ॐ

विवेकचूड़ामणिः

श्रीस्वामिशङ्कराचार्यविरचितः

श्रीस्वामिकेशवाचार्यनिर्मितया
प्रभाख्यया व्याख्यया

तथा

नारायणमुनिनिर्मितया
भाषाभावार्थदीपिकया
चालङ्कृतः

सच

मुनिमण्डलमहाविद्यालय-
संरक्षकमहोदय-
निदेशतः

श्रीगणेशीलालात्मज-लक्ष्मीनारायणेन
स्वकीये

मुद्रितः

सं. १९६७, सन् १९१०

अस्यसर्वेऽधिकारा मुनिमण्डलायत्ताः ।

Printed and published by Lakshmi Narayan
at the Lakshmi Narayan Press, Moradabad.

प्रस्तावना

विदितमेव विवेकिनां यत्सर्वे प्राणिनः सुखमनुभवितुं समीहन्ते, तदर्थं तत्साधनं जिज्ञासमाना लोकदृष्टिमनुसृत्य वित्तमेव तत्साधनं विदन्ति, यतो वित्तवन्तो जनाः सुखमनुभवन्तोऽनुभूयन्ते वित्तविहीनाश्च स्वप्नेऽपि सुखलवमलभमाना उपलभ्यन्ते, गृहक्षेत्रदारागारपुत्रमित्रादयस्तु वित्तक्रीतात्मानो नात्मनः सुखसम्पत्तौ स्वतन्त्रास्तस्माद्वित्तमेव तत्साधनं निश्चीयते । अथवा तेऽपि वित्तमेवेति मतं विशेषदर्शिनां तथा च कुप्याकुप्यभेदभिन्नं वित्तमासाद्य सुखमनुभूयते जनैरिति व्यावहारिकाः । अत्र विवेचका विमृशन्ति, सत्यमैन्द्रियिकं सुखं वित्तसाध्यमिति परन्तु सातिशयं दुःखशतकवलितं च तत्सुखं हेयमेव "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" इति योगसूत्रेण तथैवोपपादनात्, अनैन्द्रियिकं हि सुखमुपादेयं विवेकिनां तस्य दुःखलेशेनाप्यननुविद्धस्य साम्यातिशयातिशायिनोऽलौकिकत्वाल्लौकिकसुखस्य लौकिकवित्तसाध्यत्वेऽप्यलौकिकसुखस्य ब्रह्मानन्दपदाभिलप्यस्यालौकिकविवेकवित्तलभ्यत्वमुपलब्धं विवेकिभिस्तच्च सुखमात्मसुखमित्याख्यायते, ऐन्द्रियिकसुखसाधनमैन्द्रं पदमपि थूत्कृत्य कन्थाकौपीनमात्रधना महाभाग्यशालिविशालमानसा विवेकिनो विरक्ताः सन्त एव स्वमानसेऽनुभवन्तोऽनुभूयन्ते ततो नामासिद्धिरपि तदिदमलौकिकं सुखं लब्धुं दुर्लभं सुलभं मानवं जन्म तदन्यजन्मसु तदभिव्यक्तेरसम्भवात् तथा चालौकिकसुखसाधनालौकिकवित्तवितरणशीलो भगवान् भाष्यकारः शङ्कराचार्यो भाष्यादिनिबन्धविचारासमर्थानधिकारिणः समालोच्य सरलमञ्जुलानवद्यपद्यैर्विवेकप्रधानसाधनसन्तानसन्तायमानं विवेकचूडामणिनामानं निबन्धमुपनिबबन्ध, तमपि सान्वयसप्रमाणसंक्षिप्तया प्रभाख्यया व्याख्यया निराकारमीमांसाभाष्यकारो भगवान् केशवाचार्योऽलञ्चकार तदनु तमेव निबन्धं प्राकृतमतीनुपचिकीर्षुः प्रकाशानन्दस्वामिसहायो नारायणमुनिः प्राकृतव्याख्यया भाषाभावार्थदीपिकया दीपयांचकार, स चायं निबन्धः सर्वथा सर्वेषामुपकाराय विरच्यमानो मुनिमण्डलमहाविद्यालयसंरक्षकमहोदयनिदेशेन मया स्वकीययन्त्रालये मुद्रितो विजेष्यते नराभिरभ्यर्थ्यते भगवतः ।

गणेशलालात्मजो लक्ष्मीनारायणो—

मुरादाबादवास्तव्यः,

१—इदं दैवं वित्तमित्याचक्षते वेदविदः ।

हरिः ओम्

विवेकचूडामणिः

प्राकृतसंस्कृतटीकासहितः ।

नित्यं' विज्ञानमानन्दं पूर्णं प्रत्यक्तयाऽर्पितम् ॥
श्रुत्यन्तैः शाम्भवं भक्त्या वन्दे विग्रहमद्भुतम् ॥ १ ॥
व्याख्यातायेन वेदान्ता व्यासवाचोविवृण्वता ॥
व्यश्रामन्नद्वये शुद्धे स सेव्यः शंकरोबुधैः ॥ २ ॥
जगत्प्राणोऽप्राणः सततसुखरूपोजगति ना,
न कोपीति ख्यातिं प्रथयदमलां येन च विना ॥
विपन्नानामेकं शरणमिह यन्नाम किलतं,
प्रसन्नास्यं वन्दे नतसुरतरुं नानकगुरुम् ॥ ३ ॥
विस्पष्टार्थोप्ययं ग्रन्थोमन्दबुद्ध्यनुकम्पया ॥
व्याख्यायते समासेन[2] प्रतिशब्दं स्फुटोक्तिभिः ॥ ४ ॥
विवेकचूडामणिनामधेयः श्रुत्यन्तसारार्थसुबोधमेयः ॥
प्रच्यावितोर्थात्क्वचिदुज्झितोयं व्याख्यातृभिः कैश्चिदतोयतेहम् ॥

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ॥
गोविन्दं परमानन्दं सद्गुरुं प्रणतोस्म्यहम् ॥ १ ॥

एकएव नित्यशुद्धबुद्धमुक्तस्वभावोजीवेश्वरजगद्भेदावभासविनिर्मुक्तः कूटस्थोनित्योनिर्विकल्पोनिराकारोनिराधारः सच्चिदानन्दमात्रमूर्तिः स्वरूपप्रतिष्ठोऽसंभाव्यस्वेतरसत्त्वसम्भवः प्रत्यगभि-

१ यस्यनानकस्य नाम यन्नाम । २ संक्षेपेण । ३ असम्भाव्यः स्वेतरस्य सत्त्वसम्भवोयस्मिन्सः ।

न्नः परमेश्वरोऽस्तीत्येषसर्ववेदान्तानां तात्पर्यविषयोऽर्थोन्यायैर्निर्विवादं गृहीतः सन् स्वरूपावस्थानलक्षणपरमपुरुषार्थाय कल्पते। सच वेदान्ततात्पर्यार्थःप्राक् तत्तात्पर्याभिज्ञाचार्योपदेशात्स्वाश्रयविषयानाद्यविद्यया भूयोविक्षेपदक्षयातमोरूपयापिहितइत्यगृहीतः सन निःसारैरेव जीवेश्वरजगदाकारैर्विकारप्रायैर्विक्षिप्तइति स्वेनैव स्वतोऽन्यथा गृह्यते यावदस्याचार्योपदेशानिमित्तेन सम्यग्ग्रहणेनाग्रहणान्यथाग्रहणे न निवर्तेयातां तावदयमगृहीतात्मयाथात्म्योऽन्यथागृहीतात्मा दुःखोदर्कैरेव जायापत्यवित्तादिसाधनैर्दुःखं जिहासन् सुखं च लब्धुंकामयमानोमनोवाक्कायैः प्रयतमानोधर्माधर्मावुपचिन्वानो नानायोनिसंचारभ्रममनुवोभूयमानोनिजेच्छानुरूपं फलमलभमानोमोमुह्यमानमतिः कामकर्माधीनगतिरुपरिष्टाद् ब्रह्मभुवनपर्यन्तेऽधस्ताच्चावीचिपर्यवसाने संसारान्धकूपे घटीयन्त्रमिव हा कष्टमित्यजस्रं बंभ्रमीति। एतस्यानर्थव्रातविषवल्लीवितानस्याग्रहणान्यथाग्रहणात्मिकाऽविद्यैव बीजं, तस्याअत्यन्तासत्त्वनिश्चयात्मा बाधएव दाहः सच सम्यक्स्वस्वरूपग्रहाश्रयाशोन्मेषमात्रं प्रतीक्षते। तच्च वेदान्तारणितात्पर्यालोचनमन्थनमपेक्षते, तच्चाचार्योपदिष्टयुक्तिमतामेव सिद्ध्यतीत्याचार्येण वेदान्ततात्पर्यालोचनोपयुक्तायुक्तयोयावच्छिष्यसन्तोषमुपदेष्टव्यास्ताश्च नित्यशुद्धबुद्धतादिविशेषणोपलक्षितेऽखण्डे वेदान्ततात्पर्यं व्यवस्थापयता प्रस्थानेषु तत्र तत्र तेनोपदिष्टास्तथापि प्रस्थानावगाहनश्रममसहमानास्तद्युक्तिसिद्धमर्थं प्रतिपित्समानामन्दधियोमुमुक्षवस्तदर्थप्रतिपत्सितत्फलानुभवोपयोगिकर्तव्यविशेषोपदेशेन संसारान्धकूपादुद्धर्तव्याइति तदर्थं विवेकचूडामणिनामकं "शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम्" आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः" इतिलक्षणलाक्षितं सर्ववेदान्तसारसंग्रहरूपं प्रकरणमारभमाणो भगवान् भाष्यकारः श्रोतृसुखावबोधार्थं विचारयोग्यं वस्तुस्वरूपमुपस्थापयन् विघ्नोपशमादिसमर्थं शिष्टाचारप्रमाणकं परापरदेवताप्रणामलक्षणं मङ्गलं साक्षादाचरन्नर्थात्स्वाचारेण शिष्यसंन्तानं शिक्षयञ्छ्रोतृ

१ आश्रयमश्नातीत्याश्रयाशोवह्निः । २ समूहम् ।

प्रवृत्तिनिमित्तमनुबन्धचतुष्टयं सूचयति सर्ववेदान्तेत्यादिना ।

तं गोविन्दमहं प्रणतोस्मीति संबन्धः । तथा च तं "यतोवाइमानि भूतानि जायन्ते" इत्येवं जातीयकैर्वाक्यैः कार्यलिङ्गकानुमानेन च सामान्यतः प्रसिद्धं प्रधानादिसाधर्म्येणानवधारितस्वरूपविशेषं गोविन्दं "गोभिरेव यतोवेद्योगोविन्दः समुदाहृतः" इतिस्मरणाद्गोभिः 'सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दोब्रह्मेति व्यजानात्' इत्यादिभिः स्वरूपविशेषसमर्पणपरैर्वाक्यैरनन्यसाधारणरूपतयोपलभ्यमानं तत्पदार्थं शुद्धं परमेश्वरं । अहं "योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" इत्यादिवाक्यैरवगम्यमानः शुद्धस्त्वंपदार्थःसाक्षी प्रणतः प्रकर्षेण जीवेश्वरजगद्भेदाभिमानव्यपोहेन तदात्मतयोपगतः । अस्मि । भवामीति महावाक्यार्थः पर्यवसन्नः । अत्रायं संग्रहश्लोकः ॥ ' यथा पयोधिं प्रणताः प्रवाहाः पयोधिरेवाशु भवन्ति सर्वे ॥ तथा तदर्थं प्रणतास्त्वमर्थास्तदर्थएवाशु भवन्ति सर्वे " इति । एतेन क्रियाकारकफलविलक्षणः । प्रत्यगभिन्नः परमेश्वरएव वेदान्तानां विषयइति ध्वनितम् । नन्वा 'म्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इतिजैमिनिन्यायेन वेदान्तानामप्याम्नायत्वाविशेषात् क्रियापरत्वमेव युक्तमन्यथातेषामानर्थक्यं प्रसज्येत । तेषामाक्रियार्थत्वेपि कर्त्रादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वमेष्टव्यम् । तावता तत्सार्थक्योपपत्तेः।साङ्ख्यादयस्तु प्रधानादीन्यनुमिमानास्तत्परतयैव वेदान्तवाक्यानि योजयन्ति तथाच कथं क्रियाकारकफलविलक्षणःप्रत्यगाभिन्नःपरमेश्वरएव वेदान्तानां विषयइत्याक्षेपप्रतिक्षेपाभिप्रायेणविशिनष्टि।सर्ववेदान्तेति। सर्वेषां वेदान्तानामुपनिषच्छब्दवाच्यानामर्थान्तरपरत्वेन सन्दिह्यमानानां सिद्धोऽ"थातोब्रह्मजिज्ञासे" त्यारभ्या "नावृत्तिः शब्दादि" त्यन्तैर्वैयासिकैर्न्यायैर्निष्पन्नोऽन्तस्तात्पर्यावसानं तस्य गोचरं विषयं विश्रामभूमिमित्यर्थः। 'आम्नायस्येति ' न्यायस्तुकर्मकाण्डाभिप्रायोऽन्यथा धर्मविचारेणैव ब्रह्मविचारस्य गतार्थत्वाच्छारीरकमीमांसाऽनारम्भः प्रसज्येत, प्रधानादीनां त्वप्रामाणिकत्वेन स्वरूपलाभोपि दुर्लभः, कुतस्तत्र वेदान्ततात्पर्यावधारणप्रत्याशा ननु प्रत्यक्षा-

दिभिर्नृपादित्ययोरिव तत्त्वमर्थयोर्भेदप्रतीतेः कथं यथोक्तविषयसिद्धिरिति चेत्तत्राह अगोचरमिति । उपनिषदतिरिक्तप्रमाणाविषयं । यथा 'नावेदविन्मनुते तं बृहन्त' मिति श्रुतिर्वेदातिरिक्तप्रमाणाविषयत्वं शुद्धात्मनोऽवगमयति तथा 'तन्त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतिरुपनिषदातिरिक्तवेदभागोपि न साक्षाच्छुद्धात्मगोचरइत्यवबोधयति। 'सर्वे वेदायत्पदमामनन्ति' इति श्रुतिस्तु साक्षात्प्रणाड्या च सर्वेषां वेदानां तत्र पर्यवसानं दर्शयतीति व्यवस्थाऽऽस्थीयते। 'यतोवाचोनिवर्तन्ते' इति श्रुतिस्तु शक्तिवृत्तिनिवृत्तिपरा।अपि च ययोर्भेदः प्रत्यक्षादिभिः प्रतीयते न तयोरभेदोवेदान्तैः प्रमाप्यते ययोस्त्वभेदोवेदान्तैः प्रमाप्यते न तयोर्भेदः प्रत्यक्षादिभिः प्रतीयते धर्मिप्रतियोगिप्रतीत्यधीनत्वाद्भेदप्रतीतेः।शुद्धस्यचधर्मित्वप्रतियोगित्वाभावात् विशिष्टयोस्तत्त्वंपदार्थयोः सत्येव भेदधर्मिप्रतियोगिभावेऽभ्युपगम्यते भेदः । तत्रास्तु प्रत्यक्षादीनां भेदप्रत्यायकत्वम् । वस्तुतस्तु तत्राविद्यैव भेदप्रतीतौ पटीयसीति कृतं प्रत्यक्षादिभिस्तत्पादोपजीविभिः प्रमाणाभासैः।शुद्धयोस्तत्त्वंपदार्थयोर्भेदस्यैवाभावात् कुतोधर्मिप्रतियोगिभावः कुतस्तरां तु तत्प्रतीत्यधीनप्रतीतिकस्य तद्भेदस्य प्रत्यायकत्वं प्रत्यक्षादीनाम्। दूरोत्सारितद्वित्वस्यापि शुद्धैकवस्तुनस्तत्पदलक्ष्यत्वत्वंपदलक्ष्यत्वधर्मद्वयारोपादेव द्वित्वव्यपदेशः।वस्तुतस्तु'अयमात्मा ब्रह्म'अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यम्'अशब्दमस्पर्शमरूपमव्ययं तथारसंनित्यमगन्धवच्चयत्'देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेषधर्मः' अणीयान् ह्यतर्क्यमणुप्रमाणात्' अप्रमेयमनादिं च हेतुदृष्टान्तवर्जितम्' अन्यत्र धर्मादन्यत्राधर्मात्'सएषनेति नेत्यात्मा' अस्थूलमनण्वह्रस्वमदीर्घम् ।'नान्यदतोस्ति विज्ञातृ'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति सभूमा'तत्त्वमसि'सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्'

१ ननुतत्त्वंपदार्थयोरीतिद्विवचननिर्देशोऽनुपपन्नस्तत्त्वंपदार्थैक्यादतआह दूरेत्यादि ।

इत्यादिश्रुतिप्रसिद्धं प्रत्यक्षाद्यगोचरं स्वतःसिद्धं शुद्धैकत्वमेवावगम्यते तत्रैव तदाश्रिताविद्योत्सारिणां सर्वेषां वेदान्तानां परिनिष्ठा[1]यूपादित्ययोस्तु भेदस्य प्रत्यक्षसिद्धत्वाद्गौणं तादात्म्यंतत्राभ्युपगतम्।तथा च शुद्धतत्त्वंपदार्थैक्यस्य वेदान्तैरेवावगम्यमानत्वात्तस्यानन्यसाधारणलक्षणलक्षितत्वं तद्विषयत्वं सिद्धम् । विषयस्य वेदान्तैरवगम्यमानत्वादेव तेन तेषा[3]मयोगव्यवच्छेदलक्षणः प्रतिपाद्यप्रतिपादकभावः सम्बन्धोपि सुबोधः । ननु स्वेष्टविषयाजन्यत्वेन सुखेतरच्छुद्धं, तत्पदार्थं स्वतादात्म्येन वेदान्तैरुपगच्छतस्त्वम्पदार्थस्यात्मानात्मभेदप्रमनिदानाविद्यातत्कार्यसर्वानर्थनिवृत्तौसत्यांसुखस्याप्यविद्याकार्यान्तःपातित्वेन निवृत्तिरेव स्यात् कारणनिवृत्त्या निःशेषकार्यनिवृत्तेरावश्यकत्वात् तथाच दुःखनिवृत्त्यपेक्षया सुखस्याभीष्टतरत्वात् पूर्वसुखनिवृत्तिमपूर्वसुखानवाप्तिं च फलांशे दुस्तार्किकसभाप्रवेशापत्तिं च प्रेक्षमाणस्य सुखार्थिनोवेदान्तेषु प्रवृत्तिर्न स्यात्स्याच्च स्वल्पदुःखाधिकसुखस्वर्गादिसाधनेषु यज्ञादिषु प्रवृत्तिस्तस्येत्याशङ्कापरिहारपरं विशेषणान्तरं समुच्चिनोति परमानन्दमिति । नित्यनिरतिशयसुखस्वरूपम् । 'एषोऽस्य परमानन्दः' इत्यादिश्रुतेः । न हि यथोक्तविशेषणादीश्वरादन्यत्र प्रयुज्यमानः सुखशब्दः सार्थकतामालम्बते । येन तस्य सुखेतरत्वं भवेत् 'योवै भूमा तत्सुखं नाल्पे सुखमस्ति' इति श्रुतिर्हि परमेश्वरस्यैवामृतस्य सुखशब्दार्हत्वं तदन्यस्याविद्यान्तःपातिनोमर्त्यस्य तदनर्हत्वं च दर्शयति, सचैकरूपोपि चित्तप्रसादोत्कर्षापकर्षप्रयुक्तोत्कर्षापकर्षः सन्नाब्रह्मस्तम्बपर्यन्तैः सर्वैः प्राणिभिरुपजीव्यते 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इतिश्रुतेः । सएषच 'सैषाऽऽनन्दस्य मीमांसा भवति' इत्यारभ्य 'सएकोब्रह्मणआनन्दः श्रोत्रियस्य चाकामहतस्य' इत्यन्तेन ग्रन्थेन पूर्वपूर्वापेक्षयोतरत्रोतरत्रशतगुणोत्कर्षो[2]ब्रह्मवल्ल्यां व्युत्पादितः । 'रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति 'कोह्येवान्यात्कः प्राण्याद्यदेषआकाशआनन्दोन स्यादेषह्येवानन्द[4]याति' इतिश्रुतिः । परमे-

१ सादृश्यगुणयोगनिमित्तमित्यर्थः । २ विपर्येण शुद्धेनब्रह्मणा । ३ वेदान्तानाम् । ४ आनन्दयतीत्यर्थः दैर्घ्यंछान्दसम् ॥

श्वरादन्यस्य वैरस्यं व्यञ्जयन्ती तत्प्राप्तस्यैवानन्दिव्यपदेशार्हत्वं सर्वासां चेष्टानां तत्प्रयुक्तत्वं तस्यैव निखिलजगदानन्दप्रयोजकत्वं च दर्शयति। ब्रह्मजिज्ञासुश्च भृगुः 'यतोवा इमानि भूतानि जायन्ते' इत्यादिना वरुणोपदिष्टं सर्वभूतोत्पत्तिस्थितिलयाधारत्वं ब्रह्मणोलक्षणम् 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिना सर्वमनात्मानमतिक्रम्यानन्दमात्रे संयोज्य 'आनन्दो-ब्रह्मेति व्यजानात्' इत्याविज्ञातं प्रत्यगानन्दस्वरूपमेव परमेश्वरं विज्ञाय वीतजिज्ञासोबभूव'तदेतत् प्रेयः पुत्रात् प्रेयोवित्तात्प्रेयोऽ-न्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा'इति श्रुत्या निरतिशयप्रीतिविषयत्वेन निरतिशयसुखस्वरूपं सर्वान्तरं पारमेश्वरमेव तत्त्वमवगम्यते।'आत्मनस्तु कामाय सर्वम्प्रियं भवति'इति श्रुतिश्चयत्सम्पर्कादप्रियमपि सर्वं प्रियं भवति,तस्याद्वितीयात्मनो'मा न भूवं हि भूयासमि'ति परमप्रेमास्पदत्वेन परमानन्दरूपतायां किन्नु वक्तव्यमिति स्वाशयं स्फुटयति। एवं सत्यज्ञानाद्वयानन्दघनोपि जीवेश्वरजगत्कल्पनातीतोपि परमेश्वरः स्वमेव स्वाविद्यया पिधाय तस्याविषयत्वेनाश्रयत्वेन च तत्पदार्थस्त्वंपदार्थश्चेत्यखण्डैकरसोपि सन् द्विधा व्यपदिश्यते।सचैवं त्वंपदार्थीभूतः पञ्चकोशातीतोपि तदाकारेण परिणतामविद्यामेवात्मत्वेन गृहीत्वा ततोभिन्नं तद्विपयं निष्प्रपञ्चं निरतिशयसुखैकरूपमात्मानमपि तत्पदार्थं स्वतोभिन्नतयाऽऽकाशादिभूतभौतिकोच्चावचप्रपञ्चतया सुखेतरतयाऽनात्मतया च मन्यमानस्तदुपगतेः स्वसुखविनाशमाशंकमानोनिःशेषानर्थनिवृत्तिनित्यनिरतिशयसुखाभिव्यञ्जकेषु वेदान्तश्रवणादिष्वप्रयतमानोयज्ञादिरूपेण परिणतायामुत्पातनिपातफलायां कन्दुकक्रीडायामिवाविद्यायां बाहुल्येन प्रवर्तमानोनिकृष्टकामाक्रुष्टचेताः काम्यप्राप्तौ कृतार्थोऽस्मीत्यभिनन्दन्नहमिदं ममेदमिति प्रलपन्प्राप्तेपि लज्जावसरे स्वाविद्यामहिमानं ख्यापयन्नविलज्जते। तमेवं वृत्तं परमेश्वरं स्वाविद्याकर्दमे निमग्नं महागजमिव ततः समुद्धृत्याखण्डैकरसे मनोगिरामगोचरे सच्चिदानन्दस्वरूपस्वाराज्येऽभिषेचयितुं कोनाम समर्थः स्यादृते तत्त्वमस्यादिमहावाक्येभ्यः।

१ श्रुतिश्चेतिमात्रकेनान्वितामिदम् ।

कोनाम च तेषामधिकारी तर्हि न स्याद्यदि सएव मन्दभाग्यो न भवेदिति विवेकादिसाधनसम्पन्नोमहाभाग्यएव वेदान्तानामधिकारी। प्रयोजनं च निःशेषानर्थनिदानाविद्याऽत्यन्तासत्त्वाभिव्यक्तिपूर्वकसत्यज्ञानाद्वयानन्दघनस्वरूपावस्थितिरूपा मुक्तिरेवेति परमानन्दमिति विशेषणेनाधिकारिप्रयोजने सूचिते।अस्य च ग्रन्थस्य वेदान्तानां प्रकरणत्वात्तदीयैरेवानुबन्धैस्तद्वत्ताऽवगन्तव्या। ननु"सत्प्रामाण्यंवचोग्राह्यं प्रेक्षावद्भिरि"ति स्थितेः वेदान्तानां प्रामाण्येप्यसाधारणं कारणं किंचिद्वक्तव्यमन्यथा प्रेक्षावतां तत्रानादरः स्यान्न ह्यसत्प्रामाण्यं वाक्यं कश्चिदाद्रियते प्रेक्षावानिति चेत्र परमाप्तपरमेश्वरोद्गारत्वेनाप्रामाण्यकारणाभावमेव कारणं तत्रावेहीत्यभिप्रायेण तत्पदार्थस्यैव स्वाविद्यैकदेशविशुद्धसत्त्वोपाधिप्रयुक्तसर्वज्ञत्वादिद्योतकं विशेषणान्तरमुपादत्ते सद्गुरुमिति । सतां श्रेष्ठतया प्रसिद्धानां धर्मज्ञानोपदेशसम्प्रदायप्रवर्तकानां हिरण्यगर्भादीनां गुरुं गुह्यगम्भीरार्थस्य वेदस्योपदेष्टारमित्यर्थः।"योब्रह्माणं विदधाति पूर्वं योवै वेदांश्च प्रहिणोति तस्मै" तेने ब्रह्महृदा यआदिकवये मुह्यन्ति यत्सूरयः'पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इत्यादिश्रुतिस्मृतिन्यायेभ्योऽयमर्थोऽवगम्यते । तथाच यस्मादन्यैरचिन्त्यरचनः सर्वार्थावद्योती सर्वोत्पत्तिनिमित्तभूतःसर्वव्यवस्थानियामकःसंसारसागरनिमग्नजन्तूद्धारतत्परः पुरुषार्थतदुपायप्रदीपः सर्वज्ञकल्पः शाखाप्रशाखाभेदैरपरिमितविस्तरऋगादिभेदभिन्नःसर्वभूतनमस्योमन्त्रब्राह्मणात्मा वेदः पुरुषान्निःश्वासइवानायासेन यथापूर्वं प्रतिसर्गं प्रादुरस्ति तस्य महतोभूतस्य वेदयोनेः सर्वज्ञत्वे सर्वशक्तित्वेऽचिन्त्यमहत्त्वे निरतिशयकारुणिकत्वे परमगुरुत्वे च न किंचिद्वक्तव्यमस्ति विशुद्धसत्त्वं द्वारीकृत्य सर्वाधिष्ठानस्वरूपचैतन्येन सर्वावभासके तस्मिन्नेषां धर्माणां नैसर्गिकत्वादतएव। 'स्वाविद्योपाधिसापेक्षासर्वज्ञत्वादिकल्पना। साऽस्त्यविद्ये परेशुद्धे सर्वथापि न युज्यते'इति संगृह्यते।नापिस्वानन्दपरितृप्ते तस्मिन्नप्रामाण्यहेतवोऽज्ञानभ्रान्तिप्रमादविप्रलिप्साकरणापाटवाख्याः पौरुषेयदोषास्ते सम्भवन्तियैःपौरुषेयस्य वाक्यस्य प्रामाण्यं प्रतिबध्यते।अन्यथेश्वर-

स्वभावविलोपादयो दोषाः प्रसज्येरन्। तस्मान्निर्दोषेश्वरमादुर्भूतत्वेनाप्रामाण्यकारणाभावादेव वेदप्रामाण्यं स्वतःसिद्धमिति परदेवताप्रणामपक्षे व्याख्यानम्। अपरदेवताप्रणामपक्षे तु 'यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मनः॥' इति श्रुतिमनुसृत्य परदेवताभक्तिरिवापरदेवताभक्तिरपि विद्याप्राप्त्यावन्तरङ्गं साधनमिति सूचयन् साक्षात्स्वाचार्यं प्रणमति॥ तमिति। भारतवर्षे यतिराजशिरोमणित्वेन प्रसिद्धं। गोविन्दमिति 'गौडगोविन्दशङ्कराः' इत्युक्तेः कलिकालेऽनवधृततात्पर्यत्वेन विलुप्तप्रायान्वेदान्तान्दुरासादश्रीगौडपादप्रसादमासाद्याविन्दतेत्यन्वर्थनामानं श्रीगोविन्दभगवत्पूज्यपादं । सर्ववेदान्तेति। सर्ववेदान्तसिद्धान्तोयथोक्तलक्षणोगोचरः करामलकवदपरोक्षीभूतोविषयोयस्य सतथोक्तस्तं सर्ववेदान्तसिद्धान्ताभिज्ञत्वेन शिष्यनिःशेषसंशयशङ्कूत्पाटनपटीयांसं श्रोत्रियवरीयांसम्।अगोचरमिति।'यथास्थितमिदं यस्य व्यवहारवतोपि च। अस्तं गतं स्थितं व्योमसजीवन्मुक्तउच्यते'इति वासिष्ठोक्तेर्ब्रह्मविज्ञानास्तमितत्वान्न विद्यते गोचरः प्रत्यक्षादिविषयोदृश्यप्रपञ्चोयस्य सतथोक्तस्तं सदासमाधिनिष्ठत्वेनादृष्टाज्ञानतत्कार्यानिष्ठं ब्रह्मनिष्ठवरिष्ठं।परमानन्दमिति।परमोनित्यनिरतिशयआनन्दः सुखापरपर्यायः स्वरूपभूतोयस्य सतथोक्तस्तमाविर्भूतनिजानन्दमपरोक्षीकृतविज्ञानफलं। सद्गुरुमिति। सतां स्वोपदिष्टसन्मार्गावलम्बिनामस्मदादीनां गुरुं गुह्यवेदान्ततात्पर्यस्योपदेष्टारम्।अहम्।तत्प्रसादपात्रीभूतस्तत्कृतोपकारं स्मरन्। प्रणतः। प्रकर्षेणमनोवाक्कायव्यापारेण प्रह्वीभूतोस्मीत्यर्थः। एतेन 'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ'न नरेणावरेणप्रोक्तएषसुविज्ञेयोवहुधा चिन्त्यमानः। तद्विज्ञानार्थं सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'एवमेवेह आचार्यवान् पुरुषोवेद' श्रुतंह्येव मे भगवद्दृशेभ्यः' आचार्याद्धैव विद्याविदिता साधिष्ठं प्रापयाति'इत्यादिश्रुतिभ्योविशिष्टाचार्यप्रसादासादितविद्यैव निःशेषानर्थनिवृत्तिपरमसुखावहेत्यवगमात्स्वस्य विशिष्टाचार्यसम्बन्धसंकीर्तनेन स्वविद्यायाः परमोत्कर्षसूचनात्स्वमामा-

ण्यं समार्थितम् । तच्च स्वोपदिष्टे तत्त्वे श्रोतॄणां विश्वासदार्ढ्योपयुज्यते तद्दार्ढ्येनैव हि संसारान्धकूपात्समुद्धृतो भवत्यधिकारिजन्तुरिति संक्षेपः ॥ १ ॥

सर्ववेदान्तसिद्धान्तगोचरम् । तम् । अगोचरम् । गोविन्दम् । परमानन्दम् । सद्गुरुम् । प्रणतः । अस्मि । अहम् ॥ १ ॥

जो सर्ववेदान्तोंके तात्पर्यका विषय है मनवाणीका अविषय है वेदके अन्तवाक्यों करके प्राप्त होवे है परम आनन्द स्वरूप है जो ब्रह्मादि श्रेष्ठोंका गुरु है । तिस परमात्मा परब्रह्मको मैं प्रणाम करता हूं ॥ १ ॥ अथवा सर्व वेदान्तोंके तात्पर्यका विषय मन वाणीका अविषय परमानन्द रूप परमात्माका स्वरूप जो हमारे सद्गुरुजी गोविन्दानन्द सरस्वती हैं तिनको मैं प्रणाम करता हूं ॥

इस श्लोकसे जीवब्रह्मकी एकतारूप विषय अनर्थनिवृत्ति परमानन्दकी प्राप्तिरूप प्रयोजन साधनचतुष्टयसंपन्न अधिकारी और प्रतिपाद्य प्रतिपादकभाव सम्बन्ध इस ग्रन्थ का सूचन किया है ॥ १ ॥

जन्तूनां नरजन्मदुर्लभमतः पुंस्त्वं ततोविप्रता।
तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् ॥
आत्मानात्मविवेचनं स्वनुभवोब्रह्मात्मना संस्थिति-
र्मुक्तिर्नोशतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥२॥

जन्तूनां खलु लाभोद्विविधोदृश्यते सुलभोदुर्लभश्च तत्र प्राणभृन्मात्रलभ्यः सुलभः सहि विषयभोगलाभः । आश्रृगालशूकरमामहीन्द्रमहेन्द्रञ्च सुप्रसिद्धः सर्वस्य प्राणभृतोजगन्मण्डले । सच क्षणिकत्वबहनर्थप्रदत्त्वादिना फल्गुलाभ इत्युच्यते । निष्कामनिरभिमानपुरुषानुष्ठितपुण्यपुञ्जप्राप्याविवेकविज्ञानलभ्योनिर्दुःखनिरातिशयसुखलाभस्तु दुर्लभः । सच ब्रह्मात्मनावस्थानलक्षणः ।

परमलाभइत्युच्यते सर्वदा विनाशवैधुर्यादनर्थमूलनिवर्हकत्वाच्च तस्य । तथाचातिफल्गुविषयभोगलाभार्थं मृगाइव मानुषं देहं भ्रमयन्तोमरुमरीचिसलिललाभार्थं परमदुर्लभलाभचर्चायां च महाघोराविद्यानिद्रायां निद्राणाः प्रमादपरम्परामावहन्तोमूढामोह-निद्रायाउत्थाप्याः करुणया निष्कारणयाऽऽचार्येण दयावशंवदेन 'प्रोवाच तां तत्त्वतोब्रह्मविद्याम्' इतिश्रुतेः इति मनसि निधाय दुर्लभब्रह्माभेदाभिव्यक्तिलाभोपायतदुपायपरम्परामपि तथा दुर्लभामुपदिशामीत्यालोच्य किमत्र दुर्लभं लब्धव्यं नरेण वरेण भगवन्निति पृच्छन्तं सविनयं विनेयमुपादिशत्यकारणकरुणालयो-भगवत्पादोजन्तूनामित्यादिना ॥

जन्तूनां जनिपरम्पराप्रवाहे पतितानां प्राणप्रधानपिण्डपुष्टि-तत्पराणां जीवानां नरजन्म मानुषं जन्म मनुष्यदेहइति यावत् । तिर्यगादिसुलभजन्मापेक्षया दुर्लभमनेकपुण्यप्राप्यत्वाद्बहुविधसा-मर्थ्योपेतत्वाच्च तस्येति भावः 'पुरुषे त्वाविस्तरात्मा' इतिश्रुतेः 'दुर्लभोमानुषोदेहोदेहिनां क्षणभङ्गुरः' इति जनकोक्तेश्च । तत्रा-पि 'न स्त्रीस्वातन्त्र्यमर्हति' इति स्मृतेर्नारीदेहस्य पराधीनत्वादिना मन्दत्वप्रसिद्धेः पुंस्त्वं मनुष्यपुंसोदेहोमहादुर्लभः । तत्रापि 'नावेदवि-न्मनुते तं बृहन्तम्' इति वेदाद्विप्रता अधीतवेदाद्विजाग्र्यता दुर्लभा । 'वेदाध्ययनाद्भवेद्विप्रः' इत्युक्तेः । अधीतवेदस्यापि धर्ममार्गमवमत्य प्रवर्तमानस्य जीवनलुब्धस्य न प्रशस्ततेत्याह वैदिकधर्मेत्यादि । वेदतात्पर्यानभिज्ञस्य सकामं धर्ममार्गमनुतिष्ठतोवि प्रस्थापिनाति-श्रेष्ठ्यमित्याह चिद्रत्वमिति । मानसशोधनादिद्वाराकर्मकाण्डस्या-पि ब्रह्मात्मविद्योदये तात्पर्यमन्यथा कुञ्जरस्नानमिव कर्मानुष्ठा-नम्भवेदिति वेदतात्पर्यविदः श्रेष्ठ्यम् । एवं विदितेपि तात्पर्येऽवि-

१ मरुमरीचिसलिललाभार्थम्मृगाइवेत्यन्वयः । २ भागवतैकादशस्कन्धे नव योगीश्वरजनकसंवादे । ३ तिरस्कृत्य । ४ यथा हि कुञ्जरः स्नानेन स्वल्पं रजोविधूयानन्तरं ततोधिकं रजः प्रक्षिपति स्वदेहे तथा यागेन मानवभोगमपहाय दैवभोगावाप्त्यामहाऽऽसक्तिप्रसक्तिरितिभावः ॥

वेचितजडचेतनोविदुषां संसदि मूढइव न विवेकिपरिषदि महत्त्वमालम्ब्यतेऽतआह । आत्मानात्मेति । सत्यपि विवेके द्वितीयबोधे युद्धावद्वैतानुभवानुदये नोत्तमता ततआह स्वनुभवइति । द्वैतदृष्टिलक्षणदुरनुभवापवादेन शोभनोऽनुभवः स्वनुभवः अद्वैतात्मानुभवः सच सर्वेभ्योपि गरीयान् दुर्लभतमस्तल्लभ्या ब्रह्मात्मनाऽवस्थितिलक्षणामुक्तिस्तु जन्मपरम्परासम्पादितासंख्यसुकृतैर्निष्कामतया कृतैः पुण्यैः प्राप्या महादुर्लभतमा सैव जीवेन प्राप्या प्रयत्नतः 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतेः । तथाच नरजन्म सुलभं दुर्लभं लब्ध्वा दुर्लभामुक्तिर्लब्धव्या अन्यथा 'नचेदिहावेदीन्महती विनष्टि' रिति श्रुतेर्महाहानिः स्यात्तस्यालाभे तु 'इह चेदवेदीदथ सत्यमस्ति' इति श्रुतेर्यथार्थलाभेन मानुषं जन्म सफलं भवेदिति भावः ॥ २ ॥

जन्तूनाम् । नरजन्म । दुर्लभम् । अतः । पुंस्त्वम् । ततः । विप्रता । तस्माद् । वैदिकधर्ममार्गपरता । विद्वत्त्वम् । अस्मात् । परम् । आत्मानात्मविवेचनम् । स्वनुभवः । ब्रह्मात्मना । संस्थितिः । मुक्तिः । नो । शतजन्मकोटिसुकृतैः । पुण्यैः । विना । लभ्यते ॥ २ ॥

जीवोंको मनुष्यका जन्म दुर्लभ है उससे भी पुरुषका देह दुर्लभहै उससे भी वेदोंका अर्थसहित पठन दुर्लभहै उससे भी वेदोक्त धर्ममार्ग में तत्पर होना दुर्लभ है उससे भी परे विद्वान्होना दुर्लभ है उससे भी आत्मा अनात्माका विवेक दुर्लभ है उससे भी अपरोक्ष आत्माका साक्षात्कार दुर्लभहै उससे भी ब्रह्मके संग अभेद होकर स्थितिरूप ब्रह्मनिष्ठा दुर्लभ है ऐसी मुक्ति अनन्तजन्मों के सुकृतनिष्कामपुण्यों विनो नहीं प्राप्त होवे है ॥

---

१ स्वप्रयत्नमन्तरामाप्तम् । २ अनेकपुण्यप्राप्यम् । ३ मुक्त्यलाभे ॥

इस श्लोकमें सर्व दुर्लभपदार्थों का अवधिरूप होनेसे मुक्तिके लाभ में उद्यम करना आवश्यक है और मायिक तुच्छपदार्थ जो प्रारब्धवशसे विनायत्नही प्राप्त होते हैं उन में उद्यम करना निष्फलहै यह भावार्थ सूचन कियाहै ॥२॥

दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम् ॥
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः॥ ३ ॥

सर्वानपि दुर्लभांस्त्रिष्वन्तर्भाव्य व्याचष्टे दुर्लभमिति। दुर्लभत्वे हेतुगर्भितं विशेषणमुपादत्ते।देवानुग्रहेति देवस्य भगवतोऽनुग्रहस्य प्रसादस्य दुर्लभत्वेन तल्लभ्यमेतत् त्रयं मनुष्यत्वं मानुषदेहसंसर्गः मुमुक्षुत्वं मोक्षोमे भूयादित्याशीः।महापुरुषसंश्रयश्च।महान् कामादिभिरक्षुभितमानसः पुरुषोमहापुरुषः निष्कामोब्रह्मनिष्ठइत्यर्थः'श्रोत्रियस्य चाकामहतस्ये'ति श्रुतेः तस्य संश्रयः सागरादुद्धीर्षोः कर्णधारस्येवावलम्बः यद्वा 'वेदाऽहमेतं पुरुषं महान्तम्'इति श्रुतेः महापुरुषोमहामहिमा परोदेवस्तस्य संश्रयस्तन्निष्ठः॥ 'श्रोत्रियं ब्रह्मनिष्ठ'मिति श्रुतेः ब्रह्मनिष्ठोपि विद्वान् दुर्लभः।यदा हि मनुष्यत्वमुमुक्षुत्वे दुर्लभे तदा किमु वक्तव्यं ब्रह्मनिष्ठस्य दुर्लभत्वे तथाच मनुष्यत्वादित्रयं निःश्रेयसलक्षणदुर्लभलाभोपाय भूतं सुदृढं दुर्लभमिति भावः ॥ ३ ॥

दुर्लभम् । त्रयम् । एव । एतद् । देवानुग्रहहेतुकम् । मनुष्यत्वम् । मुमुक्षुत्वम् । महापुरुषसंश्रयः ॥ ३ ॥

यह तीन ही दुर्लभहैं ईश्वरकी कृपासे मिलतेहैं मनुष्यदेह मोक्षकी इच्छा ब्रह्मनिष्ठ विद्वान्का सत्संग ॥

इस श्लोक का भावार्थ यहहै मनुष्यजन्म मोक्षकी इच्छा और ब्रह्मज्ञानीका सत्संग ऐसी पूर्ण सामग्री मिलनेपर मोक्ष के उपायमें तत्पर होना उचितहै ॥ ३ ॥

लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं,
तत्रापि पुंस्त्वंश्रुतिपारदर्शनम् ॥

यस्त्वात्ममुक्तौ न यतेत मूढधीः,
सह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ॥ ४ ॥

नन्ववगतं व्याससमासाभ्यान्दुर्लभं वस्तु ततः किन्तत्राह लब्ध्वेति दुर्लभं नरजन्म तत्रापि पुंस्त्वविशिष्टं श्रुतिपारस्य वेदान्तस्य दर्शनं विचारचातुर्यम् लब्ध्वा प्राप्यापि योमूढधीः मोहावृतसत्त्वः प्रमादीति यावत् ततएव आत्ममुक्तौ ब्रह्मात्मभावविषये न यतेत सपुंनामा असति देहादावात्मग्रहात् देहात्मज्ञानवञ्चनात् स्वमात्मानं विनिहन्ति देहादिविविक्तं सन्तमप्यसन्तं मन्यमानोन जानाति तेनात्महेति शब्दभागी भवति सएव महापापिष्ठ इति भावः। 'असुर्यानाम ते लोका अन्धेन तमसावृताः तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनोजनाः' इति श्रुतेरिति बोध्यम् ॥ ४ ॥

लब्ध्वा। कथंचित्। नरजन्म। दुर्लभं। तत्रापि। पुंस्त्वं। श्रुतिपारदर्शनं। यः। तु। आत्ममुक्तौ। न। यतेत। मूढधीः। सः। हि। आत्महा। स्वं। विनिहन्ति। असद्ग्रहात् ॥ ४ ॥

विस्तारसंक्षेपसे दुर्लभवस्तु को ज्ञान होनपर क्या कर्तव्यहै इस आकांक्षा को शान्त करे हैं ॥

जो विवेकरहित प्रमादीपुरुष दुर्लभ मनुष्यजन्मको किसी पुण्यसमूहसे प्राप्तहोके तिसमेंभी पुरुषकाशरीर वेदशास्त्रके पठन पाठनका अधिकारीहो ब्रह्मस्वरूप मुक्तिके लिये यत्न नहीं करता सो पुरुष ही आत्मघाती मिथ्यावस्तुके ग्रहण करनेसे अपनेको नाश करताहै अर्थात् अनेक नीच दुःखहेतु योनि की प्राप्तिके लिये उद्यम करता है ॥ ४ ॥

इतः कोन्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति ॥
दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम् ॥५॥

नन्वात्मज्ञानविकलानामपि देहादिपोषणार्थं नानाकलाकुशला-

नां कुशलताविस्तानां कथं मूढशब्दव्यवहार्यता किन्तु विक्षिप्तचेताव्यावहारिकविज्ञानसमर्थोमूढइत्युच्यते तत्राह इतः कोन्वस्तीति॥

उदरंभरित्वकौशल्यं हि कृमिदंशादिसाधारणं न मूढशब्दं विरुणद्धि शुकपिकादीनामपिपिचेण्डपोषणार्थमनेकविधचातुर्यदर्शनात् किन्तु स्वार्थमोक्षकौशल्यमेव वास्तवं कौशल्यं तदभावेऽन्यकौशल्यं तु न मौढ्येन विरुध्यते तथाचायमेव मूढात्मा मूढमनाः योदुर्लभं मानुषं देहं तत्रापि पौरुषं पुंसामर्थ्यम्प्राप्य स्वार्थे मोक्षे प्रमाद्यति साधनोद्योगे तत्परोन भवति इतोनान्यः काश्चिदपि मूढमनाः विक्षिप्तचेतास्त्वसमर्थोन स्वतोमूढइति भावः ॥५॥

इतः कः नु अस्ति मूढात्मा यः तु स्वार्थे प्रमाद्यति दुर्लभं मानुषं देहं प्राप्य तत्र अपि पौरुषम् ॥ ५ ॥

शंका-लोकमें देहादिके पालन में और अनेक प्रकारके धनसम्पादन में तत्पर बहुत बुद्धिमान् पुरुषहैं उनको मूढ़ कहना बनता नहीं ॥

उत्तर।जो पुरुष सर्वसेउत्तम दुर्लभ मनुष्यका शरीर तिसमें भी परमपुरुषार्थ स्वरूपमुक्तिके योग्य देहको प्राप्तहैकि फिर मुक्ति की प्राप्ति में प्रमाद करताहै अर्थात् पशुकेतुल्य विषय भोगता है तिससे अधिक मूढपुरुष "कौन है" अर्थात् कोई नहीं ॥५॥

वदन्तु शास्त्राणि यजन्तु देवान्,
कुर्वन्तु कर्माणि भजन्तु देवताः ॥
आत्मैक्यबोधेन विनापि मुक्ति,
र्नसिध्यति ब्रह्मशतान्तरेऽपि ॥६॥

नन्वात्मैक्यबोधपराङ्मुखाअपि कर्ममीमांसकाः कर्मभिर्लभ्यं दुर्लभं मनुष्याणां, दुःखासंभिन्नंस्वर्गसुखममृतं मन्यमानानिरातिशयं, प्रवर्तमानाश्च यावज्जीवं वैदिकेषु कर्मसु यज्ञादिषु, दुर्लभमाजः

१ प्रसिद्धानाम् । २ उदर ॥

स्वान्मन्यन्ते, तथाच ते ऋग्वेदादिशास्त्राणि पठन्तोवैदिकेभ्योयज्ञे· तिकर्तव्यतां चोपदिशन्तः पाठयन्तश्च, तानि यथाविध्युपसन्नान- धिकारिणोज्योतिष्टोमाद्यश्वमेधान्ततत्तत्कर्मसु वेदवर्णितवर्णाश्रम- वयोवस्थाद्यधिकारिविशेषणधर्मभाजआस्तिकप्रवरावेदानां भक्ता- स्तांश्च यथासमयं समुपास्य प्रसादयन्तोविद्वांसः सुप्रसिद्धाइति- कथं तान्मूढशब्दभाजोमन्येरन्मतिमन्तस्तत्राह वदन्त्वित्यादिना

शास्त्राणि ऋग्वेदादीनि कर्मोपासनाप्रवर्तकानि यान्यपराविद्या- भिधानानि "तत्रापरा ऋग्वेदोयजुर्वेदः" इत्यारभ्य "छन्दो- ज्योतिष" मित्यन्तश्रुतेः वदन्तु गुरुमुखतोवैदिकसम्प्रदायाध्वना- पठन्तु पाठयन्तु च यथाविधि समासन्नानधिकारिणश्छात्रान्नैताव- ता शास्त्राभिप्रायाभिज्ञता तेषां भवितुमर्हति तात्पर्यलिङ्गानामु- पक्रमादीनां विचारमन्तरा शास्त्रतात्पर्यस्य निर्णेतुमशक्यत्वात्। तथादेवानिन्द्रादीन् यजन्तु चरुपुरोडाशादिना मन्त्रोच्चारणपुरःसरं समर्चन्तु, नैतावता निरतिशयसुखलाभस्तेषां भवितुमर्हति, पूज्य- देवानां तदलाभे पूजकानां तु तल्लाभाशा दूरतोनिरस्ता, याव- त्संपातश्रुतेः। 'क्षीणे पुण्ये मर्त्यलोकं विशन्ती' त्यादिस्मृतेश्च तथा 'यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करि- ष्य'न्निति श्रुतेः देवतायागोद्देश्याभजन्तु ध्यायन्तु भजधातोर्विव- क्षातोमानससेवनरूपध्याने वृत्तिः। एवमुक्तान्यनुक्तानि च कर्मा- णि दानहोमादीनि कुर्वन्तु सकामाः कर्मठाविवेकाविकलाः समनु- तिष्ठन्तु, तथापि तेषां मुक्तिरात्मैक्यसाक्षात्कारमन्तरा न सिद्ध्यति न लब्धा भवति ननु सत्यमेतन्नकर्मभिर्मुक्तिसिद्धिरिति कलावा- युषोत्यल्पत्वाद्विघ्नबाहुल्येन च निर्विघ्नसाङ्गोपाङ्गकर्मणामनिष्प त्तेर्न हि सामिकृतमकृतमिव वर्तमानं कृताकृतं कर्म किमपि फला- यतेअतएव श्रुतिरप्याह'तदेतत्सत्यं मंत्रेषु कर्माणि कवयोयान्यपश्यं- स्तानि त्रेतायां बहुधा सन्ततानी'ति तथापि यावदायुर्मुहुर्मुहुरनु- तिष्ठतश्च वैदिककर्माणिवासनानामनुवृत्त्या भृशमधिकारिज- न्मलाभादभीष्टसिद्धिराकल्पयितुं शक्यत एव, तथाचाह भगवा-

१ यावत्सम्पातमुषित्वा इत्यादितः। २ अर्द्धं।

'शुचीनां श्रीमतांगेहे योगभ्रष्टोभिजायते' इत्यादिना, ब्रह्मणो-लयेऽपि कर्मवासनानामलयात्कल्पान्तरेषु कर्मवासनया सत्क-र्मानुष्ठाने निर्विघ्ने निर्विघ्नामुक्तिर्भविष्यति, नचेदमसंभाव्यं 'अपा-मसोममसृताअभूमे' तिश्रुतेरित्याशंक्याह । ब्रह्मशतान्तरेपीति । ब्रह्मणां शतस्याभ्यन्तरे समयेपि वर्तमानानां भवतां न कर्मानुष्ठितै-र्मुक्तेर्लाभः संभाव्यः कर्मणोवहुसमयेन निष्पन्नस्यापि मुक्तिलाभेऽस-मर्थत्वात्, न हि यद्यस्य साधनेऽसमर्थं तद्दीर्घकालानुष्ठितं सत्त-स्य साधने सामर्थ्यमवलम्बतेऽन्यथा नियतसाधनसाध्यभावभङ्गप्र-संगोऽमृतत्वश्रुतेस्तात्पर्यन्तु व्यक्तीभविष्यत्युपरिष्टादित्यलम् ॥६॥

शंका । लोकमें विषयोंमें मग्न पुरुषोंको मूढ कहना बन सकताहै परन्तु पूर्वकाण्ड वेद शास्त्रके पठन पाठन में तथा तिनकर विदित यज्ञादि देवतोंकी उपासना में तत्पर पूर्व मीमांसामें कुशल बुद्धिमान् पुरुषोंको मूढ कहना बनसके नहीं काहेते यज्ञादिकों सेभी मुक्ति होवेहै ऐसा वेदमें लिखाभीहै॥

वदन्तु शास्त्राणि यजन्तु देवान् कुर्वन्तु कर्माणि भजन्तु देवताः
आत्मैक्यबोधेन विना अपि मुक्तिः न सिद्ध्यति ब्रह्मशता-
न्तरे अपि ॥ ६ ॥

उत्तर॥यज्ञादिकोंमें प्रवृत्त सकाम पुरुषोंको मूढ कहना बनसके है काहेते जो सकामकर्मों से जन्म मरण अनर्थकी प्राप्ति होवे है निष्कामकर्म और श्रवण मनन निदिध्यासन द्वाराजीव ब्रह्मकी एकता ज्ञानसे विना सौ ब्रह्माकी आयुमेंभी केवल वेदशास्त्रके पठन पाठनसे तथा इन्द्रादि देवतोंको उद्देश करके अर्थात देवयोनिकी प्राप्तिके लिये यज्ञकरे तथा वेद और स्मृतिविहित कर्म करे तथा इन्द्रादि देवतोंकी उपासना करे इनसे निश्चय करके कैवल्यमुक्ति होवै नहीं जो कर्मोंसे वेदमें मुक्ति कही है

सो दीर्घकाल स्वर्गमें स्थितिका नाम वेदसिद्धान्तमें निर्णय किया है ॥ ६ ॥

अमृतत्वस्य नाशास्ति वित्तेनेत्येव हि श्रुतिः ॥
ब्रवीति कर्मणोमुक्तेरहेतुत्वं स्फुटं यतः ॥ ७ ॥

ननु प्रतिज्ञामात्रमिदं यदात्मैक्यबोधेन विना मुक्तिर्न सिद्ध्यतीति हेतोरनुक्तेः, नच प्रतिज्ञामात्रतः साध्यं सेद्धुमर्हति अन्यथा गगनकुसुमादिकमपि सिध्येत् नच"नान्यः पन्था विद्यतेऽयनाये"ति श्रुतिरेव हेतुरिति वाच्यं तस्याःकर्मफलामृतत्वश्रुत्या सत्प्रतिपक्षितत्वान्नच प्रतिपक्षश्रुतेर्दीर्घकालस्थैर्मलक्षणमर्थान्तरं कल्प्यं, अप्रतिषेधात् कर्मणोमोक्षप्राप्तिप्रतिषेधश्रवणेत्वेवं भवेदपि तदभावान्न कल्पनैषा प्रामाणिकीत्यतआह। अमृतत्वस्येति।

यतोमृतत्वस्याबाध्यब्रह्मात्मभावस्य वित्तेन कर्मसाधनमुख्य द्रविणसाध्ययज्ञादिना आशासंभावनापि नास्ति कुतस्तेन तत्प्राप्तिरिति भावः। यदि कर्मणा मुक्तिः स्यात्तर्हि तत्प्रतिषेधोन युज्यते तस्मात्कर्मणोमुक्तिप्रतिषेधात्कर्मफलामृतत्वश्रुतेरुपचरितार्थत्वं तेन न तया सत्प्रतिपक्षतेति भावः। इदमुपलक्षणं 'नकर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' तद्यथेह कर्मचितोलोकः क्षीयत एवमेवामुत्र पुण्यचितोलोकः क्षीयत' इत्यादि श्रुतीनामिति बोध्यम्

अमृतत्वस्य न आशा अस्ति वित्तेन इति एव हि श्रुतिः
ब्रवीति कर्मणः मुक्तेः अहेतुत्वं स्फुटं यतः ॥ ७ ॥

शङ्का। अद्वैतज्ञानसे ही मुक्ति होवै है ऐसा पूर्वकथन किया है प्रमाण बिना केवल प्रतिज्ञामात्र से वस्तुकी सिद्धि होवै नहीं जेकर प्रमाण से बिना वस्तुकी सिद्धि मानो तब गगनकुसुमादि पदार्थोंकी सिद्धिभी होनी चाहिये।

उत्तर। केवल प्रतिज्ञा ही नहीं है किन्तु श्रुतिभी प्रमाण है जिस कारणसे धन स्त्री पुत्रादि पदार्थोंकरके मुक्तिकी इच्छा

१ विरुद्धत्वात्। २ स्थिति।

भी बने नहीं इस अर्थवाली श्रुति मुक्तिके प्रति कर्मको स्पष्टही कारणताका निषेध कहती है निश्चय करो वेदमें प्रसिद्ध है ॥७॥

अतोविमुक्त्यै प्रयतेत विद्वान्,
संन्यस्तवाह्यार्थसुखस्पृहः सन् ॥
सन्तं महान्तं समुपेत्य देशिकं,
तेनोपदिष्टार्थसमाहितात्मा ॥ ८ ॥

विमुक्तेर्दुर्लभलाभत्वेन तत्साधनायाप्रयतमानस्य मनुष्यस्य मूढत्वे आत्मैक्यबोधस्य तदुपायत्वे कर्मणां तदनुपायत्वे च सिद्धे सति फलितमाह। अतइति।

यतोविमुक्तिरेव दुर्लभादुर्लभश्चतदुपायोब्रह्मात्मैक्यबोधोदुर्लभलाभेनैव च मनुष्यजन्मादिसाफल्यमतोविद्वान् सुलभदुर्लभलाभविवेकनिपुणः संन्यस्तवाह्यार्थसुखस्पृहः सन् संन्यस्ता दूरतस्त्यक्ता वाह्यार्थात् शब्दादेर्जन्यस्यसुखस्य सर्वेषां प्राणभृतां सुलभस्य स्पृहाभिलाषो येन सतथा अन्तर्मुखः सन्नित्यर्थः 'वाह्यस्पर्शेष्वसक्तात्मे' तिस्मृतेः सन्तं सदाचारप्रचारचतुरं महान्तं महाशयं ब्रह्मनिष्ठमिति यावत्। देशिकं ब्रह्मविद्यावित्तावितरणोदारम् समुपेत्य विधिवत्समासाद्य तेनोपदिष्टार्थसमाहितात्मा तेन निर्निमित्तकारुणिकेन उपदिष्टे आवेदिते अर्थे परमपुरुषार्थेऽद्वैतात्मनि समाहितः स्थिरीकृतआत्मामनोयेन तथाभूतश्च सन् विमुक्त्यै अविद्यावन्धविध्वंसनपुरःसरं ब्रह्मानन्दलाभाय तत्साधने ब्रह्मात्मैक्यबोधे यतेत न प्रमाद्येतेत्यर्थः ॥ ८ ॥

अतः विमुक्त्यै प्रयतेत विद्वान् संन्यस्तवाह्यार्थसुखस्पृहः सन् सन्तं महान्तं समुपेत्य देशिकं तेन उपदिष्टार्थसमाहितात्मा ॥ ८ ॥

जिसहेतुसे दुर्लभ वस्तुकी प्राप्तिसे मनुष्यजन्म सफल

१ विनायत्नं प्राप्तविषयभोगाः।

होवै अन्यथा पशुजन्मवत् निष्फल है इस वास्ते उत्तम बुद्धिमान् पुरुष बाह्यविषयसे उत्पन्नहुये सुखकी इच्छाको त्यागकर और श्रेष्ठ महात्मा ब्रह्मश्रोत्रिय ब्रह्मनिष्ठ सद्गुरुको विधिपूर्वक प्राप्त होके गुरु करके उपदेश किया जो अर्थ उस करके समाहित मन करनेवाला बुद्धिमान् पुरुष मुक्तिके लिये यत्न करे ॥ ८ ॥

उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ ॥
योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया ॥ ९ ॥

नन्वीश्वरोगुरुश्च दयालुरिति ताभ्यामेवास्य दयापरवशाभ्यां स्वानुचरस्यभवाब्धौ पतितस्य जीवस्य मुक्तिरितिकृतं स्वयत्नेन न ह्ययतनसिद्धं साधयन्यतनतो, न मूढइति व्यवाह्रियतेऽमूढैरित्यत आह उद्धरेदिति।

संसारवारिधौ मृतिजन्मजलनिधौ मग्नं पतितं कामादिग्राहग्रस्तमात्मानं आलोमाग्रमानखाग्रं चात्रपिण्डे व्यापिनं जीवं योगारूढत्वम् 'यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते। सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते'॥ इति स्मार्तलक्षणलक्ष्यत्वम्। आसाद्य अभ्यासादिना सम्पाद्य तत उदितया सम्यग्दर्शननिष्ठया अद्वैतात्मसाक्षात्कारसम्पत्त्याऽऽत्मना विचारप्रवणचेतसा उद्धरेद्दुःखविमुक्तं साधयेदित्यर्थः "उद्धरेदात्मनात्मानं नात्मानमवसादयेत्। आत्मैव ह्यात्मनोबन्धुरात्मैव रिपुरात्मनः"॥ इति स्मृत्यर्थोऽत्रस्फोरितः यथा च नान्येन बन्धविमोचनं तथाव्यक्ती भविष्यति सदृष्टान्तं मूलएवेति ध्येयम् ॥ ९ ॥

उद्धरेत्। आत्मना। आत्मानं। मग्नं। संसारवारिधौ। योगारूढत्वम्। आसाद्य। सम्यक्दर्शननिष्ठया ॥ ९ ॥

शंका। ईश्वर और गुरु परमदयालुस्वभावसे संसाररूप समुद्रमें गिरे जीवको मुक्त करदेवेंगे जीवका अपना यत्न निष्फल है।

उत्तर। अपने यत्नसे विना दूसरा उद्धार करने वाला कोई नहीं है काहेते विना अपने यत्नसे मुक्ति होनेसे सर्व मर्यादाका भंग होताहै इस वास्ते विषयोंसे इन्द्रियसहित मन को हटाके ब्रह्ममें एकतारूप जो योगहै उसमें आरूढ होके अद्वैत ज्ञाननिष्ठाकरके संसारसमुद्रमें मग्न आत्मा को आपही उद्धार करे ॥ ९ ॥

संन्यस्य सर्वकर्माणि भवबन्धविमुक्तये ॥
यत्यतां पण्डितैर्धीरैरात्माभ्यासउपस्थितैः १०

ननु " कुर्वन्नेवेह कर्म्माणि जिजीविषेच्छतं समाः" यावज्जीवमग्निहोत्रं जुहोति"इति प्रभृतिश्रुतिवचोभिर्यावज्जीवं जीवैः कर्तव्यानि कर्माणि वैदिकानीतिविधेः "न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृदि " ।तिस्मृतेश्च कर्माविनिर्मुक्तस्य कस्याप्यनवस्थितेः कर्मविक्षिप्तचेतसश्च ब्रह्मात्मैक्यबोधोदयस्य दूरतोनिरासान्न सम्भाव्यते मुक्त्युपायोयत्र यत्नोविधेयो भवेदित्यत आह संन्यस्येति ।

आत्माभ्यासे आत्मनः शुद्धचिद्धातोः अभ्यासे श्रवणाद्यावृत्तौ " आवृत्तिरसकृदुपदेशात् " इति सूत्रात् उपस्थितैः सम्मुखैःधीरैः आब्रह्मैक्यबोधमभ्यासे निःखेदं यतमानैः पण्डितैः परोक्षात्मानात्मविवेकज्ञानकुशलैः भवबन्धविमुक्तये भवबन्धस्य जन्मप्रयोज्यकर्तृत्वाद्यनर्थस्य विमुक्तये समूलोन्मूलनाय सर्वकर्माणि सर्वाणि कर्माणि लौकिकानि वैदिकानि पुण्यान्यपुण्यानि च संन्यस्य बन्धकत्वाविज्ञानेन ततश्चेतसउपरतिं विधाय'कर्मणा बध्यते जन्तुरिति' स्मृतेश्च यत्यतां साधनसावधानं मानसं संपाद्यतामित्यर्थः। यावज्जीवादिश्रुतयस्तु जीवाभिमानिनं मलिनमानसमुद्दिश्य प्रवृत्ता इति न ताभिर्विरोधइति बोध्यम् ॥ १० ॥

संन्यस्य सर्वकर्माणि भवबन्धविमुक्तये यत्यताम् पण्डितैः धीरैः आत्माभ्यासे उपस्थितैः ॥ १० ॥

शंका । श्रुतिस्मृतिप्रमाणोंने जीवके प्रति सर्वआयुमें कर्म

विधान किये हैं केवल अद्वैतज्ञान विधान नहीं किया।

उत्तर । कर्म करने में चित्त विक्षिप्तरहे है अद्वैतके ज्ञानकी चर्चा स्वप्नमें भी बने नहीं जाग्रत्काल में क्या कहनाहै श्रुति स्मृतिने जो कर्म विधान किये हैं सो विवेकरहित मलिन बुद्धि वाले पुरुषके प्रति कियाहै इस वास्ते शुद्धब्रह्मके अभ्यास में अर्थात् वेदान्तश्रवणादि मुख्यसाधनों में सन्मुखहुवे बुद्धि-मान् आत्मा अनात्माके विवेकयुक्त बुद्धिवाले पुरुषोंने सर्व कर्मों को त्यागके संसाररूप बन्धनसे मुक्तिके लिये तत्परहोके यत्न करना उचितहै ॥ १० ॥

चित्तस्य शुद्धये कर्म नतु वस्तूपलब्धये ॥
वस्तुसिद्धिर्विचारेण न किञ्चित्कर्मकोटिभिः ॥ ११ ॥

पूर्वं दुर्लभं नरजन्मादिकं लब्ध्वात्ममुक्तावप्रयतमानस्य मूढबुद्धेः स्वार्थे प्रमाद्यतःसद्यात्महा स्वं विनिहन्त्य सद्ग्रहादितःकोन्योस्तिमूढात्मेति चात्मघातित्वं मुख्यमूढशब्दाभिधेयत्वं चाभिधायात्मैक्य बोधेन विनापि मुक्तिर्न सिद्ध्यतीत्यनेन केवलैरेवकर्मभिर्मुक्तिं मन्यमानानां मनोरथं भङ्क्त्वा'ऽमृतत्वस्य नाशास्ति वित्तेने' ति वित्तसाध्यकर्मणोमुक्तेरहेतुत्ववचनेन ज्ञानसमुच्चितानामेव कर्मणां मुक्तिहेतुत्वमाशासानानां दुराशामपनीय यतोमुक्त्यर्थमप्रयतमानस्यात्मघातित्वादिकर्मणां चमुक्त्यहेतुत्वं ज्ञानसमुच्चितानामप्यतो-निःसारं कर्म तत्फलं च संसारंविद्वान्निरस्तसमस्तविषयसुखस्पृहो निर्विण्णचेतामुक्तिहेत्वात्मैक्यबोधार्थमाचार्यमुपगम्य तदुपदिष्टार्थ-समर्पितबुद्धिः सन्मुक्त्यै कर्मातिरिक्तं प्रयत्नं कुर्यादिति प्रयत्नोपदेशेन।'स्वभावतोबद्धस्य स्वभावतोमुक्ति'रिति स्वभाववादमर्थादपोद्य ततोयोगारूढत्वसम्पत्तिफलभूतसर्वकर्मसंन्यासापरपर्यायशमैकसाधनसम्यग्दर्शननिष्ठयैव केवलयात्मोद्धारवचनेन कर्मसमुच्चितेनैव ज्ञानेन मुक्तिरिति मतमुपमृद्य ततश्च यथा मुक्तिं प्रति केव-

लानां ज्ञानसमुच्चितानां च कर्मणां कर्मसमुच्चितस्य च ज्ञानस्याहेतुत्वं तथा तदभिव्यञ्जकज्ञाननिष्ठां प्रत्यप्यहेतुत्वं युक्तं तद्धेतुभूत विचारापरपर्यायपुरुषप्रयत्नाङ्गत्वेन सर्वकर्मसंन्यासस्यैव तद्धेतुत्वादित्यवगमितं "सन्न्यस्य सर्वकर्माणी" त्येवं ब्रुवताचार्येण सम्प्रति 'तमेतं वेदानुवचनेन ब्राह्मणाविविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'तिश्रुत्या वेदानुवचनादिकर्मणां ज्ञाननिष्ठापरपर्यायवेदनहेतुभावोऽवगम्यते रथेन जिगमिषतीत्युक्त्या गतिहेतुतारथस्य यथा ततश्च वेदनार्थिनः कर्मसन्न्यासोन युज्यते हेतुसन्न्यासेन हेत्वन्तराभावेन च वेदनानुत्पत्तिप्रसङ्गाच्चासमीक्ष्यकारित्वप्रसङ्गादपि न हि यस्य यत्साधनं तदर्थी तद्विहायान्यथाप्रयतमानः समीक्ष्यकारीति सम्मतं प्रेक्षावतामकाम्यकर्मविधानानर्थक्यप्रसङ्गाच्च न ह्यकाम्यकर्मणां वेदनादन्यत्र फलसंयोगमलभमानानां वेदनार्थिनाननुष्ठाने विधानमर्थवद्भवति यावज्जीवादिश्रुतेश्च'यावज्जीवमग्निहोत्रं जुहोति कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा'इत्येवं जातीयकाश्रुतिः कर्मानुष्ठानेनैवसर्वायुषः'समाप्तिं दर्शयति वीरहत्यापत्तेश्च'वीरहा वा एषदेवानां योऽग्निमुद्वासयते'इति श्रुतिरग्निसंबन्धिकर्मसंन्यासिनोवीरहत्यापत्तिं श्रावयतिसन्न्यासवादास्तु कर्मानधिकृतविषयाविद्वत्सन्न्यासाभिप्राया वा द्रष्टव्याइत्याक्षेपं प्रतिक्षिपन्सत्वशुद्ध्येकफलं कर्म न ज्ञानमात्रेऽपि समर्थमात्मयाथात्म्यानुभूतिस्तु विचारैकसाध्येत्यवगमयति चित्तस्येत्यादिना ।

कर्म निष्कामनिरभिमानजनानुष्ठितं मुक्तिविज्ञानहेतुत्वेन वाद्यभिमतं श्रौतं स्मार्तं च सर्वं चित्तस्य अद्वितीयात्मतत्त्वाश्रयविषयानाद्यविद्याविक्षेपशक्तिपरिणामापञ्चीकृतपञ्चभूतसाधारणसत्वांशसमारब्धस्यागन्तुकेन रजसातिचाञ्चल्यजुषस्तमसाच कलुषीकृतस्य विविधविषयभोगवासनोपचितस्य तद्वशादेव सर्वदा विषयचिन्तनलम्पटस्य सर्वविक्षेपनिक्षेपनिकेतस्यैहिकामुष्मिकभोगवैराग्योदयानुदयनिर्ज्ञातशुद्ध्यशुद्धिकस्य कामसंकल्पविचिकित्सादिवृत्तिमतोऽन्तःकरणस्य शुद्धये मोक्षमार्गोपसर्गमलमार्जनेन

१ मुक्ति । २ ज्ञाननिष्ठा । २ कर्मत्यागेन । ३ विघ्न ।

संसारमार्गविच्छेदहेतुविवेकादिसाधनसम्पत्तियोग्यनिर्मलीभावाय समर्थमिष्यते, शास्त्रतात्पर्याभिज्ञैरिति शेषस्तथा च शास्त्रं, 'योगिनः कर्मकुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये' कषायपक्तिः कर्माणीत्यादि । एतेनाकाम्यकर्मविधानानर्थक्यप्रसङ्गः परिहृतः । एवं च सति 'तावत्कर्माणि कुर्वीत न निर्विद्येत यावते'ति स्मरणाद्यावत्सत्वशुद्धिसूचकनिर्वेदोदयमेव कर्मानुष्ठेयं ततऊर्ध्वं तु "यदहरेव विरजेत्तदहरेव प्रव्रजेदि'तिश्रुतेः सर्वविक्षेपोपशमसमर्थः सर्वकर्मसन्न्यासएव कर्तव्यइत्यवगमाद्वर्णाश्रमवयोभिमानी कामकलुषितबुद्धिरेव यावज्जीवादिश्रुतिविषयइति न विस्मर्तव्यं । 'वीरहानग्निकोगृही'त्युक्तेरुत्सन्नाग्निगृहस्थएव वीरहत्यापत्तिपात्रं । कर्मानधिकृतविषयाः सन्न्यासवादाइत्यपि मनोरथमात्रमथ पुनरव्रती व्रती वा स्नातकोऽस्नातकोवोत्सन्नाग्निरनग्निकोवा इत्यादिना कर्मानधिकृतानां पृथक्सन्न्यासविधानादित्यवसीयते ॥ ननु तमेतमिति श्रुत्यवगतवेदनहेतुभावं कर्मात्मानुभवार्थमपि समर्थमिष्यतामसमर्थस्याहेतुत्वादिति चेन्नेत्याह नत्विति वस्तूपलब्धये वस्तुनः सामान्यतः प्रतिपन्नस्य विशेषतश्चाप्रतिपन्नस्य बुभुत्सितयाथात्म्यस्यात्मानात्मसाधारणपदार्थमात्रस्य उपलब्धये सर्वथाऽज्ञानसंशयविपर्यासनिरासक्षमानुभूतये तु पुनर्न कर्म समर्थमिष्यते कर्मणोऽप्रमाणत्वेन ज्ञानमात्रेप्यसमर्थत्वात्कुतस्तस्य यथोक्तविशिष्टानुभूतौ सामर्थ्यसम्भावनापीति, न युज्यतेतरां साक्षाद्वेदनहेतुता यज्ञादेरिति भावः । विविदिषन्तीत्यत्र तु प्रकृतिप्रत्ययार्थयोर्मध्ये प्रत्ययार्थस्यैव प्राधान्यमिति न्यायेन सन् प्रत्ययार्थवेदनेच्छां प्रत्येव यज्ञादेर्हेतुतावगतिरेतदेवाकाम्यकर्मणः परमं फलं यत्सत्वशुद्ध्या वेदनावसानविविदिषोत्पत्तिर्नातः परं तत्फलमन्वेष्टव्यं । यद्यपीच्छायाविषयसौन्दर्यज्ञानाधीनत्वात्'ज्ञात्वा देवं सर्वपाशापहानिः' ज्ञात्वा शिवं शान्तिमत्यन्तमेति'तरति शोकमात्मविद्'ब्रह्मविदाप्नोति परं'ब्रह्म वेद ब्रह्मैव भवती'त्येवमादिवाक्यशतैर्वेदनसौन्दर्यश्रवणेनैव विविदिषोपजायते न सास्योत्पत्तौ

१ मनोरथमात्रमितिसम्बन्धः । २ मोक्षसुखहेतुत्वमत्रसौन्दर्यम्

कर्मापेक्षते तथापि 'महापातकिनां नृणां ज्ञानयज्ञोन रोचते। प्रत्युत ज्ञानयज्ञस्तु प्रद्वेष्योभासते स्वत' इति स्मरणात्पापोपप्लुतचित्तेभ्यः श्रूयमाणमपि वेदनसौन्दर्यं पित्तोपहतरसनेभ्योमाधुर्यमिव नैव रोचतेतरामतएवाद्वैतकथयोद्विजन्तोदृश्यन्ते बहवोचोदिनस्तच्चारुच्युत्पादकं पापवृन्दमौषधेन पित्तमिव यज्ञादिनापनुद्यते 'धर्मेण पापमपनुदती'ति श्रुतेस्ततश्च विविदिषाप्रतिबन्धिदुरितापनोदद्वारा यज्ञादेर्विविदिषाहेतुतेति तस्यैं सत्यशुद्धिहेतुतैव पर्यवसितेति प्रत्ययार्थप्राधान्यपक्षः प्रकृत्यर्थप्राधान्यपक्षे तु सत्वशुद्धिद्वारैव यज्ञादेर्वेदनहेतुतेति सन्तोष्टव्यं रथस्त्वक्रियात्माक्रियात्मानं गतिं प्रतिसमर्थत्वेन हेतुरितिदृष्टान्तवैषम्यं । विस्तरस्तु सर्वापेक्षाधिकरणभाष्यादिषु द्रष्टव्यः। एतेन सर्वोपि पूर्वपक्षः प्रत्याख्यातप्रायोऽवगन्तव्यः। ननुकर्मणोऽप्रमाणत्वेन ज्ञानमात्रेप्य समर्थत्वात्प्रमाणस्य चानुभूतिमात्रे समर्थस्यापि सर्वथाऽज्ञानादिनिवृत्त्यदर्शनेन विशिष्टानुभूतावसमर्थत्वान्निर्हेतुककार्योत्पत्त्यदर्शनाच्च विशिष्टानुभूतिःकेन हेतुना सिद्ध्यतीतिचेत्तत्राहवस्तुसिद्धिरिति।विचारेण सन्दिग्धवस्तुयाथात्म्यनिर्णयार्थकन्यायपरामर्शेन याथात्त्वानिर्णयं क्रियमाणेनहेतुना वस्तुसिद्धिः वस्तुनोयथोक्तलक्षणस्य सिद्धिर्यथोक्तलक्षणोपलब्धिर्जायते इतिशेषः एतेन वेदनानुत्पत्तिप्रसङ्गः प्रत्युक्तः यद्यपि 'मानाधीनामेयसिद्धि'र्विचारस्तु पुरुषापराधविनिवृत्तिफलः सकलो विचार' इति। वेदविदुक्तेः संशयविपर्यासनिरासहेतुरितिराद्धान्तस्तथापि विचारेण वस्तुसिद्धिरिति ब्रुवतोविचारेणैव हि वस्तुव्यवस्थितिस्तदभावेतद्व्यवस्थितिरिति सर्वोपि प्रमाणप्रमेयलक्ष्यलक्षणनियमनिर्वाहोविचाराधीनएवेत्याशयोलक्ष्यते स्वतः प्रामाण्यव्यवहारस्यापि विचार एव प्रयोजकोविचारविहीनेषु तथा विधव्यवहारादर्शनादेतदेव हि मीमांसाशास्त्रारम्भोऽभिव्यनक्ति न हि विना विचारं धर्मोवा ब्रह्मवान्यद्वाकिञ्चित्सिद्ध्यति सिद्ध्यद्वाभिमेतफलाय कल्पते अज्ञातसन्दिग्धविपर्य-

१ रुच्यर्थानांप्रीयमाणइतिचतुर्थी। २ द्वैतवल्लभाः। ३ निष्कामयज्ञादेः। ४ क्रियास्वरूपम्॥

स्तवस्तूनां पुरुषार्थानुपयोगित्वादन्यथा तदनारम्भएव प्रसज्येत सचानिष्टः सर्वेषां मनुस्तु वेदार्थतत्त्वज्ञचूडामणिः 'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते सधर्मं वेदनेतर' इतिधर्म्मविज्ञानं विचाराधीनमेव स्मरतिस्म श्रुतिश्चा 'त्मा वाअरे द्रष्टव्यः श्रोतव्योमन्तव्य' इत्यात्मसाक्षात्कारमुद्दिश्य श्रवणमननापरपर्यायं विचारमेव महता ऽऽदरेण विधत्ते तस्मात्सुष्ठूक्तं विचारेण वस्तुसिद्धिरिति तथाच विचारएव विशिष्टानुभूतावेकोनिःशेषं तमोभिभूय भुवनावभासे भास्वानिव समर्थोहेतुः प्रमाणं च तत्प्रयोजकापातज्ञाने वस्तुमात्रावद्योते तारावृन्दमिव समर्थं कर्म तु पवनादिस्पन्दनामिव नतत्रापीत्युक्तं भवति । ननु यथैका तारका तमिस्रासु स्थवीयः पदार्थाल्पीयः प्रकाशेऽसमर्थापि तत्समूहस्तत्र समर्थोदृश्यते तथा विचारप्रयोजकापातज्ञानं प्रत्येकं कर्मासमर्थमपि कर्मकलापस्तत्र समर्थः स्यात्स्याच्च तदुत्पादद्वारा तस्य विचारहेतुतापीति चेन्नेत्याह न किञ्चिदिति । कर्मकोटिभिः कर्मणां श्रौतानां स्मार्तानां च सर्वेषां कोटिभिर्भूयोभूयोऽनुष्ठानेन तदाख्यबहुसंख्याभिः किञ्चिल्लौकिकं वैदिकं वाऽऽपातज्ञानमपि न सिद्ध्यति न ह्यसमर्थसमूहेनापि समर्थसाध्यं कार्यं किञ्चित्प्रसिद्ध्यति यदुदाहरणं स्यात्तारका तु स्वयंप्रकाशमाना स्वानुरूपप्रकाशोत्पादसमर्थेति तत्समूहस्य तत्र तथात्वं युक्तमन्यथेङ्गालशतकोटिभिस्तमोमात्राभिभूयेत, तत्र स्थविष्ठपदार्थालिपष्ठप्रकाशश्चाभिव्यज्येत न साभिभूयते न सोऽभिव्यज्यते च तस्मादसमर्थसमूहस्याप्यसमर्थत्वान्नकर्मकलापस्याऽऽपातज्ञानं प्रति सामर्थ्यं कुतस्तदुत्पादद्वारा विचारं प्रतिहेतुत्वसम्भावनापि, साक्षात्तस्य तद्धेतुता तु 'वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेद्' तमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' सन्न्यस्य श्रवणं कुर्यादि' त्येवं जातीयकैर्वाक्यैः शमदमाद्युपबृंहितसर्वकर्मसंन्यासस्यैव विचाराङ्ग-

१ ब्रह्मात्मैक्यानुभवे इत्यर्थः । २ आपातज्ञानेपि । ३ तमिस्रातामसीरात्रिरित्यमरः । ४ ज्ञानंमतीतिछेदः । ५ तमोलेशइत्यर्थः । ६ यथैकोऽन्धोदर्शनेऽसमर्थस्तत्समुदायः शतमपीति महाभाष्योक्तेः ॥

त्वावगमाद्दूरोत्सारिता ॥ कर्मविक्षिप्तबुद्धेस्तु विचारस्यैवासम्भवात्कुतस्तस्य विशिष्टानुभूतिः, आश्रमान्तरनिष्ठस्य ज्ञाननिष्ठाभ्युपगमे तु सन्न्यासपूर्वको जन्मान्तरीयविचारस्तत्रहेतुरभ्युपगन्तव्य इत्यविरोधः । एतेन सन्न्यासवादास्तु विद्वत्सन्न्यासाभिप्रायाइति निरस्तं तथाच 'कर्मणैवहि धीशुद्धिः शुद्धबुद्धेर्जिहासुता । जिहासोरेव सन्न्यासः सन्न्यस्येव विचारभाक् ॥ १ ॥ विचारेणैव विज्ञानं विज्ञस्यैव विमुक्तता । विमुक्तस्य पुनर्बन्धोनेतिशास्त्रार्थ संग्रहः ॥ २ ॥' एवं च सति कस्यासमीक्ष्यकारित्वमिति प्रष्टव्योदेवानां प्रियइति सिद्धम् ॥ ११ ॥

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ॥ वस्तुसिद्धिः विचारेण न किञ्चित् कर्मकोटिभिः ॥ ११ ॥

कर्मोंसे ही आत्माका बोध प्राप्त होसके है विचारकी कुछ आवश्यकता नहीं इस शंकाका उत्तर कहेहैं ।

यज्ञादिकर्म चित्तकी शुद्धिके हेतुहै पुनःवस्तुके ज्ञानके हेतु नहीं है विचारकरके वस्तुका ज्ञान होवै है क्रोडकर्म करने से लेशमात्र भी ज्ञान नहीं होवै है ॥ ११ ॥

सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा ॥
भ्रान्तोदितमहासर्पभयदुःखविनाशिनी ॥ १२ ॥

ननु विचारस्यापि क्व स्वरूपसाक्षात्कारे हेतुताऽवगता तत्राह सम्यग्विचारतइति ।

भ्रान्तोदितमहासर्पभयदुःखविनाशिनी भ्रान्तेषूदितानि महान्ति सर्पहेतुकभयदुःखानि विनाशयितुं शीलं यस्याः सा निर्भयसुखप्रदा रज्जुतत्त्वावधारणा रज्जुविशेषस्वरूपविनिश्चितिः साक्षात्कृतिः सम्यग्विचारतो विचारसहितनिर्दोषनयनादिप्रमाणतःसिद्धा लब्धात्मभावा सर्वैः सुखैरनुभूयते इतिशेषः तथाच तथैव ब्रह्मविज्ञानसिद्धावपि विचारेणैव भवितव्यमिति भावः ॥ १२ ॥

१ तद्धेतुतेति पूर्वेणान्वयः ॥

सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा ॥ भ्रान्तोदितमहासर्पभयदुःखविनाशिनी ॥ १२ ॥

विचारकोंभी वस्तुके साक्षात्कारमें कारणता कहां देखी है ऐसी आकांक्षा होनेपर कहे हैं सम्यग्विचारतइति ॥

भ्रान्त पुरुषों में सर्प भ्रमसे उदयहुये महाभय महा दुःखों को विनाश करनहारा निर्भय सुखदेन हारा रज्जुके वास्तव स्वरूप का विशेप निश्चय निर्दोष नेत्रादि प्रमाणजन्य विचार से सिद्धहोवै है इसीप्रकार ब्रह्मके स्वरूपज्ञानमें भी निर्दोष वेदप्रमाणजनित विचारही हेतुहै अन्य नहीं ॥ १२ ॥

अर्थस्य निश्चयोदृष्टोविचारेण हितोक्तितः ॥
न स्नानेन न दानेन प्राणायामशतेन वा ॥ १३ ॥

उक्तमर्थमुपसंहरति। अर्थस्येति।

हितोक्तितः हिताऽनर्थनिवर्हनिवर्हणकरी या सदुक्तिस्तस्या विचारेण गुरूपदिष्टवाक्यार्थमननेनार्थस्य लौकिकस्येव परमार्थस्य परमात्मनोनिश्चयोऽसन्दिग्धसाक्षात्कारोदृष्टोऽनुभूतोविचक्षणैःस्नानेन तीर्थादिमज्जनेन दानेन हिरण्यभूमिगजादीनां दानपात्रे समर्पणेन प्राणायामशतेन वा योगाङ्गसाधनसमूहानुष्ठानेन च न पदार्थनिश्चयः उद्भवितुमर्हतीति भावः। नतुद्वयं निश्चयस्वरूपोदयेकर्मणोऽत्यन्तानुपयोगं ख्यापयति ॥ १३ ॥

अर्थस्य। निश्चयः। दृष्टः। विचारेण। हितोक्तितः ॥
न। स्नानेन। न। दानेन। प्राणायामशतेन। वा ॥ १३ ॥

पूर्वोक्त प्रकरणको समाप्त करे हैं। अर्थस्येति।

अनर्थ दुःखका निवारक यथार्थवक्ताके वाक्यके विचारनेसे रज्जुआदि पदार्थका निश्चय दीखता है स्नान करके नहीं होता

१ समूह।

वा दान करके नहीं होता अथवा योगके अंग प्राणायामादि क्रिया करकेभी नहीं होता किंतु विचारसे ही पदार्थका निश्चय जैसे लोकमें होताहै वैसेही ब्रह्मात्माके स्वरूपका भी गुरुके उपदेशके श्रवणानन्तर मननरूप विचारसे ही निश्चय होवैहै ॥ १३ ॥

अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः ॥
उपायादेशकालाद्याः सन्त्यस्मिन्सहकारिणः ॥ १४ ॥
अतोविचारः कर्तव्योजिज्ञासोरात्मवस्तुनः ॥
समासाद्य दयासिन्धुं गुरुं ब्रह्मविदुत्तमम् ॥ १५ ॥

नन्वात्मब्रह्मैक्यविज्ञानेऽधिकारिणस्तत्सहकारिणश्च दुर्निरूप्यत्वान्न ब्रह्मात्मैक्यज्ञानतोमुक्तिसिद्धिः नचैन्द्रियिकभोगनिर्विण्णा ग्रहणधारणसामर्थ्याद्यधिकारिविशेषणविशिष्टाजिज्ञासवः सन्ति शतसहस्रशइतिवाच्यं तेषामपि जगन्मिथ्यात्वग्रहणधारणयोश्चाकितचेतसामद्वैतात्मनिश्चयादृष्टेरतोब्रह्मात्मैक्यविचारोदुर्घटोऽतआह । अधिकारिणमिति ।

यतोविशेषतोऽसंदिग्धाऽविपर्यस्ता फलसिद्धिः विचारफलस्य साक्षात्कारस्य सिद्धिः वक्ष्यमाणलक्षणलाक्षितमधिकारिणमाशास्त इच्छति आङः शासुइच्छायामिति धातुपाठात् अपेक्षतइति यावत् देशकालाद्यानिर्जनोदेशः आसुप्तेरामृतेराच साक्षात्कारोदयात् समुद्बुद्धशुद्धपुण्यपुञ्जजन्यवैराग्योदयसमयः ताविमावाद्यौ मुख्यौ येषां ते उपायाविज्ञानोत्पादने विचारानुकूलाः सहकारिणएककार्योद्देश्यकाश्च सन्ति विद्यन्तएव नासंभवस्तेषामितिभावः। अतस्तत: यत्तच्छब्दयोर्नित्यसंबन्धात् ब्रह्मविदुत्तमं ब्रह्मश्रोत्रियं ब्रह्मनिष्ठञ्च दयासिन्धुं करुणावरुणालयं गुरुं हितोपदेष्टारमाचार्यं समासाद्य विधिवत्समुपेत्य जिज्ञासोर्ब्रह्मात्मैक्यं साक्षाद्विचकीर्षोरात्मवस्तुनआत्मामत्यक् सएव वस्तु ब्रह्म ब्रह्मात्म-

नोविचारोमननं कर्तव्यं, प्रत्यहं प्रयत्नतः संपाद्यइत्यर्थः। यद्यपि प्रथमं जिज्ञासोर्मानसं जगन्मिथ्यात्वाद्युपश्रुत्य चकितायते तथापि विचाराङ्कुरया प्रबुद्धस्य स्वप्नवज्जगन्मिथ्यात्वनिश्चयोदृढां स्थितिं निबध्नन्मनसश्शङ्कितत्तां विधुनोतिमनश्च विश्वसितिं तेनाद्वैतात्मसाक्षात्कृतौ सन्नद्धमुत्सहतइतिभावः युग्मम् ॥ १४ ॥ १५ ॥

अधिकारिणम् आशास्ते फलसिद्धिः विशेषतः॥ उपायाः देशकालाद्याः सन्ति अस्मिन् सहकारिणः ॥ १४ ॥

अब अधिकारी सहकारीकी दुर्घटता होने से ब्रह्मात्माके ज्ञान से मुक्तिसिद्धि कैसे होगी यद्यपि वैराग्यवान् अधिकारी संभवे हैं तथापि जगत्के मिथ्यापने में उनका भी चित्त चकित होताहै इसीसे अद्वैतात्माका निश्चय दुर्घटहै इस शंकाका उत्तर कहे हैं ॥

संशय विपर्ययरहित साक्षात्काररूपफलकी सिद्धि शमदमादिसाधनसंपन्न अधिकारीकी अपेक्षा करेहै इसमें निर्जनदेश ब्रह्म साक्षात्कारपर्यन्त सुषुप्ति मरणसे पूर्व सर्वही काल तथा विवेकादिसाधन सहकारी अनेक उपायहेतु भूत वर्तमानहै इस कारणसे अधिकारी आदिका संभव होनेपर ज्ञानसे मुक्ति दुर्घट नहींहै ॥ १४ ॥

अतः विचारः कर्तव्यः जिज्ञासोः आत्मवस्तुनः॥समासाद्य दयासिन्धुं गुरुं ब्रह्मविदुत्तमम् ॥ १५॥

अब विचारकर्तव्यता प्रकरणको समाप्तकरे हैं अतइति।

इस कारणसे ब्रह्मश्रोत्रिय ब्रह्मनिष्ठ करुणाके समुद्र हितोपदेष्टा आचार्यको विधिपूर्वक प्राप्तहोकर ब्रह्मात्मके साक्षात्कारकी इच्छावाले पुरुषको अपना जीवात्माही वस्तुब्रह्मरूप है ऐसा विचार निरन्तर करना उचित है यद्यपि जिज्ञासुका-

मन जगत् के मिथ्यात्व निश्चय करने में प्रथम चकित होता है तथापि गुरूपदेशके मनन करने से जगत्का मिथ्यात्व निश्चित होजाता है जैसे जाग्रत् काल में स्वप्नका प्रपंच मिथ्या निश्चित होवे है तैसे ही जानना ॥ १५ ॥

मेधावी पुरुषोविद्वानूहापोहविचक्षणः ॥
अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः॥१६॥

ननु वक्तव्योऽधिकारी सविशेषण आत्मविद्यायामतआह । मेधावीति ।

मेधावी गुरूपदिष्टपदार्थग्रहणधारणपटुः विद्वान् तथ्यमिथ्या विवेकविद्यासंपन्नः ऊहापोहविचक्षणः श्रुतिसंमतस्तर्कऊहः ऊह वितर्के इति धातुस्मरणात् श्रुतिविमततर्कापवादअपोहस्तयोर्विचक्षणः चतुरचक्रचूडामणिः पुरुषः पुर्यान्तर्नौप्राविष्टः "तत्सृष्ट्वा तदेवानु प्राविशादि" तिश्रुतेः । एतेन देवानामप्यत्राधिकारोदर्शितस्तथाच ब्रह्मसूत्रं "तदुपर्यपि वादरायणः सम्भवात्" इति ननु किं प्रत्येकमेषामधिकारिविशेषणतेति चेन्नेत्याह उक्तलक्षणलक्षितइति वक्तैरत्र श्लोकेऽभिहितैरनभिहितैश्च सर्वैरेव लक्षणैर्लक्षितः आत्मविद्यायां प्रस्तुतायामधिकारी दानपात्रमित्यर्थः ॥ १६ ॥

मेधावी । पुरुषः । विद्वान् । ऊहापोहविचक्षणः ॥ अधिकारी । आत्मविद्यायाम् । उक्तलक्षणलक्षितः॥ १६ ॥

अब विशेषणसहित अधिकारीको वर्णन करेहैं मेधावीति ।
गुरुके उपदेशको ग्रहण धारणमें चतुर सत्य असत्यका विवेक ज्ञानवान् वेदसम्मत युक्तिका ग्रहण करनेमें वेदविरुद्ध युक्तिका खण्डन करने में निपुण जो पुरुषहै सो पूर्व उक्तलक्षण समूहवाला आत्माको ब्रह्मरूपताके विचार में दानपात्रहै अर्थात् ऐसे विशेषणवाले पुरुषको ही ब्रह्मविद्याका दान देना उचित है ॥ १६ ॥

विवेकिनोविरक्तस्य शमादिगुणशालिनः॥
मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता॥१७॥

नन्ववगतआत्मविद्याधिकारी तथापि योग्योमुख्योऽधिकार्यपि वर्णनीय इत्यतआह। विवेकिनइति।

विवेकवैराग्यशमादिषट्कमुमुक्षारूपसाधनचतुष्टयवतोऽधिकारिणोजिज्ञासायोग्यता ब्रह्मनिष्ठानां मताऽभिमतेत्यर्थः विवेकादीनां लक्षणानि स्वयमेवानुपदं वर्णयिष्यतीति बोध्यम्। हि शब्दोऽधिकारिविशेषणानां विवेकादीनां वेदान्तेषु प्रसिद्धिं सूचयति अथातो ब्रह्मजिज्ञासेति सूत्रमत्र साक्षिसमर्थत इतिबोध्यम्॥ १७॥

विवेकिनः विरक्तस्य शमादिगुणशालिनः॥ मुमुक्षोः एवं हिं ब्रह्मजिज्ञासायोग्यता मता॥ १७॥

अब योग्यमुख्य अधिकारी का वर्णन करेहैं।

आत्मा अनात्मके विवेकज्ञानवान्को तथा संसारके भोगों से विरक्तको शमदमादि षट्संपत्तिसंपन्नको मोक्षकी इच्छावाले कोही ब्रह्म जिज्ञासाकी योग्यता ऋषियोंने मानी है इन साधनोंसे शून्य पुरुषको ब्रह्मजिज्ञासा कभी नहीं होती विवेकादि विशेषणवान् ही अधिकारी है ऐसा वेदान्तमें प्रसिद्धहै।।१७॥

साधनान्यत्र चत्वारि कथितानि मनीषिभिः॥
येषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति॥ १८॥

ननु विवेकादीनामधिकारिविशेषणत्वे साधनत्वानुपपत्तिरिति चेन्न तत्साधनस्यैव तदधिकारिविशेषणत्वादित्याह। साधनान्यत्रेति।

अत्र ब्रह्मविद्यायां चत्वारि चतुःसङ्ख्याकानि साधनानि पुष्कलकारणानि मनीषिभिः वेदान्तविद्भिः कथितानि उपदिष्टानि सन्ति तान्येवाधिकारिणोविशेषणानि संन्ति तस्य योग्यताअयत्वमापा-

१ जसन्तमंगत्।

दयन्तीत्यर्थः । कारणताग्राहकान्वयव्यतिरेकौ ग्राहयति । येषु सत्स्वेवेति । येषु कथितविवेकादिसाधनेषु सत्स्वेव विद्यमानेष्वेव सन्निष्ठा ब्रह्मनिष्ठा सिद्ध्यति नान्यथेत्यर्थः । एवशब्दार्थं स्वयं वर्णयति यदभाव इत्यादिना । येषां साधनानामभावे सन्निष्ठा न सिद्ध्यति नोदेतीत्यर्थः ॥ १८ ॥

साधनानि । अत्र । चत्वारि । कथितानि । मनीषिभिः ॥
येषु । सत्सु । एवासन्निष्ठा । यदभावे । न । सिद्ध्यति॥ १८ ॥

जो अधिकारीके विशेषण होते हैं सोही कर्तव्यके साधन होवेहैं सो इहां विवेकादि चतुष्टय अधिकारी के विशेषणही ज्ञानके साधनहैं ऐसा निरूपण करे हैं । साधनानीति ।

इहां ब्रह्मविद्यामें चार साधन (दृढकारण) वेदान्तवेत्ताओंने[1] उपदेशकिये हैं सो ही अधिकारीके विशेषण होकर उसकी योग्यताके सम्पादक होजाते हैं कारणताकोअन्वयव्यतिरेक ग्रहण करावेहैं सो इहांभी है जिनके होनेपरही ब्रह्मनिष्ठा होती है और जिनके न होनेपर ब्रह्मनिष्ठा नहीं सिद्ध होती सो विवेकादि साधन हैं ॥ १८ ॥

आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ॥
इहामुत्र फलभोगविरागस्तदनन्तरम् ॥
शमादिषट्कसम्पत्तिर्मुमुक्षुत्वमिति स्फुटम् ॥१९ ॥

तानि चत्वारि साधनान्यधिकारिविशेषणत्वेन सन्निष्ठाकारणत्वेन चाभिहितानि विविच्य गणयति । आदावित्यादिना ।

आदौ वैराग्योदयात्पूर्वदशायाम् एतेन वैराग्यस्य प्राथम्यं केनचिदभिहितं प्रत्याख्यातमुक्तं, विना विवेकेन वैराग्यलाभस्य दुर्लभत्वादिति भावः। नित्यानित्यवस्तुविवेकस्तथ्यमिथ्याविवेचनं परिगण्यते संख्यायते सांख्यैः तदनन्तरम् विवेकसम्पत्तेः पश्चात्

१ वेदान्ताचार्यैः ।

इहामुत्र फलभोगविरागऐहलौकिकपारलौकिककर्मफलसुखसाक्षात्कारजिहासा गण्यते इत्यर्थः। तदनन्तरञ्च शमादिषट्कसम्पत्तिः शमादीनां षण्णां समूहस्य संसिद्धिः चतुर्थन्तु मुमुक्षुत्वमिति स्फुटं निःसन्दिग्धं गण्यते इत्येतन्नाम्ना प्रसिद्धानि चत्वारि साधनानीति साधनश्लोकयोरन्वयः॥ १९॥

आदौ। नित्यानित्यवस्तुविवेकः परिगण्यते॥ इह। अमुत्र। फलभोगविरागः। तदनन्तरम्॥ शमादिषट्कसम्पत्तिः। मुमुक्षुत्वम्। इति। स्फुटम्॥ १९॥

उन चारोंको पृथक्२ करके कथन करे हैं। आदाविति।

वैराग्यके उदय होनेसे प्रथम नित्य अनित्य वस्तुका विवेचन करना रूपविवेक होवै है सो चारोंसाधनोंमें प्रथम गिनाहै तिससे पश्चात् इसलोक परलोकके सुखभोगोंसे वैराग्य दूसरा गिनतेहैं शमदमादि छै साधनोंकी सम्पत् और मोक्षकी इच्छा यह चार साधन स्पष्ट वर्णन किये हैं॥ १९॥

ब्रह्म सत्यं जगन्मिथ्येत्येवं रूपोविनिश्चयः॥
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः॥ २०॥

चतुर्णां ब्रह्मविद्यासाधनानां नामतोनिर्देशं विधाय विविच्य तेषां स्वरूपाणि प्रदर्शयति। ब्रह्मसत्यमित्यादिभिःसार्द्धैरष्टभिः।

ब्रह्म मायातत्कार्यव्यापकं चैतन्यं सत्यमविनाशि विनाशहेत्वभावात् 'अविनाशी वा अरेऽयमात्मे' ति श्रुतेः। 'नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावक' इत्यादिस्मृतेश्च जगज्जडजातं मिथ्यादृष्टनष्टस्वलक्षणमित्येवं रूपोविनिश्चयः एतच्छन्दाभिलापजयोनिःसंदिग्धः प्रत्ययः सः पूर्वं गणितश्चतुर्षु साधनेषु अयमुपदर्शितस्वरूपः नित्यानित्यवस्तुविवेक आत्मानात्मविवेचनं समुदाहृतोनिःशेषमभिहितः॥ २०॥

ब्रह्म। सत्यं। जगत्। मिथ्या। इत्येवं। रूपः। विनिश्चयः॥ सः। अयं। नित्यानित्यवस्तुविवेकः। समुदाहृतः॥ २०॥

ब्रह्मविद्याके चारों साधनोंका स्वरूप दिखायाहै अब उनका विवेकपूर्वक स्वरूप दिखाते हैं । ब्रह्मेति ।

माया और मायाके कार्यमें व्यापक चैतन्य अविनाशी है उसके नाशके हेतुको न होनेसे और जडसमूह मिथ्या (दृष्टनष्टस्वरूप) है इस प्रकारका संशय विपर्यय रहित निश्चय जो है सो यह नित्यानित्यवस्तुविवेक है ऐसा विवेक ऋषियोंने कथन किया है ॥ २० ॥

तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः ॥
देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि ॥ २१ ॥

सनिमित्तं वैराग्यस्वरूपमाचष्टे । तद्वैराग्यमिति ।

देहादिब्रह्मपर्यन्ते स्वकीयमनुष्यशरीरादिब्रह्मदेहान्ते ह्यनित्ये विनाशिन्येव भोगवस्तुनि कर्मणि घञि भोग्यपदार्थजाते दर्शनश्रवणादिभिः दोषाणामिति शेषः । आदिनानुमितिपरिग्रहः तथा च दोषाणां प्रत्यक्षागमानुमानज्ञानैः समुत्पन्ना या जिहासा प्रहाणेच्छा तद्वैराग्यमिति । विधेयवैराग्यलिङ्गापेक्षया तदिति नपुंसकनिर्देशः तथाचाह कैयटः " उद्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यत्वमापादयन्ति सर्वनामानि पर्यायेण तत्तल्लिङ्गमुपादते" इति । वस्तुतस्तु लोकलक्षणानुरोधेनेयमुक्तिः, वैराग्यस्य लक्षणं त्वेषूपदर्शितेषु भोगेषु रागस्य स्वभावप्राप्तस्य निवृत्तिरेव । अत एव दोषदृष्टेस्तत्कारणत्वमपि साधु सङ्गच्छते । गुणदृष्टेरागहेतुतया दोषदृष्टेर्गुणदृष्ट्यपवादद्वारारागसामग्रीविघटकतया वैराग्येरागनिवृत्तौ हेतुत्वस्य सुवचत्वात् । यथाश्रुते तु जिहासाया अपि त्यागरागरूपत्वेन त्यागगुणदृष्टिजन्यत्वेपि विषयदोषदृष्टिजन्यत्वे प्रमाणाभावात् । विषयेषु दोषदृष्ट्या तत्रगुणदृष्ट्यपस्थितिस्ततश्च तत्र रागानुदयस्ततश्चत्यागेच्छासमुद्भवइत्येवं परंपरया दोषदृष्टेर्जिहासाहेतु-

1 रागनिवृत्तिस्वरूपे वैराग्ये इत्यर्थः ॥

त्वकल्पने तु न मतेवैंभवकथापीति बोध्यम् । अतएव वासिष्ठे श्रीरामवचोपि सम्मतं भवति तथाहि "एवं विमृशतोब्रह्मन् सर्वेष्वेव तत्तोमम । भावेष्वरतिरायाता पथिकस्य मरुष्विवे"तीत्यलम् ॥२१॥

तद् । वैराग्यं । जिहासा । या । दर्शनश्रवणादिभिः ॥ देहादिब्रह्मपर्यन्ते । हि । अनित्ये । भोगवस्तुनि ॥ २१ ॥

अब कारणसहित वैराग्यका स्वरूप वर्णन करेहैं । तद्वैराग्यमिति ।

अपने मनुष्यशरीरसे लेकर ब्रह्माकी देह तक ही विनाशी भोगपदार्थोंमें दोषोंके दर्शन श्रवणादि करके उत्पन्न हुई जो त्यागेच्छा उसको वैराग्य कहे हैं ॥ २१ ॥

विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः ॥
स्वलक्ष्ये नियतावस्था मनसः शमउच्यते ॥२२॥

वैराग्यसंमुद्भूतं शमं लक्षयति । विरज्येत्यादिना ।

मुहुर्मुहुर्दोषदृष्ट्या विषयव्राताद्विरज्य भृशं दोषानुसन्धानजन्यवैराग्यं संपाद्य मनसः सङ्कल्पादिलक्षणस्य स्वलक्ष्ये स्वविश्रमाश्रये ब्रह्मणि "ब्रह्मतल्लक्ष्यमुच्यते" इतिश्रुतेः । नियतावस्था बाह्यतो निरोधावस्थितिः शमः उच्यते "शान्तोदान्तः" इति श्रुतौ शमधात्वर्थोऽभिधीयते ॥ २२ ॥

विरज्य । विषयव्राताद् । दोषदृष्ट्या । मुहुर्मुहुः ॥ स्वलक्ष्ये । नियतावस्था । मनसः । शमः । उच्यते ॥ २२ ॥

अब वैराग्यसे उदयहोने वाले शमका लक्षणकरेहैं विरज्येति ।

वारंवार दोषदृष्टिकरके विषयसमूहसे (इसलोक, परलोक के भोगोंसे) अतिशय दोषदृष्टिजन्य वैराग्यको सम्पादन करके

१ परंपरया विषयदोषदृष्टेर्हेतुत्वकल्पनापेक्षया त्यागगुणदृष्टेः साक्षाद्धेतुत्वकल्पनस्यैव सा धीयस्त्वादितिभावः । २ प्रणवोधनुः शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयोभवेदिति,समस्ताश्रुतिः ॥

संकल्प विकल्परूप मनकी अपनी विश्रान्तिका अधिष्ठानब्रह्ममें वाँह्यसे निरोधपूर्वक स्थितिको शम कहते हैं ॥ २२ ॥

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके ॥
उभयेषामिन्द्रियाणां सदमः परिकीर्तितः ॥
वाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा ॥ २३ ॥

उपदर्शितश्रुतिस्थदमधात्वर्थन्दमं लक्षयितुमाह । विषयेभ्य-इत्यादिना ।

उभयेषां विषयज्ञानकर्मकरणानाम् इन्द्रियाणाम् इन्द्रायात्मने हितानां विषयेभ्योभोगेभ्यः परावर्त्य वैमुख्यं विधाय स्वस्वगोलके चक्षुरादिरन्ध्रेषु स्थापनं निश्चलतयाऽवस्थितिविधिर्यः सः दमः परिकीर्तितः । उपरतिं लक्षयति वाह्यानालम्बनमिति । वृत्तेः विषयप्रकाशिकाया मनःपरिणतेः वाह्यानालम्बनं वाह्याविषयकत्वम् एषा उत्तमा वैराग्यादिसाधनसन्ततिफलभूता साक्षादात्मसाक्षात्कारहेतुः उपरतिः अभिधीयत इति शेषः ॥ २३ ॥

विषयेभ्यः । परावर्त्य । स्थापनं । स्वस्वगोलके ॥ उभयेषाम् । इन्द्रियाणां । सः । दमः । परिकीर्तितः ॥ वाह्यानालम्बनं । वृत्तेः । एषा । उपरतिः । उत्तमा ॥ २३ ॥

अब शमके साधन दमको निरूपण करे हैं । विषयेभ्यइति ।

ज्ञानेन्द्रियोंका और कर्मइन्द्रियोंका भोगोंसे विमुखकरके अपने अपने स्थानोंमें निश्चलकरना सो दम कथन कियाहै अब उपरतिका लक्षण कहते हैं ॥ वाह्येति ॥ विषयप्रकाशकवृत्तिका वाह्य अनात्मपदार्थाकार न होना यह उत्तम वैराग्यादि साधनोंका फलरूप आत्मज्ञानके सन्निहित उपराति है अर्थात् चित्त की समाहित अवस्थाको उपराति कहे हैं ॥ २३ ॥

१ शान्तोदान्तउपरतस्तितिक्षुरितिश्रुतिस्थेत्यर्थः ॥

सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ॥
चिन्ताविलापरहितं सा तितिक्षा निगद्यते ॥ २४ ॥

तितिक्षां लक्षयति । सहनमित्यादिना ।

सर्वदुःखानाम् आध्यात्मिकादिभेदभिन्नानां प्रतिकूलमत्यालम्बितानां चिन्ताविलापरहितं कथं मे नंक्ष्यन्ति दुःखानीति चिन्तया हा हतोस्म्येतैरिति विलापेन च रहितं विधुरम् अप्रतीकारपूर्वकं तन्निवृत्त्युपाये श्रमाकरणपुरःसरं सहनम् अनात्मधर्माणामेषां न मे क्षतिक्षमत्वामिति मत्वोपेक्षणं सा सत्सु वीतरागेषु प्रसिद्धा तितिक्षा निगद्यते इत्यर्थः ॥ २४ ॥

सहनं । सर्वदुःखानाम् । अप्रतीकारपूर्वकम् ॥ चिन्ताविलापरहितं । सा । तितिक्षा । निगद्यते ॥ २४ ॥

अब तितिक्षाका लक्षण कहेहैं । सहनमिति ।

आध्यात्मिक आधिभौतिक आधिदैविक प्रतिकूल बुद्धिके विषय दुःखोंका कैसे मेरे यह संकट नष्ट होवेंगे ऐसी चिन्ता और हाय मैं इन दुःखोंसे अब मूआ ऐसे विलापसे रहित उनकी निवृत्ति के उपायमें तत्पर न होना यह अनात्माके धर्म मेरी लेशमात्र भी हानि नहीं करसकते इस प्रकार उपेक्षा करनी सो वीतराग पुरुषोंमें प्रसिद्ध तितिक्षा नामसे कहँने में आवै है ॥ २४ ॥

शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम् ॥
सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ॥ २५ ॥

श्रद्धां लक्षयति । शास्त्रस्येत्यादिना ।

गुरुवाक्यस्य गुरूपदिष्टस्य शास्त्रस्य ब्रह्मात्मैक्यशासनकरणस्य वेदरहस्यवचसः सत्यबुद्ध्यवधारणम् अबाधितार्थकत्वमत्या इदमेव मे श्रेयस्करमिति निश्चयः । यया विश्वासवृत्त्या वस्तूपलभ्यते परमार्थलाभो भवति सा वृत्तिः सद्भिः श्रद्धा कथिता ॥ २५ ॥

शास्त्रस्य । गुरुवाक्यस्य । सत्यबुद्ध्यवधारणम् ॥ सा । श्रद्धा । कथिता । सद्भिः । यया । वस्तु । उपलभ्यते ॥ २५ ॥

तितिक्षाको कहकर अब श्रद्धाको कहेहैं । शास्त्रस्येति ।

गुरुका वचन और वेदान्तशास्त्रका अद्वैतवचन अर्थात् जीव ब्रह्मकी एकता का बोधक वचन जिसकरके स्वस्वरूपका ज्ञानहोवै तिस वचनको यथार्थ अर्थका बोधकहै इस बुद्धिकरके निश्चयकरे जिस करके सत्आत्मवस्तुकी प्राप्ति होतीहै उस को श्रेष्ठ महात्माओंने श्रद्धा कथन कियाहै ॥ २५ ॥

सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ॥
तत्समाधानमित्युक्तं न तु चित्तस्य लालनम् ॥ २६ ॥

समाधानस्य लक्षणमाह । सर्वदेति ।

बुद्धेः निश्चयवृत्तेः सर्वदा कालत्रयेपि शुद्धे रागादिमलविकले ब्रह्मणि सर्वदा स्थापनम् आहारविहारादिष्वपि तत्परत्वं तत्समाधानमिति नाम्ना उक्तम् । चित्तस्य लालनं कुतूहलमात्रतया वेदान्तकथासु स्थापनं तु न समाधानमित्यर्थः ॥ २६ ॥

सर्वदा । स्थापनं । बुद्धेः । शुद्धे । ब्रह्मणि । सर्वदा ॥ तत्समाधानम् । इति । उक्तं । न । तु । चित्तस्य । लालनम् २६

अब समाधानका लक्षण कहे हैं ।

तीनों कालमें रागद्वेषादि से रहित सत् चित् आनन्दस्वरूप भूतब्रह्म में अन्तःकरणकी निश्चयरूप वृत्ति को तीनों कालमें स्थितकरे अर्थात् विषयोंसे हटाकर ब्रह्ममें लगावै तिसको समाधान कहा है जैसे विषयोंमें चित्तरंजन करे हैं ऐसे वेदान्तकथामें चित्तको केवल रंजनमात्र न करे ॥ २६ ॥

अहङ्कारादिदेहान्तान्बन्धानज्ञानकल्पितान् ॥
स्वस्वरूपावबोधेन मोक्तुमिच्छामुमुक्षुता ॥ २७ ॥

मुमुक्षां लक्षयति। अहङ्कारादिति।

अज्ञानकल्पितानविद्योत्पादितान् अहङ्कारादिदेहान्तान् सूक्ष्मस्थूलतनुपदाभिधेयान् बन्धान् आत्मनोनित्यमुक्तताऽऽवृत्तिहेतून् स्वस्वरूपावबोधेन नित्यमुक्तस्वात्मसाक्षात्कारेण मोक्तुं न पुनः सन्तु मय्यमे बन्धाइति पुनरसम्बद्धुमिच्छा मुमुक्षुता मुमुक्षा ॥ २७ ॥

अहङ्कारादिदेहान्तान्। बन्धान्। अज्ञानकल्पितान्॥ स्वस्वरूपावबोधेन। मोक्तुम्। इच्छा। मुमुक्षुता॥२७॥

अब मुमुक्षाका लक्षण कहे हैं। अहङ्कारेति।

आत्मामें अज्ञानकरके कल्पित अहङ्कारसे आदिदेह पर्यन्त सर्व बन्धरूप है तिस देहादि संघातसे आत्माके स्वरूप ज्ञानकरके जो छूटनेकी इच्छा है सो मुमुक्षा शास्त्र में कथन करी है॥ २७॥

मन्दमध्यमरूपापि वैराग्येण शमादिना॥
प्रसादेन गुरोः सेयं प्रवृद्धा सूयते फलम्॥ २८॥

ननु चतुर्ष्वपि साधनेषु मुख्या मुमुक्षुताऽऽख्यायते सा च तनुभृत्सु कृशतनुर्बालाबलेव कुमारीव वा मन्दमध्यमरूपतया वर्तमाना न फलं सोतुं समर्था, रागविक्षेपाभ्यामहर्निशं वर्द्धमानाभ्यां कृशीकरणाच्च न तु तनूपचयं लब्धुमर्हति येन कालतस्तीव्रासती फलं सोष्यतीति सम्भाव्येतातआह। मन्दमध्यमरूपापीति।

सा पुरस्तात्साधनेषु गणिता इयमुक्तलक्षणलक्षिता मुमुक्षुता पूर्वोपार्जितपुण्यपुञ्जमान्द्यादिभेदेन मन्दमध्यमरूपापि मन्दं क्वचिदधिकारिणि क्वाचिच्च मध्यमं रूपंविभ्रत्यपि सत्समागमसेवनादिना गुरोः नित्यं मुमुक्षान्तसाधनानि समुपदिशतः प्रसादेनाहर्निशमुपचीयमानेन वैराग्येण शमादिना च निरस्तप्रतिद्वन्द्विरागविक्षेपा प्रवृद्धा प्रतिदिनमुपचयमुपगतासती युवतीव सत्पुत्रं फलमात्म-

१ फलेच्छाया उपायेच्छाम्प्रतिप्रयोजकत्वान्मुमुक्षा मुख्या बोध्या तां विना विवेकादिषु प्रवृत्तेरसम्भवादिति तत्त्वम्॥

साक्षात्कारं सूयते सोऽप्यत्येच नात्र संशयोविधेयइति वर्तमाननिर्देशेन दर्शितं वर्तमानसामीप्ये भविष्यति लट् ॥ २८ ॥

मन्दमध्यमरूपा । अपि । वैराग्येण । शमादिना ॥ प्रसादेन । गुरोः । सा । इयं । प्रवृद्धा । सूयते । फलम् ॥ २८ ॥

चारसाधनोंमें मुमुक्षाको मुख्यसाधन कहाहै सो बने नहीं काहेते जैसे दुर्बल छोटी अवस्था वाली अबला सन्तानको उत्पन्नकरने में समर्थ नहीं है ऐसे मन्द मध्यम स्वरूपवाली रागद्वेषादि करके दुर्बल मुमुक्षाभी ज्ञानस्वरूप पुत्रको उत्पन्न करने में समर्थ नहीं होसके है इस आशंकाको श्लोकसे निवारण करे हैं ।

पूर्वजन्ममें उपार्जित न्यून अधिक पुण्यसे मुमुक्षा किसी पुरुषमें मन्द किसी पुरुषमें मध्यम है तौ भी सत्संग करने से और गुरुकी श्रद्धापूर्वक सेवाकरके गुरुकी कृपासे वैराग्य शमादि साधनोंसे सो यह मुमुक्षापरिपक्वअवस्थामें आत्मसाक्षात् कारको उत्पन्नकरेगी इस हेतुसे अतिशोभनीय मुमुक्षाहै यहां यहआशयहै जैसेमातापिताकरके रक्षित अबलाधीरे२पतिकोप्राप्त होके युवा अवस्थामें बलवालीहोकर सन्तानको उत्पन्न करतीहै ऐसे वैराग्यशमादि साधनों करके परिपक्व अवस्थाको प्राप्तहोके मुमुक्षा अद्वैतज्ञानस्वरूप पुत्रको उत्पन्न करैगी ॥ २८ ॥

वैराग्यञ्च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते ॥
तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः २९

तथाच तीव्रा मुमुक्षैव फलप्रसवहेतुर्यत्नतोऽन्वेष्टव्येत्याह।वैराग्यञ्चेति ।

यस्याधिकारिणो वैराग्यं मुमुक्षुत्वं च तीव्रं प्रवृद्धं विद्यते तस्मिन्नेव शमादयोऽर्थवन्तः सार्थकाः । अर्थवन्तइत्यस्यैव व्याख्या फल-

वन्तइति भाष्यकृतो भाष्यमर्यादयापि क्वचित्क्वचित्काव्यरचनायाद्दृष्टेः ॥ २९ ॥

वैराग्यं । च । मुमुक्षुत्वं । तीव्रं । यस्य । तु । विद्यते ॥ तस्मिन् । एव । अर्थवन्तः । स्युः । फलवन्तः । शमादयः॥२९

इस रीतिसे तीव्र वैराग्य और मुमुक्षावाले पुरुषमें ही शमादिसाधन सार्थक होवै हैं ऐसा कहेहैं । वैराग्यमिति ।

जिस पुरुषके पुनः तीव्र वैराग्य और मुमुक्षा हैं तिस पुरुष में ही शमादिसाधन सार्थक होते हैं अर्थात् फलको उत्पन्न करते हैं ॥ २९ ॥

एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः ॥
मरौ सलिलवत्तत्र शमादेर्भानमात्रता ॥ ३० ॥

पूर्वपद्यस्थतुशब्दसूचितमन्दाधिकारिणि तयोर्मन्दत्वमयुक्तं फलाभावं दर्शयति । एतयोरिति ।

एतयोः उपक्रान्तयोः विरक्तत्वमुमुक्षयोः यत्र कुसङ्गिसङ्गिनि असम्पादितगुरुकरुणे मन्दता शैथिल्यं दृश्यते इति शेषः । तत्र मरौ ऊषरावनौ सिक्तसलिलवत् शमादेर्भानमात्रता प्रतीतिरेव न फले समर्थत्वं किन्तु नैष्फल्यं साक्षात्कारानुत्पादकत्वात् तस्मात्कुसङ्गिसङ्गं यत्नतो निवर्त्य गुरुप्रसादं चासाद्य वैराग्यमुमुक्षयोः सफलतायै तीव्रतायां यतितव्यमधिकारिभिरिति भावः ॥ ३० ॥

एतयोः । मन्दता । यत्र । विरक्तत्वमुमुक्षयोः।मरौ । सलिलवत् । तत्र । शमादेः । भानमात्रता ॥ ३० ॥

वैराग्य मुमुक्षा दोनों को मन्द होनेसे शमादि साधन निष्फल हैं इसी को लोकदृष्टान्त से दिखावे हैं ॥

जिस मन्द अधिकारीमें यह दोनों वैराग्य और मुमुक्षा मन्द हैं तिस पुरुषमें शमादिकी प्रतीतिमात्र ही है अर्थात् निष्फल है जैसे मरुभूमिमें जलका भान निष्फलहै ॥ ३० ॥

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ॥

स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ॥ ३१ ॥

ननु " यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः " इति श्रुतौ भक्तेरपि देवसाक्षात्कार-साधनत्वश्रवणात्तस्याश्चोक्तसाधनेष्वगणनान्न्यूनत्वं दोषोऽत आह। मोक्षकारणसामग्र्यामिति ।

मोक्षकारणसामग्र्यां मोक्षप्रापकात्मसाक्षात्कारसाधनसन्तत्यां भक्तिरेव गरीयसी प्रशस्यतरा नान्यसाधनसमाना । तथाचास्याः सर्वसाधनश्रेष्ठायायुक्तं साधनशिरस्यभिधानं वेदानां शिरसि ब्रह्म ज्ञानस्याभिधानवदिति भावः।तस्यालक्षणमाकाङ्क्षितमभिदधाति। स्वस्वरूपानुसन्धानमित्यादिना स्वेन रूप्यते ।निरूप्यते तत् स्वरूपं प्रमाणानपेक्षआत्मा स्वमेव स्वरूपं प्रत्यक् साक्षी पञ्चकोशातीत-स्तस्यानुसन्धानं चिन्तनाभ्यासोभक्तिरित्याभिधीयते ॥ ३१ ॥

मोक्षकारणसामग्र्याम् । भक्तिः । एव । गरीयसी ॥ स्व-स्वरूपानुसंधानम् । भक्तिः । इति । अभिधीयते ॥ ३१ ॥

ईश्वरके समान गुरुमें भक्ति करनेवाले को वेदान्तके पदार्थों का यथार्थ बोध होवै है ऐसा श्रुतिमें कथन करनेसे भक्ति भी ज्ञानके साधनों में कथन करनी उचितहै उसके न कथन करने से न्यूनतादोष प्राप्त होवै है इस शंकाका श्लोकसे उत्तर कहे हैं ।

मोक्षका हेतु जो ज्ञानहै तिसकी कारणसमूहरूप सामग्री में भक्ति ही सर्वसाधनोंमें श्रेष्ठहै भक्तिके समान कोई साधन नहीं इसकारणसे वेदोंके अन्तमें जैसे वेदान्तका प्रतिपादन है वैसेही सर्व साधनों के अन्तमें भक्तिका प्रतिपादनहै श्रेष्ठता के सूचनके लिये , इस हेतुसे न्यूनतादोष नहीं आवै है अपने आपसे प्रकाशमान् पंचकोशातीत आत्माके प्रत्यक्स्वरूप

१ भक्तेः ॥

का जो चिन्तनाभ्यासहै इसको भक्ति कहे हैं ॥ ३१ ॥

स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः ॥
उक्तसाधनसम्पन्नस्तत्त्वजिज्ञासुरात्मनः ॥
उपसीदेद्गुरुं प्राज्ञं यस्माद्बन्धविमोक्षणम्॥३२॥

ननु स्वस्वरूपानुसन्धानलक्षणा भक्तिर्नाद्वैतपक्षपातिनी कापिलैरप्यस्या अवलम्बाद् द्वैततिरस्कारासमर्थत्वाच्चातआह। स्वात्मतत्त्वानुसन्धानमिति।

स्वात्मनएव तत्त्वं याथार्थ्यमतोऽन्यस्य मरुमरीचिकासलिलवन्मिथ्यात्वमिति यदनुसन्धानं निश्चितिः सा भक्तिरित्यपरे कापिलेभ्योभिन्नाअद्वैतवादिनोजगुः। यद्वा भक्तिरद्वैतात्मचिन्तनात्मिका निदिध्यासनेऽन्तर्भूतेति न वैराग्यादिषु गणितेत्याशयेनेदमिति बोध्यम्। अभिहितसाधनसम्पन्नोऽधिकारी किमनुतिष्ठेत्तत्राह। उक्तसाधनेत्यादिना उक्तसाधनसम्पन्नः अभिहितसमस्तसाधनसम्पत्तिमानधिकारी, आत्मनः प्रतीचस्तत्त्वं याथात्म्यं जिज्ञासुर्बुभुत्सुः प्राज्ञं ब्रह्मप्रज्ञोपदेशपटुं गुरुं शिष्यहितोद्युक्तम् उपसीदेत् प्राप्नुयात् गुरोस्स्वरूपं वर्णयति यस्माद्बन्धविमोक्षणमित्यादिना यस्माद्गुरोरुक्तलक्षणस्य बन्धनस्य विमोक्षणमनुत्पादः 'अविद्यास्तमयोमोक्षः स च बन्धउदाहृतः' इत्युक्तमर्यादयाऽविद्यानिवृत्तिर्वा तमाराध्येति तृतीयेनान्वयः॥ ३२॥

[1]स्वात्मतत्त्वानुसन्धानम्। [2]भक्तिः। [3]इति। [4]अपरे। [5]जगुः॥ [6]उक्तसाधनसम्पन्नः। [7]तत्त्वजिज्ञासुः। [8]आत्मनः॥ [9]उपसीदेद्। [10]गुरुं। [11]प्राज्ञं। [12]यस्माद्। [13]बन्धविमोक्षणम्॥ ३२॥

इस प्रकारकी भक्तिका सांख्यशास्त्रवाले भी अंगीकार करते हैं और इस भक्तिसे द्वैतकी निवृत्ति होनी भी दुर्लभहै इस शंकाका उत्तर श्लोकार्द्धसे करे हैं।

अपने आत्माको ही यथार्थता है उससे भिन्न जगत् मरु

---

१ अहङ्कारादिदेहान्तस्य।

भूमि में जलवत् मिथ्याहै ऐसे चिन्तनको वेदान्तीभक्ति कहते हैं अथवा अद्वैत आत्माके यथार्थताका चिन्तन निदिध्यासन रूपहै इस कारण पृथक् भक्तिकी गणना नहीं की है पूर्वोक्त साधनों करके युक्त अधिकारी आत्माके प्रत्यक्स्वरूपके बोधकी इच्छावाला ब्रह्मज्ञानके उपदेष्टा शिष्यके हितमें वर्तमान गुरु के समीप प्राप्त होवै जिसे गुरुसे शिष्यका बन्ध विनष्ट होवै ३२

श्रोत्रियोऽवृजिनोकामहतोयोब्रह्मवित्तमः ॥
ब्रह्मण्युपरतः शान्तोनिरिन्धनइवानलः ॥
अहेतुकदयासिन्धुर्बन्धुरानमतांसताम् ॥ ३३ ॥

सं कं इत्यपेक्षमाणं प्रति निरूपयति । श्रोत्रियइत्यादिना ।

"श्रोत्रियँश्छन्दोऽधीते" इति पाणिनीयसूत्रादधिगतसार्थवेदः 'स्वाध्यायोऽध्येतव्यः' इत्यस्यां श्रुतौ सार्थवेदाक्षरग्रहणमध्ययनमिति पूर्वमीमांसायां निर्णयादिति बोध्यम् । अवृजिनः निवृत्तनिषिद्धाचारः अकामहतः सर्वतोनिस्पृहः'श्रोत्रियस्य चाकामहतस्ये'ति श्रुतेः। ब्रह्मवित्तमः निःसन्दिग्धावगतब्रह्मात्मैक्यः ब्रह्मण्युपरतः परमात्मनि विलीनचित्तवृत्तिः शान्तः रागद्वेषाद्यतसमानसः निरिन्धनः भस्मीकृतैधोवृन्दः अनलः वह्निरिव ज्वलदङ्गारवदप्रधर्ष्यदीप्तिरित्यर्थः। अहेतुकदयासिन्धुःपूजाख्यात्यादिनिमित्तमनुद्दिश्योपदेशदेशनकरकरुणावरुणालयः आनमतां मुहुः प्रेम्णा प्रणामपरंपरायां मग्नानां सतां सत्कर्मपरायणानामधिकारिणां बन्धुः पितेव परमहितकरः ॥ ३३ ॥

श्रोत्रियः। अवृजिनः। अकामहतः । यः । ब्रह्मवित्तमः ॥ ब्रह्मणि । उपरतः । शान्तः । निरिन्धनः । इव । अनलः ॥ अहेतुकदयासिन्धुः । बन्धुः । आनमतां । सताम् ॥ ३३ ॥

परमात्मामें लीनहै चित्तकी वृत्ति जिसकी रागद्वेपादि अग्नि

---

१ गुरुः । २ क्लिशयुक्तः ॥

करके जिसका चित्त तप्त नहीं हुआ जिसने सर्वथा काष्ठ भस्म करदियेहैं वैसे अग्निके अंगारके सदृश अतितेजस्वी पूजा मान बड़ाई की अपेक्षा विना दयाकरने वाला प्रेमपूर्वक प्रणाम करने वाले सत्कर्म करने वाले पुरुषों का पिताके समान हित-कारी है ॥ ३३ ॥

तमाराध्यगुरुं भक्त्या प्रह्वप्रश्रयसेवनैः ॥
प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः ॥ ३४ ॥

गुरोर्लक्षणमभिधाय अधिकारिणः कर्तव्यां पृच्छामाचष्टे। तमा-राध्येति ॥

तमुक्तलक्षणं गुरुं भक्त्या पादवाहनादिसेवया आराध्य प्रसा-दोन्मुखमालक्ष्य पुनरपि प्रह्वप्रश्रयसेवनैः प्रणातिविनयभक्तिभिः प्रसन्नं। किमिति विलम्बसे हृद्गतं पृच्छ सौम्य सर्वं याथातथ्येन वक्ष्यामीति वदन्तं प्रसन्नाननं तमेवं मुहुर्वदन्तं देशिकम् अनुप्राप्य बद्धाञ्जलिः समासाद्य आत्मनः स्वस्य ज्ञातव्यं वक्ष्यमाणं पृच्छेत् जिज्ञासेत। पृच्छेदित्यन्तेन"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणोनि-र्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं सगुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतेरर्थोवर्णितइति बोध्यम् ॥ ३४ ॥

तम्। आराध्य। गुरुम्। भक्त्या। प्रह्वप्रश्रयसेवनैः ॥ प्रस-न्नम्। तम्। अनुप्राप्य। पृच्छेत्। ज्ञातव्यम्। आत्मनः॥ ३४॥

तिस पूर्वोक्त लक्षणोंवाले गुरुको चरणसेवादिरूप भक्ति करके प्रसन्न करके प्रणाम नम्रता भक्ति से प्रसन्न हुवे को अपने मनका संशय कहो मैं सर्वसंशयों को नाश करूंगा इस प्रकार कहने में प्रवृत्त हुवे तिस गुरुको प्राप्त होकर अपने को जो ज्ञातव्य है अर्थात् जानने योग्य है उसकी जिज्ञासा करे ऐसे ही वेदमें गुरुको प्राप्त होकर जिज्ञासा करनी निरूपण की है ॥ ३४ ॥

स्वामिन्नमस्ते नतलोकबन्धो,
कारुण्यसिन्धो पतितं भवाब्धौ ॥
मामुद्धरात्मीयकटाक्षदृष्ट्या,
ऋज्व्याऽतिकारुण्यसुधाभिवृष्ट्या ॥ ३५ ॥

पृच्छेदिति विधिं श्रुत्वा तथाऽनुतिष्ठतः कस्यचिच्छिष्यस्योक्तिमभिनयति । स्वामिन्नमस्ते इत्यादिभिः पद्भिः ।

हे स्वामिन् दैवसम्पत्समृद्ध । नतलोकबन्धो प्रणतजनपितः । कारुण्यसिन्धो निर्निमित्तदयासागर । ते तुभ्यं नमोऽस्तु । अतिकारुण्यसुधाभिवृष्ट्या निर्व्याजदयापीयूषस्याभिवर्षणावधिभूतया । ऋज्व्या सर्वथा वक्रभावचर्जितया । आत्मीयकटाक्षदृष्ट्या स्वीयमनोहरावलोकनेन । भवाब्धौ जन्मजराजलनिधौ । पतितं मग्नं । मामुद्धर पारय । अत्र हि संसारस्य सागररूपकतया वर्णनमवगन्तव्यम् ॥ ३५ ॥

स्वामिन् । नमः । ते । नतलोकबन्धो । कारुण्यसिन्धो । पतितम् । भवाब्धौ ॥ माम् । उद्धर । आत्मीयकटाक्षदृष्ट्या । ऋज्व्या । अतिकारुण्यसुधाभिवृष्ट्या ॥ ३५ ॥

इस प्रकार जिज्ञासा करनी उचितहै ऐसा श्रवण करके शिष्यको जिज्ञासा उदय हुई उसको गुरुसे निवेदन करे हैं छै श्लोकों से ।

हे स्वामीजी ! प्रणाम करने वालोंके पिताजी ! दयाके समुद्र आपको मेरी नमस्कार होवै निर्निमित्तदयाअमृतवर्षाकाअवधिभूत अतिसरल अपनी मनोहर कटाक्षदृष्टिसे जन्मजराआदि समुद्रमें मग्न मेरे को पारकरो इस श्लोकमें संसारको सागररूपतारूपक अलंकारसे वर्णन किया है ॥ ३५ ॥

दुर्वारसंसारदवाग्नितप्तं,

दोधूयमानं दुरदृष्टवातैः॥
भीतं प्रपन्नं परिपाहि मृत्योः,
शरण्यमन्यद्यदहं न जाने॥ ३६ ॥

इदानीं भवं दवरूपकेण निरूपयन् प्रार्थयते दुर्वारेत्यादिना। संसारएव दवोवनं तत्र योदुर्वारः कामक्रोधादिलक्षणोऽग्निर्वह्निस्तेन तप्तं दुःखितं दुरदृष्टवातैः। दुष्टकर्मजन्यानिष्टादृष्टभयंकरवात्याभिः। दोधूयमानं वेवेप्यमानं स्वकृतदुष्कृतचिन्तनवेवेपिताचित्तमिति यावत्। मृत्योर्व्याघ्रनिभाद्भीतं प्रपन्नं भवच्छरणमुपसन्नं मां हेमभो पाहि रक्ष यद्यतोऽहं त्वदन्यं शरणं नजाने। न विद्यते भवतोऽन्योभवादृशः शरणागतरक्षणशीलोयमालम्बेहमिति भावः॥ ३६॥

दुर्वारसंसारदवाग्नितप्तम्। दोधूयमानम्। दुरदृष्टवातैः॥ भीतम्। प्रपन्नम्। परिपाहि। मृत्योः। शरण्यम्। अन्यत्। यत्। अहम्। न। जाने॥ ३६॥

अब संसारको वनाग्निरूपसे वर्णन करते हुवे प्रार्थना करते हैं। दुर्वारेत्यादिना॥

संसारही वनहै इसमें कामक्रोधादिरूप दुर्वा अग्निहै उस करके दुःखी हुवाहूं अपने आपसे किये पाप कर्मरूपभयंकर पवन समूहसे महाकम्पायमान चित्त मेरा हुवा है मृत्युरूप व्याघ्रसे भयभीत होरहाहूं आपकी शरण प्राप्त हुवा हूं मेरी आपही रक्षाकरो जिस कारणसे आपसे भिन्न किसी को शरणागतका रक्षक मैं नहीं जानता हूं इसकारण आपही रक्षा करो॥ ३६॥

शान्तामहान्तोनिवसन्ति सन्तो-
वसन्तवल्लोकहितं चरन्तः॥
तीर्णाः स्वयं भीमभवार्णवंजना
न हेतुनाऽन्यानपि तारयन्तः॥ ३७॥

ननु निर्निमित्ताप्रवृत्तिर्न दृष्टचरी प्रेक्षावतामिति कथमकारणा करुणा प्रेक्षावच्छिरोमणौगुरौ घटेतात आह। शान्ताइति।

वसन्तवल्लोकहितं चरन्तः । यथा हि वसन्तर्तुरनेकविधपत्रप्रसूनादिसम्पत्सम्पादनेन छायासुरूपसौरभादिभिर्लोकानां त्वङ्नयनघ्राणाद्यानन्दं निर्निमित्तमेवातनोति तथा महान्तोपि विद्यासम्पत्सम्पादनेन शान्तिसौन्दर्यसुषुमादिभिर्लोकानांनिर्निमित्तमेव मनांसि तनूश्चानन्दयन्तीत्यर्थः। शान्ता रागलोभाद्यक्षुभितमानसा महान्तोमहाशयाः सन्तः सत्कर्मयन्तोनिवसन्ति तरुतार्णकुटीगिरिगुहादितत्तदाश्रमेषु तिष्ठन्ति ते च स्वयं भीमभवार्णवं जन्मजरादिभयङ्करसंसार सागरं तीर्णाः सन्तोऽहेतुना निर्निमित्तपरोपकृतितत्परस्वभावेनैव न्यानपि समुपसन्नाञ्जनानधिकारिणः संसाराब्धेस्तारयन्तोनिवसन्तीति पूर्वेण सम्बन्धः ॥ ३७ ॥

शान्ताः । महान्तः । निवसन्ति । सन्तः । वसन्तवत् । लोकहितम् । चरन्तः ॥ तीर्णाः ।स्वयं । भीमभवार्णवम् । जनाः न । हेतुना । अन्यान् । अपि । तारयन्तः ॥ ३७ ॥

वसन्तऋतु के समान लोकोंका हिताचरणकरनेमें अर्थात् वसन्तऋतु जैसे छाया सुगन्धि आदिसे लोकोंका उपकार करेहै वैसे सन्तभी विद्याके उपदेशादि से सर्वजनोंका उपकार करेहैं रागादि करके जिनमें क्षोभ नहीं होता है महाशय जनहैं सत्कर्मों में तत्परहैं वृक्ष कन्दरा छप्परादि आश्रमों में निवास करते हैं सोमहात्मा भयंकर संसारसागरको तरेहुंवे हैं और विना हेतु से अन्य पुरुषों को भी जो शरण आते हैं उनको भी तारतेहैं—अर्थात् ज्ञानोपदेशरूप जहाज में चढाकर संसारसागर से मुक्तकरके मोक्षरूप ब्रह्मधाममें प्राप्त करते हैं यह निर्निमित्त स्वभाव सन्तों महात्माओंका होताहै सो आप भी वैसे सन्त महात्मा हैं मुझको तारो ॥ ३७ ॥

अयं स्वभावः स्वतएव यत्पर-
श्रमापनोदप्रवणं महात्मनाम् ॥
सुधांशुरेष स्वयमर्ककर्कश-
प्रभाभितप्तामवति क्षितिं किल ॥ ३८ ॥

नन्वयं परोपकारस्वभावोपि सतां सनिमित्तोवाच्योनिर्निमित्त-कार्यादर्शनादिति चेन्न स्वभावस्यानियोज्यत्वाचन्द्रस्वभाववदि-त्याह। अयमिति।

महात्मनां महाशयानां यत्परश्रमापनोदप्रवणं परखेदनिवार-णोन्मुखत्वमित्ययं स्वभावः स्वतएव निर्निमित्तएव। अत्र च चन्द्रएव दृष्टान्तइत्याह एषः। नभस्युन्नतनयनैः प्रत्यक्षमुपल भ्यमानः सुधांशुः पीयूषरश्मिश्चन्द्रोऽर्ककर्कशप्रभाभितप्तां। प्रचण्ड-मार्तण्डातपोत्सारितरसां क्षितिं क्षयसंनिहितप्रायामवनिं किल प्रसिद्धमेतत् अवति रसाभिवर्षणेन पुनरुज्जीवयति तथाच चन्द्र-वदेव शान्तवचोभिर्वर्षणेन ममान्तःसन्तापमपाकुर्विति भावः ३८॥

अयम्। स्वभावः। स्वतः। एव। यत्। परश्रमापनोद-प्रवणम्। महात्मनाम्॥ सुधांशुः। एषः। स्वयम्। अर्ककर्कश-प्रभाभितप्ताम्। अवति। क्षितिम्। किल ॥ ३८ ॥

शंका। सन्तोंका जो परोपकार स्वभाव है उसमें भी कुछ निमित्त होगा क्योंकि विना निमित्त कार्य होना असम्भवहै।

उत्तर। चन्द्रमावत् स्वभावमें प्रश्न करना अनुचितहै महाशयोंका जो अन्यजनों के खेदनिवारण में तत्परताहै यह स्वभाव निर्निमित्त है इसमें चन्द्रमाही दृष्टान्तहै यह जो गगनमण्डल में चन्द्रमा दीखताहै जिसकी अमृतमय किरणें हैं सो प्रचण्ड सूर्य करके तपाई हुई पृथिवीको अपनी किरणों द्वारा रसका सेचन करके विनानिमित्त रक्षा करताहै अर्थात् चन्द्रमावत् अपनी शान्तवाणी की वर्षा करके मेरे अन्तः करण

के सन्तापको विनाश करके हेगुरो! आप शीतल करो ॥ ३८ ॥

ब्रह्मानन्दरसानुभूतिकलितैः पूतैः सुशीतैर्युतैः,
युष्मद्वाक्कलशोज्झितैः श्रुतिसुखैर्वाक्यामृतैः सेचय॥
सन्तप्तं भवतापदावदहनज्वालाभिरेनं प्रभो,
धन्यास्ते भवदीक्षणक्षणगतेः पात्रीकृताः स्वीकृताः३९

सद्गुरुमुपदेशाभिमुखमापादयन् स्वस्य तद्दर्शनमात्रेण कृतार्थतामाविष्करोति। ब्रह्मानन्देत्यादिना।

भवतापदावदहनज्वालाभिः भवतापा आध्यात्मिकादि भेदभिन्नानि दुःखानि तएव दावदहनरूपाणि वनवह्निनिभानि तेषांवृत्तयोज्वालास्ताभिः सन्तप्तं भृशं क्लिश्यन्तम् एनं भवच्छरणमुपसन्नं मां ब्रह्मानन्दरसानुभूतिकलितैः ब्रह्मानन्दलक्षणरसानुभवेन मधुरैः तथाविधतया प्रसिद्धैरित्यर्थः। पूतैः पवित्रैः निर्दोषैरित्यर्थः। सुशीतैः शान्तिसुखोद्बोधकैर्युतैः असंकीर्णैः युमिश्रणामिश्रणयोरिति धातुपाठात् युष्मद्वाक्कलशोज्झितैः भवद्वाणीकुम्भाविनिर्गतैः श्रुतिसुखैः श्रवणरमणीयैः। वाक्यामृतैः उपदेशपीयूषैः सेचय सरसं संपादय। हेप्रभो ये भवदीक्षणक्षणगतेः भवदीयदृष्टेः क्षणमात्रगतेः तथाविधवृत्तेः पात्रीकृताः विषयतयावलम्बिताः। तेनैव स्वीकृताः भवतानुगृहीताइति व्यवहृतिं प्राप्तास्ते धन्याः पुण्यात्मानः तन्मध्येऽहमपि स्वात्मानं मन्यमानोधन्यएव तथा भवदुपदेशश्रुत्या शान्तमात्मानमासाद्य धन्यतमोबुभूषुरस्मीतिभावः॥३९

ब्रह्मानन्दरसानुभूतिकलितैः। पूतैः। सुशीतैः। युतैः। युष्मद्वाक्कलशोज्झितैः। श्रुतिसुखैः। वाक्यामृतैः।सेचय॥ संतप्तम्। भवतापदावदहनज्वालाभिः। एनम्। प्रभो। धन्याः। ते। भवदीक्षणक्षणगतेः। पात्रीकृताः। स्वीकृताः॥३९॥

सद्गुरुजी को उपदेशमें सन्मुख करनेके लिये शिष्य अपने को गुरुदर्शनसे कृतार्थताको प्रकट करेहै।

१ पात्रीकरणेनैव।

आध्यात्मिक आधिभौतिक आधिदैविक दुःखही वनकी अग्निरूपहैं उनकी वृत्ति ज्वालारूपहै उन करके अत्यन्त क्लेशको अनुभव करतेको यह आपकी शरणको प्राप्त मुझको ब्रह्मानन्द-रसके अनुभव करके मीठे पवित्र अर्थात् निर्दोष शान्तिसुख देनेवाले असंकीर्ण पृथक्२ रूपसे अर्थबोधक आपकी रसना-रूप गगरीसे निकसे हुवे श्रवणों को आनन्द देनेवाले उपदेश-रूप अमृतों करके मेरे को सिंचन करो हे प्रभो ! आपकी कृपादृष्टिकी क्षणमात्र गतिके भी जो पात्र हुवेहैं और स्वीकृत हुवेहैं सो पुण्यात्माहैं उनके मध्यमें मुझको समझके उपदेश से कृतार्थ करो ॥ ३९ ॥

कथं तरेयं भवसिन्धुमेतं,
का वा गतिर्मे कतमोस्त्युपायः ॥
जाने न किञ्चित्कृपयाऽव मां प्रभो,
संसारदुःखक्षतिमातनुष्व ॥ ४० ॥

एवमुक्ते विनेयेन पृच्छामाविष्कुरु तदानुगुण्येनोपदेक्ष्यामीति वदन्तं सद्गुरुमाह । कथमिति ।

हे प्रभो स्वामिन् । एतं भवसिन्धुं संसारसागरं केन प्रकारेण केन साधनेनेति यावत् । तरेयम् पारयेयम् । मे मम का गतिर्विश्रमस्थानं वेदोक्तानां कर्मोपासनज्ञानानां मध्ये कतमउपायः साक्षान्मोक्षसाधनसमर्थोहेतुरस्ति । पृष्टेष्वेतेषु न किंचिज्जाने ततो मे न दौरात्म्यं कृपया मामव रक्ष संसारदुःखक्षतिं भवदुःखविघातमातनुष्व विस्तारय यथा न पुनर्दुःखमुदियादिति भावः ४०॥

कथम् । तरेयम् । भवसिन्धुम् । एतम् । का । वा । गतिः । मे । कतमः । अस्ति । उपायः ॥ जाने । न । किञ्चित् ।

कृपया । अव । माम् । प्रभो । संसारदुःखक्षतिम् । आतनुष्व ॥ ४० ॥

इस संसारसमुद्रको मैं कैसे तरूंगा मेरे को विश्रान्तिका स्थान कौन है और वेदोक्त कर्म उपासना ज्ञान इनमें कौन उपाय है मैं कुछ जानता नहींहूं हे प्रभो! आप कृपा करके मेरी रक्षा करो संसारके दुःखोंके नाशको विस्तार से कहो इस प्रकार मेरी प्रार्थना है ॥ ४० ॥

तथावदन्तं शरणागतं स्वं,
संसारदावानलतापतप्तम् ॥
निरीक्ष्य कारुण्यरसार्द्रदृष्ट्या,
दद्यादभीतिं सहसा महात्मा ॥ ४१ ॥

शिष्यं शिक्षयित्वा गुरुकर्तव्यमुपदिशति ।

तथावदन्तमिति । यथोक्तं पुरस्तात्तथा तेन प्रकारेण नतु तैरेव शब्दैरिति नियमइति भावः । वदन्तम् । उपदेशमभ्यर्थयमानम् । स्वं स्वीयम् । शरणागतम् । संसारदावानलतापतप्तम् । जगज्जङ्गलसमुद्गताचिन्तादिज्वालजटिलभोगकामानलसन्तापसन्ततिसंसर्गसंसृष्टत्रिविधदुःखोद्विग्नमानसमित्यर्थः । कारुण्यरसार्द्रदृष्ट्या कृपारसपूर्णकटाक्षपातेन निरीक्ष्य महात्मा सहसा क्षिप्रम् । अभीतिम् । भयनिवृत्तिनिमित्तोपदेशम् । दद्यात न विलम्बेतेति भावः ॥

तथा । वदन्तम् । शरणागतम् । स्वम् । संसारदावानलतापतप्तम् ॥ निरीक्ष्य । कारुण्यरसार्द्रदृष्ट्या । दद्यात् । अभीतिम् । सहसा । महात्मा ॥ ४१ ॥

जिस प्रकारसे पूर्व कहाहै उसी प्रकार उपदेशकी प्रार्थना करने वाले अपनी शरणको प्राप्त हुवेको तथा संसाररूप जंगल में चिन्तारूप ज्वालासे दीप्त भोगकामनारूप अग्नि करके

दग्ध मानस शिष्यको कृपारस पूर्णकटाक्ष करके महाशय गुरु शीघ्रही भयको निवृत्त करनेवाले उपदेशको देवै विलम्ब कदापि न करे ॥ ४१ ॥

भावार्थ—यहहै कि महात्मा से विना अभयदानकर्ता संसार में कोई नहीं यद्यपि गज अश्व भूमि रत्न आदि विविध मायिक पदार्थ संसारभयके हेतु पदार्थोंका दान अनेक जीव करते हैं तथापि जन्मादिभय निवारक और निर्भय परमात्मपद प्रापक ब्रह्मबोधका दाता केवल ब्रह्मनिष्ठ महात्मा ही जगत् में विराजमानहै उनकी शरणको अवश्य प्राप्त होके निर्भय होना उचितहै ॥ ४१ ॥

विद्वान्सतस्माउपसत्तिमीयुषे,
मुमुक्षवे साधुयथोक्तकारिणे ॥
प्रशान्तचित्ताय शमान्विताय,
तत्त्वोपदेशं कृपयैव कुर्यात् ॥ ४२ ॥

ननु देशिकोजीवन्मुक्तः सन्कथं कर्तव्यं मन्येत निर्निमित्तं च कथमुपदेशे प्रवर्तेत नच करुणैव निमित्तमिति वाच्यम्। प्रयोजनमनुद्दिश्य करुणायाअप्यनुदयात् । नच परयन्धानिवृत्तिरेव प्रयोजनमिति शङ्क्यम् ब्रह्मविदः परंदृष्टयभावादन्यथाऽज्ञत्वापत्तिरित्याशङ्कायामाह ।

विद्वान्सइत्यादिना । सदेशिकवरोविद्वान् ब्रह्मनिष्ठस्तस्मै यथोक्तकारिणे वेदोक्तसत्कर्मकर्तृशीलाय देशिकाभिप्रायानुरोधेन सेवनशीलाय वा उत्तमाधिकारिणे इति यावत् प्रशान्तचित्ताय विध्वस्तचाञ्चल्यचेतसे। शमान्विताय। पूर्वत्र हेतुगर्भितं विशेषणमिदम् । बाह्योपरमलक्षणस्य शमस्य मनःशान्तौ हेतुत्वात् । उपसत्तिमीयुषे।अनन्यभावेनोपसन्नाय। मुमुक्षवे कृपयैव तत्त्वोपदेशं कुर्यात्। नतु लौकिकलाभमुद्दिश्येत्येवकारार्थः परदृष्टयभावे-

पि स्वात्मदृष्टचैव शिष्यबन्धापनोदमुद्दिश्योपदेशप्रवृत्तिरुचितैव, अतएव 'आत्मबन्धहरः' इति श्रुतिः सङ्गच्छत इति भावः । अनेन "सतस्मै विद्वानुपसन्नायसम्यक्प्रशान्तचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतोब्रह्मविद्याम्" इति श्रुतिरर्थतः प्रदर्शितेति बोध्यम् ॥ ४२ ॥

विद्वान् । सः । तस्मै । उपसत्तिम् । ईयुषे । मुमुक्षवे । साधुयथोक्तकारिणे ॥ प्रशान्तचित्ताय ॥ शमान्विताय । तत्त्वोपदेशम् । कृपया । एवं । कुर्यात् ॥ ४२ ॥

गुरु जीवन्मुक्त होनेसे अपनेको उपदेशका कर्ता कैसे मानेगा, विनानिमित्त उपदेशमें कैसे प्रवृत्त होगा और विना प्रयोजन कृपाका उदयहोना भी दुर्लभहै ब्रह्मवेत्ताकी दृष्टि में परका अभाव होनेसे परबन्धनिवृत्ति भी प्रयोजन नहीं कह सकते । इस शङ्काका उत्तर श्लोकसे कहे हैं ।

सोगुरुवर, आचार्य तिसै वेदोक्त सत्कर्मशील गुरुसेवातत्पर उत्तम अधिकारी चञ्चलतारहित चित्त जिसकाहै अनन्य होकर जो शरणागतहै मुमुक्षुजन तिसको केवल कृपादृष्टि से ही तत्त्वका उपदेश करे। यद्यपि ब्रह्मनिष्ठ गुरुको परदृष्टि नहीं है तथापि आत्मदृष्टि से ही उपदेश करे है जैसे अपने शरीरके रोगादि की निवृत्तिके लिये आप औषध करे है वैसे शिष्यके संसाररूप रोग दूर करनेके लिये गुरु आत्मदृष्टि से ही उपदेश करे है इसकारण वेदमें अपने बन्धोंको परमेश्वर दूर करे है ऐसा कहाहै ॥ ४२ ॥

माभैष्ट विद्वँस्तव नास्त्यपायः,
संसारसिन्धोस्तरणेऽस्त्युपायः॥

येनैव यातायतयोऽस्य पारं,
तमेव मार्गं तव निर्दिशामि ॥ ४३ ॥

भवतापभीतं शिष्यमाश्वासयन्नुपदेशप्रवृत्तिं प्रतिजानीते माभैष्टेत्यादिना ।

हेविद्वन् उपदिश्यमानपदपदार्थसंगतिज्ञ । माभैष्ट भयनिवृत्तिं सन्निहितां विजानीहि । उपायासम्भावनामपाकरोति । संसारेति संसारसिन्धोस्तरणे उपायः साधनमस्ति तल्लाभे सति तवापायो-मृत्युप्रवाहोनास्ति नस्यात् वर्त्तमानसामीप्ये भविष्यति लट् । उपायस्य स्वाभ्यूह्याभ्यूहितत्वमपनुदति येनैवेति । येन मार्गेण यतयो-बाह्यान्तःकरणयमनशीलाअस्य संसारसिन्धोः पारमविद्यापारं परंब्रह्म "तमसः पारं दर्शयति" इतिश्रुतेः । याताः प्राप्तास्तमेव नतु नूतनं स्वमनीषाकल्पितं मार्गमात्मान्वेषणहितं मृगअन्वेषणे इति धातुपाठात् । उपायमितियावत् । तवाधिकारिणः । निर्दिशामि । आब्रह्मसाक्षात्कारमुपदिशामीतिभावः । निःशब्दोनैरन्तर्ये दिशि-रुच्चारणइति वैयाकरणाः । तथाचाऽल्पमुपदिश्य विरंस्यतीत्यपि न शङ्कनीयमिति तात्पर्यम् ॥ ४३ ॥

मा । भैष्ट । विद्वन् । तव । न । अस्ति । अपायः । संसार-सिन्धोः । तरणे । अस्ति । उपायः ॥ येन । एव । याताः । यतयः । अस्य । पारम् । तम् । एव । मार्गम् । तव । निर्दिशामि ॥ ४३ ॥

हे पदपदार्थ के बोधमें निपुण शिष्य मत भयकर संसार-सागरसे तरण का जो उपाय है तिसके लाभ होने से तेरी मृत्युप्रवाहमें प्राप्ति न होवेगी जिसे मार्गद्वारा ही जितेन्द्रिय-यतिलोक इस संसारसागर के पार परब्रह्म को प्राप्त हुवे हैं उस मार्गको ही तुम्हारे प्रति मैं उपदेश करताहूं जब तक तुमको ब्रह्मसाक्षात्कार न होगा तब तक उपदेश करतारहूंगा ।

ज्ञानमार्ग प्राचीन ऋषि मुनि करके सेवित है इस द्वारा अनेक मुक्त हुवेहैं इस ज्ञानमार्ग से मोक्षप्राप्ति की लेशभी शंका न करके निर्भय मार्गमें आरूढ होकर निर्भय ब्रह्मको प्राप्त होने में उद्यत होना आवश्यक है नवीनकल्पित ज्ञानभिन्न मार्गों का त्याग करना चाहिये ॥ ४३ ॥

अस्त्युपायोमहान् कश्चित्संसारभयनाशनः ॥
तेन तीर्त्वा भवाम्भोधिं परमानन्दमाप्स्यसि॥ ४४॥

स्वस्य भाष्यकृत्त्वाद्भाष्यरचनाशैल्यैवात्रापि पूर्वोक्तपद्यं स्वयमेव व्याचष्टे । अस्त्युपायइत्यादिना ।

संसारभयनाशनः जनिजरामृतिभीतिविघातहेतुः । महान् फलाव्यभिचारी उपायः कश्चित् स्वर्गाद्युपायविलक्षणः । अस्ति । तेन उपायेन भवाम्भोधिं तीर्त्वा स्वाज्ञानं विनाश्य परमानन्दं निरतिशयं ब्रह्मानन्दम् । अवाप्स्यसि प्राप्तमेवसन्तमविद्यया तिरोहितमविद्याधिनाशेनाविर्भूतमनुभविष्यसीत्यर्थः ॥ ४४ ॥

अस्ति । उपायः । महान् । कश्चित् । संसारभयनाशनः ॥ तेन । तीर्त्वा । भवाम्भोधिम् । परमानन्दम् । आप्स्यसि॥ ४४॥

संसारभयको नाश करनेवाला अवश्य फलदायक कोई एक स्वर्गादि साधनोंसे विलक्षण साधन है उससे संसारसमुद्रको तरके निरतिशय ब्रह्मानन्दको तुम प्राप्त होवोगे अर्थात् अज्ञान आवरण के निवृत्त होने से निरावरण आत्मा के अनुभवको प्राप्त होवोगे ।

इस श्लोकमें पूर्वश्लोकमें कथन किये अर्थकाही दृढतार्थ पुनर्वर्णन किया है और प्राप्त होने योग्य वस्तुको परमआनन्दरूपता वर्णन करने से परमपुरुषार्थरूपता दिखाई है आनन्दपुरुषार्थ होवैहै और परमआनन्द परमपुरुषार्थ होवैहै ४४

वेदान्तार्थविचारेण जायते ज्ञानमुत्तमम् ॥
तेनात्यन्तिकसंसारदुःखनाशोभवत्यनु ॥ ४५ ॥

प्रतिज्ञातमुपदेष्टव्यमनुक्रामति। वेदान्तार्थेत्यादिना। वेदान्तानां निर्विशेषब्रह्मनिष्ठानामुपनिषद्वचसां योऽर्थस्तात्पर्यगोचरोऽद्वैतात्मा तस्य विचारेण उपक्रमादिषड्विधलिङ्गलक्षिततात्पर्य्यावगतमद्वैतात्मतत्त्वमेव वेदान्तप्रमेयमिति मननेन। उत्तमम् साक्षान्मोक्षोपायभूतम्। ज्ञानम्। साक्षात्कारः जायते "तं त्वौपनिषदं पुरुषं पृच्छामि" इति श्रुतेः। दशमस्त्वमसीति वच्छब्दस्याप्यपरोक्षज्ञानजनकत्वावधारणादिति भावः। तेन आत्मसाक्षात्कारेणानु अव्यवधानेन आत्यन्तिकसंसारदुःखनाशो भवति। आत्यन्तिकः स्वसमानाधिकरणदुःखप्रागभावासमानकालीनोयोदुःखविनाशः स भवति। मुक्तेषु विद्यते ज्ञानवत्सु त्वयि च सम्पन्नज्ञाने सति भविष्यति। "तरति शोकमात्मविदि" तिश्रुतेः संसारपदं सम्भवाभिप्रायेण न तु व्यावर्तकम् असंसारदुःखस्याभावादिति बोध्यम्। अनुपदं ज्ञानमोक्षयोरव्यवधानं सूचयति तथाच श्रुतिः "तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे" तिष्ठन्गायतीति वदयं निर्देश इत्यलम् ॥४५॥

वेदान्तार्थविचारेण। जायते। ज्ञानम्। उत्तमम्॥ तेन। आत्यन्तिकसंसारदुःखनाशः। भवति। अनु॥ ४५ ॥

उपनिषदों का अद्वैतात्मारूप जो अर्थ है उसके विचार करने से साक्षात् मोक्षका साधन साक्षात्काररूप ज्ञान उत्पन्न होवैहै तू दशमहै इस वाक्यवत्, उपनिषदोंसे भी अपरोक्ष ज्ञान उत्पन्न होवैहै उसके अनन्तर तिसि ज्ञानसे संसारदुःख का अत्यन्त विनाश होवै है अर्थात् पुनः दुःखकी प्राप्ति होवै नहीं ॥

१ ब्रह्मात्मैक्यंसाक्षात्कुर्वत्सु। २ संसारदुःखेतिमूले संसारपदं दुःखविशेषणमिति भ्रमं वारयति संसारेति ॥

संसार में सुखका लेशभी नहीं है और कल्पनामात्र सुख है भी तो भी सो परमसुख नहीं है क्योंकि विनाशी और दुःखसमूह करके मिश्रित होनेसे इसीकारण ज्ञानभिन्न यावत् संसारसुखके साधनहैं सो परमपुरुषार्थ के साधन नहीं हैं और मोक्षको पूर्वोक्त रीतिसे परमपुरुषार्थरूपता है क्योंकि उसको अविनाशी होने से और दुःखलेशका संबन्ध न होनेसे उसका साधन ज्ञान वेदान्तविचारसे जो प्राप्त होवै है सोही परमपुरुषार्थ का साधन होने से प्राप्त करने के योग्य है ॥ ४५ ॥

श्रद्धाभक्तिध्यानयोगान्मुमुक्षो-
र्मुक्तेर्हेतून्वक्ति साक्षाच्छ्रुतेर्गीः ॥
योवा एतेष्वेव तिष्ठत्यमुष्य,
मोक्षोऽविद्याकल्पिताद्देहबन्धात् ॥ ४६ ॥

समधिगतं ब्रह्मात्मज्ञानं मोक्षसाधनमिति तथापि तदपि तु नाहेतुकमुदेतीत्यतस्तद्धेतुनिर्वचनमपेक्ष्यते, नच विवेकादयोहेतव उक्ताएवेति वाच्यं तेषां विज्ञानतोदूरे वर्तमानानां साक्षाज्ज्ञानाहेतुत्वादतः साक्षाज्ज्ञानहेतूनाह ।

श्रद्धेति । श्रुतेः " तस्मै सहोवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवेहि " इत्यस्याः कैवल्योपनिषदः श्रुतेः गीः श्रद्धाद्यवेहीत्यन्तं वाक्यम् । मुमुक्षोः जिज्ञासोः । श्रद्धाभक्तिध्यानयोगान् । आस्तिक्यमत्यद्वैतात्मानुसन्धानाविजातीयप्रत्ययरहितसजातीयप्रत्ययप्रवाहान् ।मुक्तेः ब्रह्मात्मनावस्थितेः ब्रह्मविद्यायावा साक्षाद्धेतून्वक्ति । किमेषामन्यतमेनापि ब्रह्मविद्यासिध्यतिनेत्याह योवाइति । यः पुरुषः वै निश्चितम् । एतेषु । पूर्वोपदार्शितेषु तिष्ठत्येव निष्ठां लभते । अमुष्य । तस्य । अविद्याकल्पितात

१ ब्रह्मात्मज्ञानमपि ।

अविद्यया भ्रान्त्या कल्पिताद्देहबन्धात् देहाभिमानात् । मोक्षो-भवत्येवेति शेषः । एतेष्वितिबहुवचनेन संहत्यकारित्वमेषां सूचितम् ॥ ४६ ॥

श्रद्धाभक्तिध्यानयोगान् । मुमुक्षोः । मुक्तेः । हेतून् । वक्ति। साक्षात् । श्रुतेः। गीः॥ यः। वै । एतेषु। एव । तिष्ठति । अमुष्य । मोक्षः । अविद्याकल्पिताद् । देहबन्धात् ॥ ४६ ॥

श्रद्धा भक्ति ध्यान योगसे मोक्ष होताहै ऐसी कैवल्योपनिषद्की श्रुतिका वाक्यहै जिज्ञासुको आस्तिकता अद्वैत आत्मा का विचार और विजातीय प्रत्ययके व्यवधानरहित सजातीय प्रत्ययका प्रवाह इनको ब्रह्मनिष्ठा वा ब्रह्मविद्याके प्रति साक्षात् कारणरूप कहे हैं जो पुरुष निश्चय करके इन पूर्वोक्त साधनों में ही निष्ठा करताहै तिसको भ्रान्तिकल्पित देहाभिमानसे निवृत्ति अवश्य होवे है ॥ ४६ ॥

अज्ञानयोगात्परमात्मनस्तव,
ह्यनात्मबन्धस्ततएव संसृतिः ॥
तयोर्विवेकोदितबोधवह्नि-
रज्ञानकार्यं प्रदहेत्समूलम् ॥ ४७ ॥

ज्ञाननिवर्त्यत्वसिद्ध्यर्थं बन्धस्याज्ञानसम्बन्धसाध्यत्वं साधयति। अज्ञानयोगादिति ।

वस्तुतः परमात्मनएव सतस्तवानात्मबन्धोऽनात्मनि जडे बन्धोऽहं ममेति मिथ्याभिमानः सचाज्ञानयोगादनाद्यविद्यासंसर्गात्सम्भूतस्ततश्च संसृतिः। जनिमृतिवितातिः। तयोरात्मानात्मनोर्विवेकेन वक्ष्यमाणलक्षणेनोदितोयोबोधोवह्निरद्वैतात्मबोधकृष्णवर्त्मा समूलं साविद्यम् । अज्ञानकार्यम् । आत्मानात्माध्यासलक्षणं शुष्ककाननम् । प्रदहेत् । भस्मसाद्भावयेदित्यर्थः ॥ ४७ ॥

१अज्ञानयोगात् । २ जीवब्रह्मैक्यसाक्षात्कारलक्षणोऽग्निरित्यर्थः ॥

अज्ञानयोगात् । परमात्मनः । तव । हि । अनात्मबन्धः । ततः । एव । संसृतिः ॥ तयोः । विवेकोदितबोधवह्निः । अज्ञानकार्यम् । प्रदहेत् । समूलम् ॥ ४७ ॥

वास्तवसे परमात्माका स्वरूपही तू है तिस तुमको जड देहादिमें यह मैं हूं यह मेराहै ऐसा मिथ्या अभिमानरूप बन्ध अज्ञानके संबन्धसे उदय होवै है तिससे ही जन्मादि रूप संसार होवै है तिनै आत्मा अनात्माके विवेकसे उदय हुवा जो ज्ञानरूप अग्निहै सो मूलाज्ञानसहित अहंता ममता अभिमानरूप सूखे तृणोंको भस्म करे हैं ॥ ४७ ॥

शिष्यउवाच ।

कृपया श्रूयतां स्वामिन् प्रश्नोयं क्रियते मया ॥
यदुत्तरमहं श्रुत्वा कृतार्थः स्यां भवन्मुखात् ॥४८॥

एवं महादुर्लभलाभकरं कारुणिकगुरुसंगममवगम्य बन्धविध्वंस आत्मब्रह्मैक्यविज्ञानमात्रप्राप्यइत्युपश्रुत्य बन्धादिविशेषस्वरूपं जिज्ञासमानोजिज्ञासुर्जगादेत्याह शिष्यउवाचेति ।

हेस्वामिन् अयं वक्ष्यमाणः प्रश्नोजिज्ञासा मया क्रियते इच्छायाः कृतिविषयत्वासम्भवाल्लक्षणया प्रकाश्यतइत्यर्थः । कृपया श्रूयतां शब्दः श्रुतोऽर्थं श्रावयेतिवत्साधु । प्रश्नशब्दस्य तद्बोधकवाक्यलक्षणायां क्रियतइत्यस्योच्यतइत्यर्थकरणे तु यथाश्रुतमेव साधु । यस्य प्रश्नस्य भवन्मुखादुत्तरं श्रुत्वाऽहंकृतार्थः कृतकृत्यः स्यां भविष्यामि । अनेन प्रश्नस्य परमार्थसम्बन्धित्वेनोपेक्षाऽपाकृतेति बोध्यम् ॥ ४८ ॥

शिष्यः । उवाच ॥ कृपया । श्रूयताम् । स्वामिन् । प्रश्नः । अयम् । क्रियते । मया ॥ यदुत्तरम् । अहम् । श्रुत्वा । कृतार्थः । स्याम् । भवन्मुखात् ॥ ४८ ॥

शिष्य कहे है । हेस्वामिन् ! मैं इस प्रश्नको करताहूं आप

कृपाकरके श्रवण करें । आपके मुखसे जिस प्रश्नके उत्तरको श्रवण करके मैं कृतार्थ होजाऊंगा ॥ ४८ ॥

कोनाम बन्धः कथमेषआगतः,
कथं प्रतिष्ठाऽस्य कथं विमोक्षः ॥
कोऽसावनात्मा परमः कआत्मा,
तयोर्विवेकः कथमेतदुच्यताम् ॥ ४९ ॥

शिष्यः प्रष्टव्यमर्थं प्रतिज्ञातं प्रकाशयति । कोनामेति । नामप्रसिद्धोबन्धः कएषबन्धः कथं केनप्रकारेणात्मनि आगतः प्राप्तः आत्मनोनित्यमुक्तत्वश्रुतेरिति भावः । अस्य बन्धस्य प्रतिष्ठा स्थितिःकथं विमोक्षोनिवृत्तिश्च कथम् अनात्मा असौ पूर्वमभिहितः कः परमात्मा च कः तयोरात्मानात्मनोर्विवेकः कथम् । एतत् प्रष्टव्यजातमुच्यताम् विविच्य वक्तव्यमित्यर्थः ॥ ४९ ॥

कः । नाम । बन्धः । कथम् । एषः । आगतः । कथम् । प्रतिष्ठा । अस्य । कथं । विमोक्षः ॥ कः । असौ । अनात्मा । परमः । कः । आत्मा । तयोः । विवेकः । कथम् । एतत् । उच्यताम् ॥ ४९ ॥

प्रसिद्ध बन्ध कौनहै यह बन्ध किस प्रकार आत्मामें प्राप्त हुवाहै आत्माको नित्य मुक्त होनेसे उसमें बन्धका असम्भवहै यह तात्पर्य है इस बन्धकी स्थिति कैसे होवेहै और विमोक्ष अर्थात् इस से छूटना कैसे होगा सो अनात्म पदार्थ कौनहैं और परम आत्मा कौनहै और उन आत्मा अनात्माका विवेक कैसे होवेहै यह सर्व जो कुछ मैंने पूछाहै इसका उत्तर दीजिये ॥ ४९ ॥

श्रीगुरुरुवाच ।

धन्योसि कृतकृत्योऽसि पावितं ते कुलं त्वया ॥

यदविद्याबन्धमुक्त्या ब्रह्मीभवितुमिच्छसि ॥५०॥

ब्रह्मविद्यासंबन्धिप्रश्नप्रकाशनात्प्रशस्ततां शिष्यस्यालक्ष्यसन्तुष्टः श्रीगुरुः शिष्यमभिनन्दयति । धन्योसीति ।

भोविनेय धन्यः कृतनिष्कामपुण्योऽसि विद्यसे कृतकृत्यः कृतकर्तव्यःपूर्णकामोऽसि भविष्यासि साम्प्रतमेवावर्तमानसामीप्ये भविष्यति लट्।एतदर्थमेवासीति पुनरुक्तम्पदम्। त्वया प्राप्तब्रह्मविद्येन ते कुलं स्वशिष्यसम्प्रदायप्रविष्टं सुजनवृन्दं विद्यावंशस्यैवात्र ग्रहणयोग्यत्वात् । "नास्याब्रह्मवित्कुले भवति"इति श्रुतावप्येवमेव व्याख्येयत्वात् कुलपदस्येति बोध्यम्।प्रशंसापरत्वे त्वस्य जन्मवंशग्रहोपि युज्यते। प्रतिज्ञासिद्धौ हेतुमुपादत्ते। यदविद्याबन्धमुक्त्या यद्यतोऽविद्यारूपोयोबन्धस्तस्य निवृत्त्या " अविद्याऽस्तमयोमोक्षः सा च बन्धउदाहृतः"इत्युक्तेः।इत्थंभावे तृतीया ब्रह्मीभवितुमिच्छसि । यदा ब्रह्मबुभूषाया एवैतादृशं माहात्म्यं तदा किमु वक्तव्यं ब्रह्मभावावाप्तेरित्याभिप्रायेणेच्छापदम् । अर्थस्त्वतिरोहितः ॥५० ॥

श्रीगुरुः । उवाच ॥ धन्यः।असि । कृतकृत्यः । असि। पावितम् । ते । कुलम् । त्वया ॥ यदविद्याबन्धमुक्त्या । ब्रह्मीभवितुम् । इच्छसि ॥ ५० ॥

श्रीगुरुजी कहे हैं । तुम निष्काम कर्मसे पुण्यात्मा हो पूर्णकाम हो तुमको ब्रह्मविद्या प्राप्त होगी उसीसे तुमने अपने कुलको पवित्र करदियाहै । जिस कारण अविद्यारूप बन्ध से छूटके ब्रह्मरूप होने की तुम इच्छाकरतेहो ब्रह्मजिज्ञासासे ही तुम कृतार्थ हो और ब्रह्मकी प्राप्तिसे कृतार्थ होने में तो कहना ही क्या है॥ ५० ॥

ऋणमोचनकर्तारः पितुः सन्ति सुतादयः ॥
बन्धमोचनकर्ता तु स्वस्मादन्योन कश्चन ॥ ५१ ॥

तदेवं ब्रह्मविदा पुत्रेण कुलमुपकृतं पवित्रतामालम्ब्यते ब्रह्मवि-

१ शिष्य ।

च्छायान्तु स्वप्रयत्नमन्तरा न कस्यापि कुलीनस्योपयोगइति नायं तैरुपकार्योभवतीत्याह । ऋणमोचनेति ।

पितुर्जनकस्य ऋणमोचनकर्तारऋणस्यान्यतोगृहीतस्यस्वयमदत्तस्य धनस्य मोचनमुत्तमर्णाय तदर्पणं तस्य कर्तारः सम्पादनकुशलाः सुतादयः पुत्रादयःसन्ति विद्यन्ते लोके । अन्यत्रैवं परकर्तव्यस्य परसाध्यत्वेपि बन्धमोचनकर्तातु। तुशब्दःपूर्वस्मादतिवैलक्षण्यं सूचयति बन्धनिवृत्तौ प्रयत्नवांस्तु स्वस्मादन्योमुमुक्षोभिन्नः कश्चन सुतः पिता वा न विद्यते तस्मान्न ब्रह्मविदि कुलीनानामुपकारोब्रह्मविदस्तु सर्वत्रोपकारः कुलीनेष्विति महामहिमाब्रह्मबोधः । तस्मिन्ननन्यतनसम्पाद्ये न प्रमाद्येतेति भावः॥ ५१ ॥

ऋणमोचनकर्तारः । पितुः । सन्ति । सुतादयः ॥ बन्धमोचनकर्ता । तु । स्वस्मात् । अन्यः । न । कः । चन ॥५१॥

पिताने जिस पुरुषसे धनादि कर्जा लिया हो उस धनादिको देकर पिताके ऋणको दूर करने में समर्थ पुत्रपौत्रादि विद्यमानहैं परन्तु अपने जन्ममरणादिबन्धके निवृत्त करनेवाला अपने से भिन्न कोई भी नहीं है किन्तु आपही उद्यम करके गुरूपदेशादि द्वारा ज्ञानको प्राप्त होकर अपने बन्धको दूर करे है ॥ ५१ ॥

मस्तकन्यस्तभारादेर्दुःखमन्यैर्निवार्यते ॥
क्षुदादिकृतदुःखन्तु विना स्वेन न केनचित्॥५२॥

अत्रस्वेनैवबन्धापनोदे दृष्टान्तमाचष्टे । मस्तकन्यस्तेत्यादिना ।

मस्तकन्यस्तभारादेः शिरसि निहितकाष्ठभारादितोजन्यं दुःखं क्लेशोऽन्यैः शिरसः करावलम्बादिना भारावरोहकैर्दयालुभिःसुतादिभिर्वा निवार्यतेऽपसार्यते तु पुनः क्षुदादिकृतदुःखं क्षुत्पिपासाजनितं दुःखं स्वस्य स्वेनान्नं पानीयं च अश्नता पिबता विना केनचित् स्वभिन्नेनोपशान्तक्षुत्पिपासेनान्नं पानीयं चाश्नता पिबता

१ स्वकुलवर्तिकुटुम्बिनः । २ कुलीनैः । ३ पञ्चम्यन्तामिदम् ॥

वा न निवार्यते इति सुप्रसिद्धतरम्। अन्यथैकस्मिन्भुक्तभोज्ये सर्वे भुक्तभोज्याभवेयुरिति बोध्यम् । एवमन्यास्वपि तथाविधासु हदनमूत्रणादिषु क्रियासु बोद्धव्यम् । तथाच यथा क्षुत्पिपासादिजनितदुःखनिवृत्तौ स्वयत्नोविजयते तथा भवबन्धनिवृत्तावपीति भावः ॥ ५२ ॥

मस्तकन्यस्तभारादेः । दुःखम् । अन्यैः । निवार्यते ॥ क्षुदादिकृतदुःखम् । तु । विना । स्वेन । न । केनचित् ॥ ५२ ॥

शिरमें रखेहुवे काष्ठके भारादिसे उत्पन्न हुवे दुःखको दूसरे पुरुष भार उतरवाकर वा आप उठाकर अन्यपुरुष के दुःख को निवारण करते हैं परन्तु भूख वा प्यास के दुःखकी अपने भोजन खाने और पानी पीनेसे ही निवृत्ति होवैहै अपने विना खाने पीने अन्यपुरुपके खाने पीनेसे वा आशीर्वादादि से नहीं निवृत्ति होती ॥ ५२ ॥

पथ्यमौषधसेवा च क्रियते येन रोगिणा ॥
आरोग्यसिद्धिर्दृष्टास्य नान्यानुष्ठितकर्मणा ॥५३॥

बन्धविध्वंसने दृष्टान्तमभिधाय ब्रह्मभावापत्तौ दृष्टान्तमाह । पथ्यमित्यादिना । येन रोगिणा कफपित्तवातवैषम्यनिमित्ततत्तद्गदपराभूतस्वास्थ्येन पथ्यं हितमितमेध्याशनम् । औषधसेवा तत्तद्गदप्रतीकारकरभिषज्भक्षणमर्दनादिकम् । च क्रियते अनुष्ठीयते अस्य तस्य तथानुतिष्ठतः । आरोग्यसिद्धिः स्वस्थता दृष्टा । अन्यानुष्ठितकर्मणा सेवितपथ्यौषधस्यान्यपुरुषकृततत्तत्क्रियया न दृष्टा । तथाच यथा स्वस्य स्वस्थता स्वस्वरूपभूतैव रोगादिना तिरस्कृता पथ्यौषधसेवनादिना स्वयमनुष्ठितेन रोगापनयेऽभिव्यज्यते । तथा स्वस्य ब्रह्मात्मतापि तमोरूपानाद्यविद्यारोगतिरस्कृता स्वयत्नसंपादितबोधौषधसमाधिपथ्यसंपादनेनाविद्यानिवृत्तावभिव्यज्यते इति भावः ॥ ५३ ॥

पथ्यम्। औषधसेवा। च। क्रियते। येन। रोगिणा॥ आरोग्यसिद्धिः। दृष्टा। अस्य। न। अन्यानुष्ठितकर्मणा॥ ५३॥

बन्धविध्वंसनमें दृष्टान्त पूर्व कहाहै यहां ब्रह्मभावकी प्राप्तिमें दृष्टान्त कहेहैं॥ कफ पित्त वातकी विषमतानिमित्तक रोगवाले जिस पुरुषने रोगनिवृत्ति हेतु औषध और हित मित पथ्य भोजनका सेवन करीता है उसको रोगकी निवृत्ति दीखने में आवैहै अन्य पुरुषके औषध पथ्यसे अन्यका रोग निवृत्त होवै नहीं तैसेही अन्यके यत्नसे ब्रह्मभावकी प्राप्ति होवै नहीं किन्तु जैसे औषधसेवनसे रोगनिवृत्तिरूप स्वस्थता अपनेको प्राप्त होवैहै वैसेही ब्रह्मज्ञानरूप औषधसे अविद्यारोगकी निवृत्ति होनेसे स्वरूपस्थितिरूप मुक्ति अपने यत्नसे होवैहै॥ ५३॥

वस्तुस्वरूपं स्फुटबोधचक्षुषा,
स्वेनैव वेद्यं न तु पण्डितेन॥
चन्द्रस्वरूपं निजचक्षुषैव,
ज्ञातव्यमन्यैरवगम्यते किम्॥ ५४॥

मोक्षे दृष्टान्तद्वयम्प्रदर्श्य तदुपाये ब्रह्मात्मबोधे दृष्टान्तमुपादत्ते। वस्तुस्वरूपमिति। वस्तुस्वरूपम्। सर्वबाधावध्यध्यात्मब्रह्मस्वरूपम्। स्वेनैव। आत्मनैव प्रयतमानेन मुमुक्षुणा। स्फुटबोधचक्षुषा असंदिग्धाविपर्यस्तात्मसाक्षात्कारेण "पश्यन्ति ज्ञानचक्षुष" इति स्मृतेः। वेद्यम्। साक्षात्करणीयम्। पण्डितेन। स्वान्येन ब्रह्मविदा गुरुणा ब्रह्मादिगुरुणापि वा स्वप्रयत्नमन्तरेण न तु वेदनसंपादनमन्यस्य संभवति। यथा चन्द्रस्वरूपम्। अद्वैतप्रकृष्टप्रकाशलक्षणम्। निजचक्षुषैव निर्दोषस्वकीयनयनेनैव। ज्ञातव्यम्। द्रष्टव्यम्। अन्यैरन्यचक्षुर्भिरनेकैरपि अवगम्यते किंनावगम्यते। किम् आक्षेपोर्थः स्वेन स्वेकेनाप्यवगम्यते। अतः पूर्वत्र चक्षुषेत्येकवचनमिति भावः॥ ५४॥

वस्तुस्वरूपम् । स्फुटबोधचक्षुषा । स्वेन । एव । वेद्यम् । न । तु । पण्डितेन ॥ चन्द्रस्वरूपम् । निजचक्षुषा । एव । ज्ञातव्यम् । अन्यैः । अवगम्यते । किम् ॥ ५४ ॥

मोक्षमें दृष्टान्त दो दिखाये हैं यहां मोक्षसाधन ज्ञानमें दृष्टान्त कहते हैं–सर्व दृश्यके बाधका अवधि आत्मा का ब्रह्मस्वरूप प्रयतन वाले मुमुक्षुने ही संशयविपर्ययशून्य आत्मसाक्षात्कारसे अपरोक्षीकृत होवैहै और स्वभिन्न ब्रह्मवेत्ता गुरु ने भी स्वप्रयत्नसे विना ज्ञानका संपादन नहीं किया इसमें दृष्टान्त दिखावैहै चन्द्रमाका स्वरूप अपने निर्दोष नेत्रों करके ही जाना जाताहै अन्य करके नहीं जाना जाता अर्थात् अन्य अनेक पुरुषोंके अनेक नेत्रों करके भी नहीं दीखता अपने एक नेत्र करकेभी चन्द्रमाका स्वरूप प्रकाश होवैहै वैसे आत्माका प्रकाश भी अपनेही प्रयत्नसे होवैहै ॥ ५४ ॥

अविद्याकामकर्मादिपाशबन्धं विमोचितुम् ॥
कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि ॥ ५५ ॥

उपक्रान्तमुपसंहरति ।

अविद्याकामकर्मादीति । आत्मानं साधनाभ्यासे समुद्युक्तं स्वं विना कल्पकोटिशतैरपि । अतिमहताकालेन प्रतीक्षणेपि । अविद्याकामकर्मादिपाशबन्धम् । अविद्याकामकर्मादिरूपपाशेन सूत्रेण कृतं बन्धम् । दुःखं विमोचितुम् । विमोक्तु विनाशयितुम् । कः शक्नुयान्नकोपि ब्रह्मापि वा इत्यर्थः । सम्प्रत्येतादृशदयालोरभावेपि कालान्तरे कल्पान्तरे कश्चिद्बन्धमोक्ता मुमुक्षूणांस्वयमप्रयतमानानां भविष्यतीत्याशङ्कायाउत्तरं कल्पकोटिशतैरपीति ॥ ५५ ॥

अविद्याकामकर्मादिपाशबन्धम् । विमोचितुम् ॥ कः । शक्नुयाद् । विना । आत्मानम् । कल्पकोटिशतैः । अपि ॥ ५५ ॥

अपने उद्यमसे विना सौकोटि कल्पोंकरके भी अविद्या

कामकर्मादि फांसीकृत दुःखरूप बन्धको विनाश करने में कौन समर्थ है अर्थात् ब्रह्माभी अपने उद्यमसे विना अपने बन्धनिवृत्ति करने में समर्थ नहीं फिर दूसरें किसीको कहना ही क्या है ॥ ५५ ॥

न योगेन न सांख्येन कर्मणा नो न विद्यया ॥
ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा ॥५६॥

इतरनिषेधेन प्रकृतमनुक्रामति ।

न योगेनेत्यादि। योगेन । हठयोगेन कायकष्टमात्रफलेन सिद्धिलब्धिकामनयानुष्ठितेन । सांख्येन । प्रकृतिपुरुषान्यत्वज्ञानेन । कर्मणा सकामेन दानादिना। विद्यया । वादिगृहीतपक्षप्रत्याख्यानस्वगृहीतपक्षस्थापननिमित्तशास्त्रस्फूर्त्या मोक्षोनसिध्यति प्रत्येकं संहृत्य वा नैषां मोक्षसाधनत्वमिति सूचनाय नकारबाहुल्यम् । तथाऽन्यथा। उपासनादिनापि न मोक्षः किन्तु ब्रह्मात्मैकत्वबोधेन मोक्षः ।"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये" ति श्रुत्यर्थोऽत्र वर्णितः ॥ ५६ ॥

न । योगेन । न। सांख्येन । कर्मणा । नो । न । विद्यया ॥
ब्रह्मात्मैकत्वबोधेन । मोक्षः । सिध्यति । न । अन्यथा ॥५६॥

हठयोग करके जिससे केवल कायाको कष्ट मात्र होवै है तथा प्रकृति पुरुषके भेद ज्ञान करके दानादि सकाम कर्मों करके तथा केवल शास्त्रोंके पठनमात्र करके मोक्ष नहीं सिद्ध होवै है तथा उपासनादि करके भी मोक्ष नहीं सिद्ध होवै है किन्तु जीव ब्रह्मके एकत्व ज्ञान करके मोक्ष प्राप्त होवै है और प्रकार नहीं ॥ ५६ ॥

वीणायारूपसौन्दर्य्यं तन्त्रीवादनसौष्ठवम् ॥
प्रजारञ्जनमात्रं तन्न साम्राज्याय कल्पते ॥५७॥

एषां विनाशिफल्गुसुखसाधनानां नाविनाशिपरमानन्दमोक्षहेतुत्वमित्यत्र दृष्टान्तं प्रदर्शयति ।

वीणायाइति । यथा हि वीणायावादनसाधनभूतायास्तन्त्र्या रूपसौन्दर्य्यम् । तथा तन्त्रीवादनसौष्ठवम् । वीणाशब्दस्य श्रोत्राभिरामनिमित्तत्वम् । प्रजारञ्जनमात्रं श्रोतृपुरुषमनःप्रसादहेतुमात्रमेव तत् पूर्वमुपदर्शितम् । साम्राज्याय सम्राड्भावाय न कल्पते साधनं न भवति । किन्तु यथा महापुण्यैरेवोदितैः साम्राज्यलाभस्तथा आत्मबोधहेतुभिरपूर्वपुण्यैरेव बोधसाम्राज्यलाभ इति साम्राज्यपदस्यारस्यम् ॥ ५७॥

वीणायाः[1] । रूपसौन्दर्य्यम्[2] । तन्त्रीवादनसौष्ठवम्[3] ॥ प्रजारञ्जनमात्रम्[4] । तत् । न । साम्राज्याय । कल्पते ॥ ५७ ॥

जैसे वीणा आदि जो बाजे हैं उनका सुन्दररूप होना तथा उसकी तारोंका शब्द कर्णइन्द्रियके आनन्दका हेतु है सो श्रोता पुरुषोंके मनके हर्षका निमित्तमात्र है सो चक्रवर्ती राज्यकी प्राप्तिके लिये समर्थ नहीं होवै है क्योंकि उसको राज्यकी प्राप्तिमें असाधन होने से । चक्रवर्ती राज्य जैसे महापुण्योंसे प्राप्त होवैहै तैसे ही ब्रह्मज्ञानरूप चक्रवर्ती राज्य भी महापुण्योंसे प्राप्त होवै है ॥ ५७ ॥

वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलम् ॥
वैदुष्यं विदुषां तद्वद् भुक्तये न तु मुक्तये ॥ ५८ ॥

दृष्टान्तसिद्धमर्थन्दर्शयति ।

परापश्यन्तीमध्यमावैखरीभेदभिन्नासु चतसृषु वाक्षु[1] वैखरी । श्रोत्रनिर्ग्राह्या वर्णसामान्यविशेषात्मिका चतुर्थी वाग् वाणी शब्दझरी वाचाचलमुखबिलान्निःसरन्ती दशदिग्भूप्रदेशेषु प्रसरन्ती तटस्थकर्णकुहराणि प्रविशन्ती कथचित् किञ्चिदुपयुज्यमाना प्रायः

१ चत्वारि वाक्परिमितापदानि तानि विदुर्ब्राह्मणायेमनीषिणः गुहात्रीणि निहितानेङ्गयन्ति तुरीयां वाचोमनुष्या वदन्तीति श्रुतेः ॥

पुरुषार्थानुपयोगिनी क्रियाकारकफलवाचिशब्दद्वारांप्रवाहविशेषापरपर्याया शब्दस्रवन्ती वृथेत्यभिप्रायः॥ यद्यप्युच्चैर्विराजमानः शब्दवारिप्रवाहाश्रयोवावदूकाद्विजनतिर्यग्भिर्निषेव्यते तथापि नैतावता तस्य हृदयग्रन्थिकाठिन्यं भिद्यते तद्भेदोहि विद्याफलं तदभावादकिञ्चित्करी शब्दझरीति बोध्यम्। शास्त्रव्याख्यानकौशलम्। गूढार्थसूत्रादीनाम्। भाष्यविवरणादिरचनचातुर्य्यम्। वैदुष्यं। सर्वदर्शनद्रष्टृत्वादि। विदुषां लौकिकपण्डितानां शास्त्रश्रावणजीवनानां कुटुम्बभरणे व्यग्रचेतसामवधीरितविचाररत्नानां भुक्तये। भोगकरं कुटुम्बभरणमात्रोपयोगि सर्वम्। मुक्तये भवबन्धविमोक्षकरम्। तु न भवति विचारचातुर्य्याभावेनाद्वैतात्मनिष्ठायास्तेष्वभावादिति विचारस्य हेतुत्वं सव्यतिरेकमुक्तमग्रेविद्ययेत्युक्तस्यायं प्रपञ्चः ५८

वैग्। वैखरी। शब्दझरी। शास्त्रव्याख्यानकौशलम्॥ वैदुष्यम्। विदुषाम्। तद्वत्। भुक्तये। न। तु। मुक्तये॥ ५८॥

परा पश्यन्ती मध्यमा वैखरी इस प्रकार वाणीके चार प्रकारके भेदहैं उनमें जो मनुष्य उच्चारण करतेहैं सो वैखरी नामक वाणीहै सो वैखरी वाणी शब्दोंको अखण्ड प्रवाह दिखानेमें समर्थ हुई तथा गूढार्थक सूत्रादिको भाष्यादि टीका बनाने में चतुराई तथा सर्वशास्त्रोंमें निपुणता यह पूर्वोक्तवस्तु कुम्टुबपालनमें तत्पर जीवनलोभी लौकिक पण्डितोंको कुटुम्बका वा अपना पेटभरण मात्रका ही उपयोगीहै परन्तु मोक्षके लिये नहीं है क्योंकि विचारनिपुणता की धारणा न होनेसे केवल दुकानवत्, व्यवहारमात्रका उपयोगी होवैहै ॥ ५८ ॥

अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला॥
विज्ञातेपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला॥ ५९॥

किन्तर्हि तेषां लौकिकविदुषां शास्त्राधीतिर्वाणिज्यायते न चेदं युक्तं पिचण्डपोषणस्य प्रकारान्तरेणापि कपिलकणादादिवत्सम्भवेन शास्त्राधीतेरिदम्फलत्वे निष्फलत्वापत्तेः नहि वराटकवाणि-

ज्यसाध्यं साम्राज्येन साधयन् साधीयान् साधुभिरुच्यते इत्यतआह ।

अविज्ञाते इति । परे । अविद्यातीतेतत्त्वेऽबाध्यब्रह्मात्मनि। अविज्ञाते शास्त्रविचारतोऽसाक्षात्कृते । शास्त्राधीतिः । गुरुमुखाद्वेदाध्ययनम् । निष्फलातु । निष्फलैव । शास्त्रश्रावणादिनापिचण्डपोषणपरायणस्य लोकरञ्जनार्थंन्नानालौकिकदृष्टान्तोपाख्यानानि वितन्वानस्य शास्त्रविचारानभिज्ञस्य लौकिकपण्डितस्य कुटुम्बासक्तचेतसोब्रह्मबोधलक्षणदुर्लभफलालाभेन निष्फलैव, नहि सुधाम्प्रयत्नतः स्वर्गादानीय तत्सेचनया स्वाङ्गणसन्तापमुपशमयतः सुधाफलायते इति भावः। अथ यदि विचारचातुरीरहितेषु शास्त्रनैष्फल्यं तर्हि तत्समानं विचारचतुरेष्वपि फलसिद्ध्युत्तरमप्यहर्दिवं शास्त्राण्येवचिन्तयत्सु बोधान्तरानुदयेन शास्त्रनैष्फल्यस्यावश्यम्भावादतआह । विज्ञातेपि परे तत्त्वे विज्ञातेपि शास्त्रविचारेण साक्षात्कृतेपि तदुत्तरमपि वेदान्तशास्त्रविचारेष्वेव व्यापृतस्य विदुषोपि शास्त्राधीतिस्तु । तुशब्दः पूर्वस्माद्वैलक्षण्यमाख्याति पूर्वत्र फलानुत्पत्त्या नैष्फल्यमत्र तु फलसिद्ध्युत्तरकालीनशास्त्राधीतेः फलाजनकत्वं प्रथमाधीतेरेव मोक्षलाभेन कृतार्थस्य परमार्थविदुषः फलान्तराभावेन शास्त्राधीतेर्विनोदमात्रत्वादितिभावः।तथाच विचारचतुरेषु विद्वत्सु शास्त्राधीतिः प्रथमा निष्फला निष्पन्नफला तदुत्तरा तु फलान्तराभावाद्विनोदमात्रफलैव न मोक्षान्तरफलेति निष्फला तथा च विचारस्य मोक्षमापकत्वेन सार्थकत्वान्न व्यभिचारः । यदिमोक्षान्तरं सम्भवेत्तदा विज्ञाततत्त्वकृतशास्त्रविचारोपि फलं प्रसूयेत तदभावान्न तथेति न विचारापराधइति भावः ॥ ५९ ॥

अविज्ञाते । परे । तत्त्वे । शास्त्राधीतिः । तु । निष्फला ॥ विज्ञाते । अपि । परे । तत्त्वे । शास्त्राधीतिः । तु । निष्फला ॥ ५६ ॥

जो कभी अविद्यासे परे परमात्माके वास्तव स्वरूपका साक्षात्कार न हुवा तौ लौकिकपण्डितोंका शास्त्रोंका गुरुमुखसे पठन करना निष्फल है क्योंकि उदरपोषणमात्रका तौ

व्यापार सेवादिसे भी सम्भव है । और अविद्यासे पर परमात्माके वास्तव स्वरूपके साक्षात्कारसे[९] बाद भी[१०] जो फिर[११] २ शास्त्रोंका पठन है सोभी[१२] निष्फल[१३] है आत्मबोध प्रथम ही होगयाहै और अन्यकर्तव्य कुछ रहा ही नहीं है फिर शास्त्रपठन क्या ॥ ५९ ॥

शब्दजालं महारण्यं चित्तभ्रमणकारणम् ॥
अतः प्रयत्नाज्ज्ञातव्यं तत्त्वज्ञैस्तत्त्वमात्मनः ॥६०॥

विचारमन्तरा न केवलं लौकिकपण्डितानां शास्त्रनैष्फल्यं किन्तु चित्तविभ्रमः पुरुषार्थभ्रंशश्च भवतीत्याह । शब्दजालमिति । शब्दजालम् नानाशास्त्रमाविचारितं गृहीतपदपदार्थमप्यदृष्टविचारमार्गाणां पण्डितानां महारण्यमिव वर्त्तमानं चित्तभ्रमणकारणं भवति । यथा महारण्यमज्ञातमार्गमनभिज्ञं पण्डितंमन्यं कण्टकगर्तादिना तोदयति तथा शास्त्रमपि विचारमार्गानारूढं पण्डितमूढं प्रति पूर्वापरविरोधादिकण्टकगर्तानर्थादिना विभ्रमयति पुरुषार्थाच्च भ्रंशयतीत्यर्थः । यतोविचारमन्तरेण शास्त्रपीयूषं हालाहलायते ततस्तत्त्वज्ञैः विचारविद्भिः आत्मनः प्रतीचस्तत्त्वं याथात्म्यं प्रयत्नात् । भृशं विचाराभ्यासात् ज्ञातव्यं साक्षात्कर्तव्यम् ॥६०॥

शब्दजालम्[१] । महारण्यम्[२] । चित्तभ्रमणकारणम् ॥ अतः[४] । प्रयत्नात्[५] । ज्ञातव्यम् । तत्त्वज्ञैः । तत्त्वम् । आत्मनः ॥६०॥

विना विचार शास्त्रका पठन महाअनर्थका हेतु होवै है ऐसा कहे हैं ॥ जैसे महावनमें विना मार्गज्ञानसे पुरुषको महाभ्रम होवै है तैसे ही विचारमार्गमें अनारूढ लौकिक पण्डितोंको शास्त्रोंके परस्पर विवाद शब्दोंका समूह महावनरूप है ईश्वर है वा नहीं प्रकृतिसे जगत्की उत्पत्ति है वा परमाणुगणसे जगत् सत्य है वा मिथ्याहै आत्मा एक है वा

नाना है जीव ब्रह्मका भेदहै वा नहीं ॥ इत्यादि अनेक प्रकार की चित्तकी भ्रान्ति अर्थात् संशयका हेतुरूप होवै है इसकारण विचारकुशल पुरुषोंने विचारमें यत्न करके आत्माका वास्तवस्वरूप और जगत्का मिथ्यास्वरूप जानना उचित है जिससे शास्त्रोंका पठन सफल होवै ॥ इसप्रकार विना विचार शास्त्रकी निष्फलता होवैहै और महाअनर्थकी हेतुता होवै है और विचारसे ही शास्त्र सफल होवै है और परमार्थ का हेतु होवै है ॥ ६० ॥

अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना ॥
किमु वेदैश्च शास्त्रैश्च किमु मन्त्रैः किमौषधैः ॥ ६१ ॥

अज्ञाननिवृत्तिर्न ब्रह्मज्ञानमन्तरेति फलितमाह ।

अज्ञानसर्पदष्टस्येति।आत्माज्ञानलक्षणाशीविषोत्पादिताहं ममाध्यासविषाविष्टसर्वाङ्गसङ्गिजीवस्य ब्रह्मज्ञानौषधं आत्मब्रह्मज्ञानलक्षणसिद्धभेषजंविनाऽन्तरेण वेदैः शास्त्रैश्चाधीतैरविचारापराधेनानुत्पादितब्रह्मबोधैः किमु न किमपि फलितम्। तथा मन्त्रैःरहस्यजपैः किमेवमौषधैः चन्द्रोदयादिभिः किं न किमपि फलति। यद्यपि मन्त्रैर्जपितैराराधितो देवस्तत्प्रकाश्यः प्रसीदति चन्द्रोदयादिभिश्च धातुदार्ढ्येन दीर्घायुस्सन्नाल्पकालेन म्रियते तथापि नामृतत्वप्राप्तिर्विना बोधोदयं जन्मबीजादाहादिति भावः। आयुषःप्रारब्धकर्मनियतत्वाद्दीर्घत्वं चाल्पत्वं च न स्वायत्तमिति मुनिः ॥ ६१ ॥

अज्ञानसर्पदष्टस्य[1] । ब्रह्मज्ञानौषधम्[2] । विना[3] ॥ किमु । वेदैः[4] । च । शास्त्रैः । च । किमु । मन्त्रैः । किम् । औषधैः ॥ ६१ ॥

अज्ञानकी निवृत्ति ज्ञानविना अन्यसाधनोंसे होवै नहीं ऐसा कहेहैं ॥ अज्ञानरूप सर्पकरके जिसको अहंकारादि विषका आवेश हुवा है उसको ब्रह्मज्ञानरूप सिद्धऔषध विना विचारसे शून्य पुरुषने पठन किये वेदों करके वा शास्त्रों करके

क्या होता है। और एकान्त स्थानमें बैठकर जपेहुवे मन्त्रोंसे क्या होताहै और चन्द्रोदयादि औषधों करके क्या होता है यद्यपि चन्द्रोदयादि औषधसेवनसे धातुसम होनेसे धातुवैषम्य निमित्तक रोगकी निवृत्ति द्वारा पूर्णायु भोगनेसे अकालमृत्यु नहीं होती तथापि अमृतत्वरूप निरतिशय मोक्ष तो ब्रह्मज्ञानसे ही होवै है और आयुकी पूर्णताभी प्रारब्धकर्मके अधीनहै बिना प्रारब्धकर्म भोगे शरीरका अन्त नहीं होता इस कारण आयुमें औषधका उपयोग कहना भी अनुचितहै इसी हेतुसे लिखाहै कि आयुके शेष रहनेपर ही औषध करना उपयोगी होवैहै बिना आयुशेषसे औषध किया हुवा भी व्यर्थ होवै है ॥ ६१ ॥

न गच्छति विना पानं व्याधिरौषधशब्दतः ॥
विनाऽपरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥ ६२ ॥

ननु लौकिकपण्डिताः "ब्रह्मास्मि शुद्धमेवाहं त्वं चासि ब्रह्मचिद्घनम्। श्रोतारश्च भवन्तोऽभी ब्रह्मातोमां समर्चत" इत्युपदिशन्तो दृश्यन्ते नच ते विवेकादिविचारश्रममावहन्ति तत्कुतो विवेकादिविचारजं ब्रह्मज्ञानमेव मोक्षहेतुरत आह नगच्छतीति।

पानमौषधस्येत्यर्थलब्धम्। मर्दनादेरप्युपलक्षणमिदम्। विना। अन्तरेण औषधशब्दतः। "औषधं शब्दतः पीतं नीतमन्तर्मया भिषक्। कुतोन नश्यति व्याधिरश्चोत्तरं ब्रवीतु मे ॥ १ ॥" इत्यत्रोक्तौषधशब्दमात्रतोयथा व्याधिर्न गच्छति। "औषधं शब्दतः पीतं व्याधिं तु शब्दतोगतम्। कथं न मन्यसे मूढ नैच पीतं न गच्छतीति"। प्रतिवचनंयथातथाऽपरोक्षानुभवं विना पूर्वोक्तैर्ब्रह्मशब्दैर्न मुच्यते मुक्तिमनुभवतीत्यर्थः ॥ ६२ ॥

न। गच्छति। विना। पानम्। व्याधिः। औषधशब्दतः ॥ विना। अपरोक्षानुभवम्। ब्रह्मशब्दैः। न। मुच्यते ॥ ६२ ॥

जैसे पान करने विना केवल मैंने औषध पिया है ऐसे शब्दके कथनमात्रसे रोग नहीं दूर होता (नहीं निवृत्त होता) तैसे आत्माके अपरोक्षज्ञानसे विना मैं ब्रह्म हूं तू ब्रह्म है सर्व जगत् ब्रह्म है ब्रह्मसे भिन्न कुछ नहीं इन शब्दोंके कथन मात्रसे पूर्वोक्त संसारबन्धकी निवृत्ति होवै नहीं ॥

जैसे गुड शब्दसे मुख मीठा नहीं होता और मैं धनी हूं इस कहनेसे दरिद्रता दूर नहीं होती तैसे वाणीमात्रके बकवादसे अविद्या निवृत्त नहीं होती किन्तु ब्रह्मात्माके साक्षात्कारसे अविद्यानिवृत्ति परमानन्दकी प्राप्ति होवै है ॥६२॥

अकृत्वा दृश्यविलयमज्ञात्वा तत्त्वमात्मनः ॥
ब्रह्मशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणाम् ॥ ६३ ॥

ननु शब्दस्याप्यचिन्त्यसामर्थ्यं सुप्तप्रबोधनस्थले दृष्टमिति ब्रह्मशब्दैः कुतोनमुक्तिरतआह । अकृत्वेति ।

दृश्यविलयम्।दृश्यं नास्तीति बोधेन बुद्धेर्दृश्याविलापनम्। अकृत्वा। असंपाद्य। आत्मनस्तत्त्वमज्ञात्वा। प्रतीचोयाथात्म्यमसाक्षात्कृत्य। उक्तिमात्रफलैः। कण्ठशोषणातिरिक्तफलविकलैः भुक्तिमात्रफलैरित्यपि पाठः। ब्रह्मशब्दैः। उपदर्शितैः। नृणां लौकिकपण्डितानां कुतोमुक्तिः न कुतोऽपीत्यर्थः। अचिन्त्यशक्तिमानपि शब्दोनानधिकारिणिफलं सूतेऽनाकृष्टकठोरभूमौ वारिवाहकइवेतिभावः॥

अकृत्वा। दृश्यविलयम्। अज्ञात्वा। तत्त्वम्। आत्मनः॥ ब्रह्मशब्दैः। कुतः। मुक्तिः। उक्तिमात्रफलैः। नृणाम् ॥ ६३॥

दृश्य तीनकालमें है नहीं इस ज्ञानसे दृश्यके विलापनको न करके अपना आत्मा स्वरूप ब्रह्मको न जानके मैं ब्रह्महूं ऐसे शब्दमात्र कहनेसे जिनसे कण्ठका शोषणमात्र ही फलहै वा लौकिक पण्डितोंका उदरभरणमात्र प्रयोजन है उनसे लौ-

किंकि पण्डितोंकी वा श्रोतागणकी कैसे मुंक्ति होसके है। यद्यपि शब्दकी अचिन्त्य महिमा है तथापि ऊषर भूमिमें वृष्टि जैसे व्यर्थ होवे है तैसे ही अनधिकारीमें शब्दभी निष्फल होवै है ॥ ६३ ॥

अकृत्वा शत्रुसंहारमगत्वाऽखिलभूश्रियम् ॥
राजाहमिति शब्दान्नो राजा भवितुमर्हति ॥ ६४ ॥

शब्दमात्रात्स्वार्थासिद्धौ दृष्टान्तमुपादत्ते अकृत्वेत्यादिना। शत्रुसंहारं प्रतिपक्षनृपाणां रणे शिरश्छेदमकृत्वा नविधाय। तथा चतुर्दिग्विजयेन भूश्रियं राज्यलक्ष्मीमगत्वा न लब्ध्वा। राजाहमिति शब्दात्। अहमस्मि समस्तवसुधाधिपतिपतिः सम्राडिति शब्दोच्चारणमात्रतोराजा सम्राड् भवितुं नोअर्हति नैवयोग्योभवतीत्यर्थः ॥ ६४ ॥

अकृत्वा। शत्रुसंहारम्। अगत्वा। अखिलभूश्रियम्॥ राजा। अहम्। इति। शब्दात्। नो। राजा। भवितुम्। अर्हति॥ ६४॥

अपने विरोधी राजालोकोंका रणमें नाश किये बिना चारों दिशाके जयसे राज्यलक्ष्मीके मिले विना मैं सर्व पृथिवीका चक्रवर्त्ती राजा हूं ऐसे कथनमात्रसे चक्रवर्त्ती राजा नहीं हो सकता है किन्तु दुर्दशाको ही पाता है वैसे मैं ब्रह्म हूं केवल ऐसे शब्दमात्रसे दुःखही पाता है। यह श्लोक पूर्वोक्त कथन में दृष्टान्तमात्र प्रदर्शनार्थ है॥ ६४ ॥

आप्तोक्तिं खननं तथोपरिशिलाद्युत्कर्षणं स्वीकृतिम्,
निःक्षेपं समपेक्षते न हि बहिःशब्दैस्तु निर्गच्छति ॥
तद्वद् ब्रह्मविदोपदेशमननध्यानादिभिर्लभ्यते,
मायाकार्य्यतिरोहितंस्वममलं तत्त्वं न दुर्युक्तिभिः॥ ६५॥

ननु श्रुतिशरणमन्तरापि तर्ककुशलैरात्मस्वरूपं विज्ञाय मोक्तुं शक्यते इति किं शास्त्रविचारेणेत्यत आह । आप्तोक्तिमिति ।

यथा निःक्षेपं निधिनिहितहिरण्यादि । कर्मणि घञ् । आप्तोक्तिम्। सत्यवक्तुर्वाक्यम् । खननम् । कुद्दालकादिभिर्भूमिभेदनम् । तथा । उपरिशिलाद्युत्कर्षणम् । हिरण्याद्यावरणशिलाद्यपसारणम् । स्वीकृतिम् । हिरण्यादेः कराद्याकर्षणम् । समपेक्षते । स्वनिर्गतायैतं साधननिकरमपेक्षते । बहिः शब्दैस्तु । खनिज बहिरागच्छ त्वामहं शरणंगतः । इति प्रभृतिशब्दैस्तु हि यतो न निर्गच्छति । नबहिराविर्भवं याति । तद्वत् । तथा । अमलम् । शुद्धं स्वम् । आत्मधनं तत्त्वमविनाशिब्रह्माभिन्नम् । मायाकार्य्यतिरोहितम् । अविद्यातत्कार्य्याच्छन्नम् । ब्रह्मविदोपदेशमननध्यानादिभिः ब्रह्मश्रोत्रिय ब्रह्मनिष्ठोपदिष्टश्रवणमनननिदिध्यासनैः । 'श्रोतव्योमन्तव्योनिदिध्यासितव्य' इति श्रुतिप्रसिद्धैरादिशब्दस्तेषामावृत्तिंसूचयति तथा च ब्रह्मसूत्रम् 'आवृत्तिरसकृदुपदेशात' इति । लभ्यते प्राप्यते। न दुर्युक्तिभिः । तार्किकतर्कितश्रुतिविमतात्मकर्तृत्वादिकुतर्कैर्न लभ्यते किन्तु श्रुत्यनुग्राहितर्केण दृश्यं विलाप्य ब्रह्मज्ञोपदेशेनैवात्मधनलाभः । 'तद्यथा हिरण्यनिधिनिहितं क्षेत्रज्ञाउपर्युपरिसंचरन्तोन विन्देयुरेवमेवेमाः सर्वाःप्रजाअहरहर्गच्छन्त्यएतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा' इति श्रुत्यर्थोऽत्र संगृहीतोबोध्यः ॥

आप्तोक्तिम् । खननम् । तथा । उपरिशिलाद्युत्कर्षणम् । स्वीकृतिम् । निःक्षेपम् । समपेक्षते । न । हि । बहिः । शब्दैः । तु । निर्गच्छति ॥ तद्वद् । ब्रह्मविदोपदेशमननध्यानादिभिः । लभ्यते । मायाकार्य्यतिरोहितम् । स्वम् । अमलम् । तत्त्वम् । न । दुर्युक्तिभिः ॥ ६५ ॥

शंका । श्रुतिविचारसे विना भी तर्कसे आत्माका ज्ञान होकर मुक्ति होसके है । उत्तर । तर्कमात्रसे आत्मज्ञान और मुक्ति नहीं प्राप्त होवै है जैसे—सुवर्ण चान्दीकी खान यथार्थवक्ताके उपदेशको कुद्दालादि द्वारा भूमि खोदनेको तैसें ऊपरकी

शिलाका जिससे कि सुवर्ण चान्दीका आवरण होरहा है उसका दूर करना और हाथोंकरके उसका ग्रहण करना इनकी अपेक्षा करे है अर्थात् इतने साधनोंसे सुवर्णादि उत्तम पदार्थका लाभ होवै है और हे सुवर्णकी खान! तू बाहर आजा मुझे प्राप्तहो ऐसे शब्दके कथनमात्रसे सुवर्णादि बाहिर नहीं निकसके आते। तैसे ही शुद्ध अविनाशी ब्रह्मरूप आत्मधनभी अविद्या और उसके कार्यों करके आच्छादितहै ब्रह्मनिष्ठ गुरुके श्रवणरूप उपदेश करके तथा स्वकृत मनन निदिध्यासन करके प्राप्त होवै है नैयायिकों करके कल्पित वेदान्तविरुद्ध कुतर्कों करके नहीं प्राप्त होवै है किन्तु श्रुतिका अनुसारी तर्क दृश्यका अभावबोधन ब्रह्मनिष्ठके उपदेशादि करके ही आत्मधनका लाभ होवै है ॥ ६५ ॥

तस्मात्सर्वप्रयत्नेन भवबन्धविमुक्तये ॥
स्वैरेव यत्नः कर्तव्योरोगादाविव पण्डितैः॥ ६६ ॥

तदेवं स्वयत्नमात्रलभ्या बन्धविमुक्तिरित्युपसंहरति तस्मादिति। यस्मान्नान्ययत्नसाध्या स्वतःसिद्धा वा विमुक्तिस्तस्मात्सर्वप्रयत्नेन। सर्वेषां प्रयत्नानामिनः स्वामी सतथा तस्य संबोधनम्। भोसर्वप्रयत्नसमर्थशिष्य भवबन्धविमुक्तये स्वैरेव पण्डितैः स्वयं विवेकिभिः। रोगादाविव यत्नः कर्तव्यः।यथा रोगनिवृत्तये स्वयमेवौषधपानादौ प्रयत्यते तथा मुक्तयेपि स्वयमेव प्रयतितव्यमिति भावः॥ ६६ ॥

तस्मात्। सर्वप्रयत्नेन। भवबन्धविमुक्तये॥ स्वैः। एव। यत्नः। कर्तव्यः। रोगादौ। इव। पण्डितैः॥ ६६ ॥

हे सर्वप्रयत्नसमर्थ शिष्य! मुक्तिको अन्य यत्नकरके वा स्वभावसे अप्राप्य होनेसे संसारबन्धकी निवृत्तिके लिये स्वयं विवेकीपुरुषोंने ही यत्न करना उचितहै जैसे रोगकी निवृ-

त्तिमें अपने यत्नकी अपेक्षा है तैसे ही मोक्षमें भी अपना ही यत्न उपयोगी है ॥ ६६ ॥

यस्त्वयाद्य कृतः प्रश्नोवरीयाँञ्छास्त्रविन्मतः ॥
सूत्रप्रायोनिगूढार्थोज्ञातव्यश्च मुमुक्षुभिः ॥६७॥

परमार्थसम्बन्धित्वेन शास्त्रवित्सम्मतत्वेन संक्षिप्तार्थत्वेन च प्रश्नं प्रशंसति।

यस्त्वयेत्यादिना। अद्य पुण्यपुञ्जोदयसमये त्वया संबोध्य चेतनेन यः प्रश्नः कृतः या पृच्छा प्रकाशिता वरीयान् लौकिकव्यवहारपृच्छापेक्षया वैदिककर्मपृच्छायावरत्वन्ततोप्यात्मपृच्छायावरत्वमिति सूचनाय प्रकर्षनिर्देशः। वरीयस्त्वेहेतुगर्भितविशेषणमाह शास्त्रविन्मतइत्यादिना। शास्त्रविदः खलु बाह्यतोनिर्विण्णाबन्धमुमुक्षापृच्छां प्रशंसन्ति स्वात्मस्मारकत्वेनोत्तमत्वादिति भावः। तथा निगूढार्थः लघुः शब्दतोऽर्थतस्तु भूयानित्यर्थः।तथाचोक्तं।"लघूनि सूचितार्थानि लघ्वक्षरपदानि च। सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः" इति। यतोनिगूढार्थस्ततः सूत्रप्रायइति हेतुगर्भितविशेषणम् अतोऽन्यैरपि मुमुक्षुभिर्ज्ञातव्योमोक्षसिद्ध्ये देशिकाग्रे प्रकाशयितव्यइत्यर्थः। "त्वादृङ्नोभूयान्नचिकेतः प्रष्टे"ति श्रुतेरिति भावः॥ ६७ ॥

यः। त्वया। अद्य। कृतः। प्रश्नः। वरीयान्। शास्त्रविन्मतः॥ सूत्रप्रायः। निगूढार्थः। ज्ञातव्यः। च। मुमुक्षुभिः॥

अब निष्कामधर्मके उदयकालमें तुमने जो प्रश्न किया है सो अत्यन्त श्रेष्ठ है शास्त्रज्ञोंको स्वीकृत है शब्द जिसमें अल्प है और अर्थ बहुत गम्भीर है ऐसे सूत्रोंके समान ही आपका प्रश्नवाक्य है इसकारण अन्य मुमुक्षुजनोंको भी जानना चाहिये जिससे ऐसाही प्रश्न वह भी अपने गुरुसे करें॥

शृणुष्वावहितोविद्वन्यन्मया समुदीर्यते ॥
तदेतच्छ्रवणात्सद्योभवबन्धाद्विमोक्ष्यसे ॥ ६८ ॥

समाधानं वक्तुं प्रतिजानीते शृणुष्वावहितइत्यादिना।

हे विद्वन् विवेकिन् पदतदर्थसङ्गतिज्ञ मया यद्वक्ष्यमाणं बन्धतद्धेतुमोक्षतन्निमित्तादिपदार्थजातं समुदीर्यते तदवहितः शृणुष्व सावधानमनाः सन् स्वार्थसाधकमाकर्णय नच तच्छ्रवणादनुप्रश्नापादकं संशयादिरूपमुदेष्यति। अपौरुषेयवेदमूलके मद्वचने वेदाविरोधियुक्तिशतोपबृंहिते सर्वसंशयोन्मूलके संशयोत्पादकत्वप्रत्याशायाअप्यनुदयादिति भावेनाह एतच्छ्रवणादिति।एतस्य वक्ष्यमाणस्योपदेशस्य श्रवणात्सद्यो भवबन्धाद्विमोक्ष्यसे। उत्तमाधिकारिणस्ते श्रद्धालोः श्रवणसाधनेनैवात्मसाक्षात्कारोदयोभविष्यति असंभावनाविपरीतभावनानुदयेन नमननाद्यपेक्षा भविष्यतीत्यहं सूक्ष्मदृशा समीक्षइति भावः॥ ६८॥

शृणुष्व। अवहितः। विद्वन्। यत्। मया। समुदीर्यते॥ तद्। एतत्। श्रवणात्। सद्यः। भवबन्धात्। विमोक्ष्यसे॥ ६८॥

हे पदपदार्थके अर्थज्ञाता विवेकी शिष्य! जो मैं तुम्हरे को बन्ध तथा बन्धका हेतु मोक्ष तथा मोक्षप्राप्तिका हेतु पदार्थ कहता हूं उनको सावधान मन होकर श्रवणकर उनके श्रवणसे अनन्तर संशयादि उदय नहीं होवेंगे और संसारबन्धनसे शीघ्रं मुक्त होजावैगा अर्थात् जीवन्मुक्ति विदेहमुक्ति को प्राप्त होवैगा॥ ६८॥

मोक्षस्य हेतुः प्रथमोनिगद्यते,
वैराग्यमत्यन्तमनित्यवस्तुषु॥
ततः शमश्चापि दमस्तितिक्षा,
न्यासः प्रसक्ताखिलकर्मणां भृशम्॥ ६९॥

उक्तानामपि चतुर्णां साधनानां मुख्यतयाभिमतं वैराग्यादिकमनुष्ठापयति मोक्षस्येत्यादिना।

अनित्यवस्तुषु। वैराग्यं मोक्षस्य प्रथमोमुख्योहेतुर्निगद्यते वैरा-

ग्ये सति सर्वेषां साधनानामभ्यासे पुरुषप्रवृत्तेरस्य मुख्यत्वम् । मन्दवैराग्यस्य परमपुरुषार्थासाधनत्वादाह । अत्यन्तमिति । तीव्रमित्यर्थः । ततः । तीव्रवैराग्ये सिद्धेरनुशमोदमास्तितिक्षा । प्रसक्ताखिलकर्मणाम् । प्रसक्तानां श्रुतिविहितानां शुभानां स्वभावतः प्राप्तानामशुभानां चाखिलानां समस्तानां कर्मणां चित्तचापल्यनिमित्तक्रियाणां भृशं न्यासश्च । अत्यन्तोपेक्षणम् ॥ ६९ ॥

मोक्षस्य । हेतुः । प्रथमः । निगद्यते । वैराग्यम् । अत्यन्तम् । अनित्यवस्तुषु ॥ ततः । शमः । च । अपि । दमः । तितिक्षा । न्यासः । प्रसक्ताखिलकर्मणाम् । भृशम् ॥ ६९ ॥

ज्ञानसाधनोंमें मुख्यसाधन वैराग्यका निरूपण करे हैं हे शिष्य! अनित्य पदार्थोंमें जो वैराग्य (इच्छाका त्याग) है सो प्रधान मोक्षका कारण कथन किया है क्योंकि वैराग्यके उदय होनेसे ही अन्यसाधनोंका लाभ होवै है, मन्द वैराग्यको ज्ञानका हेतु न होनेसे अतिदृढ वैराग्य करना उचित है, तिस तीव्र वैराग्यसे अनन्तर शम और पुनः दम तितिक्षा शुभ अशुभ सर्वकर्म जो कि अज्ञानीको प्राप्त हैं उनका अत्यन्त त्याग यह सर्व ज्ञानके हेतु हैं ॥ ६९ ॥

ततः श्रुतिस्तन्मननं सतत्त्व-
ध्यानं चिरं नित्यनिरन्तरं मुनेः ॥
ततोऽविकल्पं परमेत्य विद्वा-
निहैव निर्वाणसुखं समृच्छति ॥ ७० ॥

ततस्तदनन्तरं श्रुतिर्वेदान्तवचसां श्रवणम् । तन्मननम् । श्रुतपदार्थानां सुयुक्तिभिः सम्भावितत्त्वनिश्चयः ततोमुनेः । मननशीलस्य नित्यं निरन्तरं सतत्त्वध्यानम् । आत्मैक्यचिन्तनम् । अत्र च "परीक्ष्य लोकान्कर्मचितान् ब्राह्मणोनिर्वेदमायात्" । तद्यथेह कर्मचितोलोकः क्षीयते एवमेवामुत्र पुण्यचितोलोकःक्षीयते" । शान्तोदान्त उपर-

तास्तितिक्षुः"। श्रोतव्योमन्तव्योनिदिध्यासितव्यः"। इत्येताः श्रुतयोऽर्थतोनिबद्धाइति बोध्यम्। ततोनिर्विकल्पब्रह्मसाक्षात्कारोदयमाह। ततोऽविकल्पमिति। ततोनिदिध्यासनतः पश्चात्। आविकल्पं नामजातिगुणक्रियानाश्रयं निर्विशेषमित्यर्थः। परम्। सर्वोत्कृष्टं पञ्चकोशातीतं विद्वान् साक्षात्कुर्वन्। निर्वाणसुखमिहैवैत्य। जीवन्नेवात्मसुखमनुभूय। समृच्छति। विदेहोपि संस्तदेव सुखमाप्नोति सकर्मकत्वाच्च 'समोगम्यृच्छिभ्या' मित्यात्मनेपदम्। अत्र हि 'अत्र ब्रह्म समश्नुते' इत्यादिश्रुतेरर्थः स्फोरितः॥ ७०॥

ततः। श्रुतिः। तन्मननम्। सतत्त्वध्यानम्। चिरम्। नित्यनिरन्तरम्। मुनेः॥ ततः। अविकल्पम्। परम्। एत्य। विद्वान्। इह। एव। निर्वाणसुखम्। समम्। ऋच्छति॥ ७०॥

तिसके अनन्तर श्रवण करना वेदान्तवाक्योंका और श्रवण कियेहुवे पदार्थोंका युक्तियों करके मनन करना उचित है अनन्तर दीर्घकाल विजातीय प्रतीतिके व्यवधानशून्य सजातीय प्रतीतिका अखण्ड प्रवाहरूप निदिध्यासनरूप ध्यान करना उचित है तिसके अनन्तर मननशील मुनिको निर्विकल्प आत्माका साक्षात्कार होवै है। विकल्प नाम जाति गुण क्रियाका है उनसे रहित निर्विकल्प निर्विशेषं ब्रह्मको सर्वोत्कृष्ट आत्माका स्वरूप जानके जीवते हुवे ही आत्मानन्द को अनुभवकरके विदेहमुक्त होकर भी तिसीआनन्दको प्राप्त होवै हैं इस प्रकार मोक्षके साधनोंका सामान्यसे निरूपण कियाहै विशेषरूप करके आगे निरूपण करेंगे॥ ७०॥

यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनम्॥
तदुच्यते मया सम्यक् श्रुत्वाऽऽत्मन्यवधारय॥ ७१॥

विचारोपदेशं प्रतिजानीते यद्बोद्धव्यमिति। हेशिष्य! यत्तव आत्मानात्मविवेचनं बोद्धव्यमस्ति तदिदानीं मया सम्यगुच्यते

तच्च विवेचनं श्रुत्वा आत्मनि स्वमानसेऽवधारय निश्चिनु ॥७१॥

यत् । बोद्धव्यम् । तव । इदानीम् । आत्मानात्मविवेचनम् ॥ तत् । उच्यते । मया । सम्यक् । श्रुत्वा । आत्मनि । अव- धारय ॥ ७१ ॥

अब विचारके उपदेशकी प्रतिज्ञा करते हैं हेशिष्य! जो तुमको आत्मा अनात्माका विवेक जानने योग्य है सो विवेक तुमको अब हम कहते हैं उस विवेकको सावधानतासे श्रवण करके अपने मनमें निश्चय करो ॥ ७१ ॥

मज्जाऽस्थिमेदःपलरक्तचर्म,
त्वगाह्वयैर्धातुभिरेभिरन्वितम् ॥
पादोरुवक्षोभुजपृष्ठमस्तकै-
रङ्गैरुपाङ्गैरुपयुक्तमेतत् ॥ ७२ ॥

बन्धस्य स्वरूपं कारणं प्रतिष्ठापकं च नानात्मस्वरूपविज्ञानमन्तरेण विज्ञातं भवति । बन्धाज्ञानेन न तन्निवृत्तिलक्षणोमोक्षोऽपि ज्ञातुं सुशकः परमात्मनोऽभ्यर्हितत्वेपि दुर्बोधत्वमतः प्रश्नपाठक्रममनादृत्यार्थक्रमेण प्रश्नान्समाधातुं पुरस्तादनात्मस्वरूपं स्थूलक्रमेणाभिदधाति । मज्जाऽस्थीत्यादिना ।

मज्जादिभिरेभिः प्रत्यक्षमुपलभ्यमानैः सप्तभिर्धातुभिर्देहधारकैरन्वितमनुगतं तथा पादादिभिर्मस्तकान्तैरङ्गैः प्रधानाङ्गैरुपाङ्गैर्नखलोमादिभिश्चोपयुक्तमेतत्स्थूलशरीरमित्युत्तरेणान्वयः॥ ७२॥

मज्जाऽस्थिमेदःपलरक्तचर्मत्वगाह्वयैः । धातुभिः । एभिः । अन्वितम् ॥ पादोरुवक्षोभुजपृष्ठमस्तकैः । अङ्गैः । उपाङ्गैः । उपयुक्तम् । एतत् ॥ ॥ ७२ ॥

मज्जा अस्थि मेद मांस रक्त चर्म त्वचा नामक इन सप्त धातु करके युक्त हैं चरण पट्ट वक्षस्थल भुजा पीठ शिर इत्या-

दि अङ्ग तथा नख रोमादि अनेक उपांग करके युक्त यह स्थूलदेह है ॥ ७२ ॥

अहं ममेति प्रथितं शरीरं,
मोहास्पदं स्थूलमितीर्यते बुधैः ॥
नभोनभस्वद्दहनाम्बुभूमयः,
सूक्ष्माणिभूतानिभवन्तितानि ॥ ७३ ॥

अहं ममेति मोहास्पदं प्रथितम्। स्थूलोहं कृशोहं गौरोहं श्यामोहं तिष्ठामि गच्छाम्यहमित्यहंकारास्पदत्वेन ज्वरार्तम्मे शरीरं नीरोगं सम्प्रति मे शरीरमिति रूपममतास्पदत्वेन च भ्रमविषयतापन्नं स्थूलं शरीरमिति बुधैरीर्यतेऽभिधीयते नचेदं लक्षणमव्यापकं सर्वेषां ब्रह्मादिपिपीलकान्ततनूनामुक्ताहंममास्पदत्वेन प्रथनादित्याह प्रथितामिति। एतदुपादानस्वरूपं प्रदर्शयति नभइत्यादिना नभआदिभूम्यन्तपञ्चभूतानि यानि सूक्ष्माणि तानि ॥ ७३ ॥

अहम्। मम। इति। प्रथितम्। शरीरम्। मोहास्पदम्। स्थूलम्। इति। ईर्यते। बुधैः॥ नभोनभस्वद्दहनाम्बुभूमयः। सूक्ष्माणि। भूतानि। भवन्ति। तानि ॥ ७३ ॥

अहंता ममता रूप मोहका विषय है मैं स्थूलहूं कृशहूं गोराहूं कालाहूं ऐसा अहंकारकी और मेरा शरीर बीमार है नीरोगहै इत्यादि ममतारूप मोहकी लोकमें प्रसिद्धि है सो भ्रमका विषयहै उसको विद्वान् स्थूल शरीर कहतेहैं ब्रह्मासे आदि चीटी पर्यन्त सर्व जीवोंकी अहंता ममतारूप भ्रान्तिका विषय प्रसिद्ध है आकाश वायु अग्नि जल पृथिवी यह पंचभूत हैं सो प्रथम सूक्ष्म होवे हैं उनके मिलनेसे स्थूलशरीर होवे है ॥ ७३ ॥

परस्परांशैर्मिलितानि भूत्वा,

स्थूलानि च स्थूलशरीरहेतवः ॥
मात्रास्तदीयाविषयाभवन्ति,
शब्दादयः पञ्च सुखाय भोक्तुः ॥ ७४ ॥

परस्परांशैर्मिलितानि । स्वस्वेतरभूतार्धभागचतुर्थांशचतुष्टयैर्मिलितानि मिश्रितानि स्थूलानि च भूत्वा स्थूलशरीरहेतवोभवन्ति तदीयमात्राः पञ्चभूतगुणाः। शब्दादयः पञ्चविषयाः जीवबन्धनहेतवोपि भोक्तुः विस्मृतात्मस्वरूपस्य भोगलम्पटस्य जीवस्य सुखाय सुखाभिमानाय भवन्ति पञ्चत्वनिमित्तत्वस्य पञ्चानामेषां वक्ष्यमाणत्वादित्यर्थः ॥ ७४ ॥

परस्परांशैः । मिलितानि । भूत्वा । स्थूलानि । च स्थूलशरीरहेतवः । मात्राः । तदीयाः । विषयाः । भवन्ति । शब्दादयः । पञ्च । सुखाय । भोक्तुः ॥ ७४ ॥

अपनेसे भिन्न भिन्नमें अपने चतुर्गुण अंशके मेलन होनेसे वह भूत सूक्ष्म स्थूलताको प्राप्त हुवे फिर स्थूलशरीर का हेतु होवै हैं और उन पंचभूतोंके शब्दादि पंच तन्मात्रा श्रोत्रादिइन्द्रिय ग्राह्य होकर विषयसंज्ञाको प्राप्त होकर जीवको सुखकी प्रतीतिका कारण होवै हैं ॥ ७४॥

यएषु मूढाविषयेषु बद्धारागोरुपाशेन सुदुर्दमेन ॥
आयान्तिनिर्यान्त्यधऊर्ध्वमुच्चैःस्वकर्मदूतेन जवेननीताः

स्थूलशरीरस्वरूपमुपदर्श्यास्य स्वरागद्वारा सर्वसंसृतिहेतुत्वमाह यएष्वित्यादिना ।

ये मूढाः स्थूलानात्मत्वमातिविकलाः सुदुर्दमेन विना विवेकखड्गप्रहारं दुर्भेद्येन । रागोरुपाशेन । रागलक्षणविस्तीर्णपाशेन।बद्धा बन्धमनुभवन्तः । उच्चैः स्वकर्मदूतेन साहङ्कारसुकृतदुष्कृतलक्षणराजदूतेन दण्डनाक्रियायां विनियुक्तेन नीताः स्ववशीकृताःसन्तः।

१ मृत्यु।

अधः। पश्वादियोनिषु। ऊर्ध्वं च देवान्तयोनिषु। आयान्ति निर्यान्ति च गत्यागती लभन्तइत्यर्थः। यथा हि परपदार्थरतास्तस्करा राजदूतेन पाशबद्धाउत्थानावस्थानादिना दण्डयन्ते तथैव स्थूलदेहरागिणोऽप्यधोगत्यादिना दण्ड्यन्ते न सुखलेशं लभन्तइति भावः। विवेकिदृष्ट्योर्ध्वगतेरपीर्ष्यासूयादिना दुःखनिमित्तत्वमिति बोध्यम्॥ ७५॥

ये। एषु। मूढाः। विषयेषु। बद्धाः। रागोरुपाशेन। सुदुर्दमेन॥ आयान्ति। निर्यान्ति। अधः। ऊर्ध्वम्। उच्चैः। स्वकर्मदूतेन। जवेन। नीताः॥ ७५॥

इतने करके स्थूल शरीरको दिखाया है इसीमें रागद्वेष होनेसे सर्व संसार होवै है ऐसा कहे हैं॥ जो पुरुष स्थूलदेहको अनात्मा नहीं जानते विवेकशस्त्र विना अविनाशी रागरूप बड़ा फांसी करके बांधे है इस जीवसे बलमें अधिक कर्मरूप दूतने बड़े वेगसे वशकरके अधीन किये दीन हुवे ऊपर देवान्त योनियोंमें और नीचे पशुआदि योनियोंमें प्राप्त किये जाते हैं जैसे परधनादिमें राग करनेवालेको राजदूत ऊंचा नीचा उठाते बैठाते दण्ड देते हैं वैसेही देहादि अनात्मामें राग करने वालोंको कर्मरूप दूत ऊंच नीच योनिमें भ्रमण रूप दण्ड देते हैं विवेकीकी दृष्टिसे ऊपरके लोक भी दुःखके हेतु हैं॥ ७५॥

शब्दादिभिः पञ्चभिरेव पञ्च,
पञ्चत्वमापुः स्वगुणेन बद्धाः॥
कुरङ्गमातङ्गपतङ्गमीन-
भृङ्गानरः पञ्चभिरञ्चितः किम्॥ ७६॥

नचेदं स्वरूपेणैव रागपाशहेतुः किन्तु रूपस्पर्शादिषु रागपञ्च-

लक्षणपञ्चपाशनिमित्तत्वेन मरणान्तदण्डनहेतुरिति सदृष्टान्तमाह शब्दादिभिरिति ।

कुरङ्गमातङ्गपतङ्गमीनभृङ्गाः । मृगगजशलभझषभ्रमराः पञ्च । जात्या पञ्च स्वगुणेन स्वस्वाभिलाषगोचरेण शब्दादिना गुणेन सूत्रस्थानीयेन बद्धाः । बन्धदुःखमनुभवन्तः शब्दादिभिः पञ्चाभिरेव प्रत्येकं न त्वेकेन केनचित् । एतेन सर्वेषामपि प्रत्येकं बन्धकत्वं दर्शितम् । पञ्चत्वं मृतिम् । आपुः । प्राप्ताः । यदि चैषां प्रत्येकमपि रागोत्पादनद्वारा पञ्चानां पञ्चत्वनिमित्तत्वं कुरङ्गादिषु भृङ्गान्तेषु पञ्चसु दृष्टं तदा पञ्चभिरञ्चितः । एभिः पञ्चभिर्ग्राहैर्गृहीतोनरोमनुष्यः पञ्चत्वं नाप्नोतिकिं किन्त्वाप्नोत्येव किमोत्राक्षेपार्थत्वाद् एषां गाथा लोके सुप्रसिद्धा नैव वर्णचिन्यासमपेक्षते इति बोध्यम् ॥ ७६ ॥

शब्दादिभिः । पञ्चाभिः । एव । पञ्च । पञ्चत्वम् । आपुः । स्वगुणेन । बद्धाः ॥ कुरङ्गमातङ्गपतङ्गमीनभृङ्गाः । नरः । पञ्चभिः । अञ्चितः । किम् ॥ ७६ ॥

स्थूल शरीरभी स्वरूपसे बन्धनका हेतु नहीं है किन्तु शब्दस्पर्शादि पंच विषयोंमें पंच राग करनेसे पंच फांससे बन्धन करे है इस वार्ताको इस श्लोकमें दृष्टान्तसे कहा है । हेशिष्य ! मृग, पतंग, हाथी, मच्छ, भ्रमर, येह पांच जीव शब्दादि पांच रूप एक २ विषयमें ही रागकरनेसे बांधेहुवे मरणको प्राप्त होतेहैं तब इन पांचों विषयोंमें रागरूप फांसी करके जो एक पुरुष बांधा है सो मृत्युको क्यों न प्राप्त होगा अर्थात् शब्दादि विषयोंमें रागद्वारा शरीरमें मोह करने वाला जीव जन्म मरणादि प्रवाह परम्पराको अवश्य ही प्राप्त होगा इस कारण रागरूप फांसीसे बचाने का वैराग्यरूप शस्त्रही उपाय है उसको ग्रहण करो ॥ ७६ ॥

दोषेण तीव्रोविषयः कृष्णसर्पविषादपि ॥

विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम्॥ ७७ ॥

ननु किमिति सर्वसुप्रसिद्धसुखहेतुभ्यः शब्दादिभ्योनागेभ्यो-विषमुद्गिगिरद्भ्यइव बिभेषि सर्वेषामेषां त्यागे भोगमात्रासिद्धेरत-आह दोषेणेत्यादिना।

विषयः रागद्वारावन्धनहेतुः शब्दादिः षिञ्बन्धने इति धातु-पाठात्। कृष्णसर्पविषादपि। सद्योमृतिहेतुकालाहिक्ष्वेडादपि दो-षेण रागद्वेषोत्पादनलक्षणदोषेण तीव्रः कथमेतत्तदाह। विषमिति। विषं भोक्तारं निहन्ति हलाहलं स्वमश्नन्तं हृदयस्फोटनेन नाश-यति। अयं विषयश्चक्षुषा नेत्रेण द्रष्टारं स्वं समीक्षमाणमपि निह-न्ति। चक्षुषेत्येकवचनं काणाभिप्रायेण उपलक्षणमिदं स्मर्तुरपि तथात्वस्य तस्मात् स्वमृत्युहेतुर्हेयोविषयइति भावः॥ ७७॥

दोषेण। तीव्रः। विषयः। कृष्णसर्पविषाद्। अपि॥ विषम्। निर्हन्ति। भोक्तारम्। द्रष्टारम्। चक्षुषा। अपि। अयम्॥ ७७॥

विषय सुखका हेतु हैं इनके त्यागसे भोगमात्रकी असिद्धि होगी इस शंकाका उत्तर इस श्लोकमें कहे हैं। शब्दादि विषय रागोत्पत्तिद्वारा बन्धनका हेतु हैं सो कालेनागकी विषसे भी अधिक दोषवाले हैं क्योंकि विष तो खाने वालेकी मृत्यु करे है और रूपादि विषय तो नेत्रोंसे द्रष्टाका भी विनाश करे हैं तैसे श्रोत्रादि द्वारा श्रुत शब्दादि विषय श्रोताके नाशके हेतु होवै हैं॥ ७७॥

विषयाशामहापाशाद्यो विमुक्तः सुदुस्त्यजात्॥
सएव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यपि॥७८॥

यदा विषयाशायाएवानर्थप्रदत्वं तत्त्यागस्य च मुक्तिहेतुत्वं तदा किं वक्तव्यं विषयस्यानर्थप्रदत्वे तत्त्यागस्य च परमार्थसाधनत्वे इत्याशयेनाह विषयाशेत्यादिना।

योमनुष्यः सुदुस्त्यजात्।विषयलम्पटैस्त्यक्तुमशक्यात् विषयाशा-महापाशाद् विषयाभिलाषरूपादामहेन्द्रं बन्धनसमर्थान्महापाश-

नाम्नः । विमुक्तः । बहिर्निःसृतः । सएव मुक्त्यै कल्पते योग्यतामश्नुते । अन्यः । विषयाभिलापमहापाशबद्धः । षट्शास्त्रवेद्यपि षण्णां शास्त्राणामध्ययनाध्यापनवेदनसम्पन्नोपि लौकिकपाण्डितः न मुक्त्यै कल्पत इति सम्बन्धः ॥ ७८ ॥

विषयाशामहापाशाद् । यः । विमुक्तः । सुदुस्त्यजात् ॥ सः एव । कल्पते । मुक्त्यै । न । अन्यः । षट्शास्त्रवेदी । अपि ७८

जबकि विषयोंकी आशाही अनर्थका कारणहै और विषयाशा का त्याग परमार्थसुखदायक है तौ फिर विषयोंको अनर्थकारणता और विषयत्याग परमार्थसुखका हेतु हैं इसमें कहनाही क्या है ऐसा इस श्लोकमें कहे हैं ॥ हे शिष्य ! विषयोंकी आशारूप महाफांसी है जिससे छुटना कठिनहै जिससे इन्द्रादि भी बंधे हैं उससे जो बाहर निकसे हैं सो ही मुक्तिका योग्य अधिकारी है और विषयोंकी आशारूप फांसीसे बंधाहुआ पुरुष छैः शास्त्रोंके पठन पाठनमें निपुण भी हो लौकिक पण्डित कुटुम्बपोषणमें तत्पर सो मुक्तिका अधिकारी नहीं है मुक्तिके अयोग्य है ॥ ७८ ॥

आपातवैराग्यवतोमुमुक्षून्,
भवाब्धिपारं प्रतियातुमुद्यतान् ॥
आशाग्रहोमज्जयतेऽन्तराले,
निगृह्य कण्ठे विनिवर्त्त्य वेगात् ॥ ७९ ॥

विषयाशायामहत्त्वं प्रकटयितुमुद्योगाप्रमादाय तस्याग्राहत्वरूपेण दुर्जय्यत्वमाह । आपातवैराग्यवतइत्यादिना ।

आशाग्रहः । उपदर्शिताविषयाभिलाषग्राहः । भवाब्धिपारम् । अविद्यामहोदधिपारं परं ब्रह्म प्रतियातुं प्राप्तिनिमित्तम् । उद्यतान् । कृतोद्योगान् । आपातवैराग्यवतः । मन्दवैराग्यलक्षणास्तीक्ष्णखड्गधरान् । मुमुक्षून मोक्षाधिकारिणः । कण्ठेग्रीवायां निगृह्य । परमार्थ-

प्रयत्नान्निरोध्य वेगाद्विनिवर्त्य प्रत्यहं मनसस्तत्र प्रवहन्तं प्रवाहं निवार्य्य। अन्तराले मज्जयते। लौकिकालौकिकसुखविमुखं करोति। तथाच स्मृतिः'कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति'इत्यादिः तस्माद्वैराग्यतीव्रतायै यत्नोऽनुष्ठेयइति भावः॥ ७९॥

आपातवैराग्यवतः। मुमुक्षून्। भवाब्धिपारम्। प्रतियातुम्। उद्यतान्॥ आशाग्रहः। मज्जयते। अन्तराले। निगृह्य। कण्ठे। विनिवर्त्य। वेगात्॥ ७९॥

अब विषयाशाको ग्राहरूपसे वर्णन करे हैं, हे शिष्य! संसारसे पार परब्रह्मको प्राप्त होनेमें उद्यम करते हैं मोक्षकी जिनकी जिज्ञासा है परंच मन्द वैराग्यवाले हैं तीव्र वैराग्य जिनको नहीं उनको कण्ठसे जैसे ग्राह पकडताहै तैसे ही आशारूप ग्राह परमार्थप्रयत्नसे विमुखकरके बडे वेगसे मनके परमार्थप्रवाहको रोकके बीचमें ही डोबदेताहै अर्थात् लौकिक अलौकिक सुखसे विमुख कर देताहै इस कारण तीव्र वैराग्यका यत्न करो॥७९॥

विषयाख्यग्रहोयेन सुविरक्त्यसिना हतः॥
सगच्छति भवाम्भोधेःपारं प्रत्यूहवर्जितः॥ ८०॥

मन्दवैराग्ये दोषमुक्त्वा तीव्रवैराग्ये गुणमाह। विषयाख्यग्रहइत्यादिना।

येन सम्पादिततीव्रवैराग्येण। विषयाख्यग्रहः। विषयेण विषयाभिलाषोलक्ष्यते तथाच विषयाभिलाषग्राहइत्यर्थः।तथैव प्रकरणात्। सुविरक्त्यसिना दृढवैराग्यखड्गेन हतः सः पुरुषः प्रत्यूहवर्जितः परमार्थप्रयत्नप्रतिद्वन्द्विविघ्नविकलः सन् भवाम्भोधेः अविद्यायाः पारं परमात्मतत्त्वं गच्छति प्राप्नोतीत्यर्थः॥ ८०॥

विषयाख्यग्रहः। येन। सुविरक्त्यसिना। हतः॥ सः। गच्छति। भवाम्भोधेः। पारम्। प्रत्यूहवर्जितः॥ ८०॥

जिस पुरुषने तीव्र वैराग्यको सम्पादन करके विषयोंकी

आशारूप ग्राहका दृढ वैराग्यरूप तलवारसे विनाश किया है सो पुरुष परमार्थविरोधि विघ्नसे रहित हुवा अविद्यारूप सागर से पार परमात्माको प्राप्त होता है इसकारण विघ्ननिवृत्तिके लिये वैराग्यकी तीव्रता अपेक्षित है ॥ ८० ॥

विषमविषयमार्गैर्गच्छतोऽनच्छबुद्धेः,
प्रतिपदमभियातो मृत्युरप्येषविद्धि ॥
हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या,
प्रभवति फलसिद्धिः सत्यमित्येव विद्धि ॥ ८१ ॥

कथं तर्हि वैराग्यतीव्रतेत्यतआह विषमविषयमार्गैरिति । अनच्छबुद्धेर्मलिनमनसः । विषमविषयमार्गैर्भयङ्करदुर्गमदुःखप्रदशब्दाद्यभिलाषलक्षणवर्त्मभिः । गच्छतोव्यवहरतः।पुरुषस्य एष सर्वलोकप्रसिद्धोमृत्युर्मारकोदेहप्राणवियोगसमयोप्यलक्षितरंहाः प्रतिपदमभियातः क्षिप्रं संप्राप्तोन विलम्बते।इत्येव विद्धि। जानीहि तथाच नैवायुर्विश्वासेन प्रमदितव्यमिति भावः।हितसुजनगुरूक्त्या। हितोपदेशकब्रह्मविद्गुरूपदेशेन। युक्त्या वेदाविरोध्यभ्यूहिततर्केण च गच्छतः प्रवर्तमानस्य स्वस्य । फलसिद्धिः प्रभवति। स्वात्मसाक्षात्कृत्याजीवन्मुक्तिर्भवतीत्येतन्मदुपादिष्टं सत्यमवितथं विद्धि। निश्चिनु तथाच कुमार्गेण गच्छतोऽनर्थः सुमार्गेण गच्छतश्च मोक्षो भवतीत्यवगम्य कुमार्गमपास्य सुमार्गोमार्गणीयइति भावः ॥ ८१॥

विषमविषयमार्गैः । गच्छतः । अनच्छबुद्धेः । प्रतिपदम् । अभियातः । मृत्युः । अपि । एषः । विद्धि ॥ हितसुजनगुरूक्त्या । गच्छतः । स्वस्य । युक्त्या । प्रभवति । फलसिद्धिः । सत्यम् । इति । एवं । विद्धि ॥ ८१ ॥

शंका । कैसे वैराग्यकी तीव्रता सिद्ध होवै है । उत्तर।हेशिष्य! जो मलिनमन पुरुष है और भयंकर दुःखदायक शब्दादि विषयमार्गकरके व्यवहार करे है सर्वलोकप्रसिद्ध सर्वका विनाशक

मृत्युकाल भी शीघ्र प्राप्त होनेवाला है देर नहीं करेगा ऐसा तुम जानो आयु बहुत है ऐसे विश्वाससे प्रमाद मत करो इस कारण हितके उपदेष्टा ब्रह्मनिष्ठ गुरुजीके उपदेशसे और आप भी एकान्त देशमें वेदकी अविरोधि युक्तिके विचार करनेसे आत्माके अपरोक्ष ज्ञानसे जीवन्मुक्ति होती है इस मेरे उपदेशको ही यथार्थ निश्चय कर इसकारण कुमार्गगमनसे बन्ध होता है उसको त्यागके मोक्षका हेतु सुमार्गका आश्रय कर जिससे वैराग्यकी तीव्रता सिद्ध होवै है ॥ ८१ ॥

मोक्षस्य काङ्क्षा यदि वै तवास्ति,
त्यजातिदूराद्विषयान् विषं यथा ॥
पीयूषवत्तोषदयाक्षमार्जव-
प्रशान्तिदान्तीर्भज नित्यमादरात् ॥ ८२ ॥

उक्तकुमार्गं हापयन् सुमार्गमारोहयति । मोक्षस्येति । यदीदानीं पुण्यपुञ्जोदये । तव । ममाभिमुखस्य ते । मोक्षस्य काङ्क्षा वैमोक्षापेक्षा वर्त्ततएव नात्र किञ्चिद्वक्तव्यंकर्त्तव्यं वा विद्यते परं च यथा विषं त्यज्यते विवेकिभिस्तथा विषयानतिदूरात्त्यज । नास्मिन् विषयाभिलाषकुमार्गे पदमात्रमपि निधेहीत्यर्थः । पीयूषवत् यथा पीयूषमादरात्कृतपुण्यैःपीयतेतथा तोषदयाक्षमार्जवप्रशान्तिदान्तीः । यदृच्छालाभसन्तोषदीनदुःखोद्धारणकरुणाक्रूरवाक्यादिसहनसरलस्वभावचित्तनिरोधबाह्येन्द्रियनैश्चल्यानि सुमार्गलक्षणानि साधनानि नित्यमनवरतमादराद्भज सम्पादय । अयं सुमार्गेऽवश्यमारोहणीयइति भावः ॥ ८२ ॥

मोक्षस्य । काङ्क्षा । यदि । वै । तव । अस्ति । त्यज । अतिदूरात् । विषयान् । विषम् । यथा ॥ पीयूषवत् तोषदयाक्षमार्जवप्रशान्तिदान्तीः । भज । नित्यम् । आदरात् ॥ ८२ ॥

अब कुमार्गको त्याग कराते हुवे सुमार्गमें शिष्यको आरूढ करे हैं । पुण्योदयकालमें जो तुमको मोक्षकी इच्छा है तो

जैसे विचारवान् विषको त्याग देते हैं तैसे तुम महामृत्युदायक विषयोंको बहुत दूरसे त्यागदो इनमें अल्पभी संकल्प न कर जिसप्रकार पुण्यात्मा पुरुष बड़े आदरसे अमृत पीते हैं तिसी प्रकार आदरसे सन्तोष दया क्षमा सरलता अत्यन्त शान्ति इन्द्रियोंका विषयमार्गसे निरोधरूप दमन निरन्तर सम्पादन कर इस सुमार्गमें आरूढ हो इसीको देवमार्ग कहते हैं ॥ ८२ ॥

अनुक्षणं यत्परिहृत्य कृत्य-
मनाद्यविद्याकृतबन्धमोक्षणम् ॥
देहः परार्थोऽयममुष्य पोषणे,
यः सज्जते सस्वमनेन हन्ति ॥ ८३ ॥

शब्दादिविषयोपभोगतत्परतायाः कुमार्गत्वमात्मघातित्वेन दर्शयति । अनुक्षणमिति ।

अनाद्यविद्याकृतबन्धमोक्षणम् । आविद्यकाहंममममतिलक्षणबन्धनविमोचनम् । अनुक्षणं यत्कृत्यं कर्तव्यं साधनाभ्यासम् । परिहृत्य । असंपाद्य । योऽयं परार्थः श्वशृगालभक्षणार्थो देहः । उपचितास्थूलतनुः अमुष्य परभक्ष्यदेहस्य पोषणे पालनलाडनादौ सज्जते तत्परो भवति समूढमतिः । अनेन । देहतत्परत्वात्मविमुखत्वलक्षणविपरीताचरणेन स्वमात्मानं सदासन्तमपि तद्बोधासम्पादनेन विनाशयति । आत्महा भवतीत्यर्थः । 'असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' इति श्रुतितात्पर्य्यमत्र गृहीतमिति बोध्यम् ॥ ८३ ॥

अनुक्षणम् । यत् । परिहृत्य । कृत्यम् । अनाद्यविद्याकृतबन्धमोक्षणम् ॥ देहः । परार्थः । अयम् । अमुष्य । पोषणे । यः । सज्जते । सः । स्वम् । अनेन । हन्ति ॥ ८३ ॥

शब्दादि विषयोंमें भोगतत्परताको आत्मघातका कारण होनेसे कुमार्गता दिखावे हैं। अनुक्षणमिति । अनादि अविद्या-

कृत अहंममरूप बुद्धि बन्ध है उसकी निवृत्तिका कारण निरन्तर कर्तव्यबुद्धिका अभाव है उस कर्तव्यबुद्धिके त्यागको न करके यह कूकर गीदड़ोंके भोजन योग्य परभक्ष्य शरीर है इस देहके पालनेमें जो तत्पर होकर विषयभोगलम्पट होता है सो देहतत्परतासे आत्माका घात करता है इसीसे महामूढ़ है क्योंकि देहभोगोंके तत्पर होनेसे आत्माकी विस्मृतिरूप घात होवै है और पुनः पशुयोनी आदिकी परम्परा प्राप्त होनेसे जन्म मृत्युकी परम्परा प्राप्त होवै है मनुष्यदेह करके प्राप्त होने योग्य अमृतत्वरूप मोक्षकी प्राप्ति होवै नहीं ॥ ८३ ॥

शरीरपोषणार्थी सन् य आत्मानं दिदृक्षति॥
ग्राहं दारुधिया धृत्वा नदीं तर्तुं सगच्छति॥८४॥

ननु शरीरपोषणे सति तदनुगतआत्मापि पोषितोभवति यद्वा देहपोषणेनात्मैवपोषितोभवति चेतनत्वात्तस्य देहोपेक्षणे चात्माप्युपेक्षितः स्यादन्यत्रात्मनो दृष्टेरभावात् "पुरुषे त्वाविस्तरामात्मे"ति श्रुतेरतोदेहपोषणादिनैवात्मदिदृक्षापि भवति मूर्च्छितस्य मृतस्य वा तद्दृष्टेरतआह। शरीरेत्यादिना।

योविपरीतमतिः शरीरपोषणार्थी। अनुक्षणशीर्यमाणस्थूलतनुभरणतत्परः सन्। आत्मानं दिदृक्षति। शरीरपोषणोपायलभ्यमात्मज्ञानं समीहते। सदारुधिया ग्राहं धृत्वा नदीं तर्तुं गच्छति। यथाऽज्ञः कश्चिन्महाक्रूरं नक्रं स्वतरणसाधनकाष्ठमत्या समारुह्य सरितं तितीर्षति तथा देहपोषणेनात्मदिदृक्षा द्रष्टव्या यथा दृष्टान्ते नक्रस्य न नदीतरणसाधनत्वं किन्तु स्वमारकत्वं तथा प्रकृते देहभरणस्यात्मदिदृक्षानुपायत्वं प्रत्युत स्वात्मतादात्म्याध्यासोत्पादेनात्मदिदृक्षा विमुखीकरणेन मारकत्वमिति भावः ॥ ८४ ॥

शरीरपोषणार्थी। सन्। यः। आत्मानम्। दिदृक्षति॥
ग्राहम्। दारुधिया। धृत्वा। नदीम्। तर्तुम्। सः। गच्छति॥ ८४॥

देहपोषण करके ही आत्माका पालन मानने वालेके

मतको खण्डन करे हैं, हे शिष्य ! जो पुरुष शरीरके पालन लालनका अर्थी होकर शरीरपालनसे ही आत्माका साक्षात्कार करनेकी इच्छा करता है सो पुरुष ग्राहको ही तरण साधनरूप काष्ठ जानकर ग्राहके ऊपर चढकर नदीको तरनेके लिये जाते हुवे मूढपुरुषके समान है जैसे ग्राहके ग्रहण से मरण ही होवै है नदीतरण नहीं होवै है तैसे ही देहमें अहंतारूप ग्राहसे अविद्यातरण नहीं होवै है किन्तु जन्म मरण ही होवै है ॥ ८४ ॥

मोहएव महामृत्युर्मुमुक्षोर्वपुरादिषु ॥
मोहोविनिर्जितोयेन समुक्तिपदमर्हति ॥ ८५ ॥

देहाद्यभिमानिनोऽनर्थप्राप्तिमभिधाय निर्मोहस्य मुक्तिमभिदधाति मोहएवेति ।

मुमुक्षोः स्वात्मानं मोक्तुमिच्छोः । वपुरादिषु । देहेन्द्रियादिष्वनात्मसु मोहएव । आत्मत्वाभिमानएव महामृत्युः । महामारकोऽन्तकः । पुनःपुनर्जन्म परम्परामापाद्य मृतिप्रवाहप्रापकत्वादयं महामृत्युर्बोध्यः । येन देहाद्यनात्मात्माविवेकिनाऽऽत्मनिश्चयेन मोहोऽनात्मन्यात्माभिमानरिपुर्विनिर्जितोविनाशितः । सएव मुक्तिपदम् मोक्षस्वरूपं परं ब्रह्म । अर्हति । प्राप्तुं योग्यतामालम्बते ॥ ८५ ॥

मोहः । एव । महामृत्युः । मुमुक्षोः । वपुरादिषु ॥ मोहः । विनिर्जितः । येन । सः । मुक्तिपदम् । अर्हति ॥ ८५ ॥

पूर्व देहाभिमानको अनर्थप्राप्ति कही है अब निर्मोहको मुक्तिकी प्राप्ति कहे हैं, हे शिष्य ! मोक्षकी इच्छावाले पुरुषको देह इन्द्रियादि अनात्मसंघातमें आत्मताका अभिमान ही महाकालरूप मरणका हेतु यमराजके समान है । मरण जन्मादि परम्पराका प्रापक होनेसे और जिस विवेकी पुरुषने

देहातिरिक्त आत्माका निश्चय करके अभिमान शत्रुका जय किया है अर्थात् नाश किया है सो पुरुषही मोक्षस्वरूप परब्रह्म को प्राप्त होनेके योग्य है ॥ ८५ ॥

मोहं जहि महामृत्युन्देहदारसुतादिषु ॥
यञ्जित्वा मुनयोयान्ति तद्विष्णोःपरमम्पदम् ८६

देहाभिमानमूलकत्वाद्दाराद्यभिमानस्य तत्त्यागे तत्त्यागमर्थतो- लब्धमनूद्य तस्य फलं ग्राहयति। मोहं जहीति।

देहदारसुतादिषु। शरीरभार्यात्मजगृहादिषु। मोहम्। अहंममा- भिमानम्। महामृत्युम् मृत्युप्रवाहहेतुं जहि। विवेकेन विनाशय। यम्। उपदर्शिताभिमानरूपसपत्नं जित्वा विहत्य। मुनयोमनन- शीलाः विवेकिनः। तद्। वेदान्तप्रसिद्धम्। विष्णोर्व्यापनशीलस्य परममुत्कृष्टं पदं स्वरूपं निरतिशयं सुखं ब्रह्म यान्ति। प्राप्नुवन्ति प्राप्ताश्च। सन् "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इत्यादिश्रुत्यर्थोत्र वर्णितइति बोध्यम्॥ ८६॥

मोहम्। जहि। महामृत्युम्। देहदारसुतादिषु॥ यम्। जित्वा। मुनयः। यान्ति। तद्। विष्णोः। परमम्। पदम्॥ ८६॥

पुत्र, स्त्री आदिकोंमें अभिमानका कारण देहाभिमान है देहाभिमानके त्यागसे पुत्रादिकोंमें अभिमानका अभावरूप फल स्वतःसिद्ध कहे हैं।मोहम्इति। शरीर स्त्री पुत्र गृह आदिमें अहंमम अभिमानको कि जो मृत्युप्रवाहका हेतु है तिसको विवेकशस्त्रसे विनाश कर जिस शत्रुको मारकर मननशील विवेकीजन वेदान्तप्रसिद्ध व्यापक जीवके उत्तम स्वरूप निरतिशय सुखरूप ब्रह्मको प्राप्त होवै हैं॥ ८६ ॥

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसङ्कुलम्॥
पूर्णं मूत्रपुरीषाभ्यां स्थूलं निन्द्यमिदं वपुः॥८७॥

ननु दर्शनीयतमे सर्वलौकिकवैदिकव्यवहृति समर्थे देहे कथं

घृणोदियाद्येन तदभिमानापनोदे यत्नोविधीयेतेत्यतआह त्वङ्मांसेत्यादिना।

इदं प्रत्यक्षमुपलभ्यमानं स्थूलं वपुः शरीरं त्वङ्मांसादिसप्तधातुवेष्टितं। मूत्रपुरीषाभ्याम्पूर्णम्। आपादमस्तकं स्रवन्नानाविधमलमतएव निन्द्यं घृणास्पदमतएवात्मत्वाभिमानायोग्यं ज्ञातव्यमिति शेषः। दर्शनीयतमत्वादिकन्तु भ्रमकल्पितमतोन घृणानवकाश इति भावः॥ ८७॥

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंकुलम्॥ पूर्णम्। मूत्रपुरीषाभ्याम्। स्थूलम्। निन्द्यम्। इदम्। वपुः॥ ८७॥

(सर्व लोकोमें प्रसिद्ध अतिसुन्दरस्वरूप शरीरमें कैसे ग्लानि होगी इस शंकाका उत्तर इस श्लोकमें कहा है। त्वचा मांस लहू नाड़ी मेद मज्जा हड्डी इन सप्त धातुकरके वेष्टित मल मूत्र करके भरा हुवा ऐसी रीतिसे वर्तमान यह स्थूल शरीर निंदाके योग्य है बाहर जिन पदार्थोंसे ग्लानी होती है सोही सर्व वस्तु इस स्थूलशरीरमें भरी हैं॥ ८७॥

पञ्चीकृतेभ्योभूतेभ्यः स्थूलेभ्यः पूर्वकर्मणा।
समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः॥
अवस्था जागरस्तस्य स्थूलार्थानुभवोयतः॥ ८८॥

ननु स्थूलशरीरमवगतं तत्कारणं पुनर्ब्रह्मैव वाच्यमन्यथा द्वैतापत्तिस्तथाच कथं निन्द्यत्वमस्य घटेतेत्यतआह पञ्चीकृतेभ्यइति। पञ्चीकृतेभ्यो "द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते" इत्युक्तरीत्या पञ्चांशमिलितेभ्यः। अतएव स्थूलेभ्यः। उत्पत्तितः स्थूलाकृतिमुपगतेभ्यः उपादानभूतेभ्योगगनादिभ्योभूतेभ्यः। पूर्वकर्मणा स्वोपार्जितजन्मान्तरीयशुभाशुभकर्मणा निमित्तेन समुत्पन्नम् उत्पत्त्यालिङ्गितम् आत्मनोजीवस्य भोगायतनं सुखदुःखसाक्षात्कारस्थानमिदं स्थूलशरीरम्। ब्रह्म तु निर्विकारत्वान्न परिणाम्युपादानं तथा

व्यवहारस्तु विवर्ताधिष्ठानत्वमात्रावलम्बनइति भावः। तस्य स्थूलदेहाभिमानिनोजीवस्य जागरोऽवस्था । यतस्तदभिमानेन स्थूलपदार्थानुभवोभवति तस्माज्जीवस्य जाग्रदवस्थाभागित्वम्।तस्यस्थूलस्य शरीरस्येत्यर्थस्तु गौणोनमनोरञ्जयतीति हेयः ॥८८ ॥

पञ्चीकृतेभ्यः । भूतेभ्यः । स्थूलेभ्यः । पूर्वकर्मणा । समुत्पन्नम् । इदम् । स्थूलम् । भोगायतनम् । आत्मनः ॥ अवस्था । जागरः । तस्य । स्थूलार्थानुभवः । यतः ॥८८॥

शंका । स्थूल शरीरका कारण ब्रह्मको मानोगे नहीं तौ द्वैतमतकी प्राप्ति होगी जब शरीरको ब्रह्मका कार्य माना तौ फिर इसमें ग्लानी क्यों करते हो । उत्तर । हे शिष्य ! पंचभूतोंका परस्पर मेलन होकर स्थूलताको प्राप्त हुवे पंच महाभूतोंसे जो उपादानकारण हैं और जन्मान्तरमें अपने आपसे कृत शुभ अशुभ कर्मोंसे जो निमित्तकारणरूप हैं उनसे उत्पन्न हुवा जीवके सुख दुःख भोगका स्थान है यह स्थूल शरीरहै ब्रह्मको निर्विकार होनेसे परिणामिउपादानता बने नहीं किन्तु विवर्ताधिष्ठान ब्रह्म है तिसं स्थूल देहके अभिमानी जीवकी जाग्रत् अवस्था है स्थूल देहके अभिमानसे स्थूल पदार्थोंके अनुभव होनेसे ॥ ८८ ॥

वाह्येन्द्रियैः स्थूलपदार्थसेवां,
स्रक्चन्दनस्त्र्यादिविचित्ररूपाम् ॥
करोति जीवः स्वयमेतदात्मना,
तस्मात्प्रशस्तिर्वपुषोऽस्य जागरे ॥ ८९ ॥

स्थूलपदार्थानुभवोयतइत्युक्तमुपपादयति वाह्येन्द्रियैरिति । जीवः प्राणादिसंघाताभिमानी चेतनः । वाह्येन्द्रियैश्चक्षुरादिभिः । स्रक्चन्दनस्त्र्यादिविचित्ररूपां स्रक्चन्दनवनिताविनोदादि-

विविधविषयनिरूप्याम् । स्थूलपदार्थसेवाम् । स्थूलवस्तुसंसृष्टकरण-जातसुखाभिमानवृत्तिम् । एतदात्मना । स्वतादात्म्यापन्नस्थूलदेहेन । स्वयं । स्वतन्त्रः सन् । करोति । सम्पादयति । तस्माज्जीव-भोगायतनत्वादस्य स्थूलशरीरस्य । जागरे । जाग्रदवस्थायाम् । प्रशस्तिः । श्रैष्ठ्यं प्राधान्यमिति यावत् ॥ ८९ ॥

बाह्येन्द्रियैः । स्थूलपदार्थसेवाम् । स्रक्चन्दनस्त्र्यादिविचित्ररूपाम् ॥ करोति । जीवः । स्वयम् । एतदात्मना । तस्मात् । प्रशस्तिः । वपुषः । अस्य । जागरे ॥ ८९ ॥

अब स्थूल पदार्थानुभवका उत्पादन करे है, हेशिष्य ! प्राणादि संघातका अभिमानी चेतन नेत्रादि इन्द्रियों करके माला चन्दन स्त्री आदि नाना प्रकारके स्थूल पदार्थोंके सुखाभिमान-रूप वृत्तिको शरीरके सङ्ग तादात्म्य अध्यास करके स्वतन्त्र हुवा संपादन करे है जीवके भोगका स्थान होनेसे इस स्थूल शरीरकी जाग्रत् अवस्थामें प्रधानता है यह जीव स्थूलभोगोंको स्थूल शरीरसें ही भोगे है इस कारणसे स्थूल शरीरकी जाग्रत् अवस्था है ऐसा अर्थ करना उचित नहीं है क्योंकि शरीरको जड होनेसे जाग्रत् अवस्था बने नहीं किन्तु चिदाभासयुक्त अन्तःकरणकी ही यह अवस्था है शरीरकी तो बाल्य कुमार आदि अवस्था प्रसिद्ध हैं उनका वर्णन यहां अनुपयुक्त होनेसे नहीं किया है ॥ ८९ ॥

सर्वोऽपि बाह्यसंसारः पुरुषस्य यदाश्रयः ॥
विद्धि देहमिदं स्थूलं गृहवद्गृहमेधिनः ॥ ९० ॥

सर्वसंसारयात्रानिदानत्वेनापि स्थूलदेहस्य प्राधान्यमाह सर्वोऽपीति ।

पुरुषस्य जीवस्य बाह्यसंसारः स्त्रीसुतवित्तादिप्रपञ्चः सर्वोऽपि निखिलोऽपि यदाश्रयः देहाधीनः गृहमेधिनः गृहस्थस्य गृहवदागार-वत् इदं प्रत्यक्षोपलब्धम् । स्थूलम् स्थूलाकारम् । विद्धि । विजा-

नीह्हि । एतत्पोषणार्थत्वादन्येषामिति भावः । तथाच यथा गृह्मेधिनोगृहादिः स्वान्यस्तथा स्थूलदेहोपि स्वात्मनोऽन्योविज्ञातव्य इति भावः ॥ ९० ॥

सर्वः । अपि । बाह्यसंसारः । पुरुषस्य । यदाश्रयः ॥ विद्धि । देहम् । इदम् । स्थूलम् । गृहवत् । गृहमेधिनः ॥ ९० ॥

सर्व संसार व्यवहारका कारण होनेसे भी स्थूल शरीरको प्रधान कहे हैं। जीवको स्त्री पुत्र धनादि प्रपञ्च संपूर्णही देहके अधीनहै गृहस्थको अपने गृहकेवत् यह जो प्रत्यक्ष स्थूलाकार शरीर है इसको जान इसीके पालनाके वास्ते पुत्र दारादि सर्व हैं जैसे गृहस्थका गृह गृहस्थसे भिन्न है तैसे इस जीव का गृह स्थूल शरीर जीवसे भिन्न है यह तात्पर्य्य है ॥ ९० ॥

स्थूलस्य सम्भवजरामरणानि धर्माः,
स्थौल्यादयोबहुविधाः शिशुताद्यवस्थाः ॥
वर्णाश्रमादिनियमाबहुधाऽऽमयाः स्युः,
पूजावमानबहुमानमुखाविशेषाः ॥ ९१ ॥

स्थूलदेहस्य सविकारत्वं दर्शयति स्थूलस्येत्यादिना ।

स्थूलदेहस्य सम्भवजरामरणानि । जन्मजराविनाशाधर्माविकाराः तथा स्थौल्यादयोपि बहुविधाः । धर्माइति देहलीदीपन्यायेन सम्बन्धनीयम् । तथाच "जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते विनश्यति चेति" यास्कोक्ताः षड्भावविकाराविज्ञातव्याः॥ तथा शिशुताद्यवस्थाः । बाल्याद्यवस्थादयोविकाराः । एवं वर्णाश्रमादिनियमाः ब्राह्मण्यादिवर्णाः ब्रह्मचर्याद्याश्रमास्तेषां नियमाः स्वाश्रयमात्रवृत्तित्वादयः तथा बहुविधा अनेकधा आमयाज्वरादयोगदाः पूजाऽवमानबहुमानमुखाः । अर्चापमानंविपुलमानादयोविशेषाः । विविधभेदाः स्युर्भवन्ति । तथाच सर्वेषामेषां सम्भवादिबहुमानान्तानामनात्मधर्माणामात्मन्यभिमानापादनेन सर्वथा

बन्धकत्वादस्य स्थूलदेहस्य निन्दनं पुरस्तादुक्तं युक्तं वेदितव्यं विवेकिभिरिति भावः ॥ ९१ ॥

स्थूलस्य । सम्भवजरामरणानि । धर्माः । स्थौल्यादयः । बहुविधाः । शिशुताद्यवस्थाः ॥ वर्णाश्रमादिनियमाः । बहुधा । आमयाः । स्युः । पूजावमानबहुमानमुखाः । विशेषाः ॥९१॥

स्थूल देहको विकारी दिखावे हैं। जन्म जराविनाश आदि धर्म स्थूल देहके हैं तथा स्थूलतादि दूसरे भी अनेक प्रकारके धर्म विकाररूप इस शरीरके हैं बाल्य आदि अवस्था ब्राह्मणत्वादि वर्ण ब्रह्मचर्यादि आश्रम तथा अनेक प्रकारके ज्वरादि रोग पूजा तिरस्कार बहुमान इत्यादि नाना प्रकारके भेद हैं स्थूल शरीरमें आत्मताका अभिमान करनेसे इन धर्मोंको आत्मा अपनेमें मानता है उसीसे बन्धनको प्राप्त होता है इसकारण आत्माके बन्धनका हेतु यह स्थूल शरीर है ॥ ९१ ॥

बुद्धीन्द्रियाणि श्रवणं त्वगक्षि,
घ्राणं च जिह्वा विषयावबोधनात् ॥
वाक्पाणिपादागुदमप्युपस्थः,
कर्मेन्द्रियाणि प्रवणेन कर्मसु ॥ ९२ ॥

स्थूलं देहं सविशेषं प्रदर्श्य सूक्ष्मं प्रदर्शयितुं तावदिन्द्रियाणि प्रदर्शयति । बुद्धीन्द्रियाणीति ।

श्रवणं त्वगक्षि घ्राणं जिह्वा च । श्रोत्रादिजिह्वान्तानि पञ्च विषयावबोधनात् पञ्चानां शब्दादीनां विषयाणामवबोधजननकरणत्वाद्बुद्धीन्द्रियाणि ज्ञानेन्द्रियाणीत्यर्थः । अत्र जिह्वापदेन रसना । वाक्पाणिपादागुदमुपस्थोपि वागागुपस्थान्तानि पञ्च वचनादानविहारविसर्जनानन्दाख्येषु कर्मसु प्रवणेन प्रवर्तनेन । कर्मेन्द्रियाणि ज्ञातव्यानि शिष्येति शेषः । एतेनेन्द्रियाणामात्मदर्शनायोग्यता दर्शिता । तथाच श्रुतिः 'पराञ्चि खानि व्यतृण-

त्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्' इति ॥ ९२ ॥

बुद्धीन्द्रियाणि । श्रवणम् । त्वक् । अक्षि । घ्राणम् । च । जिह्वा । विषयावबोधनात् ॥ वाक्पाणिपादाः । गुदम् । अपि । उपस्थः । कर्मेन्द्रियाणि । प्रवणेन । कर्मसु ॥ ९२ ॥

शब्दादि विषयोंके ज्ञानका हेतु होनेसे श्रोत्र त्वचा नेत्र नासिका और रसना यह ज्ञानेन्द्रिय कहलाते हैं वाक् हाथ पाद गुदा और लिङ्ग यह पांच कथन, ग्रहण-त्याग, गमन, मल-त्याग, आनन्द, भोगरूप कर्मोंमें प्रवर्तक होनेसे कर्मेन्द्रिय जानने चाहियें इस श्लोकमें इन्द्रियोंका वर्णन सूक्ष्म शरीरके वर्णन के लिये किया है ॥ ९२ ॥

निगद्यतेऽन्तःकरणं मनोधी-
रहङ्कृतिश्चित्तमिति स्ववृत्तिभिः ॥
मनस्तु संकल्पविकल्पनादिभि-
र्बुद्धिः पदार्थाध्यवसायधर्मतः ॥ ९३ ॥

बाह्यकरणानि निरूप्यान्तःकरणं सविभागमाह निगद्यते इत्यादिना ।

अन्तःकरणम् । अन्तरेव देहस्य हृदयपुण्डरीके वर्तमानं सत् सर्वज्ञानकरणम् । स्ववृत्तिभिः । स्वपरिणामविशेषैः । मनआदिचित्तान्तनामभिर्निगद्यते । इति शब्दोऽर्थपदार्थकस्य शब्दस्य शब्दपदार्थकत्वं करोति गविल्ययमाहेत्यादिवदिति बोध्यम् । मनआदिनाम्नामर्थं स्फोरयति मनस्त्वित्यादिना । सङ्कल्पविकल्पनादिभिः । इदमेवम नेवं वेति लक्षणप्रभृतिवृत्तिभिस्तु मनोनाम्नाऽन्तःकरणं निगद्यते इत्यन्वयः । आदिशब्देनालोचनादिपरिग्रहः । पदार्थाध्यवसायधर्मतो वस्तुनिश्चयरूपपरिणामतो बुद्धिरिति निगद्यते इति बोध्यम् ॥ ९३ ॥

निगद्यते । अन्तःकरणम् । मनः । धीः । अहङ्कृतिः । चित्तम् । इति । स्ववृत्तिभिः ॥ मनः । तु । संकल्पविकल्पनादिभिः । बुद्धिः । पदार्थाध्यवसायधर्मतः ॥ ९३ ॥

बाह्यकरणोंको निरूपण कियाहै अब अन्तःकरणको निरूपण करे हैं। देहके भीतर हृदयकमलमें रहकर सर्वज्ञानोंके करणको अन्तःकरण कहे हैं सो मन बुद्धि अहंकार चित्त इस प्रकार चार वृत्तियोंकरके वर्तमान है संकल्प विकल्प आदि करनेसे मन कहाताहै और वस्तुके निश्चयरूप परिणामसे बुद्धि कहावे है ९३

अत्राभिमानादहमित्यहङ्कृतिः ॥
स्वार्थानुसन्धानगुणेन चित्तम् ॥ ९४ ॥

अत्र देहादौ। अहमित्यभिमानादहङ्कृतिरहङ्कारइति। स्वार्थानुसन्धानगुणेन स्वसुखसाधनवस्तुचिन्तनवृत्तिनिमित्तेन तदन्तःकरणं चित्तमिति निगद्यते ॥ ९४ ॥

अत्र। अभिमानात्। अहम्। इति। अहङ्कृतिः ॥ स्वार्थानुसन्धानगुणेन। चित्तम् ॥ ९४ ॥

देह आदिमें अहंता रूप अभिमान करनेसे अहंकार कहावै है अपने सुखके साधन आदिके चिन्तन करनेसे अन्तःकरणको चित्त कहे हैं ॥ ९४ ॥

प्राणापानव्यानोदानसमानाभवत्यसौ प्राणः ॥
स्वयमेववृत्तिभेदाद्विकृतिभेदात्सुवर्णसलिलादिवत् ९५

अन्तःकरणवद्देवान्तःपवनमपि निरूपयति प्राणापानेत्यादिना। असौ प्राणः। प्रकर्षेणादृष्टवशेन देहान्तरानितीति प्राणः। देहाभ्यन्तरवर्तीपवमानइत्यर्थः। विकृतिभेदाद्विकारविशेषात्। सुवर्णसलिलादिवत्। सुवर्णं यथैकमेव सत्परिणामभेदात्कटककुण्डलाद्यनेकविधम् भवति यथाचैकमेव सलिलमन्तर्वातप्रवेशानिमित्ततस्तरङ्गादिनानारूपं दृश्यते। तथा वृत्तिभेदात्तत्तत्क्रियाभेदात्। स्वयमेव एकएव सः। प्राणापानव्यानोदानसमानाभवति। प्राणादिसमानान्तसंज्ञाभागी भवतीत्यर्थः। ते च प्राणस्य क्रियाभेदामूलएव स्फुटी भविष्यन्ति। स्थानानि तु 'हृदि प्राणोगुदेऽपानः सम-

नोनाभिसंस्थितः। उदानः कण्ठदेशस्थोव्यानः सर्वशरीरगः' ॥ इत्यत्रोक्तानि वेदितव्यानि अत्रासावित्युक्त्या प्राणस्य परोक्षत्वमभिहितम्। नाड्यादिक्रियया प्राणानुमानस्य सर्वसुज्ञानुमतत्वादिति ध्येयम् ॥ ९१ ॥

प्राणापानव्यानोदानसमानाः। भवति। असौ। प्राणः ॥ स्वयम्। एवं। वृत्तिभेदात्। विकृतिभेदात्। सुवर्णसालिलादिवत् ॥ ९५ ॥

पीछे अन्तःकरणका निरूपण किया है अब अन्तःपवनका निरूपण करे हैं। देहके अदृष्ट अधीन शरीरके अन्तर चेष्टा करने वाला पवन विशेष प्राण नामसे प्रसिद्ध है जैसे एक ही सुवर्ण कटकादि रूपसे और एक ही जल तरङ्गादि रूपसे परिणाम को प्राप्त होवे है तैसे एकही पवन विकारभेदसे प्राण अपान समान व्यान उदान रूप संज्ञाको प्राप्त होवे है। हृदयमें प्राण, गुदामें अपान, नाभिमें समान, कण्ठमें उदान, सर्व शरीरमें व्यान निवास करे हैं ॥ ९५ ॥

वागादि पञ्च श्रवणादि पञ्च,
प्राणादि पञ्चाभ्रमुखानि पञ्च ॥
बुद्ध्याद्यविद्यापि च कामकर्मणी,
पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥ ९६ ॥

यदर्थं करणप्राणनिरूपणमुपक्रान्तं तत्सूक्ष्मशरीरं करणप्राणसंघातात्मकं निरूपयति वागादीति।

वागादिपञ्चकम्। श्रवणादिपञ्चकम्। प्राणादिपञ्चकम्। अभ्रमुखानि। आकाशादीनि भूतानि। पञ्च च। बुद्ध्यादिचतुष्टयम्। अविद्या। कामः। कर्म। एतत्पुर्यष्टकं पुरीणां जीवस्य राज्ञो निवासार्थमभिमतानां वागादीनामष्टकं सूक्ष्मशरीरं प्राज्ञाः शास्त्रज्ञाः ब्रुवन्ति ॥ ९६ ॥

वागादि । पञ्च । श्रवणादि । पञ्च । प्राणादि । पञ्च । अभ्रमुखानि । पञ्च ॥ बुद्ध्यादि । अविद्या । अपि । च । कामकर्मणी । पुर्यष्टकम् । सूक्ष्मशरीरम् । आहुः ॥ ९६ ॥

जिसके लिये ज्ञानइन्द्रिय कर्मइन्द्रिय तथा प्राणादिका निरूपण किया है तिस सूक्ष्म शरीरका निरूपण करे हैं, हेशिष्य! पंच वाक् आदि कर्मेन्द्रिय और पंच श्रोत्रादि ज्ञानेन्द्रिय और प्राण आदि पंच वायु और आकाशादि पंच सूक्ष्मभूत मन बुद्धि चित्त अहंकार रूपचतुष्टय अन्तःकरण और अविद्या और काम कर्म यह अष्ट पुरी हैं जीवरूप स्वामीके निवास स्थान हैं इनको सूक्ष्म शरीर कहे हैं ॥ ९६ ॥

इदं शरीरं शृणु सूक्ष्मसंज्ञितं,
लिङ्गं त्वपञ्चीकृतभूतसम्भवम् ॥
सवासनं कर्मफलानुभावकं,
स्वाज्ञानतोऽनादिरुपाधिरात्मनः ॥ ९७ ॥

ननु वागादीनां समुदायएव पूर्वमुपदर्शितस्तस्य कथं शरीरत्वमतआह इदमिति ।

इदं वागादिसंघातसंवलितं त्वपञ्चीकृतभूतसम्भवम् । यतोऽपञ्चीकृतभूतोपादानकमतः सूक्ष्मसंज्ञितं शरीरमिति हेतुगर्भितं विशेषणम् ।"ततः सत्यवतःकायात्पाशबद्धं वशं गतम् । अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमोबलादि" त्युक्तेरिति बोध्यम् । शृणु निश्चिनु । एतच्च लिङ्गमिति नाम्नापि प्रथितम् । लिङ्गशब्दार्थमाह । कर्मफलानुभावकमिति । कर्मणामदृष्टात्मनां स्वास्मिँल्लीनानां फलस्य सुखदुःखात्मनोऽनुभवजनकमित्यर्थः । तथाच लीनमर्थं गमयतीति लिङ्गमिति निर्वचनं बोध्यम् । स्मृतिकारणवासनाधिष्ठानत्वाच्च तथेत्याह । सवासनमिति । तच्चात्मनः । स्वाज्ञानतःआत्मा ज्ञानहेतोरात्मन्यनात्मारोपनिदानमनाद्युपाधिः स्फटिकेलौहित्यारोपनिदानजपाकुसुमादिवदिति भावः ॥ ९७ ॥

इदम्। शरीरम्। शृणु। सूक्ष्मसंज्ञितम्। लिङ्गम्। तु। अपञ्चीकृतभूतसम्भवम्॥ सवासनम्। कर्मफलानुभावकम्। स्वाज्ञानतः। अनादिः। उपाधिः। आत्मनः॥ ९७॥

शंका। वाक् आदिके समुदायको शरीर कैसे मानें। उत्तर। हे शिष्य! वाक् आदिके समुदाय करके वेष्टित अपंचीकृत पंचभूतरूप उपादान कारणसे उत्पन्न हुवा है उसको तुम श्रवण करो इसको लिंगदेह भी कहते हैं कर्म जो अदृष्टरूपसे लिंगदेहमें लीन हैं उनके सुख दुःखरूप फलके अनुभवका कारण है और स्मृतिका हेतु वासनासमूहका आश्रय है और आत्माके अज्ञानरूप निमित्तसे आत्माकी अनादि उपाधिरूप भी है जैसे मणिमें लाल आदि रंगोंके आरोपणमें जपाकुसुम आदि द्रव्य निमित्त हैं तैसे आत्मामें कर्तृत्व आदिके आरोपमें यह सूक्ष्म शरीर निमित्त है॥ ९७॥

स्वप्नोभवत्यस्य विभक्त्यवस्था,
स्वमात्रशेषेण विभाति यत्र॥
स्वप्ने तु बुद्धिः स्वयमेव जाग्रत्,
कालीननानाविधवासनाभिः॥ ९८॥

सूक्ष्मशरीरे स्वप्नावस्थादिकं प्रदर्शयन् सर्वविलासोजीवस्यैतदायत्तइत्याह स्वप्नइति।

अस्य एतदभिमानिनोजीवस्य विभक्त्यवस्था जाग्रद्विविक्तावस्था स्वप्नोभवति यत्र यस्याम् स्वमात्रशेषेण लीनबाह्यकरणेन स्वेनैव रूपेण विभाति विविधरूपाणि विभाव्य भासते बाह्ये करणलये कथं नानारूपभानमिति चेत्तत्राह स्वप्ने तु बुद्धिरित्यादिना स्वप्ने स्वप्नावस्थायां तु बुद्धिरन्तःकरणम् स्वयमेव बाह्यपदार्थासहकृतमेव किं सर्वथा बाह्यपदार्थासहकारः स्वप्ने, तर्हि खपुष्पादेरसतोपि तत्र भानप्रसङ्गस्तत्राह। जाग्रदित्यादिना जाग्रत्कालीन-

नानाविधवासनाभिःजाग्रद्दृष्टपदार्थसंस्कारैःसहकृताबुद्धिरित्यर्थः। स्थूलात्मना बाह्यपदार्थासहकारेपि वासनात्मना तेषां सहकारो वर्ततएवेति न खपुष्पादेरसतोभानापत्तिरिति भावः ॥ ९८ ॥

स्वप्नः । भवति । अस्य । विभक्त्यवस्था । स्वमात्रशेषेण । विभाति । यत्र ॥ स्वप्ने । तु । बुद्धिः । स्वयम् । एव । जाग्रत्कालीननानाविधवासनाभिः ॥ ९८ ॥

सूक्ष्मशरीरमें अवस्थादिको दिखाते हुये जीवके सर्व विलास को सूक्ष्मदेहके अधीन कहे हैं । हे शिष्य ! सूक्ष्म देहाभिमानी जीवको जाग्रत्से पृथक् अवस्था स्वप्न होवै है जिसमें बाह्यकरणोंके लय होनेसे अपने रूपकरके ही नाना रूपोंको धारके नाटक करेहै और स्वप्नावस्थामें अन्तःकरण बाह्य पदार्थोंकी सहायताके विनाही जाग्रत् कालके पदार्थोंकी नाना प्रकारकी वासनाकी सहायतासे पूर्व उक्त विलास करे है ॥ ९८ ॥

कर्त्रादिभावं प्रतिपद्य राजते,
यत्र स्वयं भाति ह्ययं परात्मा ॥
धीमात्रकोपाधिरशेषसाक्षी,
न लिप्यते तत्कृतकर्मलेशैः ॥
यस्मादसङ्गस्ततएव कर्मभि-
र्नलिप्यते किञ्चिदुपाधिना कृतैः ॥ ९९ ॥

कर्त्रादिभावं प्रतिपद्य । सवासनमन्तःकरणमेव कर्तृकर्मकरणादिरूपेण परिणतं सत्तद्धर्मकर्तृत्वादिकमप्यस्य राजते भासते । यत्र स्वप्ने अयं परात्मा । सूक्ष्मसाक्षी चिदात्मा । स्वयं हि । स्वयमेव करणव्यापारमन्तरैव भाति । मनोविलासं भासयति । परात्मशब्दं व्याचष्टे धीमात्रेत्यादिना । केवलबुद्ध्युपाधिकोऽशेषसाक्षी समस्तस्वप्नसृष्टिसाक्षीत्यर्थः। सच तत्कृतकर्मलेशैः। बुद्धिकृतपुण्यपा-

पाभासैः न लिप्यते। न संसृज्यते,कुतस्तत्राह यस्मादिति। यतोऽयमसङ्गस्ततएव। उपाधिना बुद्ध्यादिना कृतैः कर्मभिर्न किञ्चित् कथंचित् क्रियाविशेषणं वा नैव लिप्यते। तथाच श्रुतिः यद्वै किञ्चित्पश्यत्यनन्वागतस्तेन भवति असङ्गोह्ययं पुरुषइति पुनरुक्तिः स्पष्टबोधार्था ॥ ९९ ॥

कर्त्रादिभावम्। प्रतिपद्य। राजते। यत्र। स्वयम्। भाति। हि। अयम्। परात्मा ॥ धीमात्रकोपाधिः। अशेषसाक्षी। न। लिप्यते। तत्कृतकर्मलेशैः ॥ यस्मात्। असङ्गः। ततः। एव। कर्मभिः। न। लिप्यते। किञ्चित्। उपाधिना। कृतैः ॥ ९९॥

वासनासहित अन्तःकरण ही कर्ता कर्म करण आदिरूप करके परिणामको प्राप्त हुवा उनके धर्म कर्तृत्वादिको भी प्रकाश करेहै स्वप्नमें सूक्ष्मसाक्षी चेतन आत्मा बाह्यकरणोंके व्यापार विना ही मनके परिणामोंको प्रकाश करेहै सो आत्मा सर्वस्वप्नसृष्टिका साक्षी है बुद्धिमात्र उपाधि वाला है और बुद्धिकृत पुण्य पापके आभास करके लिप्त नहीं होवै है जिस कारणसे यह असङ्ग है इसी कारणसे ही बुद्धिरूप उपाधिकरके कृत कर्मोंकरके किसी प्रकारसे भी लिप्त नहीं होवै है॥ ९९ ॥

सर्वव्यापृतिकरणं लिङ्गमिदं स्याच्चिदात्मनः पुंसः ॥
वास्यादिकमिवतक्ष्णस्तेनैवात्मा भवत्यसङ्गोऽयम् १००

सूक्ष्मशरीरस्य लिङ्गत्वमुक्तं प्रकारान्तरेण निर्वक्ति सर्वव्यापृतीति।

चिदात्मनः। चेतनस्य पुंसः। पुरुषस्य। सर्वव्यापृतिकरणम्। सर्वेषां लौकिकवैदिकव्यवहाराणां करणानि साधकतमानीन्द्रियाण्यत्रेतीदमपि करणमतोव्याख्यातमिदं सूक्ष्मशरीरं लिङ्गमिति पदेन तत्र दृष्टान्तमाह वास्यादिकमित्यादिना। तक्ष्णोवास्यादिकं यथा काष्ठतनूकरणकरणं तथेदं चिदात्मनश्चिद्रूपस्य लिङ्गं बोधक-

१ इदं पूर्वान्वयि ॥

मित्यर्थः । तेनैव । लिङ्गेन । स्वच्छायापन्नेन करणग्रामाश्रयेण चिदात्मनः सर्वव्यापृतिसाधनसमर्थेन सम्राट् स्वामात्येनेवायमात्माऽसङ्गः साक्षी भवति । अत्र यथाच्छिदादिकरणानां वास्यादीनां कर्तारमन्तरा फलानुपधानं दृश्यते तथा चक्षुरादीनामपि ज्ञानकर्मकरणानां कर्तारमन्तरा फलोपधानं न भवितुमर्हतीति तदधिष्ठाताऽनुमीयते इति बोध्यम् । "असङ्गो ह्ययं पुरुषः" इति श्रुत्या च तस्यासङ्गत्वमन्तव्यमिति ध्येयम् ॥ १०० ॥

सर्वव्यापृतिकरणम् । लिङ्गम् । इदम् । स्यात् । चिदात्मनः । पुंसः ॥ वास्यादिकम् । इव । तक्ष्णः । तेन । एव । आत्मा । भवति । असङ्गः । अयम् ॥ १०० ॥

सूक्ष्म शरीरको प्रकारान्तरसे वर्णन करे हैं। हे शिष्य! चेतनस्वरूप पुरुषका सर्वलौकिक वैदिक व्यवहारोंके साधक इन्द्रियगण इसमें रहे हैं इसीसे इस सूक्ष्म शरीरको लिङ्ग पदसे कहे हैं इसमें दृष्टान्त है "जैसे बढईके बसूला आदि शस्त्र काष्ठके छेदनके करण होवे हैं तैसेही चेतनरूप आत्माका यह बोधक है इसी कारणसे ही" यह असङ्ग आत्मा साक्षी होवेहै" अर्थात् जैसा बसूला आदि शस्त्रकर्तासे विना क्रियामें समर्थ नहीं होवे है तैसे ही इन्द्रियग्रामका आश्रय सूक्ष्म शरीर चेतन आत्माके विना रूप ज्ञानादि क्रियामें समर्थ नहीं होवे है इस प्रकार साक्षी आत्माका बोधक होनेसे इसको लिङ्ग कहेहैं ॥

अन्धत्वमन्दत्वपटुत्वधर्माः,
सौगुण्यवैगुण्यवशाद्धि चक्षुषः ॥
बाधिर्यमूकत्वमुखास्तथैव,
श्रोत्रादिधर्मान तु वेत्तुरात्मनः ॥ १०१ ॥

नन्वन्धोहमित्याद्यनुभवेनान्धत्वादीनां विकाराणामात्मनि सिद्धेर्नासङ्गत्वसिद्धिरत आह । अन्धत्वेत्यादिना ।

हि यतः सौगुण्यवैगुण्यवशात् निर्दोषत्वसदोषत्वनिमित्ततश्चक्षुषोनेत्रस्यान्धत्वमन्दत्वपटुत्वधर्माः । पटुत्वान्धत्वस्वल्पेक्षणक्षमत्वादयोधर्मा भवन्ति । तत्र सौगुण्यतः पटुत्वं वैगुण्यतोऽन्धत्वादिकं बोद्धव्यम्।तथा पूर्वनिमित्ततएव बाधिर्यमूकत्वमुखाःश्रोत्रादिधर्माः। बाधिर्यं श्रोत्रस्य। मूकत्वं वाचः। कौण्यं करयोः पङ्गुत्वं पादयोश्च तथान्येपि यथानुभूतिकरणविकाराभवन्ति । वेत्तुः । तत्साक्षिणश्चिदात्मनस्तु नैते सम्भवन्ति साक्षित्वादेवेति भावः। "सूर्योयथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः। एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः" इति श्रुतिरत्रानुसन्धातव्या ॥ १०१ ॥

अन्धत्वमन्दत्वपटुत्वधर्माः। सौगुण्यवैगुण्यवशात् । हि । चक्षुषः ॥ बाधिर्यमूकत्वमुखाः।तथा। एव। श्रोत्रादिधर्माः। न। तु ॥ वेत्तुः । आत्मनः ॥ १०१ ॥

शङ्का। मैं अन्धा हूं इत्यादि अनुभवसे आत्मामें अन्धत्वादि धर्मोंकी प्रतीति होनेसे असङ्गता सिद्ध होवै नहीं । उत्तर । हे शिष्य! जिस कारणसे चक्षुके निर्दोषता सदोपता निमित्तसे पटुत्व अन्धत्व मन्दत्व आदि धर्म नेत्रमें होवैं हैं तथा पूर्व हेतुसे ही बधिरता मूकता आदि धर्म श्रोत्रादि इन्द्रियोंमें होवैं हैं इन धर्मोंको भ्रमसे आत्मा अपनेमें माने है वास्तवसे इनके साक्षी चिदात्माके यह धर्म बने नहीं जैसे सूर्य्यमें दृश्य प्रपञ्चके धर्म नहीं हैं वैसे ही आत्मामें भी नहीं हैं ॥१०१॥

उच्छ्वासनिःश्वासाविजृम्भणक्षु-
त्प्रस्यन्दनाद्युत्क्रमणादिकाः क्रियाः।
प्राणादिकर्माणि वदन्ति तज्ज्ञाः,

प्राणस्य धर्मावशनापिपासे ॥ १०२ ॥

चक्षुरादिवदेव प्राणोपि सविकारोनात्मेति बोधयितुं प्राणादिकर्माणि दर्शयति । उच्छ्वासेत्यादिना ।

उच्छ्वासाद्युत्क्रमणान्तादिकाःक्रियाः कर्माणि तज्ज्ञाः निर्विकारात्मविदः । प्राणादिकर्माणि । प्राणापानादिधर्मान् वदन्ति निर्ब्रुवन्ति । तथाऽशनापिपासे प्राणस्य धर्मौ । यथा पूर्वं विकाराद्युरुयप्राणांशप्राणापानादिवायुविकारास्तथा क्षुत्पिपासे मुख्यांशीप्राणविकारावित्यर्थः । तत्रोच्छ्वासः कोष्ठचस्य वायोर्बहिर्गतिः । निःश्वासोऽन्तरागतिः । विजृम्भणं गात्रविनामः । प्रस्यन्दनं कर्णमलप्रस्रवणम् । उत्क्रमणमुपात्तदेहवियोगः । इत्येवमन्यदप्यूह्यम् ॥

उच्छ्वासनिःश्वासविजृम्भणक्षुत्प्रस्यन्दनाद्युत्क्रमणादिकाः । क्रियाः ॥ प्राणादिकर्माणि । वदन्ति । तज्ज्ञाः । प्राणस्य । धर्मौ । अशनापिपासे ॥ १० ॥

इन्द्रियोंके वत् विकार वाला होनेसे प्राणभी आत्मा नहीं है ऐसा वर्णन करनेके लिये प्राणादियोंके कर्मोंको दिखावै हैं । ऊर्ध्वगमन, अधोगमन, जम्भाई लेना, छींकना, कर्णमलत्याग, गृहीत देहसे वियोग, उत्तरदेहका संयोग, यह क्रिया प्राणादिके व्यवहाररूप हैं ऐसा विद्वान् कहतेहैं भोजनकीइच्छा, पानकी इच्छा यहभी प्राणके धर्म हैं अन्तःकरणकी धर्मरूप इस इच्छाको प्राणके अधीन होनेसे प्राणका धर्म कहा है ॥१०२॥

अन्तःकरणमेतेषु चक्षुरादिषु वर्ष्मणि ।
अहमित्यभिमानेन तिष्ठत्याभासतेजसा ॥१०३॥

अन्तःकरणकृत्यमाह । अन्तःकरणमिति ।

एतेषु । निरूपितरूपेषु । चक्षुरादिषु । ज्ञानकर्मकरणेषुबाह्येन्द्रियेषु वर्ष्मणि शरीरे च । अहमित्यभिमानेन । अहं पश्यामीत्यादिवृत्त्युत्पादेन । आभासतेजसा चिदाभासभासैव । अन्तःकरणम् । आन्तरविज्ञानकरणमुक्तलक्षणं तिष्ठतीत्यर्थः ॥ १०३ ॥

अन्तःकरणम्। एतेषु। चक्षुरादिषु। वर्ष्मणि॥ अहम्। इति। अभिमानेन। तिष्ठति। आभासतेजसा॥ १०३॥

अब अन्तःकरणके कर्तव्यको कहे हैं। हे शिष्य! पूर्वोक्त नेत्रादिक बाह्य इन्द्रियोंमें और शरीरमें मैं देखता हूं इत्यादि वृत्तिके उत्पन्न करने करके चिदाभासके प्रकाशको लेकर अन्तःकरण स्थित होवै है॥ १०३॥

अहङ्कारःसविज्ञेयःकर्ता भोक्ताभिमान्ययम्॥
सत्त्वादिगुणयोगेन चावस्थात्रयमश्नुते॥१०४॥

देहादिसंघाताभिमान्यन्तःकरणस्यैव कर्तृत्वादिकमित्याह। अहङ्कारइति।

सोऽयमहङ्कारः। कर्ता उक्तसंघाताध्यासनिमित्तचिदाभासाश्रयएव सन् पुण्यादिक्रियासु स्वतन्त्रस्तथा भोक्ता सुखादिसाक्षात्कारवान् अभिमानी। अभिमन्यते। सत्त्वादिगुणयोगेन। सत्त्वादीनां गुणानां मध्ये प्रत्येकं मायान्ये सति सति च द्वयोस्तदानुगुण्ये तेषां गुणप्रधानलक्षणविलक्षणसम्बन्धेन। अवस्थात्रयम्। जागरादित्रयमश्नुते प्राप्नोत्यहर्निशमित्यर्थः॥ १०४॥

अहङ्कारः। सः। विज्ञेयः। कर्ता। भोक्ता। अभिमानी। अयम्॥ सत्त्वादिगुणयोगेन। च। अवस्थात्रयम्। अश्नुते॥

देह आदिके अभिमानी अन्तःकरणके ही कर्तृत्वादि धर्म हैं ऐसा कहेहैं। पूर्वोक्त संघातका अभिमानी होकर पुण्यादिक्रियामें स्वतन्त्र सुखादि साक्षात्कार वाला अभिमानी सत्त्वादि गुणोंके सम्बन्ध करके जाग्रदादि अवस्थात्रयको सो अहंकार ही प्राप्त होवै है ऐसा जानना चाहिये॥ १०४॥

विषयाणामानुकूल्ये सुखी दुःखी विपर्यये॥
सुखं दुःखं च तद्धर्मः सदानन्दस्य नात्मनः॥१०५॥

कर्तृत्वादिवत्सुखादिकमपि तस्यैवेत्याह विषयाणामिति।

विषयाणां शब्दादीनामिन्द्रियसंसृष्टानाम् । आनुकूल्ये स्वसंकल्पानुसारित्वे चिन्तनानुरोधेन चिन्तितःवासाचित्यर्थः । सुखी । आनन्दाभिमानी विपर्यये । विषयाणां प्रातिकूल्ये । पूर्वोक्तप्रकाराद्वैपरीत्ये सति दुःखी । क्लेशभागी भवति । तथाच सुखं दुःखञ्च । अनुकूलप्रतिकूलवेदनीये सुखदुःखे । तद्धर्मः । अन्तःकरणपरिणाम एव । सदानन्दस्य । सर्वदा सुखस्वरूपस्य । "नित्यं विज्ञानमानन्दं ब्रह्मे"ति श्रुतेः । आत्मनः साक्षिरूपाचिदात्मनोन धर्मस्तस्यासङ्गत्वेन निर्विकारत्वादित्यर्थः ॥ १०५ ॥

विषयाणाम् । आनुकूल्ये । सुखी । दुःखी । विपर्यये ॥ सुखम् । दुःखम् । च । तद्धर्मः । सदानन्दस्य । न । आत्मनः॥

कर्तृत्वादिके वत् सुखादिभी अन्तःकरणके धर्म हैं ऐसा निरूपण करे हैं । शब्दादिकोंका इन्द्रियके साथ संयोग होने से अनुकूलता वृत्ति होवै है तब जीव आनन्दका अभिमानी होवै है तथा विषयोंमें प्रतिकूलता वृत्ति होने पर जीव दुःखका अभिमानी होवै है तथा सुख दुःख यह अन्तःकरणके धर्म हैं सर्वदा सुखरूप आत्माके धर्म नहीं हैं ॥ १०५ ॥

आत्मार्थत्वेन हि प्रेयान्विषयोन स्वतः प्रियः ॥
स्वतएव हि सर्वेषामात्मा प्रियतमायतः ॥ १०६ ॥
ततआत्मा सदानन्दोनास्य दुःखं कदाचन ॥
यत्सुषुप्तौ निर्विषयआत्मानन्दोऽनुभूयते ॥
श्रुतिःप्रत्यक्षमैतिह्यमनुमानं च जाग्रति ॥ १०७॥

नन्वानन्दरूपत्वमात्मनोन युज्यते आनन्दस्य विषयेन्द्रियसंयोगादिजन्यत्वेनानित्यत्वादात्मनश्च " अविनाशी वाऽरेयमात्मे"ति प्रभृतिश्रुतिभिर्नित्यत्वाभ्युपगमादानन्दश्रुतिस्तु मत्वर्थीयाच्प्रत्ययेनानन्दवदित्यर्थपरतया योज्येति न तद्विरोधः । न च प्रियप्रतीत्यात्मनआनन्दरूपत्वासिद्धिरनात्मसु विषयेष्वपि प्रियप्रतीते-

रुद्यादन्यथा तत्प्राप्तौ प्रयत्नवैयर्थ्यापत्तिरतआह आत्मार्थत्वेनेति द्वाभ्याम् ।

विषयः । जडवर्गः । आत्मार्थत्वेन । आत्मशेषत्वेन । प्रेयान् । प्रीत्यास्पदम् । स्वतः । शेषितया न । आत्मा तु यतोहेतोः सर्वेषां प्राणभृन्मात्रस्य । स्वतएव । अनन्यशेषतयैव । प्रियतमः ॥ १०६॥ ततः। तस्माद्धेतोः। सदानन्दः। नित्यानन्दस्वरूपः। सदाशब्दार्थं वर्णयति । नास्येति । अस्यात्मनः कदाचिदपि दुःखं दुःखात्मत्वं दुःखधर्मवत्त्वं वा न। यद्वा ननु यथाऽऽत्मनि प्रियप्रतीत्याऽऽनन्दरूपता साध्यते तथा धिङ्मामतिदुःखिनामिति प्रतीत्या दुःखरूपतापि कुतो न सिध्यति । यदि चात्मनि धिक्प्रतीतिः प्रतिकूलोपाधिनिमित्ता तर्हि तथैवानन्दप्रतीतिरपि विषयोपाधिनिबन्धनैवास्तु निर्विषयानन्दस्याप्रतीतेरतआह । नास्येत्याद्यनुभूयतेइत्यन्तम् । तथाचास्य दुःखमौपाधिकं सुखं स्वरूपभूतं विषयोपाधिमन्तरापि सुषुप्तौ सुखानुभवादिति भावः । अन्वयस्तु यत् । यस्मात् सुषुप्तौ विलीनबाह्यान्तःकरणग्रामतमःप्रधाननिद्रावस्थायाम्। निर्विषयः । विषयेन्द्रियसंयोगाद्यभावेन विषयानुपरञ्जितः । आत्मानन्दः । स्वरूपसुखम् । अनुभूयते । सुखमहमस्वाप्समिति जागरस्मृत्यनुमितानुभूत्याऽवगाह्यते। ततआत्मा सदानन्दइति । पूर्वेण सम्बन्धः। तथाच 'एषोऽस्य परमानन्द' इति श्रुतिरात्मनःपरमानन्दरूपतायां प्रमाणम तएव विज्ञानमानन्दमित्यत्र मत्वर्थीयाच्प्रत्ययकल्पनापि निरस्ता। आनन्दोब्रह्मेति व्यजानात्। अयमात्माब्रह्म। "योवै भूमा तत्सुखमि"ति प्रभृति श्रुतिशतमत्र प्रमाणं प्रत्येतव्यम्। प्रत्यक्षं सौषुप्तानुभवः । ऐतिह्यं जीवन्मुक्तपरम्परागतः संवादः । अनुमानम् । आत्मा परानन्दः परप्रेमास्पदत्वाद् व्यतिरेके घटादिवदिति युक्तिश्चैतानि चत्वार्येव जाग्रति सावधानानि निर्दोषाणि प्रमाणानीति नात्मनआनन्दरूपत्वे संशीतिरकस्मात्कर्तव्येति भावः । "तदेतत्प्रेयः पुत्रात्प्रेयोवित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मे"ति श्रुत्यर्थोऽत्र वर्णितइति बोध्यम् ॥ १०७ ॥

आत्मार्थत्वेन । हि । प्रेयान् । विषयः । न । स्वतः । प्रियः॥ स्वतः । एव । हि। सर्वेषाम् । आत्मा । प्रियतमः । यतः॥१०६॥

ततः। आत्मा। सदानन्दः। न। अस्य। दुःखम्। कदा। चन॥ यत्। सुप्तौ। निर्विषयः। आत्मानन्दः। अनुभूयते॥ श्रुतिः। प्रत्यक्षम्। ऐतिह्यम्। अनुमानम्। च। जाग्रति॥१०७॥

आनन्दको विषयेन्द्रियसंयोगजन्य होनेसे नित्य आत्मरूपता बने नहीं प्रिय प्रतीतिको भी द्रव्यादि अनात्म साधारण होनेसे आत्माकी आनन्द रूपतामें प्रमाण नहीं है इस आशङ्का का दो श्लोकोंसे उत्तर देवै हैं। हे शिष्य! जडवर्गको आत्मा के प्रति शेष होनेसे ही प्रिय प्रतीति होवै है शेषी होनेसे प्रियता होवै नहीं जिस कारणसे सर्वजीवोंको आत्मा मुख्यता करके ही प्रियतम है॥ इसी कारणसे आत्मा सर्वदा आनन्द रूप है आत्माको किसी कालमें भी दुःखरूपता वा दुःख-धर्मिता नहीं है॥ शङ्का। मेरे को धिक्कार है इस प्रतीतिसे आत्माको दुःखरूपता भी सिद्ध होनी चाहिये जो कभी दुःख-प्रतीति उपाधिनिमित्तसे मानें तो सुखरूपताकी प्रतीति भी उपाधिनिमित्तसे बनजावैगी तब आत्माको सुखरूपता भी न सिद्ध होवैगी॥ उत्तर। सुषुप्तिकालमें सर्व उपाधिका लय होने पर भी जिस कारणसे निर्विषय आत्मानन्दका अनुभव होवै है इसी कारणसे आत्माकी सुखरूपता उपाधिनिमित्त से विना स्वरूपभूत है और दुःखरूपतामें उपाधि ही निमित्त है। आत्माकी आनन्दरूपतामें वेदकी श्रुति और सुषुप्तिकाल का अनुभवरूप प्रत्यक्ष और आत्मा आनन्दरूप है ऐसा ब्रह्म-ज्ञानिजनोंका संवादरूप ऐतिह्य प्रमाण और आत्मा आन-न्दरूप है परम प्रेमका विषय होनेसे यह अनुमान चारों प्रमाण सावधान हैं॥ १०६॥ १०७॥

अव्यक्तनाम्नी परमेशशक्ति-

रनाद्यविद्या त्रिगुणात्मिका परा ॥
कार्यानुमेया सुधियैव माया,
यया जगत्सर्वमिदं प्रसूयते ॥ १०८ ॥

शरीरत्रयं वर्णयितुमुपक्रान्तं तत्र स्थूलं सूक्ष्मं च शरीरं वर्णितं संप्रति कारणशरीरं वर्णयति । अव्यक्तनाम्नीति ।

त्रिगुणात्मिका । सत्त्वरजस्तमसां समभावेनावस्थितानां बन्धनस्वभावानां समुदायस्वरूपा । सुधिया । तर्ककुशलमतिमता । कार्य्यानुमेया । त्रिगुणात्मसृष्टिरूपकार्येण । तथाविधासाऽनुमातुं शक्या । तथाहि त्रिगुणात्मकमुपलभ्यमानकार्य्यजातं स्वसमानस्वभावेन कारणेन जन्यं भावकार्य्यत्वात् । हिमकरकादिवदिति । अत्र हि कार्य्यविशेषस्यापि स्वसमानस्वभावकारणजन्यत्वेन मुख्यसामान्यव्याप्त्या त्रिगुणात्मस्वभावकार्य्येण त्रिगुणात्मकप्रकृत्यनुमानं न तर्ककौशल्यमन्तरा सम्भवतीतिसुधियेत्युक्तम् । सा किं साङ्ख्याभिमता प्रकृतिरिति चेन्नेत्याह । परमेशशक्तिरिति । साङ्ख्यैः प्रकृतेः स्वातन्त्र्याख्यानान्नेयं सेति भावः । चेतनानधिष्ठितजडप्रवृत्तेरदृष्टेश्च न स्वातन्त्र्यन्तस्याइति बोध्यम् । अव्यक्तनाम्नी । "अव्यक्तात्पुरुषः परः" अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे" इत्यादिश्रुतिस्मृतिप्रसिद्धानभिव्यक्तलक्षणाऽव्यक्तनाम्नी । परा । "अक्षरात्परतः परे"तिश्रुतेः।कार्य्यवर्गात्परा तत्कारणीभूतेत्यर्थः । सा किंमायान्यानेत्याह। मायेति । यया इदं सर्वं जगत्प्रसूयते सा मायेव । अनाद्यविद्या । "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्" मायाभासेन जीवेशौ करोति माया चाविद्या च स्वयमेव भवति"अजामेकां लोहितशुक्लकृष्णाम्" । इत्यादिश्रुतिस्मृतिशतप्रसिद्धमिदमवसेयम् साकारणशरीरमित्यग्रे स्फुटी भविष्यति ॥ १०८ ॥

अव्यक्तनाम्नी । परमेशशक्तिः । अनाद्यविद्या । त्रिगुणात्मिका । परा ॥ कार्यानुमेया । सुधिया । एवं । माया ।

[१०]यया । [१३]जगत् । [१२]सर्वम् । [११]इदम् । [१४]प्रसूयते ॥ १०८ ॥

स्थूल सूक्ष्म शरीरका वर्णन कर दिया अब कारण शरीर का वर्णन करे हैं । हे शिष्य ! सत्त्व रज तम इन तीन गुणों की क्षोभरहित स्थितिको अव्यक्त नामसे कहे हैं तर्क-कुशल बुद्धिमान् पुरुषों करके अनुमान की जाती है अर्थात् सात्त्विक राजस तामस तीन प्रकारकी सृष्टिरूप कार्य्यसे सत्त्व रज तम त्रिगुणात्मक प्रकृतिका अनुमान किया जाता है सो परमेश्वरकी शक्तिरूप है अनादि अविद्यारूप है कार्य प्रपञ्चसे परे कारणरूप है माया शब्दकरके वाच्य ही है जिसने [११]इस [१२]सर्व [१३]जगत्को [१४]उत्पन्न किया है ॥ १०८ ॥

सन्नाप्यसन्नाप्युभयात्मिका नो,
भिन्नाप्यभिन्नाप्युभयात्मिका नो ॥
साङ्गाप्यनङ्गा ह्युभयात्मिका नो,
महाद्भुताऽनिर्वचनीयरूपा ॥ १०९ ॥

तस्याश्च मायायालोकविलक्षणमनिर्वचनीयं रूपं प्रत्येतव्यमित्याह सन्नाप्यसन्नेति ।

अज्ञानं सन्न । सदात्मकं न भवति तथासति ब्रह्मात्मैक्यविज्ञानविनाश्यत्वानुपपत्तेरित्यर्थः । नाप्यसत् । तदज्ञानमत्यन्तासदपि न तथासत्यत्यन्तासतः शशशृङ्गादेरिव कार्यजनकत्वानुपपत्तेः । विरुद्धयोः सत्त्वासत्त्वयोरेकत्र समावेशाभावेन नोभयात्मिकापि माया भवितुमर्हति । तथा भिन्नापि न सा 'एकमेवाद्वितीयम्' इति श्रुतेः । एवमभिन्नापि न स्वशक्तित्वानुपपत्तेः नहि शक्तिमतां वीतिहोत्रादीनां स्वशक्तित्वं दृष्टम् । एवं भेदाभेदयोरेकत्र विरुद्धयोरसमावेशादुभयात्मिकापि न सा । साङ्गा सावयवा न । तदवयवानामनिरूपणात् । अनङ्गापि न । निरवयवापि न भवति । सत्त्वादित्रिगुणात्मकत्वात् । सावयवत्वनिरवयवत्वयोर्विरुद्धयोरेक-

आसमावेशादुभयात्मिकापि न भवितुमर्हति । तस्मादेषा । महाद्भुता । अत्याश्चर्यलक्षणा ततश्चानिर्वचनीयरूपा निर्वक्तुमशक्यात्मिका बोद्धव्येत्यर्थः ॥ १०९ ॥

सत् । न । अपि । असत् । न । अपि । उभयात्मिका । नो । भिन्ना । अपि । अभिन्ना । अपि । उभयात्मिका । नो ॥ साङ्गा । अपि । अनङ्गा । हि । उभयात्मिका । नो । महाद्भुता । अनिर्वचनीयरूपा ॥ १०९ ॥

तिस मायाका लोक विलक्षण अनिर्वचनीय रूप कहे हैं । हे शिष्य ! ब्रह्म आत्माके ज्ञानकर विनाशी होनेसे अज्ञान सत् नहीं है भूत भौतिक सृष्टिका उपादान कारण होनेसे असत् भी नहींहै । परस्पर विरुद्ध धर्मोंकी एक धर्मीमें अवृत्ति होनेसे अविद्या सत् असत् उभयरूप भी नहीं है आत्माको एक अद्वितीयरूप होनेसे आत्मासे भिन्नभी नहींहै आत्माकी शक्ति होनेसे आत्मासे अभिन्न भी नहींहै क्योंकि अग्निआदि पदार्थोंमें दाहकतारूप शक्ति अग्नि आदिका स्वरूप दीखनेमें नहीं आवै है भेद अभेदको परस्पर विरुद्ध होनेसे भिन्न अभिन्न उभयरूप भी नहीं है और अविद्याके अवयवोंका निरूपण न होनेसे सावयव भी नहीं है सत्त्व रज तम रूप गुणत्रय की साम्यावस्थारूप होनेसे निरवयव भी नहीं है सावयव निरवयवको परस्पर विरुद्ध होनेसे उभयरूपभी नहीं है इस प्रकार अनिर्वचनीयरूप अतिआश्चर्यरूप माया है ॥१०९॥

शुद्धाद्वयब्रह्मविबोधनाश्या,
सर्पभ्रमोरज्जुविवेकतोयथा ॥
रजस्तमःसत्त्वमिति प्रसिद्धा-
गुणास्तदीयाः प्रथितैः स्वकार्यैः ॥ ११० ॥

सत्त्वादिरूपत्वाभावे हेतुपरं पद्यं प्रकाशयति । शुद्धाद्वयेत्यादिना। माया मायातत्कार्यमलविकलाद्वैतब्रह्मात्मसाक्षात्कार-निवर्त्या तत्र । दृष्टान्तमाह सर्पभ्रमइति । यथा रज्जुविवेकतः रज्जुविशेषरूपसाक्षात्कारेण । सर्पभ्रमः कल्पितनागभ्रमोनश्यति तथेत्यर्थः । तथाच सद्रूपत्वाभावे विनाशिभावोहेतुरुक्तः। तथाच माया स्वाधिष्ठानसाक्षात्कारविनाश्या कल्पितत्वाद् रज्जुसर्पवत् इत्यनुमानं सूचितं तथा प्रथितैः । सर्वसुज्ञानुभवारूढैः स्वकार्यैः सुखदुःखमोहादिभिः । तदीयाः । मायायाः सत्त्वरजस्तमइति गुणाः । प्रसिद्धाज्ञातव्याइत्यर्थः । तथाच सत्त्वादीनां गुणानां तत्संघातात्ममायावयवानां विद्यमानत्वान्न सा निरवयवापि वक्तुं शक्येति भावः । यद्यप्यवयवारब्धघटादिलक्षणावयविवदस्याअवयवित्वं न सिध्यति तथापि त्रिविष्टब्धकादिवदवयवित्वं प्रत्येतुं शक्यते इति बोध्यम् ॥ ११० ॥

शब्दाद्वयब्रह्मविबोधनाश्या। सर्पभ्रमः। रज्जुविवेकतः।यथा॥ रजः । तमः । सत्त्वम् । इति । प्रसिद्धाः । गुणाः । तदीयाः । प्रथितैः। स्वकार्यैः ॥ ११० ॥

सत्त्वादिरूप न होनेमें हेतुको वर्णन करे हैं । हे शिष्य ! माया तत्कार्य मलसे रहित अद्वैत ब्रह्मात्माके साक्षात्कारसेनिवृत्त होवै है जैसे रज्जुके विशेष स्वरूपके साक्षात्कारसे कल्पित सर्पभ्रम निवृत्त होवै है इस हेतुसे सत्रूप नहींहै सर्व विवेकीजनोंके अनुभवप्रसिद्ध सुख दुःख मोहादिरूप कार्योंकरके सत्त्व रज तम रूप गुण प्रसिद्ध हैं इस कारणसे माया निरवयव भी नहीं है ॥ ११०॥

विक्षेपशक्तीरजसः क्रियात्मिका,
यतःप्रवृत्तिः प्रसृता पुराणी ॥
रागादयोऽस्याः प्रभवन्ति नित्यं,

दुःखादयोये मनसोविकाराः ॥ १११ ॥

स्वकार्यैरित्युक्तमेव व्यक्तीकरोति । विक्षेपशक्तीरजसइति । "रोरी"ति रेफलोपे ढूलोपे पूर्वस्येति दैर्घ्यं बोध्यम् । रजसः । रजोगुणस्य । विक्षेपशक्तिः । चलनसामर्थ्यम् । यतः । रजसः । क्रियात्मिका पुराणी प्रवृत्तिः प्रसृता । चलनलक्षणानादिप्रवाहनिर्गतिः । न केवलं बाह्यप्रवृत्तावियं हेतुः किन्तु मानसविकाराअप्यस्याउद्भवन्तीति बोध्यमित्याह रागादयोऽस्याइति । रागादयोविषयाभिलाषप्रभृतयः।दुःखादयश्च प्रतिकूलवेदनीयलक्षणदुःखाऽनुकूलवेदनीयलक्षणसुखादयोयेमनसोऽन्तःकरणस्य विकाराःपरिणामविशेषानित्यं निर्विच्छेदं प्रभवन्ति । उत्पद्यमानाअनुभूयन्ते साक्षिणा तेऽपि । अस्याराजस्याविक्षेपशक्तेरेवोद्भवन्ति नान्यथा । सुपुप्तावननुभवादिति सुप्रसिद्धा राजसीशक्तिरिति भावः ॥ १११ ॥

विक्षेपशक्तिः[2] । रजसः[1] । क्रियात्मिका[3] । यतः[4] । प्रवृत्तिः[7] । प्रसृता[8] । पुराणी[6] ॥ रागादयः[9] । अस्याः[14] । प्रभवन्ति[15] । नित्यम्[13] । दुःखादयः[9] । ये[10] । मनसः[11] । विकाराः[12] ॥ १११ ॥

सत्त्वादि गुणोंके कार्योंको निरूपण करे है । हे शिष्य ! रजो[1]गुणकी विक्षेप[2]शक्ति नामक गमन[3]सामर्थ्य है जिससे[4] क्रियारूप[5] पुरातन[6] प्रवृत्तिका[7] प्रवाह चलरहा है और रागादि[8] दुःखादि[9]रूप जो[10] मनके[11] विकार[12] नित्य[13] अनुभूत होवै हैं सो भी इस[14] विक्षेपशक्तिसे ही होवै[15] हैं ॥ १११ ॥

कामः क्रोधोलोभदम्भाद्यसूया-
ऽहङ्कारेर्ष्यामत्सराद्यास्तु घोराः ॥
धर्माएते राजसाः पुम्प्रवृत्ति-
र्यस्मादेषा तद्रजोबन्धहेतुः ॥ ११२ ॥

संप्रति तथाशक्तस्य रजसोबन्धहेतुत्वं दर्शयति । कामःक्रोधइति । कामादिमत्सरान्तायेधर्माघोराः । भ्रमणहेतवः । एते राजसाः ।

रजोविलासाः । यस्मात् । रजसः । एषा । कामादिरूपा । पुम्प्रवृत्तिः । पुरुषप्रवृत्तिप्रवाहपरम्परा प्रवृत्ता । तत् । घोरप्रवृत्तिनिमित्तम् । रजोबन्धहेतुः । अन्यथाग्रहरूपबन्धनस्याविद्यैकदेशोरजोभागोहेतुर्बोद्धव्य इति विक्षेपसंक्षेपः ॥ ११२ ॥

कामः । क्रोधः । लोभदम्भाद्यसूयाऽहङ्कारेर्ष्यामत्सराद्याः । तु । घोराः ॥ धर्माः । एते । राजसाः । पुम्प्रवृत्तिः । यस्माद् । एषा । तद् । रजः । बन्धहेतुः ॥ ११२ ॥

अब विक्षेपशक्तिवाले रजोगुणको बन्धकारणता निरूपण करेहैं । हे शिष्य ! काम क्रोध लोभ दम्भ द्रोह आदि तथा असूया अर्थात् गुणोंमें दोष आरोपण करना अहंकार ईर्ष्या मत्सर मान अपमान आदि यह धर्म रजोगुणके घोररूप हैं अर्थात भ्रमणहेतु हैं जिस हेतुसे पुरुषकी प्रवृत्ति पूर्वोक्त रजोगुणसे होवै है उसी हेतुसे पुरुषके अन्यथा ज्ञानरूप बन्धनका हेतु अविद्याका एक देश रजोगुण है ॥ ११२ ॥

एषाऽऽवृतिर्नाम तमोगुणस्य,
शक्तिर्यया वस्त्ववभासतेऽन्यथा ॥
सैषा निदानं पुरुषस्य संसृते-
र्विक्षेपशक्तेः प्रवणस्य हेतुः ॥ ११३ ॥

रजोगुणस्य विक्षेपशक्तिं निरूप्य तमोगुणस्यावरणशक्तिं निरूपयति । एषाऽऽवृतिरिति ।

यया वस्तु चिदात्मतत्त्वम् । अन्यथाऽवभासते । आत्मानात्मनोर्मिथुनीकृत्यातद्विपरीतप्रत्ययगोचरोभवति साविपरीतप्रत्ययहेतुस्तमोगुणस्यावृतिः शक्तिः आवरणशक्तिरेषा नाम प्रसिद्धा सर्वत्रानात्मवित्सु । न सा केवलमन्यथावभासनं विधायैव शाम्यति किन्तु सैषाऽऽवृतिशक्तिः । पुरुषस्य संसृतेर्निदानम् । पुरुषजन्मसृतिप्रवाहहेतुः । किञ्च विक्षेपशक्तेः पूर्वाभिहितायाराजस्याः

शक्तेः। प्रवणस्य कार्य्योन्मुखत्वस्याप्येषैव हेतुरित्यर्थः ॥ ११३ ॥

एषा। आवृतिः। नाम । तमोगुणस्य । शक्तिः। यया। वस्तु। अवभासते । अन्यथा॥ सा । एषा । निदानम्। पुरुषस्य। संसृतेः। विक्षेपशक्तेः। प्रवणस्य। हेतुः ॥ ११३॥

रजोगुणकी विक्षेपशक्तिका निरूपण किया अब तमोगुणकी आवरणशक्तिको कहे हैं। हे शिष्य ! जिस करके चिदात्मा का स्वरूप विपरीत प्रतीतिका विषय होवै है सो यह तमोगुण की आवरणशक्ति है सो अज्ञानिपुरुषोंमें प्रसिद्ध है और सो ही आवरणशक्ति पुरुषके जन्म मरण प्रवाहका कारण है और पूर्वकथनकी विक्षेपशक्तिको कार्यमें सन्मुख करनेका भी यह ही कारण है ॥ ११३ ॥

प्रज्ञावानपि पण्डितोपि चतुरोप्यत्यन्तसूक्ष्मात्मदृग्व्यालीढस्तमसा न वेत्ति बहुधा संबोधितोपि स्फुटम्॥
भ्रान्त्यारोपितमेव साधुकलयत्यालम्बते तद्गुणान्
हन्तासौ प्रबलादुरन्ततमसः शक्तिर्महत्यावृतिः॥ ११४॥

तामस्या आवृतिशक्तेः परमप्राबल्यं दर्शयति प्रज्ञावानपीति।

प्रज्ञावान्। मेधावी। पण्डितोपि। शास्त्रज्ञः। चतुरोपि। लौकिकव्यवहाराभिज्ञः। अत्यन्तसूक्ष्मात्मदृक्। अतीन्द्रियेन्द्रियप्राणादिसंघातसूक्ष्मदेहादितोपि सूक्ष्ममात्मानं यः शास्त्रोपदेशतः पश्यति सोपि। 'सूक्ष्मात्सूक्ष्मतरं नित्यम्' इति श्रुतेः। बहुधा संबोधितोपि। नानायुक्तिद्वारा सुहृद्भिर्विज्ञापितोपि। तमसा व्यालीढः। तमोगुणेन स्वावरणशक्त्याच्छादितचैतन्यः। स्फुटं न वेत्ति। असंदिग्धाविपर्य्यस्तसाक्षात्कृतिं न लभते। एतावता प्रमोत्पादप्रतिबन्ध आवृतेः कृत्यं प्रदर्शितम्। विपरीतप्रत्ययोत्पादमप्याह। भ्रान्त्येत्यादिना। आरोपितमेव । वस्तुदृष्ट्या मिथ्याभूतमेव पदार्थम्। भ्रान्त्या साधु तथ्यं कलयति। मन्यते। नच मिथ्यावस्तुनि गुणलेशस्तथापि तद्गुणानालम्बते। आरोपिते मिथ्याप-

दार्थे गुणानारोपयतीत्यर्थः। हन्त। महाकष्टम्। दुरन्ततमसः। दुरुच्छेदतमोगुणस्यावृतिशक्तिरावरणशक्तिर्महती प्रबलातिबलिष्ठेति तदपनोदेऽवश्यं यत्नोविधेयइति भावः। यः संन्यस्तदारागारोपि स्वयंशास्त्रवित् शास्त्रवित्समर्चितोलोकव्यवहाराभिज्ञोपि दारग्रहणानिर्व्रीणः सन् गृहीतदारोदारगुणवर्णनतत्परः सएवमुच्यते इति बोध्यम्॥११४॥

प्रज्ञावान्। अपि। पण्डितः। अपि। चतुरः। अपि। अत्यन्तसूक्ष्मात्मदृक्। व्यालीढः। तमसा। न। वेत्ति। बहुधा। संबोधितः। अपि। स्फुटम्॥ भ्रान्त्या। आरोपितम्। एव। साधु। कलयति। आलम्बते। तद्गुणान्। हन्त। असौ। प्रबला। दुरन्ततमसः। शक्तिः। महती। आवृतिः॥ ११४॥

तमोगुणकी आवरणशक्तिको अतिप्रबलता कहे हैं। हे शिष्य! बुद्धिमान् भी शास्त्रज्ञाता भी लौकिकव्यवहारचतुर भी इन्द्रियप्राणादि सूक्ष्मादि पदार्थोंसे भी अतिसूक्ष्म आत्माको जाननेवाला भी और नानायुक्ति द्वारा मित्रगण कर स्पष्ट बोधित हुवा भी पुरुष तमोगुणकी आवरणशक्तिकर आच्छादित हुवा भी संशय विपर्ययसे रहित अपरोक्ष ज्ञानको नहीं प्राप्त होता,इससे आवरणशक्तिका यथार्थ ज्ञानका प्रतिबन्ध करना फल निरूपण किया अब विपरीतज्ञानकी उत्पत्ति फल कहे हैं। यथार्थदृष्टिसे मिथ्या पदार्थको ही भ्रमकरके सत्य मानताहै और तिसके गुणोंको वर्णन करताहै,अतिकष्टहै अति दुःखसाध्य जिसका विनाश है उस तमोगुणकी यह आवरण शक्ति अतिबल वाली है॥ ११४॥

अभावना वा विपरीतभावना-
ऽसंभावना विप्रतिपत्तिरस्याः॥

संसर्गयुक्तं न विमुञ्चति ध्रुवं,
विक्षेपशक्तिः क्षपयत्यजस्रम् ॥११५॥

आवरणशक्तिसम्बन्धेन बन्धसामग्रीसन्निधानाधानमाह । अभावना वेत्यादिना ।

अभावना । अधिष्ठानयाथात्म्यविज्ञानाभावः । विप्रतिपत्तिः । इदमेवमनेवं वेति प्रभृतिः संशयः । असंभावना । अस्तित्वमात्रे विज्ञातेपि विशेषस्वरूपाविश्वासः । ततश्च विपरीतभावना विपर्य्ययः । अन्यथात्वनिश्चयइति यावत् । अस्याः आवृतेः। संसर्गयुक्तम् । संबन्धिनम् । न विमुञ्चति । न जहाति । निरन्तरमासां प्रत्येकं वृन्दं वा तमसावृतमवश्यमाश्रयते इति भावः । तमेव च । अजस्रम् । निरन्तरं रजोगुणविक्षेपशक्तिः क्षपयति । विक्षेपयत्यनवस्थानापादनेन विभ्रमयति ॥ ११५ ॥

[1]अभावना । [2]वा । [3]विपरीतभावना । [4]असंभावना । [5]विप्रतिपत्तिः । [6]अस्याः ॥ [7]संसर्गयुक्तम् । [8]न । [9]विमुञ्चति । [10]ध्रुवम् । [12]विक्षेपशक्तिः । [13]क्षपयाति । [11]अजस्रम् ॥ ११५ ॥

अब आवरणशक्तिके सम्बन्धसे बन्धसामग्रीका सम्बन्ध कहे है । होशिष्य ! [1]अधिष्ठानका यथार्थ ज्ञानाभाव [2]और [3]विपर्य्ययज्ञान [4]विशेष स्वरूपका अविश्वास [5]संशय [6]आवृतिके [7]सम्बन्धी को [8]नहीं [9]त्यागे हैं अर्थात् इनमें कोई एक अवश्यही आवरण वाले पुरुषको दवावै है [10]इसमें संशय नहीं और तिसी पुरुषको [11]निरन्तर [12]रजोगुणकी विक्षेपशक्ति [13]विक्षेपको प्राप्त करे है ॥११५

अज्ञानमालस्यजडत्वनिद्रा-
प्रमादमूढत्वमुखास्तमोगुणाः ॥
एतैः प्रयुक्तोनहि वेत्ति किञ्चि-
न्निद्रालुवत्स्तम्भवदेव तिष्ठति ॥ ११६ ॥

तमोगुणकृत्यमाह । अज्ञानमित्यादिना ।

अज्ञानमारभ्य मूढत्वान्ताद्याः । तमोगुणाः । तमसोऽविद्यैकदेशस्य गुणस्य गुणाः । कृत्यानि । एतैः कार्यैः प्रयुक्तः । संसृष्टः । किञ्चित् । विशेषस्वरूपं हि प्रसिद्धन्न वेत्ति न निश्चिनोति । निद्रालुवत् । निद्राणइव । स्तम्भवदेव । शुष्ककाष्ठवज्जडसमः संस्तिष्ठति निश्चेष्टो भवतीत्यर्थः ॥ ११६ ॥

अज्ञानम् । आलस्यजडत्वनिद्राप्रमादमूढत्वमुखाः । तमोगुणाः ॥ एतैः । प्रयुक्तः । न । हि । वेत्ति । किञ्चित् । निद्रालुवत् । स्तम्भवत् । एव । तिष्ठति ॥ ११६ ॥

अब तमोगुणके कार्यको कहे हैं । हेशिष्य ! अज्ञान आलस्य जडता निद्रा प्रमाद मूढता आदि धर्म तमोगुणके कार्य हैं इन्हों कार्यों करके संयुक्त पुरुष विशेष स्वरूपका निश्चय नहीं करे है निद्रायुक्तपुरुषके वत् सूखे काष्ठकेवत् ही स्वयं चेष्टा से रहित होवै है ॥ ११६ ॥

सत्त्वं विशुद्धं जलवत्तथापि,
ताभ्यां मिलित्वा सरणाय कल्पते ॥
यत्रात्मविम्बः प्रतिविम्बितः सन्,
प्रकाशयत्यर्कइवाखिलं जडम् ॥११७॥

ननु भवतूक्तरीत्या रजस्तमसोर्बन्धकत्वेनाविद्यात्वं सत्त्वस्य तु जलवद् विशुद्धत्वेनावरकत्वासम्भवान्न तथात्वं युक्तमतआह । सत्त्वमिति ।

यद्यपि सत्त्वं जलवद्विशुद्धं तथा चावरकत्वाभावेनाबन्धकत्वं प्राप्तं तथापि ताभ्यां रजस्तमोभ्यां मिलित्वा । सङ्गत्य । सरणाय । संसरणाय संसृतये । कल्पते समर्थं भवतीत्यर्थः । रजस्तमोभ्यां तर्हि संसरणसिद्धेः किमन्तर्गडुना सत्त्वेनेत्याशङ्कायामाह । यत्रात्मवि-

म्बइति । यत्र सत्त्वे आत्मविम्बः । शुद्धं चैतन्यस्वरूपम् । प्रतिबि-म्बितः सन् । प्रतिफलितोभवन् । अर्कइवाखिलं जडं प्रकाशयति यथा सूर्य्योदर्पणादौ प्रतिविम्बितःसन् भित्त्यादिकं भासयति तथात्मापि बुद्धिसत्त्वे प्रतिविम्बितः सन्निखिलं जडं भासयति । तथा च सत्त्वासत्त्वे सत्यात्मप्रतिविम्बालाभेन संसारानुपलम्भः स्यादिति रजस्तमः कार्य्यस्याप्यसिद्धिरिति न तेन तयोरनुमितिः स्यादिति सत्त्वस्यावश्यकत्वमितिबोध्यम्।किंच सत्त्वाभावे ज्ञानालाभान्न मुक्तिसिद्धिरपि स्यादिति भावः ॥ ११७ ॥

सत्त्वम् । विशुद्धम् । जलवत् । तथा । अपि । ताभ्याम् । मिलित्वा । सरणाय । कल्पते ॥ यत्र । आत्मविम्बः । प्रतिविम्बितः । सन् । प्रकाशयति । अर्कः । इव । अखिलम् । जडम् ॥ ११७ ॥

रजोगुण तमोगुणको पूर्वोक्त प्रकारसे बन्धनका हेतु होनेसे अविद्यारूपता बनसके है परंच सत्त्वगुणको जलके वत् विशुद्ध होनेसे आच्छादकता बने नहीं इस आशङ्काका उत्तर कहे है।

हेशिष्य ! यद्यपि सत्त्वगुण (जलवत्) शुद्ध है तथापि रजोगुण तमोगुणके साथ मिलकर संसारका हेतु होनेमें समर्थ होवे है जिस सत्त्वगुणमें शुद्ध चैतन्यरूप प्रतिविम्बभावको प्राप्त होकर सूर्यके वत्, सर्व जड प्रपञ्चको प्रकाश करे है अर्थात् जैसे सूर्य दर्पणादिमें प्रतिविम्वत होकर भित्ति आदिका प्रकाश करे है तैसे आत्मा भी बुद्धिसत्त्वमें प्रतिविम्बित होकर देह आदि जड पदार्थोंका प्रकाश करे है तदनन्तर देहादिमें आत्मा अभिमानको उत्पन्न कराके पुरुषको संसारवन्धनमें डाले है इस रीतिसे सत्त्वगुण भी संसारानर्थका हेतु है ॥११७॥

मिश्रस्य सत्त्वस्य भवन्ति धर्मा-
स्त्वमानिताद्यानियमायमाद्याः ॥
श्रद्धा च भक्तिश्च मुमुक्षुता च,
दैवी च सम्पत्तिरसन्निवृत्तिः ॥ ११८ ॥

गुणान्तरसंसृष्टस्य सत्त्वस्य कृत्यमाह मिश्रस्येत्यादिना । अमानिताद्याः । "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्" इत्यादयोभगवद्गीतोक्ताः । तथा नियमाः । शौचसन्तोषादयः । यमाद्याः । अहिंसासत्याऽस्तेयादयः । आद्यशब्देन स्थिरसुखासनादयः । श्रद्धा भक्तिर्मुमुक्षुता च अनुक्तापि तथा दैवीसम्पत्तिः । असन्निवृत्तिः आसुरसम्पत्तिविमुखता । तु पुनः । एते धर्माः । मिश्रस्य । गुणान्तरोपसृष्टस्य सत्त्वगुणस्य भवन्ति तत्र गुणान्तरस्य गौणत्वं सत्त्वस्य च प्राधान्यं प्रत्येतव्यमिति भावः ॥ ११८ ॥

मिश्रस्य । सत्त्वस्य । भवन्ति । धर्माः । तु । अमानिताद्याः । नियमाः । यमाद्याः ॥ श्रद्धा । च । भक्तिः । च । मुमुक्षुता । च । दैवी । च । सम्पत्तिः । असन्निवृत्तिः ॥ ११८ ॥

अन्यगुणोंके संग मिश्रित सत्त्वगुणके कार्यको कहे हैं। अमानिता अदम्भता आदि तथा शौच सन्तोषादि नियम और अहिंसा सत्य चोरीत्याग स्थिरसुख आसनादि श्रद्धा और भक्ति और मोक्षकी इच्छा इत्यादि दैवधंन और आसुरसम्पत्तिकी विमुखता यह धर्म अन्य गुणमिश्रित सत्त्वगुणके होते हैं अर्थात् सत्त्वगुणकी प्रधानता होनेपर होते हैं ॥ ११८ ॥

विशुद्धसत्त्वस्य गुणाः प्रसादः,
स्वात्मानुभूतिः परमा प्रशान्तिः ॥
तृप्तिः प्रहर्षः परमात्मनिष्ठा,
यया सदानन्दरसं समृच्छति ॥ ११९ ॥

गुणान्तरानुपसृष्टस्य सत्त्वस्य कृत्यमाह विशुद्धसत्त्वस्येति।

प्रसादः। मनोमुखकरणगणाग्लानिः। स्वात्मानुभूतिः। स्वस्वरूपावगतिः। परमा बाह्यलाभनिमित्तानुदिता। प्रशान्तिः सन्तोषः। तृप्तिः। इच्छानभिघातः। प्रहर्षः। उत्तमाह्लादः यया यदवाप्त्या सदानन्दरसमविनाश्यानन्दानुभवं समृच्छति। अवगच्छति। सा परमात्मनिष्ठा। ब्रह्मात्मनिश्चितिरुच्यते। एते गुणाः विशुद्धसत्त्वस्य गुणान्तरानुपसृष्टस्य सत्त्वगुणस्य। भवन्तीत्यनुषङ्गः॥११९॥

विशुद्धसत्त्वस्य। गुणाः। प्रसादः। स्वात्मानुभूतिः। परमा। प्रशान्तिः। तृप्तिः। प्रहर्षः। परमात्मनिष्ठा। यया। सदानन्दरसम् समृच्छति॥ ११९॥

अब शुद्ध सत्त्वगुणके कार्योंका निरूपण करे है। मन आदि इन्द्रियगणकी ग्लानि न होनी आत्मस्वरूप साक्षात्कार बाह्यलाभसे बिना जो शान्ति तृप्ति उत्तम आनन्द उत्तम तृप्ति और जिस परमात्माकी धारणासे अविनाशी आनन्दके अनुभवको प्राप्त होवै है ऐसी जो परमात्मनिष्ठा यह सब गुण शुद्ध सत्त्वगुणके कार्य हैं॥११९॥

अव्यक्तमेतत्त्रिगुणैर्निरुक्तं,
तत्कारणं नाम शरीरमात्मनः॥
सुषुप्तिरेतस्य विभक्त्यवस्था,
प्रलीनसर्वेन्द्रियबुद्धिवृत्तिः॥ १२०॥

निरुक्तत्रिगुणात्मकाव्यक्तमनूद्य तस्य कारणशरीरत्वादिकमाह। अव्यक्तमिति।

यदेतत्त्रिगुणैः। सत्त्वरजस्तमोभिः। इत्थम्भावे तृतीया। निरुक्तमव्यक्तम्। तदात्मनः कारणशरीरं नाम। स्थूलसूक्ष्मशरीरयोः कारणं सच्छीर्यते ब्रह्मविद्ययेति शरीरसंज्ञं भवति। "आकाशशरीरं ब्रह्मे"ति श्रुतेः। एतस्य। एतदभिमानिनश्चिदात्मनः। प्र-

लीनसर्वेन्द्रियबुद्धिवृत्तिः । बाह्यान्तःकरणलयाधिकरणीभूता विभक्त्यवस्था जाग्रत्स्वप्नावस्था विविक्ता सुषुप्तिरवस्था भवतीत्यर्थः "सुषुप्तिकाले सकलेविलीने तमोऽभिभूतः सुखरूपमेती"ति श्रुतेरिति भावः ॥ १२० ॥

अव्यक्तम् । एतत्त्रिगुणैः । निरुक्तम् । तत् । कारणम् । नाम । शरीरम् । आत्मनः ॥ सुषुप्तिः । एतस्य । विभक्त्यवस्था । प्रलीनसर्वेन्द्रियबुद्धिवृत्तिः ॥ १२० ॥

पूर्वोक्त गुणत्रयात्मक अव्यक्तका अनुवाद करके तिसको कारण शरीरता कहे है । सत्त्वगुण रजोगुण तमोगुण रूपकरके वर्णन किया जो अव्यक्त सो आत्माका कारण शरीर प्रसिद्ध है अर्थात् आत्माके स्थूल सूक्ष्म शरीरोंका कारण और ब्रह्मविद्या करके विनाशी है और इस कारणशरीरका अभिमानी आत्माकी बाह्य आन्तर करणोंके लयका अधिकरण जाग्रत् स्वप्न अवस्थासे भिन्न सुषुप्ति अवस्था होवैहै ॥१२०॥

सर्वप्रकारप्रमितिप्रशान्ति-
र्बीजात्मनावस्थितिरेव बुद्धेः ॥
सुषुप्तिरेतस्य किल प्रतीतिः,
किञ्चिन्न वेद्मीति जगत्प्रसिद्धेः ॥१२१ ॥

ननु अवस्था शुद्धचिदात्मनोन भवितुमर्हति तस्य निर्विकारत्वात्तदुपाधिबुद्ध्यवस्था तु भवितुमर्हति बुद्धेः सविकारत्वात्तदुपाध्यवस्थां स्वस्मिन्नन्यमानोजीवोपि भवत्यवस्थाभागी सुषुप्तौ तु बुद्धेर्विलीनत्वान्न तस्याइयमवस्था घटते सुतरां चिदात्मनस्तत्राह । सर्वप्रकारेत्यादिना ।

सर्वप्रकाराणां प्रत्यक्षत्वानुमितित्वाद्यवान्तरधर्मवतीनां प्रमितीनामनधिगताबाधितार्थप्रतीतीनां स्मृतीनां भ्रान्तीनां चोपलक्षणमिदम् प्रमितिपदस्य प्रतीतिमात्रपरत्वादिति बोध्यम् । प्रशान्तिः ।

करणलयेन लयोयत्र सा। बुद्धेरन्तःकरणस्य। बीजात्मनैवावस्थितिः। सुषुप्तिः। सुषुप्त्यवस्था। तथाचाविद्यात्मना बुद्धेरत्रावस्थानान्न शुद्धत्वं चिदात्मनइति सुषुप्त्यभिमानोयुज्यते इति भावः। नन्वविद्यायास्तत्र सद्भावे न किञ्चिद्वेद्मीति प्रतीतिरेव साधिका वाच्या सा च न सुषुप्तौ स्पष्टमनुभूयते इति चेज्जाग्रत्पुरुषस्मृतेरनुमीयते सेत्याह एतस्येति। एतस्य कारणशरीरस्याज्ञानस्य किल किञ्चिन्न वेद्मीति प्रतीतिः। जगत्प्रसिद्धेः न किञ्चिदवेदिषमिति सर्वानुभवसिद्धसुषुप्तप्रबुद्धपुरुषस्मृतेरवगन्तव्येति शेषः॥ १२१॥

सर्वप्रकारप्रमितिप्रशान्तिः। बीजात्मना। अवस्थितिः। एव। बुद्धेः॥ सुषुप्तिः। एतस्य। किल। प्रतीतिः। किञ्चित्। न। वेद्मि। इति। जगत्प्रसिद्धेः॥१२१॥

शङ्का। शुद्ध आत्माको निर्गुण होनेसे अवस्थाका सम्भव नहीं है और बुद्धिका सषुप्तिमें लय होनेसे बुद्धिकृत अवस्था का अभिमान भी असम्भव है।

उत्तर। सर्वप्रकार इति। प्रत्यक्ष अनुमानादि सर्वप्रकारकी यथार्थ प्रतीति वा भ्रान्ति ज्ञानोंकी इन्द्रियादि करणके लय होनेसे लय जिसमें है और अन्तःकरणकी कारणरूप करके ही स्थिति सुषुप्ति अवस्था है इसकारण सुषुप्तिमें बीजरूप करके अन्तःकरणकी स्थिति होनेसे आत्मा शुद्ध नहीं है किन्तु उपाधिसहित है इस वास्ते सुषुप्तिका अभिमान सम्भव है और हेशिष्य! सुषुप्तिकालमें अज्ञानरूप बीजकी प्रतीति सम्भव है क्योंकि सुषुप्तिसे उठे पुरुषको मैंने कुछ नहीं जाना था इस प्रकारकी सर्वजगत्को प्रसिद्धि होवे है उस स्मृतिरूप प्रसिद्धि से मैं कुछ नहीं जानताहूं ऐसा सुषुप्तिकालके अनुभवका अनुमान कर लेना॥ १२१॥

देहेन्द्रियप्राणमनोहमादयः,

सर्वे विकाराविषयाः सुखादयः ॥
व्योमादिभूतान्यखिलं च विश्व-
मव्यक्तपर्यन्तमिदं ह्यनात्मा ॥१२२॥

निरूपितानि स्थूलादीनि त्रीणि शरीराणि स्वात्मनोविवेचयितुं सम्प्रतिविवेचनं ग्राहयति । देहेन्द्रियेत्यादिना ।

देहेन्द्रियप्राणमनोहमादयः । स्थूलशरीरबाह्यान्तःकरणपञ्चविधासवः । तथा शब्दादयोविषयाः । सुखादयश्च मानसाः । सर्वे । इतोऽन्येपि कामादयश्चेष्टनभोजनादयश्च विकाराः । कार्यविशेषाः । व्योमादिभूतानि । गगनपवनतेजोम्बवनयः । किं बहुना गणनेन । अव्यक्तपर्यन्तम् । अव्यक्तान्तम् । इदं विश्वं दृश्यम् । अखिलं निःशेषम् । अनात्मा । आत्मभिन्नं भवितुमर्हति जडत्वादिभ्यइति भावः ॥ १२२ ॥

देहेन्द्रियप्राणमनोहमादयः । सर्वे । विकाराः । विषयाः । सुखादयः ॥ व्योमादिभूतानि । अखिलम् । च । विश्वम् । अव्यक्तपर्यन्तम् । इदम् । हि । अनात्मा ॥ १२२ ॥

स्थूलशरीर नेत्रादिक इन्द्रिय प्राण मन अहंकार बुद्धि आदि और शब्द स्पर्शादि विषय तथा सुख दुःखादि सर्व कार्य प्रपंच और इनोंका कारण आकाशादि पंच महाभूत तथा उक्त अनुक्त सर्वजगत् अव्यक्त नाम वाली मायाको भी बीचमें लेकर यह सर्व ही आत्मासे भिन्न है ॥ १२२ ॥

माया मायाकार्यं सर्वं महदादिदेहपर्यन्तम् ॥
असदिदमनात्मतत्त्वंविद्धि त्वं मरुमरीचिकाकल्पम् ॥

स्थूलादिक्रमेणाभिहितप्रपञ्चस्यानात्मत्वमुक्तमव्यक्तादिक्रमेण तस्य मिथ्यात्वमाह मायेति ।

महदादिदेहपर्यन्तम् । महत्तत्त्वादिस्थूलशरीरान्तं सर्वं मायाकार्यम् । मायाजन्यमखिलं जगन्मायाचेति पक्षनिर्देशः । इदमुक्त-

स्वरूपम् असन्मिथ्या । अनात्मतत्त्वम् । आत्मनस्तत्त्वमबाध्यम् । तन्नेति तथा बाध्यम् । भवितुमर्हतीति शेषः । अयं साध्यनिर्देशः। तथाच सद्विविक्तत्वं बाध्यत्वं वा साध्यम् । विद्धि जानीहि । जडत्वादयोहेतवस्तु स्फुटत्वान्नाभिहिताः । यद्वाऽनात्मतत्त्वमिति हेतुगर्भितं विशेषणन्तेनानात्मत्वादिति हेतुर्ज्ञातव्यः । मरुमरीचिकाकल्पम् । मरुभूमिसमुद्भतोष्मसंसृष्टतरणिकिरणेषु कल्पितसलिलवदित्यर्थः । नच सद्विविक्तत्वे खपुष्पमिव प्रत्यक्षानुपपात्तिरिति वाच्यम्। दृष्टान्तदृष्टसलिलवदेवोपपत्तेः। खपुष्पस्य तु तुच्छत्वान्न प्रत्यक्षमस्य तु ततोपि विलक्षणत्वात्तथात्वमप्रतिहतमिति संक्षेपः ॥१२३॥

माया । मायाकार्यम् । सर्वम् । महदादिदेहपर्यन्तम् ॥ असद् । इदम् । अनात्मतत्त्वम् । विद्धि । त्वम् । मरुमरीचिकाकल्पम् १२३

माया और मायाका जो कार्य है महत्तत्त्वसे लेकर स्थूल शरीर पर्यन्त सर्वही मिथ्या है यह बाधित होनेसे आत्माका स्वरूप नहीं है, हेशिष्य ! तुम इस जगत्को ऊखर भूमिमें सूर्य की किरणमें चमकता मिथ्या जलके समान निश्चय कर । इसको मिथ्या जानके इसमें मत रमण कर ॥ १२३ ॥

अथ ते संप्रवक्ष्यामि स्वरूपं परमात्मनः ॥
यद्विज्ञाय नरोबन्धान्मुक्तः कैवल्यमश्नुते ॥१२४॥

एतावता प्रबन्धेन स्थूलाद्यव्यक्तान्तमनात्मस्वरूपमभिहितं सम्प्रति परमः कआत्मेति प्रश्नं समाधातुमुपक्रमते । अथेति ।

अथ । अनात्मस्वरूपनिरूपणानन्तरम् । ते । तुभ्यम् । परमात्मनः। जडविलक्षणसर्वोत्कृष्टचिदात्मनः । स्वरूपम् । स्वकीयं याथात्म्यम्। प्रवक्ष्यामि । विविच्य जडवर्गात्तावच्मि । नरोविद्याधिकारी । यद्विज्ञाय । यदात्मस्वरूपं साक्षात्कृत्य । बन्धान्मुक्तः। त्रिविधदुःखविनिर्मुक्तः । कैवल्यं नित्यानिरतिशयस्वात्मानन्दमश्नुतेनुभवति तत्स्वरूपमिति पूर्वेणान्वयः ॥ १२४ ॥

अथ । ते । संप्रवक्ष्यामि । स्वरूपम् । परमात्मनः ॥ यत् । विज्ञाय । नरः । बन्धात् । मुक्तः । कैवल्यम् । अश्नुते ॥१२४॥

अनात्माका स्वरूप निरूपण किया है अब परम आत्मा कौन है ? इस प्रश्नका समाधान करनेके लिये आरम्भ करे हैं अथ इति । हे शिष्य ! अनात्माके निरूपणसे अनन्तर तुमको परमात्माके स्वरूपको अच्छी रीतिसे कहता हूं पुरुष जिसके स्वरूपको जानकर जन्म मरणादि बन्धसे छूंटके कैवल्य मोक्षको प्राप्त होवै है ॥१२४॥

अस्ति कश्चित्स्वयं नित्यमहंप्रत्ययलम्बनः ॥
अवस्थात्रयसाक्षी सन्पञ्चकोशविलक्षणः॥१२५॥

प्रथमं स्वानुभवेनैव सम्भावयंस्तत्स्वरूपमाह । अस्तिकश्चिदिति। पञ्चकोशविलक्षणः । वक्ष्यमाणपञ्चकोशातीतः । अवस्थात्रयसाक्षी । उक्तजाग्रदाद्यवस्थाप्रकाशकरः । नित्यमहंप्रत्ययलम्बनः । आमरणमुत्पद्यमानाहंप्रत्ययसाक्षी । नह्यात्मानमवधूयानात्मानमहंप्रत्ययोऽवगाहतेऽनात्मनः स्थूलादेर्व्यभिचारेप्यहंप्रत्ययस्याव्यभिचारात्स्वप्नादौ स्थूलाद्यभावेपि तस्य प्रत्ययस्यानुवृत्तेरित्यास्ति कश्चिज्जडवर्गाविलक्षणश्चेतनः । परमात्मेत्यर्थः ॥ १२५ ॥

अस्ति । कश्चित् । स्वयम् । नित्यमहंप्रत्ययलम्बनः ॥ अवस्थात्रयसाक्षी । सन् । पञ्चकोशविलक्षणः ॥१२५॥

अब अपने अनुभवकरके गम्य स्वरूपको कहे हैं, अस्ति इति। पंच कोशोंसे अतीत जाग्रत् आदि अवस्था तीनोंका साक्षी मरण पर्यन्त अहं प्रतीतिका विषय मन वाणीका अविषय आत्मा है स्वप्नादि अवस्थामें स्थूल देहादिके व्यभिचार होने पर भी अहं प्रतीतिका साधक आत्मा अव्यभिचारी है ॥१२५॥

योविजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु ॥
बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् ॥१२६॥

अवस्थात्रयसाक्षीत्युक्तं प्रपञ्चयितुमाह । योविजानातीति ।

जाग्रत्स्वप्नसुषुप्तिषु । दृश्यमानं सकलं जडवर्गं योविजानाति । साक्षात्करोति । किं तर्हिं बुद्धिस्वरूपं तथा वर्णितं नेत्याह । बुद्धीत्यादि । बुद्धितद्वृत्तिसद्भावम् । अन्तःकरणस्य तत्परिणामवृत्तीनां च सद्भावं तथा तेषामभावं च योविजानाति । अयमहमिति प्रत्ययालम्बनोभवति नान्तःकरणं सुषुप्तौ तस्यापि लयात् । स्वस्य स्वाभावस्य च तेन भासनासंभवादिति भावः ॥ १२१ ॥

यः । विजानाति । सकलम् । जाग्रत्स्वप्नसुषुप्तिषु ॥ बुद्धितद्वृत्तिसद्भावम् । अभावम् । अहम् । इति । अयम् ॥ १२६ ॥

अवस्था तीनोंका साक्षी जो कहा है उसका विस्तार कहे हैं । हे शिष्य ! जाग्रत् स्वप्न सुषुप्तिमें जो जडप्रपंच दीखता है उसको जो साक्षात् जानता है और अन्तःकरणकी और उसका परिणामरूप वृत्तियोंकी सत्ताको और तिनके अभावको जो जानता है सो यह अहं इस प्रतीतिका विषय है । अन्तःकरणका सुषुप्तिमें भी लय होनेसे और स्वका स्वके अभावका स्व करके भान बने नहीं इसकारणसे भी अन्तःकरण अहं प्रतीतिका विषय सम्भवे नहीं ॥ १२६ ॥

यः पश्यति स्वयं सर्वं यन्न पश्यति कश्चन ॥
यश्चेतयति बुद्ध्यादि न तद्यं चेतयत्ययम् ॥ १२७ ॥

नन्वहमिति प्रत्ययालम्बनस्याध्यात्मनोद्रष्टा कश्चिद्वाच्योऽन्यथा कथमसौ सिध्येदतआह । यः पश्यतीत्यादिना ।

यः सर्वं जडवर्गं स्वयमन्यानधीनः पश्यति साक्षात्करोति । यं च कश्चन कोपि न पश्यति । प्रकाशयितुं न पारयते । यश्च बुद्ध्यादि । बुद्धिप्राणेन्द्रियादिकम् । चेतयति । स्वसत्तास्फूर्तिप्रदानेन भानसमर्थं भावयति । यं च तद्बुद्ध्यादि न चेतयति । न भासयितुं पारयति । अयमहमिति प्रत्ययालम्बनाश्चिदात्मा । "यचक्षुषा न पश्यति येन चक्षूंषि पश्यति" । नहि दृष्टेर्द्रष्टारं पश्येः" । इत्यादि श्रुतिभ्यः स्वप्रकाशत्वादात्मनः स्वतः सिद्धिरिति न द्रष्ट्रन्तरापेक्षेति भावः ॥

यः । पश्यति । स्वयम् । सर्वम् । यत् । न । पश्यति । कः । चन ॥ यः । चेतयति । बुद्ध्यादि । न । तत् । यम् । चेतयति । अयम् ॥ १२७ ॥

शंका । अहं प्रतीतिका विषय आत्माका साधक द्रष्टा कौन है? उत्तर । जो सर्व जड प्रपंचको साक्षात् देखै है और आप अन्य के आधीन नहीं है। और जिसको कोई भी नहीं देखसकता है और जो बुद्धि प्राण इन्द्रिय आदिको अपनी सत्तास्फूर्ति देकर प्रकाश करनेको समर्थ करता है और जिसको बुद्धि आदि प्रकाश करनेमें समर्थ नहीं होवै हैं सो यह अहं प्रतीतिका विषय चेतन आत्मा है ॥ १२७ ॥

येन विश्वमिदं व्याप्तं यन्न व्याप्नोति किञ्चन ॥
आभारूपमिदं सर्वं यं भान्तमनुभात्ययम् ॥१२८॥

तस्य च सर्वजगद्व्यापकत्वमाह । येन विश्वमिति ।
इदं विश्वं दृश्यं स्थूलं सूक्ष्मं च जगत् । येनात्मना व्याप्तम् । स्वैकदेशे स्थापितम् । "पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि" । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितोजगत" । इति श्रुतिस्मृतिभ्याम् । यं चात्मानं किञ्चन । अल्पमपि जगन्न व्याप्नोति न स्वान्तर्भावयितुं शक्नोति स्वान्तर्भावकस्य कथं स्वेनान्तर्भावो भावयितुं शक्यते इति भावः । इदं सर्वं जगद्यस्याभारूपम् । छायास्थानापन्नं न ततः पृथक् संनिरूपयितुं युक्तमिति भावः । यमात्मानमुक्तलक्षणम्भान्तं प्रकाशमानं सन्तमनु तद्गृहीतसत्तास्फूर्तिकं सज्जगद्भाति प्रतीयतेऽयमहंप्रत्ययालम्बनश्चिदात्मा । "तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति ॥" इतिश्रुतेः ॥ १२८ ॥

येन । विश्वम् । इदम् । व्याप्तम् । यत् । न । व्याप्नोति । किञ्चन ॥ आभारूपम् । इदम् । सर्वम् । यम् । भान्तम् । अनु । भाति । अयम् ॥ १२८

जिस चेतनको सर्व जगत्में व्यापकता वर्णन करें हैं। येह स्थूल सूक्ष्म जगत् जिसे आत्माने अपने एक देशमें स्थापन किया है और जिस आत्माको परिच्छिन्न जगत् नहीं व्याप सकता। और येह सर्व जगत् जिसकी छायाके समान है उससे पृथक् निरूपण नहीं होसकता और जिसे आत्माके प्रकाश होते हुवे ही पश्चात् उसकी सत्ता स्फूर्तिको ग्रहण करके जगत् का प्रकाश होवै है सो अहं प्रतीतिका विषय आत्मा है॥१२८॥

यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः॥
विषयेषु स्वकीयेषु वर्तन्ते प्रेरिताइव॥१२९॥

किं देहादिवदेव दृश्यभाने व्याप्रियतेऽसौ तथासति न कूटस्थता सिद्धिरव्यापारे तु न दृश्यभानमनेन व्यापारमन्तरापि स्वरूपतया भाने तु सर्वदा दृश्यभानापत्तिरतआह। यस्येति।

देहेन्द्रियमनोधियः यस्यात्मनः सन्निधिमात्रेण। सत्तास्फूर्त्तिमात्रेण। स्वकीयेषु विषयेषु। शब्दादिषु प्रेरिताइव। भृत्याइव स्वामिदर्शनमात्रेण। वर्तन्ते। व्याप्रियन्ते। तेन नात्मनः कूटस्थत्वहानिर्नापि च देहादीनां व्यापारस्य निर्निमित्ततया सदासत्त्वमसत्त्वं वेति तत्त्वम्॥ १२९॥

यस्य। सन्निधिमात्रेण। देहेन्द्रियमनोधियः॥ विषयेषु। स्वकीयेषु। वर्तन्ते। प्रेरिताः। इव॥१२९॥

शङ्का। देहादिके वत् आत्मा जगत्के प्रकाशमें चेष्टा करता हो तौ कूटस्थ न होगा चेष्टा न करे तौ प्रकाश न कर सकेगा देहादि विना अपने स्वरूपसे ही जगत्का प्रकाश करे तौ सर्व काल जगत्का भान होना चाहिये। उत्तर। देह इन्द्रिय मन बुद्धि जिस आत्माकी समीपतासे सत्ता स्फूर्ति ग्रहणसे अपने विषय शब्दादिमें प्रेरणाको प्राप्त हुवे सेवकोंवत् वर्तते हैं अर्थात् चेष्टा करते हैं इसकारण आत्माकी कूटस्थताकी

हानि नहीं होती है और देहादि व्यापारको निमित्तरहित होनेसे सदा प्रकाशादि भी नहीं प्राप्त होवै हैं ॥१२६॥

अहङ्कारादिदेहान्ताविषयाश्च सुखादयः ॥
वेद्यन्ते घटवद् येन नित्यबोधस्वरूपिणा ॥१३०॥

नन्वहङ्कारस्यैव देहान्तसंघातसाक्षित्वमस्तु किञ्चिदात्मनेत्याह अहङ्कारादिति।

अहङ्कारादिदेहान्ताः। पूर्वमभिहिताः। विषयाः शब्दादयः सुखादयः सुखदुःखकामक्रोधादयः। येन नित्यबोधस्वरूपिणा। अलुप्तचित्स्वरूपेणात्मना। "नहि द्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वा"दितिश्रुतेः।घटवद्वेद्यन्ते। प्रकाश्यन्ते। सोऽहमितिप्रत्ययालम्बनोनाहंकारस्तस्य स्वतोजडस्य चित्प्रतिबिम्बवशतोदेहादिभासकत्वेपि स्वतोघटान्तःसलिलादिवदनवभासकत्वादितिभावः। नित्यशब्देनाहंकारस्य सुप्तौ लीनत्वान्नानन्दानुभावकत्वमिति चिदात्मावश्यकत्वं सूच्यते ॥ १३० ॥

अहङ्कारादिदेहान्ताः। विषयाः। च। सुखादयः ॥ वेद्यन्ते। घटवत्। येन। नित्यबोधस्वरूपिणा ॥१३०॥

शंका। अहंकारको ही देहान्त संघातका साक्षी मानेंगे, चेतन आत्माका अंगीकार निष्प्रयोजन है। उत्तर। हे शिष्य! अहङ्कारादि देह पर्यन्त जो पूर्व कथन किये हैं और शब्दादि सुखादि जो विषयहैं अलुप्त चेतनस्वरूप जिस आत्मा करके घटादिवत् प्रकाशे जाते हैं सो अहं प्रतीतिका विषयहै और जो अहंकार है उसको स्वयं जड होनेसे चेतनके प्रतिबिम्बके ग्रहणसे देहादिकी भासकता होनेपर भी स्वतन्त्र घटादिवत् भासकता बने नहीं और अहंकारको सुषुप्तिमें लीन होनेसे भी आनन्दकी प्रकाशकता बने नहीं इस कारण चेतन आत्मा अवश्य अंगीकार करना उचित है ॥१३०॥

एषोऽन्तरात्मा पुरुषः पुराणो-
निरन्तराखण्डसुखानुभूतिः ॥
सदैकरूपः प्रतिबोधमात्रो-
येनेषिता वागसवश्चरन्ति ॥ १३१ ॥

किं तर्हि जडानुभाविता चिदात्मा तथाच सविशेषत्वापत्तिरतआह। एषोऽन्तरात्मेति।

येनेषिता। यत्प्रेषिता। वागसवश्चरन्ति। वागादीनि कर्मेन्द्रियाणि प्राणाश्च चरन्तियथानियति चेष्टन्ते। "केनेषितं पतति प्रेषितं मनः" इत्यादिप्रश्नोत्तरश्रुतिभ्यः। एषः। प्रतिबोधमात्रः।सर्ववृत्त्यभिव्यक्तचैतन्यात्मा। "प्रतिबोधविदितं मतममृतत्वं हि विन्दते" इति श्रुतेः। सदैकरूपः। सदैकरसस्वभावः। "एकमेवाद्वितीय" मिति श्रुतेः। निरन्तराखण्डसुखानुभूतिः। निर्भेदसंसर्गासङ्गिसुखानुभवात्मा। पुराणः। सनातनः। अन्तरात्मा। 'अन्तरतरं यदयमात्मा' इति श्रुतेः। पुरुषः पूर्णश्चिदात्मा नतु सविशेष इति भावः॥ १३१॥

एषः। अन्तरात्मा। पुरुषः। पुराणः। निरन्तराखण्डसुखानुभूतिः॥ सदा। एकरूपः। प्रतिबोधमात्रः। येन। ईषिता। वाग् असवः। चरन्ति॥ १३१॥

शङ्का। चेतन आत्माको जडपदार्थोंके अनुभवका कर्ता माननेपर सविशेषता प्राप्त होवै है। उत्तर। हे शिष्य! जिस करके प्रेरित हुये वाक् आदि कर्मेन्द्रिय और प्राण यथेष्ट चेष्टा करे हैं सो सर्ववृत्तियोंमें अभिव्यक्त चेतन आत्मा सर्वकालमें एकरस स्वभाव वाला है और भेदरहित संबन्धशून्य सुख अनुभव रूप है और सनातन है सबसे अन्तर है पूर्ण चेतनरूप है यह सविशेष नहीं है॥ १३१॥

अत्रैव सत्त्वात्मनि धीगुहाया-

मव्याकृताकाशउशत्प्रकाशः ॥
आकाशउच्चैरविवत्प्रकाशते,
स्वतेजसा विश्वमिदं प्रकाशयन् ॥ १३२ ॥

नन्वेवं लक्षणश्चिदात्मा कुत्रान्वेष्टव्यइति चेत्तत्राह ।अत्रैवेति । अत्रैव । देहएव । सत्त्वात्मनि । सत्त्वगुणप्रधानेऽन्तःकरणे । धीगुहायाम् । गूढावस्थां भोगापवर्गौ पुरुषार्थाविति गुहा गुह संवरणे इति धातुपाठात् । बुद्धिलक्षणायां गुहायां कारणत्वेनानुगतेऽव्याकृताकाशे मायाख्यकारणशरीरे । उशत्प्रकाशः । कमनीयतेजः । उरुप्रकाशइत्यपि पाठः । आकाशः । व्यापकश्चिदाकाशः । स्वतेजसा॥ चैतन्यज्योतिषा । इदं विश्वं जडवर्गं प्रकाशयन् । भासयन् । उच्चैरविवत्प्रकाशते । सर्वोत्कृष्टतया भास्वानिव भासते इत्यर्थः ॥ "सत्यं ज्ञानमनन्तं ब्रह्म।" योवेद निहितं गुहायां परमे व्योम"श्चिति श्रुत्यर्थोऽत्र वर्णितः ॥ १३२ ॥

अत्र[1] । एव[2] । सत्त्वात्मनि[3] । धीगुहायाम्[4] । अव्याकृताकाशे[5] । उशत्प्रकाशः[6] ॥ आकाशः[7] । उच्चैः[12] । रविवत्[13] । प्रकाशते[14] । स्वतेजसा[8] । विश्वम्[10] । इदम्[9] । प्रकाशयन्[11] ॥ १३२ ॥

शङ्का । इस प्रकारके आत्माको कहां खोजना चाहिये । उत्तर । हेशिष्य ! देहमें[1] ही[2] सत्त्वगुण[3] प्रधान अन्तःकरणमें बुद्धिरूप[4] गुफामें कारणतारूपसे[5] अनुगत अव्याकृत आकाश में अद्भुत[6] तेजरूप व्यापक[7] चेतनरूप आकाश है अपनी[8] चेतन ज्योति करके इस[9] जड[10] प्रपञ्चको प्रकाश[11] करता हुआ सर्वोत्कृष्ट[12] सूर्य्यवत्[13] प्रकाशे[14] है ॥ १३२ ॥

ज्ञाता मनोऽहंकृतिविक्रियाणां,
देहेन्द्रियप्राणकृतक्रियाणाम् ॥
अयोग्निवत्तानुवर्तमानो-

न चेष्टते नो विकरोति किञ्चन॥१३३॥

मनोवज्ज्ञातृत्वप्रयुक्तं प्राप्तं विकारं वारयति ज्ञातेति।

मनोहंकृतिविक्रियाणाम्। अन्तःकरणपरिणामानाम्। देहेन्द्रियप्राणकृतक्रियाणाम्। स्थूलशरीरबाह्यकरणप्राणपरिणामानाम् तत्तत्कर्मणां च। ज्ञाता। प्रकाशकः। साक्षीति यावत्। अयोऽग्निवत्तानुवर्तमानः। यथा तप्तायः पिण्डे वर्त्तमानोवह्निस्तत्पिण्डगतत्रिकोणचतुष्कोणाद्याकारमनुवर्तमानोपि न तथा भवति तथात्मापि तत्तदुपाधिवशात्तत्तदाकारेण भासमानोपि न चेष्टते। न चलति। नो किञ्चन विकरोति। न लेशमात्रमपि विकारमालम्बते। निष्क्रियश्रुतेरित्यर्थः "अग्निर्यथैकोभुवनं प्रविष्टोरूपं रूपं प्रतिरूपोबभूव" तिश्रुतिरत्रानुसन्धेया॥ १३३॥

ज्ञाता। मनोहंकृतिविक्रियाणाम्। देहेन्द्रियप्राणकृताक्रियाणाम्॥ अयः। अग्निवत्। तान्। अनुवर्तमानः। न। चेष्टते। नो। विकरोति। किञ्चन॥ १३३॥

मनवत्, ज्ञातृत्वप्रयुक्त प्राप्त विकारको वारण करे हैं। ज्ञाता इति। अन्तःकरणके परिणामोंका स्थूल शरीर बाह्यकरण प्राण परिणामोंका और उनकी क्रियाका प्रकाशक साक्षी है। जैसें तप्तलोह पिण्डमें वर्तमान अग्नि त्रिकोणादि आकार प्रतीत होताभी है परंच वस्तुस्वभावसे वैसा होता नहीं तैसे उपाधि के संवन्धसे तत्तत् उपाधिका रूप आत्मा प्रतीत होवै है परंच न चलता है और न लेशमात्र भी विकारी होवै है॥ १३३॥

न जायते नो म्रियते न वर्द्धते,
न क्षीयते नो विकरोति नित्यः॥
विलीयमानेपि वपुष्यमुष्मि-
न्नलीयते कुम्भइवाम्वरः स्वयम्॥ १३४॥

नो विकरोतीत्युक्तं व्याचष्टे न जायत इत्यादिना ।

अयमात्मा न जायते । जनिलक्षणविकृतिं नालम्भते अस्तीत्यस्याप्युपलक्षणमिदम् सदा सतस्तस्य जन्मानन्तरास्तित्वलक्षणविकारानाश्रयत्वादिति भावः । न वर्द्धते वृद्धिलक्षणविकारं न भजते । नो विकरोति । न विपरिणामी भवति । न क्षीयते । नापक्षीयते नो म्रियते । न विनश्यति । कुम्भइव घटवत् । अमुष्मिन्वपुषि स्थूलदेहे विलीयमानेपि । विनश्यत्यपि । अम्बरइव गगनवत् स्वयम् । स्वतोन लीयतेविनाशप्रतियोगी न भवति किंतु तत्तदुपाधिनाशप्रयुक्तनाशव्यवहारं गौणं भजते गगनवदित्यर्थः॥ अत्र यास्कमुनिपठिता 'जायतेऽस्ति' इत्यादयः षड्भावविकारा आत्मनि निरस्तास्तेन निर्विकारत्वमप्यूह्मावेदितमिति बोध्यम् वक्ष्यते चैवमग्रे ॥ १३४ ॥

न । जायते । नो । म्रियते । न । वर्द्धते । न । क्षीयते । नो । विकरोति । नित्यः॥ विलीयमाने । अपि । वपुषि । अमुष्मिन् । न । लीयते । कुम्भः । इव । अम्बरः । स्वयम् ॥ १३४ ॥

विकारी नहीं होता इस पूर्व कथनका वर्णन करे हैं । न जायते इति । यह आत्मा जन्मरूप विकारको अनुभव नहीं करे है । यहां अस्तिका भी ग्रहण करना सदा विद्यमान आत्मा का जन्म अस्ति यह विकार असम्भव हैं।और वृद्धिरूप विकारभागी भी होवै नहीं और विपरिणामी भी होवै नहीं । अपक्षय वाला भी होवै नहीं विनाशवान् भी नहीं होवैहै और आकाशवत् स्वभावसे विनाशका प्रतियोगी होवै नहीं किंतु(गगनवत्) घटके होने पर भी इस शरीरके नष्ट होनेपर भी नष्ट नहीं होता उपाधिके नाशवशसे गौण नाश व्यवहारका भागी होवै है। अर्थात् षट्भाव विकारोंसे वर्जित निर्विकार है ॥ १३४ ॥

प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः,
सदसदिदमशेषं भासयन्निर्विशेषः ॥

विलसति परमात्मा जाग्रदादिष्ववस्था-
स्वहमहमिति साक्षात्साक्षिरूपेण बुद्धेः ॥१३५॥

अहमालम्बनस्यात्मनः स्वरूपं निर्दिष्टमुपसंहरति प्रकृतिविकृतीत्यादि।

प्रकृतिविकृतिभिन्नः।कार्यकारणविलक्षणः।यतःशुद्धबोधस्वभावः निर्मलचित्स्वरूपः परमात्मा उत्कृष्टश्चिदात्मा निर्विशेषः नामजातिगुणक्रियाविकलः। इदं सदसत् स्थूलसूक्ष्मं जगत् अशेषम् निखिलम्। कारणस्याप्यनेन सङ्ग्रहः जाग्रदादिष्ववस्थासु। अहमहमिति साक्षात्। भासयन् निरपेक्षतया प्रकाशयन् बुद्धेः साक्षिरूपेण विलसति "ध्यायतीव लेलायतीवे" ति श्रुतेरात्मनि बुद्धयनुकरण मात्रं विलसनं बुद्धेरेव सधर्मआत्मा तु तत्साक्षीति बोध्यमित्यर्थः॥

प्रकृतिविकृतिभिन्नः। शुद्धबोधस्वभावः। सदसद्। इदम्। अशेषम्। भासयन्। निर्विशेषः॥ विलसति। परमात्मा। जाग्रदादिषु। अवस्थासु। अहम्। अहम्। इति। साक्षात्। साक्षिरूपेण। बुद्धेः॥ १३५॥

अहंप्रतीतिका विषय आत्माका स्वरूप उपदेश किया समाप्त करे हैं। प्रकृति इति। कार्य कारण विलक्षण है। शुद्ध ज्ञानस्वरूप है। उत्कृष्ट चेतनस्वरूप है। नाम जाति गुण क्रियाशून्यहै।प्रत्यक्षादि प्रमाणसिद्ध स्थूल सूक्ष्म जगत् सर्वको प्रकाश करे है जाग्रत् आदि अवस्थामें मैंहूं" मैंहूं" ऐसी बुद्धिका साक्षीरूप करके निरपेक्ष क्रीडा करे है अर्थात् बुद्धयादिकी क्रीडा का प्रकाश करता तद्वत् अनुकरण करे है वास्तवसे निष्क्रियहै॥

नियमितमनसामुं त्वं स्वमात्मानमात्म-
न्ययमहमिति साक्षाद्विद्धि बुद्धिप्रसादात्॥
जनिमरणतरंगापारसंसारसिन्धुं,
प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः॥ १३६॥

अहंप्रत्ययालम्बनस्य साक्षिणोवेदनप्रकारमाह नियमितमनसेति त्वम् संबोध्यचेतनोविद्याधिकारी । अमुम् । उपदर्शितस्वभावम् स्वमात्मानम् मुख्यमात्मानम् नियमितमनसा सर्वतोव्यावृतचेतसा बुद्धिप्रसादात् । मतेः स्वास्थ्याद्धेतोः आत्मनि । स्वदेहे एव न वनगुहादौ अयमहमस्मीति साक्षाद्विद्धि साक्षात्कुरु । तत्फलमाह जनिमरणेत्यादिना जन्ममरणलक्षणतरङ्गाकुलं दुष्प्रापपारं संसारसागरम् प्रतर तीर्णोभव ब्रह्मरूपेण संस्थः सन् कृतार्थोभव संसारबन्धनिवृत्युपलक्षितब्रह्मानन्दनिष्ठामवाप्य कृतकृत्योभवेत्यर्थः । 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुतिरत्रानुसन्धातव्या ॥ १३६ ॥

नियमितमनसा । अमुम् । त्वम् । स्वम् । आत्मानम् । आत्मनि । अयम् । अहम् । इति । साक्षात् । विद्धि । बुद्धिप्रसादात् ॥ जनिमरणतरङ्गापारसंसारसिन्धुम् । प्रतर । भव । कृतार्थः । ब्रह्मरूपेण । संस्थः ॥ १३६ ॥

अहंप्रतीतिगम्य साक्षीके ज्ञानका प्रकार कहे हैं । नियमित इति । तुम विद्याका अधिकारी उक्तस्वरूप आत्माको विषयोंसे निवृत्त चित्त करके बुद्धिकी स्वस्थता होनेसे स्वदेह में ही यह मैं हूं ऐसे साक्षात् ज्ञान, ज्ञानकी महिमासे वन गुफादिमें जानेकी आवश्यकता नहीं है, उस ज्ञानसे यह फल प्राप्त होगा कि जन्म मरण रूप तरंगों करके व्याकुल जिसका पार मिलना दुर्लभ है ऐसे संसारसागरको तरो और ब्रह्मरूप होकर ब्रह्मनिष्ठ वा कृतार्थ होवो ॥ १३६ ॥

अत्रानात्मन्यहमिति मतिर्बन्धएषोऽस्य पुंसः,
प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः ॥
येनैवायं वपुरिदमसत्सत्यमित्यात्मबुद्ध्या,
पुष्यत्युक्षत्यवति विषयैस्तन्तुभिः कोशकृद्वत् ॥

आत्मानात्मनोः स्वरूपं सामान्यतोऽभिधाय कोनाम बन्धइति

प्रश्नं समाधातुमुपक्रमते । अत्रानात्मनीत्यादिना ।

अत्र अस्मिन्नुपदर्शितस्वरूपेऽनात्मनि आत्माभिन्नतया कल्पिते देहादौ । अहमिति मतिः । आत्मत्वबुद्धिः एषबन्धः । मोक्षप्रतिकूलः । अयं चास्य पुंसोऽज्ञानात्प्राप्तः । अज्ञाननिदानोयं बोध्यः । बन्धत्वं प्रकाशयति । जननमरणक्लेशसंपातहेतुः । जन्ममृत्युप्रयुक्तदुःखप्राप्तिकरः । येन निरुक्तबन्धेन अयं मूढः इदं प्रत्यक्षमसद्दृष्टनष्टस्वभावं वपुः शरीरं सत्यमित्यात्मबुद्ध्या सत्यमहमस्मीति मत्वा पुष्यति पुष्णाति पयःपानादिना उक्षति सिंचति अभ्यङ्गादिना संस्करोति विषयैः स्वानुकूलैरवति रक्षति । तन्तुभिः कोशकृद्वत् यथा कोशकारः कृमिस्तन्तुभिः सुखसाधनत्वेन भावितैर्महता श्रमेणोत्पादितैः । स्वयं बध्यते तथैव जीवोपि महाश्रमसम्पादितविषयैर्बन्धमनुभवतीत्यर्थः ॥ १३७ ॥

अत्र । अनात्मनि । अहम् । इति । मतिः । बन्धः । एषः । अस्य । पुंसः । प्राप्तः । अज्ञानात् । जननमरणक्लेशसंपातहेतुः ॥ येन । एव । अयम् । वपुः । इदम् । असत् । सत्यम् । इति । आत्मबुद्ध्या । पुष्यति । उक्षति । अवति । विषयैः । तन्तुभिः । कोशकृत् । वत् ॥ १३७ ॥

आत्मा अनात्माका स्वरूप सामान्यसे कहाहै अब बन्धक्या है इत्यादि प्रश्नका उत्तर कहे हैं । अत्र इति । पूर्वोक्त आत्मासे भिन्नरूप करके कल्पित देहादिमें आत्मा ऐसी बुद्धि यह मोक्षविरोधी बन्ध है यह इस पुरुषको अज्ञानसे प्राप्तहुआ है सो जन्ममृत्युप्रयुक्त दुःखको प्राप्त करे है जिसे बन्ध करके ही यह मूढ जीव दृष्टनष्टस्वरूप प्रत्यक्ष विनश्वर शरीरको सत्य यह मैं हूं इस प्रकार आत्मबुद्धि करके दुग्ध पानादि करके पुष्ट करता है तेल फुलेल आदिसे संस्कार करे है अनुकूल विषयोंसे रक्षा करे है जैसे कोशकार कीट अपने सुखका साधन समझके अति श्रमसे उत्पादन किये तंतुओंसे स्वयं बन्धनको प्राप्त

होवै है वैसे जीव स्वकल्पित संसारसे स्वयं बन्धनको अनुभव करे है ॥ १३७ ॥

अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा,
विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा ॥
ततोऽनर्थव्रातोनिपतति समादातुरधिक-
स्ततोयोऽसद्ग्राहस्सहि भवति बन्धःशृणु सखे १३८

अनात्मन्यात्मत्वमतेर्बन्धत्वे दृष्टान्तमुपादत्ते । अतस्मिंस्तद्बुद्धिरिति विमूढस्य मोहावृतचेतसः । तमसा अज्ञानेन अतस्मिंस्तद्बुद्धिः प्रभवति अन्यास्मिन्स्वतः स्वमतिरुपजायते सामान्येनाभिहितं विशेषतः स्फोरयति विवेकाभावाद्वै विवेकवैकल्यादेव । भुजगे नागे रज्जुधिषणा स्फुरति मालादिमतिरुदेति ततः मालादिमतितः समादातुः मालामत्या नागस्य ग्रहीतुः अनर्थव्रातोनिपतति भयकम्पादिकानर्थशतमुत्पद्यते यस्मादेवं दृष्टान्तेऽन्यथामतेरनर्थप्रदत्वेन बन्धत्वं स्पष्टं ततः । तस्माद्धेतोः हेसखे योऽसद्ग्राहः सहि बन्धो भवति । असद्बुद्धिरेव बन्धइति निर्णीतम्भवतीत्यर्थः ॥ १३८ ॥

अतास्मिन् । तद्बुद्धिः । प्रभवति । विमूढस्य । तमसा । विवेकाभावात् । वै । स्फुरति । भुजगे । रज्जुधिषणा ॥ ततः । अनर्थव्रातः । निपतति । समादातुः । अधिकः । ततः । यः । असद्ग्राहः । सः । हि । भवति । बन्धः । शृणु । सखे ॥

अनात्मामें आत्मत्व बुद्धिको बन्धरूपतामें दृष्टान्त कहे हैं । अतस्मिन् इति । जिसका चित्त अविवेकसे आवृत है उसको अज्ञानसे अन्यमें अन्यबुद्धि होवै है सामान्यरूपसे उक्तका विशेषरूपसे वर्णन करे हैं । विवेकके अभावसे ही सर्पमें माला आदि बुद्धि उदय होवै है तिसे मालादि बुद्धिसे मालाबुद्धिवाले ग्रहीताको भय कम्पादिक बहुत अनर्थ प्राप्त होते हैं जिसै कारण दृष्टान्तमें अन्यथा बुद्धि अनर्थकरी देखी

है इस कारणसे हे मित्र[17]! असत्य[18] बुद्धि जो[19] है[20] सो ही[21] बन्धनरूप[22] है[23] ऐसा[24] सुन निर्णय है ॥ १३८ ॥

अखण्डनित्याद्वयबोधशक्त्या,
स्फुरन्तमात्मानमनन्तवैभवम् ॥
समावृणोत्यावृतिशक्तिरेषा,
तमोमयी राहुरिवार्कविम्बम् ॥ १३९ ॥

बन्धस्वरूपं निरूप्य कथमेषआगतइति प्रश्नं समादधाति। अखण्डेति।

एषा तमोमयी। तमःप्रधाना। आवृतिशक्तिः। आवरणशक्तिः। अखण्डनित्याद्वयबोधशक्त्या। असंसृष्टाविनाश्यद्वैतचिच्छक्त्या स्फुरन्तम्। भासमानम्। अनन्तवैभवम्। अविनाश्यैश्वर्यशालिनमात्मानम्। अर्कविम्बम्। सूर्यमण्डलम्। राहुस्तमइव समावृणोति। आच्छादयति। यया सन्नपि नास्तीति भासमानोपि न भातीति व्यवहारं भजते चिदात्मेति भावः॥ १३९॥

अखण्डनित्याद्वयबोधशक्त्या। स्फुरन्तम्। आत्मानम्। अनन्तवैभवम्॥ समावृणोति। आवृतिशक्तिः। एषा। तमोमयी। राहुः। इव। अर्कविम्बम्॥ १३९॥

बन्धका स्वरूप निरूपण किया है, अब कैसे यह प्राप्त हुवाहै इस प्रश्नका समाधान करे हैं। अखण्ड इति। तमोगुणप्रधान यह आवरणशक्ति अखण्ड नित्य अद्वैत चेतनशक्तिसे प्रकाशमान् अविनाशि ऐश्वर्य वाले आत्माको सूर्यमण्डलको राहुवत् आच्छादन करे है जिस करके चेतन आत्मामें न अस्ति न भाति व्यवहार होवै है ॥१३९॥

तिरोभूते स्वात्मन्यमलतरतेजोवतिपुमा-
ननात्मानं मोहादहमिति शरीरं कलयति ॥

ततः कामक्रोधप्रभृतिभिरमुं बन्धनगुणैः,
परं विक्षेपाख्या रजसउरुशक्तिर्व्यथयति॥ १४० ॥

कारणीभूतावृतिसिद्धौ कार्यस्य विक्षेपस्यापि लब्धावसरत्वमाह तिरोभूते इति।

पुमान्। पुरुषः। अमलतरतेजोवति सर्वदा स्वच्छतेजस्विनि तिरोभूते पूर्वोक्तया तामस्यावृत्याच्छन्ने स्वात्मनि चिदात्मनि एवं सति तस्य भानाभावापराधेन मोहादज्ञानात् शरीरमहमिति कलयति। शरीरमेवात्मत्वेन प्रतिपद्यते। ततश्च विक्षेपाख्या रजस उरुशक्तिः विक्षेपाभिधाना राजसी बलिष्ठाशक्तिः। अमुम्। मूढं बन्धनगुणैः बन्धनसूत्रैः कामक्रोधप्रभृतिभिः।प्रसिद्धैरासुरैरेभिः परं व्यथयति।अत्यन्तं भीषयति दुःखयति चेत्यर्थः॥ १४० ॥

तिरोभूते। स्वात्मनि। अमलतरतेजोवति। पुमान्। अनात्मानम्। मोहात्। अहम्। इति। शरीरम्। कलयति॥ ततः। कामक्रोधप्रभृतिभिः। अमुम्। बन्धनगुणैः। परम्। विक्षेपाख्या। रजसः। उरुशक्तिः। व्यथयति॥ १४०॥

कारणरूप आवरणशक्तिका निरूपण किया अब कार्यरूप विक्षेप शक्तिका निरूपण करे हैं। तिरो भूते इति। पुरुष सर्वदा स्वच्छ तेजवाले पूर्वोक्त तामस आवरण शक्ति करके आच्छादित चिदात्मामें अभान होनेसे अज्ञानसे शरीरको ही आत्मरूप जानता है तिसंसे अनन्तर विक्षेप नामवाली राजसी बलवती शक्ति मूढको बांधने वाले काम क्रोधादि रूप सूत्रों करके अत्यन्त भय और व्यथा देती है अर्थात् दुःखी करतीहै १४०

महामोहग्राहग्रसनगलितात्मावगमनो-
धियोनानावस्थां स्वयमभिनयंस्तद्गुणतया॥
अपारे संसारे विषयविषपूरे जलनिधौ,

निमज्ज्योन्मज्ज्यायं भ्रमति कुमतिः कुत्सितगतिः १४१

परं व्यथयतीत्युक्तमाविष्करोति महामोहेति।

अयं कुमतिः भ्रान्तमतिर्जीवः कुत्सितगतिः निन्दितफलभागी महामोहग्राहग्रसनगलितात्मावगमनः। मूलाज्ञानग्राहग्रासविलुप्तस्वावबोधः। धियः। बुद्धेः। नानावस्थाम्। जाग्रदादिविविधावस्थाम् तद्गुणतया बुद्ध्युपाधिकत्वेन स्वयमभिनयन् स्वयं तद्वदनुकुर्वन् विषयविषपूरे बन्धकशब्दादिहलाहलपूर्णे अपारे विना ज्ञानप्लवं दुष्प्राप्यपारे। संसारे जलनिधौ मृतिजन्मसलिलराशौ निमज्ज्योन्मज्ज्य भ्रमति अधऊर्ध्वयोनिषु पुनःपुनर्जायते म्रियते चेत्यर्थः॥१४१॥

महामोहग्राहग्रसनगलितात्मावगमनः। धियः। नानावस्थाम्। स्वयम्। अभिनयन्। तद्गुणतया॥ अपारे। संसारे। विषयविषपूरे। जलनिधौ। निमज्ज्य। उन्मज्ज्य। अयम्। भ्रमति। कुमतिः। कुत्सितगतिः॥ १४१॥

पूर्वोक्तका विस्तार करे हैं। महामोहइति।

भ्रान्तबुद्धि वाला जीव निन्दित फलभागी मूलाज्ञानरूप ग्राहके ग्रास करके तिरोभूत हुवा है—आत्माका बोध जिसका सो बुद्धिकी जाग्रत् आदि अनेक अवस्थाको आप बुद्धिरूप उपाधिद्वारा तद्वत् अनुकरण करता है, बन्धनका हेतु विषयरूप विष करके पूर्ण विज्ञानरूप जहाज विना जिसका पार नहीं प्राप्त होता ऐसे मरण जन्मरूप जल करके पूर्ण संसाररूप समुद्रमें ऊपर नीचे योनियोंमें यह पुनः पुनः जन्मता मरता भ्रमता है॥१४१॥

भानुप्रभासंजनिताभ्रपङ्क्ति-
र्भानुं तिरोधाय विजृम्भते यथा॥
आत्मोदिताहंकृतिरात्मतत्त्वं,
तथा तिरोधाय विजृम्भते स्वयम्॥१४२॥

नन्वात्मोदिताहंकृतेरात्माच्छादकत्वमुपजीव्याविरोधादयुक्तम-दृष्टचरं च स्वोत्पन्नेनावरणमित्यतआह। भानुप्रभेत्यादिना। यथा भानुरश्मिसमुत्पन्नापि अभ्रपङ्क्तिर्मेघमण्डली। भानुं तिरोधाय सूर्यमावृत्य विजृम्भते। विलसति। तथा। आत्मोदिता। आत्मनः समुत्पन्नासत्यप्यात्मतत्त्वं तिरोधाय। आत्मस्वरूपं शुद्धमप्याच्छाद्य तमसन्तमिवापाद्येति यावत्। स्वयं विजृम्भते स्वयमेव विलसतीत्यर्थः। नास्तुर्याअस्याउपजीव्याविरोधभयमन्यथात्वस्या आत्मलाभएव दुर्लभतां लभेतेति भावः॥ १४२॥

भानुप्रभासंजनिताभ्रपङ्क्तिः। भानुम्। तिरोधाय। विजृम्भते। यथा॥ आत्मोदिता। अहंकृतिः। आत्मतत्त्वम्। तथा। तिरोधाय। विजृम्भते। स्वयम्॥१४२॥

आत्मासे उदयहुवे अहंकारको आत्माका आच्छादकत्व बने नहीं, कारणके संग विरोधको अयुक्त होनेसे और कार्यको कारणकी आच्छादकता कहीं देखी भी नहीं, इस शंकाका उत्तर कहेहैं। भानुप्रभा इति। सूर्यकी किरणोंसे उत्पन्नहुई मेघमण्डली सूर्यको आवरण करके प्रतीत होवे है, जैसे तैसे आत्मासे उत्पन्न हुआभी अहंकार आत्माके शुद्ध स्वरूपको आच्छादन करके अपने आपही प्रतीत होवेहै, इसका स्वरूप प्रत्यक्ष प्रमाण सिद्ध है, इसकारण इसको कारणके संग विरोधका कुछ भय नहीं है॥ १४२॥

कवलितदिननाथे दुर्दिने सान्द्रमेघै-
र्व्यथयति हिमझंझावायुरुग्रोयथैतान्॥
अविरततमसात्मन्यावृतेमूढबुद्धिं,
क्षपयति बहुदुःखैस्तीव्रविक्षेपशक्तिः॥ १४३॥

आवृतौ दृष्टान्तमभिधाय विक्षिप्तावपि दृष्टान्तं दर्शयति। कवलितेत्यादिना।

यथा दुर्दिने। मेघच्छन्नेऽहनि। सान्द्रमेघैः। निविडबलाहकैः। कवलितेदिननाथे ग्रस्तात्मनि सति। उग्रः। भयङ्करः। हिमझंझावायुः। हिमालयतटीषु नटीच वर्तमानावात्या। एतान्। मेघान्। व्यथयति। इतस्ततोभ्रमयति। व्यथ भयसंचलनयोरिति धातुपाठात्। तथा। अविरततमसा। सान्द्राज्ञानतमिस्रया। आत्मनि। चिदात्मनि। आवृते। समाच्छन्ने। तीव्रविक्षेपशक्तिः। प्रबलाराजसी शक्तिः। मूढबुद्धिम् विवेकविकलमानसम्। बहुदुःखैः। आध्यात्मिकादिभेदभिन्नैः। क्लेशैः। क्षपयति। नानायोनिषु भ्रमयत्यनवरतमिति भावः॥ १४३॥

कवलितदिननाथे। दुर्दिनेसान्द्रमेघैः। व्यथयति। हिमझंझावायुः। उग्रः। यथा। एतान्॥ अविरततमसा। आत्मनि। आवृते। मूढबुद्धिम्। क्षेपयति। बहुदुःखैः। तीव्रविक्षेपशक्तिः १४३

आवरणशक्तिमें दृष्टान्त कहा है, अब विक्षेपशक्तिमें भी दृष्टान्त कहे हैं। कवलित इति। जैसे मेघसे आच्छादित दिनमें सघन मेघोंसे सूर्यके ग्रसे जानेपर भयंकर हिमालय पर्वतमें(नटवत्)वर्तमान वायुसमूह मेघोंको इधर उधर भ्रमण करेहै तैसे सघन अज्ञानरूप तमसे चेतंन आत्माके आच्छादन होनेपर प्रबल रजोगुणकी विक्षेपशक्ति विवेकशून्य मन वाले पुरुषको आध्यात्मिकादि क्लेशोंसे नाना योनियोंमें निरन्तर भ्रमण करावै है॥ १४३॥

एताभ्यामेव शक्तिभ्यां बन्धः पुंसः समागतः॥
याभ्यां विमोहितोदेहं मत्वात्मानं भ्रमत्ययम्॥ १४४॥

उपपादिताभ्यामावरणविक्षेपशक्तिभ्यामेव बन्धप्राप्तिमाह। एताभ्यामिति।

एताभ्यामभिहिताभ्यामेव। नान्यतइति भावः। पुंसश्चेतनस्य।

बन्धः अभिहितस्वभावः । समागतः संप्राप्तः याभ्याम् । शक्तिभ्यां विमोहितः स्वस्वरूपात्प्रच्यावितः अयम् जीवः देहमात्मानं मत्वा भ्रमति देहमेव स्वं विनिश्चित्य संसृतिजङ्गलेऽनवरतं मुहुर्भ्रमतीत्यर्थः ॥ १४४ ॥

एताभ्याम् । एव । शक्तिभ्याम् । बन्धः । पुंसः । समागतः । याभ्याम् । विमोहितः । देहम् । मत्वा । आत्मानम् । भ्रमति । अयम् ॥ १४४ ॥

इन दोनों अज्ञानकी शक्तियोंको बन्धकी कारणता दिखावैं हैं। एताभ्याम् इति। इन पूर्वोक्त दोनों शक्तियोंसे ही चैतनको पूर्वोक्त स्वरूप बन्ध प्राप्त होवै है अन्य हेतु नहीं है जिनसे अपने स्वरूपको भूलकर यह जीव देहको आत्मा जानकर संसार-जंगलमें निरन्तर भ्रमण करावै है ॥ १४४ ॥

बीजं संसृतिभूमिजस्य तु तमोदेहात्मधीरङ्कुरो-
रागः पल्लवमम्बु कर्म तु वपुः स्कन्धोसवः शाखिकाः ॥
अग्राणीन्द्रियसंहतिश्च विषयाः पुष्पाणि दुःखं फलं,
नानाकर्मसमुद्भवं बहुविधं भोक्तात्र जीवः खगः १४५

एतावता कथमेषआगतइति प्रश्नः समाहितः सम्प्रति कथं प्रतिष्ठेति प्रश्नं समादधाति बीजमिति ।

संसृतिभूमिजस्य संसारतरोः बीजम् । उपादानम् । तमः । सवासनाज्ञानम् देहात्मधीस्त्वङ्कुरः अङ्कुरस्तु देहात्मत्वमतिरेव सुकोमलावयवः रागः इच्छा पल्लवम् पलाशलक्षणम् । कर्म तु विहितादिलक्षणं कर्माचरणन्तु । अम्बु सेचनसाधनं सलिलम् वपुः देवतिर्यङ्मनुष्यादिशरीरम् स्कन्धः तरोर्मूलमारभ्य शाखापर्यन्तोभागः असवः प्राणाः शाखिकाः शाखाएव इन्द्रियसंहतिः बाह्यान्तःकरणसंघातः । अग्राणि शाखाग्राणीत्यर्थः । विषयाः शब्दादयः पुष्पाणि । प्रसूनानि । तत्र फलन्तु नानाकर्मसमुद्भवं बहु-

चिधं दुःखम् क्लेशएवानेककर्मोपार्जितादृष्टोद्भूतोऽनेकधानुभूयते वैषयिकसुखमपि विवेकिभिर्दुःखपक्षे प्रक्षिप्तं तथाच सूत्रं "परिणामतापसंस्कारैर्गुणवृत्तिविरोधाच दुःखमेव सर्वं विवेकिनः" इति अत्र संसृतितरौ खगः विहगः भोक्ता जीवएव "तयोरन्यः पिप्पलं स्वाद्वत्ती"ति श्रुतेरिति भावः ॥ १४५ ॥

बीजम् । संसृतिभूमिजस्य । तु । तमः । देहात्मधीः । अङ्कुरः । रागः । पल्लवम् । अम्बु । कर्म । तु । वपुः । स्कन्धः । असवः । शाखिकाः ॥ अग्राणि । इन्द्रियसंहतिः । च । विषयाः । पुष्पाणि । दुःखम् । फलम् । नानाकर्मसमुद्भवम् । बहुविधम् । भोक्ता । अत्र । जीवः । खगः ॥१४५॥

अब कैसे बन्धकी स्थिति हुई, इस प्रश्नका उत्तर कहे हैं। बीजम् इति। संसाररूप वृक्षका बीजरूप अर्थात् उपादान कारण वासनासहित अज्ञान है और देहमें आत्मत्व बुद्धिरूप अंकुरहै, इच्छारूप पत्रहैं, पुण्य पापरूप कर्मोंका आचरण जल है और देव मनुष्यादि शरीररूप स्कन्ध है, प्राणरूप शाखा हैं, अन्तर बाह्यके इन्द्रियरूप शाखाग्र हैं और शब्दादि विषयरूप पुष्प हैं, उसमें कर्मजन्य अनेक प्रकारका दुःखरूप ही फलहै विवेकिजनोंकी दृष्टिमें विषयसुखको भी दुःखरूप समझ के दुःखही कहाहै और इस संसारवृक्षमें फलके भोगने वाला जीवरूप पक्षी है ॥१४५॥

अज्ञानमूलोयमनात्मबन्धो-
नैसर्गिकोऽनादिरनन्तईरितः ॥
जन्माप्ययव्याधिजरादिदुःख-
प्रवाहपातं जनयत्यमुष्य ॥ १४६ ॥

बन्धमूलमुपसंहरति । अज्ञानमूलइति ।

अज्ञानमूलः । अज्ञानोपादानः । अतएव नैसर्गिकः कारणान्तरनिरपेक्षः अनादिः वारिप्रवाहवदनुच्छिन्नप्रवाहः अनन्तः ज्ञानमात्रनिवर्त्यो नास्योपायान्तरैरन्तो भवति अयमनात्मबन्धः अनात्मनि देहादावात्मत्वमतिलक्षणोऽध्यासः 'नान्तोनचादिर्नच संप्रतिष्ठा' इति स्मृतौ कथितः अस्माभिश्च युष्मदस्मत्प्रत्ययगोचरयोरित्यादिना एवमयमनादिरनन्तोनैसर्गिकोऽध्यासोमिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकइत्यन्तेन भाष्यग्रन्थेन च निरूपितइत्यर्थः। सचामुष्य जीवस्य जन्माप्ययव्याधिजरादिदुःखप्रवाहपातं जनयति । जनिमृतिरोगवार्द्धक्यप्रभृतिदुःखसन्ततिप्राप्तिमुत्पादयति न कञ्चिदप्यर्थं सूते इति भावः ॥ १४६ ॥

अज्ञानमूलः। अयम् । अनात्मबन्धः । नैसर्गिकः । अनादिः । अनन्तः । ईरितः ॥ जन्माप्ययव्याधिजरादिदुःखप्रवाहपातम् । जनयति । अमुष्य ॥ १४६ ॥

उक्त बन्धमूलकी समाप्ति कहे हैं । अज्ञानमूल इति। अज्ञान जिसका उपादान कारण है, कारणान्तरकी अपेक्षासे रहित है जलके प्रवाहके समान उच्छेदरहित इसका प्रवाह है ज्ञानविना किसी अन्य उपायसे नाश नहीं होता है सो यह देहादिमें आत्मत्वबुद्धि अध्यासरूप बन्ध कहा है सो इस जीवको जन्म मरण रोगादि दुःखप्रवाहमें प्राप्त करे है कुछभी सुखको नहीं देता है ॥१४६॥

नास्त्रैर्न शस्त्रैरनिलेन वह्निना,
छेत्तुं न शक्योन च कर्मकोटिभिः ॥
विवेकविज्ञानमहासिना विना,
धातुः प्रसादेन सितेन मञ्जुना ॥ १४७॥

लौकिकबन्धच्छेदने शक्तानि साधनान्यत्रासमर्थानीति प्रदर्श-

यत् विज्ञानशस्त्रैकसमुच्छेद्यत्वं बन्धस्याह । नास्त्रैरित्यादिना । अस्त्रैः । ब्राह्मादिभिः । शस्त्रैः तोमरमुद्गरशक्तिभिन्दिपालादिभिः । अनिलेन । प्रलयमारुतेन । वह्निना अनलेन । कर्मकोटिभिः । अनन्तैः श्रौतैः स्मार्तैश्च कर्मभिश्च । छेत्तुं न शक्यः बन्धएभिर्विनाशयितुं न शक्यते चेत्केन तर्हि तद्विध्वंसस्तत्राह । विवेकेति धातुः प्रसादेन चिदात्मप्रवणतया । सितेन । तीक्ष्णतामापन्नेन । मञ्जुना । मनोहरेण विवेकाविज्ञानमहासिना विना किन्तु आत्मानात्मविवेकजनितात्मब्रह्मैक्यविज्ञानलक्षणपूर्वखड्गेनैव छेत्तुं शक्यइति पूर्वेणान्वयः ॥ १४७ ॥

नास्त्रैः । न । शस्त्रैः । अनिलेन । वह्निना । छेत्तुम् । न । शक्यः । न । च । कर्मकोटिभिः ॥ विवेकाविज्ञानमहासिना । विना । धातुः । प्रसादेन । सितेन । मञ्जुना ॥ १४७ ॥

लौकिक-बन्धछेदनमें समर्थ साधनोंको इस बन्धके छेदनमें सामर्थ्य नहीं है । किन्तु ज्ञानशस्त्र करके ही वन्धका छेद होवे है ऐसा वर्णन करे हैं । नास्त्रैः इति । ब्राह्म आदि अस्त्रों करके तोमर मुद्गर आदि शस्त्रों करके प्रलयके पवन करके अग्नि करके, श्रौत स्मार्त अनन्त कर्मोंकरके वन्धछेदन नहीं होसके है किन्तु चेतन आत्मकी तरफ चित्तकी एकाग्रता करके तीक्ष्ण मनोहर आत्मा अनात्माके विवेक ज्ञानरूप विचित्र तलवार करके छेदन होवै है ॥ १४७ ॥

श्रुतिप्रमाणैकमतेः स्वधर्म-
निष्ठा तयैवात्मविशुद्धिरस्य ॥
विशुद्धबुद्धेः परमात्मवेदनं ,
तेनैव संसारसमूलनाशः ॥ १४८ ॥

कथं प्रतिष्ठास्येति प्रश्नः समाहितः सम्प्रति कथं विमोक्षइति प्रश्नं समादधाति श्रुतिप्रमाणैकमतेरिति ।

श्रुतिशब्दोवेदमाह 'श्रुतिस्तु वेदोविज्ञेयोधर्मशास्त्रन्तु वै स्मृति' रिति मनुस्मृतेः।वेदप्रमाणाव्यभिचारिनिश्चयस्य पुंसःस्वधर्मनिष्ठा। निष्कामकर्मानुष्ठितिः जायते इति शेषः। अस्य तयैवात्मविशुद्धिः स्वधर्मनिष्ठयाऽस्याधिकारिणोमानसकषायापनयोभवति । विशुद्धबुद्धेश्च सततस्तस्य परमात्मवेदनम् गुरूपदेशश्रवणादिना ब्रह्मात्मैक्यसाक्षात्कारः। तेनैव। स्वात्मसाक्षात्कारेणैव। संसारसमूलनाशः । साज्ञानसंसारोच्छित्तिर्भवति ततश्च कृतार्थोभवतीति भावः॥ १४८॥

श्रुतिप्रमाणैकमतेः। स्वधर्मनिष्ठा। तया । एव। आत्मविशुद्धिः।अस्य॥ विशुद्धबुद्धेः। परमात्मवेदनम्। तेन।एव। संसारसमूलनाशः॥ १४८॥

कैसे बन्धकी निवृत्ति होगी? इस प्रश्नका समाधान करे हैं। श्रुति इति। वेदकी प्रमाणतामें जिसको दृढ निश्चय है उसको निष्काम कर्मोंका अनुष्ठान होवै है, इस अधिकारीकी तिसै करके ही मनकी शुद्धि होवै है उसके शुद्धबुद्धि होनेपर गुरुके उपदेशके श्रवणादि से ब्रह्म साक्षात्कार उदय होवै है तिसै आत्माके साक्षात्कार होनेसे ही अज्ञानसहित संसार की निवृत्ति होवै है उसीसे कृतार्थ होजावै है॥ १४८॥

कोशैरन्नमयाद्यैः पञ्चभिरात्मा न संवृतोभाति॥
निजशक्तिसमुत्पन्नैःशैवालपटलैरिवाम्बुवापीस्थम्॥१४९॥

कथं विमोक्षइति प्रश्नं समाधायावशिष्टमात्मानात्मविवेकप्रश्नं समाधातुं विवेककृत्यं सदृष्टान्तमाह। कोशैरित्यादिना।

निजशक्तिसमुत्पन्नैः। स्वसामर्थ्यकृतात्मलाभैः। शैवालपटलैः सलिलावरकशैवालवृन्दैः। वापीस्थमम्बिव। वाप्यन्तरवारिवदेव स्वशक्त्यविद्यासमुदितैः पञ्चभिरन्नमयाद्यानन्दमयान्तैः कोशैः संवृतश्छन्नआत्मा न भाति अद्वयानन्दादिरूपेण न प्रतीयते इत्यर्थः॥ १४९॥

कोशैः । अन्नमयाद्यैः । पञ्चभिः । आत्मा । न । संवृतः । भाति ॥ निजशक्तिसमुत्पन्नैः । शैवालपटलैः । इव । अम्बु । वापीस्थम् ॥ १४६॥

आत्मा अनात्माके विवेकके प्रश्नका समाधान निरूपण करने वास्ते दृष्टान्तसहित विवेकका फल निरूपण करे हैं । कोशैः इति । अपनी शक्तिसे उत्पन्न हुवे जलके आच्छादक शैवालसमूह करके वापी (बावली) के अन्तर स्थित जलवत्, अपनी अविद्या शक्तिसे उत्पादन किये अन्नमय आदि आनन्दमय पर्यन्त पाँच कोशों करके आच्छादित हुवा आत्मा अद्वैत आनन्द आदिरूप करके नहीं प्रतीत होता है ॥१४६॥

तच्छैवालापनये सम्यक् सलिलं प्रतीयते शुद्धम्॥
तृष्णासन्तापहरं सद्यः सौख्यप्रदं परं पुंसः ॥१५०॥

संवृतौ दृष्टान्तेनार्थमभिधाय तन्निवृत्तौ व्यवस्थामाह तच्छैवालेत्यादिना ।

तस्य सलिलस्वच्छस्वरूपावरकस्य शैवालस्य अपनये विनाशे सति सम्यक् शुद्धम् यथास्वरूपं निर्मलम् ।तृष्णासन्तापहरम् । पिपासादुःखविध्वंसकम् । सद्यः सौख्यप्रदम् । पानमात्रतआह्लादकरम् सलिलं पुंसः परं प्रतीयते। केवलं जलं पुरुषस्य साक्षात्कारमापद्यते नापूर्वमुत्पद्यते न शैवालं भासते यथा ॥१५०॥

तच्छैवालापनये । सम्यक् । सलिलम् । प्रतीयते । शुद्धम्॥ तृष्णासन्तापहरम् । सद्यः । सौख्यप्रदम् । परम् । पुंसः॥१५०॥

आच्छादन होनेसे दृष्टान्तमें अनर्थप्राप्ति कही हैं, आच्छादनकी निवृत्तिमें स्वस्थता कहे हैं । तच्छैवालइति । जलके स्वच्छ स्वरूपके आवर्तक शैवालके निवृत्त होनेपर निर्मल पियासको नाश करने वाला पानमात्रसे आनन्द करनेवाला

जेल केवल पुरुषको साक्षात्कार होवै है ॥१५०॥

पञ्चानामपि कोशानामपवादे विभात्ययं शुद्धः ॥
नित्यानन्दैकरसः प्रत्यग्रूपः परं स्वयंज्योतिः ॥१५१॥

तथा दार्ष्टान्तिकेऽपि व्यवस्थामाचष्टे पञ्चानामपीति ।

पञ्चानामपि कोशानामन्नमयाद्यानन्दमयान्तानामात्मत्वेन गृहीतानाम् । अपवादे । विवेकमत्याऽनात्मत्वेन निरसने संपन्ने । अयं स्वात्मा शुद्धोनिर्मलोनित्यानन्दैकरसोऽविनाशिसुखमात्रस्वभावः । कूटस्थः प्रत्यग्रूपः । सर्वान्तरः । स्वयंज्योतिः । स्वप्रकाशस्वभावोविदुषां स्फुरति केवलं नापूर्वं किंचिद्बोधतउत्पद्यतइति भावः । एवं च दृष्टान्तदार्ष्टान्तिकयोरावरणापनयएव यत्नोविधेयआनन्दरसानुभवस्त्वयत्नासिद्धइति भावः ॥१५१॥

पञ्चानाम् । अपि । कोशानाम् । अपवादे । विभाति । अयम् । शुद्धः ॥ नित्यानन्दैकरसः । प्रत्यग्रूपः । परम् । स्वयंज्योतिः ॥१५१॥

अब आत्मामें उसी व्यवस्थाको कहे हैं । पञ्चानामपि इति । अन्नमयादि पञ्च कोश जिनको आत्मरूप करके जाना है तिनको विवेकबुद्धि करके अनात्मरूपता करके निषेध होने पर यह आत्मा निर्मल अविनाशी सुखमात्रस्वरूप कूटस्थ निर्विकार सर्वसे अन्तर स्वप्रकाशस्वरूप विद्वानोंको प्रकाशित होवै है,अपूर्व कुछ उत्पन्न होवै नहीं । इसकारण आवरण की निवृत्तिमें यत्न करना चाहिये जिससे आनन्दका अनुभव प्राप्त होवै है ॥ १५१ ॥

आत्मानात्मविवेकः कर्तव्योबन्धमुक्तये विदुषा ॥
तेनैवानन्दी भवति स्वं विज्ञाय सच्चिदानन्दम् ॥१५२॥

विवेककर्तव्यतामुपादेशति । आत्मानात्मविवेकइति । विदुषा । तर्ककोविदेन । बन्धमुक्तये मोक्षावाप्तये आत्मानात्म-

विवेकः कर्तव्यः। आत्मानित्योऽनित्यस्त्वनात्मेति निर्णयोविधेयः। तेन। आत्मानात्मविवेकविज्ञानेन। स्वं सच्चिदानन्दम्। आत्मानमविनाशिचित्सुखात्मब्रह्माभिन्नं विज्ञाय। साक्षात्कृत्य। आनन्दी भवति जीवन्मुक्तिसुखमनुभवति बन्धविनिर्मुक्तो भवतीत्यर्थः॥१५२॥

आत्मानात्मविवेकः। कर्तव्यः। बन्धमुक्तये। विदुषा॥ तेन। एव। आनन्दी। भवति। स्वम्। विज्ञाय। सच्चिदानन्दम्॥१५२

विवेककी कर्तव्यताका उपदेश करे हैं। आत्मानात्म इति। युक्तिमें निपुण पुरुषने मोक्षकी प्राप्ति वास्ते आत्मा नित्य है, अनात्मा जगत् अनित्य है, ऐसा निर्णय करना चाहिये। आत्मा अनात्माके विज्ञानसे अपनेको अविनाशी चेतन आनन्दरूप ब्रह्मसे अभिन्न साक्षात् जानके जीवन्मुक्तिके सुखको अनुभव करता है, सर्वबन्धनसे विनिर्मुक्त होवै है॥ १५२॥

मुञ्जादिषीकामिव दृश्यवर्गा-
त्प्रत्यञ्चमात्मानमसङ्गमक्रियम्॥
विविच्य तत्र प्रविलाप्य सर्वं,
तदात्मना तिष्ठति यः समुक्तः॥ १५३॥

सफलं विवेकस्वरूपं सामान्येनाभिदधाति मुञ्जादिति।

मुञ्जात् इषीकात्वग्विशेषात् इषीकाम् तदन्तर्गतां काण्डव्यक्तिम् इव यथा तथा दृश्यवर्गात् देहेन्द्रियसंघातात्। प्रत्यञ्चम्। तद्विरुद्धस्वभावं द्रष्टारम्। असङ्गम्। निर्लेपम्। अक्रियम्। निष्क्रियं कूटस्थमिति यावत्। आत्मानं स्वं विविच्य पृथग्विज्ञाय तत्र चात्मनि दृष्टनष्टजगदधिष्ठाने। सर्वमनात्मवर्गम्। प्रविलाप्य तदतिरिक्तसत्तास्फूर्तिशून्यमिति निश्चित्य यस्तदात्मना साक्ष्यधिष्ठानस्वरूपेण तिष्ठति समुक्तोजीवन्मुक्तोमननीयः॥ १५३॥

मुञ्जात्। इषीकाम्। इव। दृश्यवर्गात्। प्रत्यञ्चम्। आत्मानम्। असङ्गम्। अक्रियम्॥ विविच्य। तत्र। प्रविलाप्य। सर्वम्। तदात्मना। तिष्ठति। यः। सः। मुक्तः॥ १५३॥

फलसहित विवेकके स्वरूपको सामान्यसे निरूपण करते हैं।मुञ्जात् इति । जैसें मूंजसे उसके अन्तर्गत सिरकी नामक तिलीको पुरुष पृथक् करे हैं तैसे देहें इन्द्रियसंघात से जडविरुद्ध स्वरूप द्रष्टा निर्लेप कूटस्थ आत्माको पृथक् जान के क्षणभङ्गुर जगत्के अधिष्ठानमें अनात्म प्रपंचका अभाव निश्चय करके तिसें अधिष्ठान साक्षीरूपसे जो स्थित होता है सो जीवन्मुक्त मानना चाहिये ॥ १५३ ॥

देहोयमन्नभवनोन्नमयस्तु कोश-
श्चान्नेन जीवति विनश्यति तद्विहीनः ॥
त्वक्चर्ममांसरुधिरास्थिपुरीषराशि-
र्नायं स्वयं भवितुमर्हति नित्यशुद्धः ॥१५४॥

दृश्यवर्गात्प्रविविच्येत्युक्तं विशदायितुं पञ्चकोशविवेचनमुपक्रमते देहोयमिति ।

अयमन्नभवनः । मातापितृभुक्तान्नरसपरिणामः । देहः । प्रतिक्षणमुपचीयमानावयवः । अन्नमयः । अन्नविकारः । कोशः । असेर्निधानमिवात्मतत्त्वस्यावरकत्वात्कोशपदव्यपदेश्यः। अन्नभवन इति पदं स्वयं व्याचष्टे। अन्नेन जीवतीत्यादिना । अन्नादुत्पन्नोप्यन्नेनैव जीवति प्राणधारणादौ शक्नोति । तद्विहीनस्तु तदन्नालाभतस्तु विनश्यति विगतासुः शवो भवतीत्यर्थः । अयमन्नमयकोशः यतस्त्वगादिपुरीषान्तमलिनद्रव्यनिकराकरस्ततोनित्यशुद्धः कार्यकारणमलविकलः स्वयमात्मा भवितुं नार्हति तथाचान्नमयोनात्मा विकारित्वान्मलिनत्वाच्च वर्चस्कादिवदित्यनुमानं सूचितम्। अत्र "सवाएषपुरुषोऽन्नरसमयः" इत्युपक्रम्याद्यतेऽत्तिचभूतानि तस्मादन्नन्तदुच्यते" इत्यन्ताऽन्नमयकोशं वर्णयन्ती श्रुतिः संगृहीतेति बोद्धव्यम् ॥१५४॥

देहः । अयम् । अन्नभवनः । अन्नमयः । तु । कोशः । च । अन्नेन । जीवति । विनश्यति । तद्विहीनः ॥ त्वक्चर्ममांसरु-

धिरास्थिपुरीषराशिः । न । अयम् । स्वयम् । भवितुम् । अर्हति । नित्यशुद्धः ॥१५४॥

पञ्चकोशका विवेक करे हैं । देहइति । माता पिताके खाये हुवे अन्नरसका परिणाम शरीर अन्नविकार तलवारके आच्छादक मियानके तुल्य है सो यह अन्नमय कोश है और सो कोश अन्नसे उत्पन्न होता है, अन्न करके जीवता है, प्राणधारणादि में समर्थ होता है और अन्नके अलाभसे नष्ट होता है और त्वचा मांस रुधिर हड्डी मल मूत्रादि अपवित्र वस्तुओंका समूहरूप है, सो कैथि कारण मलसे रहित नित्य शुद्ध आत्मा कैसे हो सकता है परस्परविरुद्ध होनेसे इनका अभेद बने नहीं॥ १५४॥

पूर्वं जनेरधिमृतेरपि नायमस्ति,
जातक्षणः क्षणगुणोऽनियतस्वभावः ॥
नैकोजडश्च घटवत्परिदृश्यमानः,
स्वात्मा कथं भवति भावविकारवेत्ता ॥१५५॥

अन्नमयस्यानात्मत्वे हेतून्वर्णयति । पूर्वं जनेरिति ।

अयम् । अन्नमयः । जनेः उत्पत्तेः । पूर्वं पुरस्तात् । मृतेः विनाशादधि । उपर्यपि नास्ति न सत्तां लभते । तन्मध्ये तु जातक्षणः । जातोलब्धः क्षणः स्थित्यवकाशोयेन सत्तयाऽस्तित्यविकारवानित्यर्थः । क्षणगुणः । क्षणिकरमणः । अनियतस्वभावः । क्षणपरिणामी । नैकः । अवयवोपचयापचयाभ्यां भिन्नाकृतिः । जडः । स्वतश्चेतनाशून्यः । घटवत्परिदृश्यमानः । पूर्वाभिहितगुणगणभागी घटइवायमपि विचार्यमाणः । भावविकारवेत्ता । देहादिसंघातविकृतिसाक्षी । स्वात्मा । ममात्मा । कथं भवति । इति विद्धीति शेषः अन्यथा स्वात्मशब्दयोः पर्यायत्वात्पुनरुक्त्यापत्तेः । यद्वा मिथ्यात्मादिव्यावृत्त्यर्थः स्वशब्दः तथाच देहोऽनात्मा उत्पादविनाशशा

लित्वात् । क्षणिकत्वात् । परिणामित्वात् । अनेकत्वात् । जडत्वात् दृश्यत्वात् । विकारत्वाच्च घटवदिति हेतवः स्फुटमुक्ता इति ध्येयमिति दिक् ॥ १५५ ॥

पूर्वम् । जनेः । अधि । मृतेः । अपि । न । अयम् । अस्ति । जातक्षणः । क्षणगुणः । अनियतस्वभावः ॥ न । एकः । जडः । च । घटवत् । परिदृश्यमानः । स्वात्मा । कथम् । भवति । भावविकारवेत्ता ॥ १५५ ॥

अन्नमय कोशको अनात्मतामें हेतु कहे हैं । पूर्वम् इति । यह अन्नमय उत्पत्तिसे पूर्वकालमें और विनाशसे अनन्तर भी नहीं रहे है और बीचमें स्थितिके अवकाशको प्राप्त होवै है, अनियत स्वभाव वाला अर्थात् क्षणपरिणामी अवयवोंकी न्यूनता आधिकतासे भिन्न आकृति वाला है, अपनी चेतनतासे रहित है, घटके समान दीखता है सो देहादिविकारोंका साक्षी हमारा आत्मा कैसे होसकता है ऐसा जान, हे शिष्य ! अनात्म पदार्थरूप देहको आत्मा मत मान ॥ १५५ ॥

पाणिपादादिमान्देहोनात्माऽव्यङ्गेऽपि जीवनात् ॥
तत्तच्छक्तेरनाशाच्च न नियम्योनियामकः ॥१५६॥

तत्रैव हेत्वन्तरमप्यापामरप्रसिद्धं प्रदर्शयति पाणीत्यादिना । पाणिपादादिमान् । करचरणशिरोग्रीवादिविविधावयवविशिष्टः देहः । स्थूलशरीरं नात्मा आत्मभिन्नः अनात्मेति वा च्छेदः । कुतः । व्यङ्गे किंचिदङ्गविनाशेपि जीवनात् । प्राणादीनां विविधचेष्टायाः सद्भावात् । तथाच यदि देहआत्मा स्यात्तर्हि कपालनाशे घटस्येव देहावयवनाशे तद्देहस्य नाशावश्यं भाव्याद्देहान्तरोत्पादेनात्मान्तरोत्पादाभ्युपगमे तद्देहदृष्टं वस्तुजातमत्र देहेनस्मर्येतान्येन दृष्टस्यान्येन स्मर्तुमशक्यत्वात् । किंच तद्देहावयवविनाशसमये आत्मवि-

नाशाभ्युपगमस्यावश्यकतया देहान्तरोत्पत्तेः प्राग्जीवनमेव न सि. द्धेदिति देहादतिरिच्यते जीवोयोदेहेषु वृक्णावयवत्वादिना नाना-विधेष्वपि सदैकरसोनिरयवचइति बोध्यम् । तथाच देहात्मवादी-प्रष्टव्यः देहस्य पाणिपादादिवृन्दात्मत्वात्पाण्यादयोऽवयवाः प्रत्ये कमात्मा तत्समुदायोवा यदि प्रत्येकं तदा देहावयवे कस्मिंश्चिदेक-स्मिंश्छिन्ने आत्मापि च्छिन्नोम्रियतेबहूनामात्मनां नानादिग्व-र्तिकार्येषूपस्थितेषु विरोधादिन्द्रियात्मवादइवात्रापि देहो-न्माथप्राप्तेरपरिहारात्तत्समुदायपक्षेपि समुदायावयवे च्छिन्ने सत्यात्मैकदेशच्छेदः प्राप्नोत्येवेति नात्मनोऽखण्डस्वरूपस्य लाभइत्यादिकमपि सूच्यतेऽनेन ग्रन्थेन । ननु तवापि देहातिरिक्ता-त्मवादिनः करादौ वृक्णे तदभ्यन्तरात्मैकदेशस्य विलोपः प्राप्नोति इत्यतआह तत्तच्छक्तेरिति । तत्तदवयवानुगतचिच्छक्तेर्मठान्तर्गत-गगनस्येव निरंशत्वान्नतत्तदवयवलोपेंऽशलोपइति भावः । अतए-वायमात्मा न नियम्यः न किञ्चिदधीनः किन्तु नियामकः । देहा-दिसङ्घातप्रेरणे स्वतन्त्रइत्यर्थः । तथाच देहोऽनात्मा विकार्यवयव-शालित्वान्नियम्यत्वाच्च घटवदिति निदर्शनं पुरस्ताद्दर्शितं द्रष्टव्य-मिति सूचितमिति दिक् ॥१५६॥

पाणिपादादिमान् । देहः । न । आत्मा । व्यङ्गे । अपि । जीवनात् ॥ तत्तच्छक्तेः । अनाशात् । च । न । नियम्यः । नियामकः ॥१५६॥

देहको अनात्मतामें अन्यहेतु भी दिखावे हैं । हाथ पाद शिर-ग्रीवादि अवयवोंवाला स्थूलशरीर आत्मा नहीं है किंचित् अंगके नाश होनेपर भी प्राणादि चेष्टाके होनेसे कभी देहको आत्मा मानें तौ अवयवोंके भंग होनेसे देहका भंग होवै है तव पूर्वदेहमें दृष्टपदार्थोंका उत्तरदेहमें स्मरण न होगा, अन्यकरके दृष्ट पदार्थका अन्यकरके स्मरण न होनेसे । शङ्का । देहातिरिक्तआत्मवादीके मतमें भी देहके अवयवच्छेदसे आत्माके एक देशका विनाश होना चाहिये । उत्तर । आत्माको निरवयव होनेसे मठके एक देश-

नाश होने पर भी उसके अन्तर आकाशके अनाशवत् आत्माका नाश होवै नहीं, चेतनशक्तिका अनाश होनेसे यह आत्मा किसीके अधीन नहीं है किन्तु देहादि समुदायप्रेरणामें स्वतन्त्र है अर्थात् विकारी अवयवोंवाला होनेसे और पराधीन होनेसे आत्मा नहीं है 'घटादिवत्' यह अनुमान सिद्ध हुवा जान लेना ॥

देहतद्धर्मतत्कर्मतदवस्थादिसाक्षिणः ॥
स्वतएव स्वतःसिद्धं तद्वैलक्षण्यमात्मनः १५७

किंचात्मनोदेहवैलक्षण्यं साक्षित्वेनानुभवसिद्धमेवेति न प्रमाणान्तरसाध्यत्वप्रयासइत्याह । देहतद्धर्मेत्यादिना ।

देहतद्धर्मतत्कर्मतदवस्थादिसाक्षिणः शरीरस्य तद्धर्माणां स्थौल्यकार्श्यादीनां तत्कर्मणां गत्यागत्यादीनां तदवस्थानां बाल्ययौवनादीनामादिना तद्रूपाणां शौक्ल्यश्यामतादीनां च साक्षाद्द्रष्टुरात्मनोजीवितस्वस्य।तद्वैलक्षण्यं साक्ष्यदेहाद्यतिरिक्तत्वं स्वतःसिद्धं प्रमाणानपेक्षया स्फुरत्सत्ताकम् प्रासादवासिन्यायेन स्वतः परतश्च सिद्ध्यतोपि स्वतःसिद्धपदव्यपदेश्यतास्यादित्यतस्तद्विघूणोति स्वतएवेति प्रासादवासिस्थले भूमिप्रासादयोरुभयोरप्यावासयोग्यस्थानत्वाद्युक्तमुभयवासिनोपि प्रासादवासित्वमत्र तु साक्षिभिन्नस्य स्वतःसत्तास्फूर्तिशून्यत्वान्नोभयसिद्धत्वप्रत्याशापि विधेयेति भावः।तथाचात्मा देहादिसाक्ष्यभिन्नः साक्षित्वात् व्यतिरेके घटादिवदित्यनुमानमपि मन्दमतिबोधार्थस्योद्धव्यम् ॥ १५७ ॥

देहतद्धर्मतत्कर्मतदवस्थादिसाक्षिणः ॥ स्वतः । एव । स्वतःसिद्धम् । तद्वैलक्षण्यम् । आत्मनः ॥ १५७ ॥

अब आत्माको साक्षीरूप होनेसे देहविलक्षणता स्वतःसिद्ध है प्रमाण देनेकी आवश्यकताके अभावको सूचन करे हैं । देह इति । शरीरका और उसके धर्म स्थूलतादिका उसकी क्रिया गमन आगमन आदिका उसकी अवस्था बाल्यादिका उसके शुक्लादिरूपोंका साक्षात् द्रष्टा आत्माको दृश्यदेहसे अतिरिक्तता

प्रमाण विना ही सिद्ध है इसीसे स्वतःसिद्ध है जैसे घटादिका साक्षी द्रष्टा घटसे भिन्न है वैसेही देहका द्रष्टा साक्षी देहसे भिन्न है,साक्षी होनेसे यह अनुमान भी जानलेना॥ १५७॥

शल्यराशिर्मांसलिप्तोमलपूर्णोतिकश्मलः ॥
कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः ॥ १५८॥

ननु देहएव साक्षी भवतु किमतिरिक्तसाक्षिकल्पनया तत्राह शल्यराशीति ।

शल्यराशिः कीकससमूहः मांसलिप्तः । आमिषलेपालङ्कृतः मलपूर्णः पुरीषपूरितपिण्डः । अतिकश्मलः । पापिष्ठतरइव वर्तमानः । अयं देहः एतद्विलक्षणः निरवयवः स्वच्छः स्वयं । प्रमाणव्यापारमन्तरा । वेत्ता । द्रष्टा साक्षी इत्यर्थः । कथं भवेत् न कथमपि भवितुमर्हतीत्यर्थः । तथाच देहस्य सावयवत्वादिना जडत्वाद्द्रष्टृत्वमेव न घटते सुतरां स्वतोद्रष्टृत्वलक्षणं साक्षित्वमिति भावः ॥ १५८ ॥

शल्यराशिः । मांसलिप्तः । मलपूर्णः । अतिकश्मलः ॥ कथम् । भवेत् । अयम् । वेत्ता । स्वयम् । एतद्विलक्षणः १५८

शङ्का । देहको ही साक्षी मानलेवेंगे अतिरिक्त साक्षी मानना निष्प्रयोजन है । उत्तर । हे शिष्य ! हड्डीका समूह मांससे लिपा हुवा मलकरके भराहुवा अपवित्र पापीवत् वर्तमान वह देह है इससे विलक्षण निरवयव स्वच्छ प्रमाण व्यापार विना ज्ञाता साक्षीरूप कैसे होवै है अर्थात् देहको सावयवत्वादि करके जड होनेसे द्रष्टापना ही नहीं बने है, प्रमाण व्यापार विना प्रकाशकत्वरूप साक्षित्व तो अत्यन्त असम्भव है॥

त्वङ्मांसमेदोस्थिपुरीषराशा-
वहंमतिं मूढजनः करोति ॥

विलक्षणं वेत्ति विचारशीलो-
निजस्वरूपं परमार्थभूतम् ॥ १५९ ॥

नन्वाकीटपतङ्गादाच देवर्षिमनुष्यादहमिति मतिः स्थूलेऽस्मिन्देहे समुदयमाना मानमस्यैवात्मत्वे तत्कुतएतद्विलक्षणः साक्षी कश्चिदननुभूयमानोमन्तव्योऽतआह त्वङ्मांसेत्यादिना ।

मूढजनः अभिहितलक्षणमोहावृतमतिमान्पुरुषः त्वङ्मांसमेदोऽस्थिपुरीषराशौ चर्मामिषमेदःकीकसमलमूत्रवृन्दे देहे । अहंमतिम् । स्थूलोहम् । कृशोहम् । गौरोहम् । श्यामोहमित्याद्यहंबुद्धिम् । करोति । वाह्यान्तःकरणैरुत्पादयति विचारशीलस्तु परमार्थभूतं सदाविद्यमानं सिद्धस्वभावं निजस्वरूपं निजात्मानं विलक्षणं देहतद्धर्मासंस्पृष्टचिन्मात्रं वेत्ति साक्षात्करोतीत्यर्थः । आकीटपतङ्गमहंमतिस्त्वविचारजा न प्रामाण्यमालम्बतेऽन्यथा स्थाणुचोरादीनामपि सिद्धिप्रसङ्गइति भावः ॥ १५९ ॥

त्वङ्मांसमेदोऽस्थिपुरीषराशौ । अहंमतिम् । मूढजनः । करोति ॥ विलक्षणम् । वेत्ति । विचारशीलः । निजस्वरूपम् । परमार्थभूतम् ॥ १५९ ॥

शङ्का । मैं स्थूल हूं इत्यादि स्थूल शरीरमें अनुभव होने से देह ही आत्मा सिद्ध है । विलक्षण साक्षीमें कोई प्रमाण नहीं है । उत्तर । हे शिष्य ! मूर्ख पुरुष चर्म मांस हड्डी मल मूत्र करके पूर्ण शरीरमें मैं स्थूल हूं इत्यादि बुद्धिको करता है और जो विचारवान् है सर्वदा विद्यमान सिद्ध स्वभाव अपने स्वरूप आत्माको देह और उसके धर्मोंसे असंबद्ध चेतनमात्र साक्षात् देखे है अर्थात् स्थूल देहादिमें अहं बुद्धि अविचारजन्य है, इसीसे अप्रमाण होनेसे अर्थका साधक नहीं है । जैसे स्थाणुमें चोरबुद्धि पुरुषको नहीं सिद्ध करे है ॥ १५९ ॥

देहोहमित्येव जडस्य बुद्धि-

देहे च जीवे विदुषस्त्वहंधीः ॥
विवेकविज्ञानवतोमहात्मनो-
ब्रह्माहमित्येव मतिः सदात्मनि ॥ १६० ॥

नन्वत्यन्तमूढानां स्थूलोहं कृशोहमिति मतिरप्रमाणत्वान्न देहात्मासिद्धौ विजयनां परन्तु विदुषामपि तथैवमतिर्देहादावुत्पद्यमाना नाविचारमूला वक्तुं शक्या विचाराभावे विद्वत्वासिद्धेरतआह देहोहमितीति ।

जडस्य शास्त्रवार्त्ताऽनभिज्ञस्य । देहोहमित्येव । देहगोचरैव स्थूलोहमित्याद्याकारा बुद्धिरुदेति । विदुषस्तु । अधीतशास्त्रस्य किंचिज्ज्ञस्य । लौकिकपण्डितस्य तु देहे स्थूलशरीरे । जीवे प्राणाद्युपाधिके चेतने चाहंधीरहमित्याकारं ज्ञानमुदेति । तथाच शास्त्राणि विदुषोपि बुद्धिर्विशिष्टविषया क्षीरोदकमतिवन्न विविक्तविषयेत्यप्रमाणमेवेति भावः । विवेकविज्ञानवतः । आत्मानात्मविवेचननिपुणस्य महात्मनः । अपरोक्षात्मसाक्षात्कारस्य परमार्थं विदुषः । सदात्मनि । अविनाश्यात्मस्वरूपे विषयेऽहंब्रह्मेत्येवमतिर्निश्चयः । सच पारमहंसोहंसविविक्तपयोविज्ञानवत्प्रमाणमेवेति समीहितसिद्धिरिति बोध्यम् ॥ १६० ॥

देहः । अहम् । इति । एव । जडस्य । बुद्धिः । देहे । च । जीवे । विदुषः । तु । अहंधीः ॥ विवेकविज्ञानवतः । महात्मनः । ब्रह्म । अहम् । इति । एवं । मतिः । सदात्मनि ॥ १६० ॥

शङ्का । देहादिमें अहंबुद्धिको अविचारमूल कहें तौ विद्वानोंको न होनी चाहिये । उत्तर । शास्त्रश्रवणसे रहित पुरुषको मैं स्थूलहूं इत्यादि बुद्धि उत्पन्न होवै है और शास्त्रज्ञ लौकिक पण्डितको पुनः स्थूलशरीरमें और प्राणादि उपाधि वाले चेतनमें अहंबुद्धि होवै है उस बुद्धिका भी मृत्तिका मिश्रित जलमें जलबुद्धिवत् देह विशिष्ट आत्मा विषय है,इस स्वाते प्रमाणता नहीं है और आत्मा अनात्माके विवेकमें निपुण

महात्मा परमार्थ पण्डितका तौ अविनाशी आत्माके ब्रह्मस्वरूप में मैं ब्रह्म हूं ऐसा ही निश्चय होवे है सो शुद्ध आत्माको विषय करे है इस वास्ते शुद्ध जलमें जलबुद्धिवत् प्रमाण है ॥

अत्रात्मबुद्धिं त्यज मूढबुद्धे,
त्वङ्मांसमेदोस्थिपुरीषराशौ ॥
सर्वात्मनि ब्रह्मणि निर्विकल्पे,
कुरुष्व शान्तिं परमां भजस्व ॥ १६१ ॥

देहादावात्मत्वमतेः संतापकरत्वेन हेयत्वमाह । अत्रेति । हे मूढबुद्धे । मोहच्छन्नमते । अत्र । अस्मिंस्त्वगादिपुरीषान्तराशौ । आत्मबुद्धिम् । आत्मतादात्म्याध्यासम् । त्यज जहीहि निर्विकल्पेनिर्विशेषेसर्वात्मनि वस्तुपरिच्छेदविधुरे ब्रह्मणि सर्वानुस्यूते चिद्रूपे आत्मबुद्धिम् आत्मत्वनिश्चयम् कुरुष्व सम्पादयस्व कुरुष्वेत्यात्मनेपदं क्रियाफलस्यात्मगामितां ज्ञापितां स्फोरयति परमामात्यन्तिकीं शान्तिं सन्तुष्टिं भजस्वानुभव नात्र कुकर्मत्यागवत्परोक्षं फलमिति भावः ॥ १६१ ॥

अत्र । आत्मबुद्धिम् । त्यज । मूढबुद्धे । त्वङ्मांसमेदोऽस्थिपुरीषराशौ ॥ सर्वात्मनि । ब्रह्मणि । निर्विकल्पे । कुरुष्व । शान्तिम् । परमाम् । भजस्व ॥ १६१ ॥

हे मूर्ख ! त्वचा मांस मेद हड्डी मल मूत्र समूह शरीरमें तादात्म्याध्यासको त्यागदे निर्विकल्प निर्विशेष सर्वात्मा ब्रह्ममें आत्मबुद्धि कर उससे तापत्रयनिवृत्ति परमानन्दकी प्राप्ति रूप शान्तिका अनुभव कर ॥ १६१ ॥

देहेन्द्रियादावसति भ्रमोदितां,
विद्वानहंतां न जहाति यावत् ॥
तावन्न तस्यास्ति विमुक्तिवार्ता-

प्यस्त्वेषवेदान्तनयान्तदर्शी ॥१६२॥

ननु वेदान्तविदोपि ब्राह्मणत्वादिधर्मान्स्वकीयान्मन्यमाना अहंमतिं देहेन्द्रियादौ न जहति विमुक्ताश्च व्यवह्रियन्ते तथाच पण्डितजनाङ्गीकृतत्वादियमुपादेयेत्यत आह। देहेन्द्रियादाविति।

विद्वान् लौकिकवेदान्ती। यावदसति सदात्मनोभिन्ने देहेन्द्रियादौ भ्रमोदितां भ्रमभातामहन्तां न जहाति। तावदेषपण्डितो वेदान्तनयान्तदर्शी। वेदान्तानीयन्ते निर्णीयन्ते येन तस्य वेदान्तनिर्णायकशास्त्रस्यान्तदर्शी पारगोपि वेदान्तदर्शनाध्ययनाध्यापननिपुणोपि चेत्तस्यापि। विमुक्तिवार्तापि नास्ति विमुक्तिस्वरूपं तु दुर्लभमित्यर्थः। तेषु विमुक्तव्यवहारस्तु गौणोन मुख्योनापि च तेषां वर्णाश्रमाद्यभिमानिनामज्ञानाङ्गीकृताहन्ताग्राह्या मूढत्वानिवृत्तेरिति भावः॥ १६२॥

देहेन्द्रियादौ। असति। भ्रमोदिताम्। विद्वान्। अहन्ताम्। न। जहाति। यावत्॥ तावत्। न। तस्य। अस्ति। विमुक्तिवार्ता। अपि। अस्तु। एषः। वेदान्तनयान्तदर्शी॥ १६२॥

शङ्का। वेदान्तवेत्ता भी ब्राह्मणत्वादि धर्मोंको अपनेमें मानते हैं इससे उनको भी देहादिमें आत्मबुद्धि प्रतीत होवै है, इस कारण श्रेष्ठोंसे स्वीकारका कैसा त्याग हो सकता है। उत्तर। हे शिष्य! लौकिक वेदान्ती सत्‌रूप आत्मासे भिन्न देह इन्द्रियादिमें भ्रमसे उत्पन्न हुई अहंताको जबतक नहीं त्यागता है तबतक सो पण्डित वेदान्तशास्त्रके पठन पाठनमें चतुर भी हो तौ भी उसको मुक्तिकी वार्ता भी नहीं होती मुक्ति होनी तौ दुर्लभ है और ब्राह्मणत्वादि वर्णाश्रमाभिमानी देहाध्यासी पण्डितोंका तौ नाममात्र ही पण्डित है इसीसे वह श्रेष्ठ नहीं॥१६२॥

छायाशरीरे प्रतिविम्बगात्रे,

यत्स्वप्नदेहे हृदि कल्पिताङ्गे ॥
यथात्मबुद्धिस्तव नास्ति काचि-
ज्जीवच्छरीरे च तथैव मास्तु ॥ १६३ ॥

शरीरानात्मत्वमतिं माहयितुं दृष्टान्तचतुष्टयं ग्राहयति । छाया-शरीरइत्यादिना ।

यथा छायाशरीरे । छायात्मनि शरीराभासे । प्रतिविम्बगात्रे जलादौ प्रतिविम्बिते देहे । यत्स्वप्नदेहे । स्वयमेव स्वप्नानुभूते नानाविधे शरीरे । हृदि कल्पिताङ्गे । मनोरथमात्रकाल्पिते स्वदेहे । काचित् । अपि गौण्यादिरपि । तवात्मबुद्धिः । आत्मत्वाभिमानो नास्ति स्वतएव न विद्यते तेषामेतत्स्थूलदेहभिन्नत्वस्य साक्षाद्दृष्टत्वात् तथा जीवच्छरीरे च । प्राणादिमति स्थूलदेहेपि । आत्ममतिर्मास्त्वेव नैवास्त्वित्यर्थः । माशब्दोयम'नोमाङि लुङि'ति लुङ्न । तथाच जीवच्छरीरमनात्मा दृश्यत्वाच्छायाशरीरादिवदित्यनुमानमत्रबोध्यम् ॥ १६३ ॥

छायाशरीरे । प्रतिविम्बगात्रे । यत् । स्वप्नदेहे । हृदि । कल्पिताङ्गे ॥ यथा । आत्मबुद्धिः । तव । न । अस्ति । काँचित् । जीवच्छरीरे । च । तथा । एव । मा । अस्तु ॥ १६३ ॥

शरीरमें अनात्म बुद्धिको दृढ करनेके लिये चार दृष्टान्त कथन करे हैं । छायाशरीरे इति । जैसे छायारूप शरीराभास में जलादिमें प्रतिविम्बित देहमें अपने स्वप्नमें कल्पित नानाप्रकारके देहोंमें और मनमें मनोरथमात्र कल्पित स्वदेहमें गौणरूप भी तेरेको आत्मताका अभिमान नहीं होता है[१२] तैसे प्राणादिवाले शरीरमें आत्मबुद्धिका तुमको अभाव होवै[१५] ऐसा गुरु शिष्यको आशीर्वाद कहते हैं ॥ १६३ ॥

देहात्मधीरेव नृणामसद्धियां,
जन्मादिदुःखप्रभवस्य बीजम् ॥

यतस्ततस्त्वं जहि तां प्रयत्ना-
त्त्यक्ते तु चित्ते न पुनर्भवाशा ॥१६४॥

ननु यथा जन्मादिदुःखं मे न पुनर्भवेत्तथोपदेष्टव्यं भगवता किं देहात्मबुद्धिहापनेनेत्यतआह। देहात्मधीरेवेति।

यतोहेतोः। असद्धियाम्। आत्मविमुखमतीनाम्। नृणाम्। नरत्वाभिमानिनाम्। जन्मादिदुःखप्रभवस्य। जन्मजरामरणादिदुःसह्यविविधदुःखनिदानरागादिदोषस्य। बीजम्। निमित्तम्। देहात्मधीरेव। नहि मिथ्याज्ञानमन्तरा रागद्वेषलक्षणदोषोदयोन च रागादिदोषमन्तरा शुभाशुभप्रवृत्तिः नच तां विना जन्मादिर्नैवाजन्मनो दुःखलेशः। 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति श्रुतेः। तथाच गौतमीयोन्यायः॥ " दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति ततस्तस्मात्कारणात् त्वंतां देहात्मधियं प्रयत्नाज्जहि विनाशय ननुत्यक्तायामपि देहात्ममतौकदाचित्कारणान्तराद्भवावाप्तिर्भविष्यति ततश्च दुःखोदयोपि दुर्निवारोऽतआह त्यक्तास्थिति चित्ते देहात्माभिमाने त्यक्ते तु पुनर्भवाशा। कारणान्तराज्जन्मादिप्राप्तिसम्भावनापि न कर्तव्या देहात्ममतित्यागे शुद्धचिद्धातोः स्फूर्त्याऽज्ञानविनाशात्संसारानुदयइति भावः॥ १६४॥

देहात्मधीः। एव। नृणाम्। असद्धियाम्। जन्मादिदुःखप्रभवस्य। बीजम्॥ यतः। ततः। त्वम्। जहि। ताम्। प्रयत्नात्। त्यक्ते। तु। चित्ते। न। पुनः। भवाशा॥ १६४॥

शङ्का। हे गुरो! जैसे हमको जन्मादिका दुःख न होवै वैसा उपदेश करना उचित है, देहादिमें आत्मबुद्धिके छोडानेमें क्या सिद्धि है। उत्तर। हे शिष्य! जिस कारणसे आत्माकी तरफसे विमुख बुद्धिवाले पुरुषोंको जन्म जरादिके असह्य विविध दुःखके कारण रागादि दोषका देहात्मबुद्धि ही

निमित्त है देहात्मबुद्धि बिना रागादि दोष नहीं होवै हैं, दोषों विना शुभाशुभ प्रवृत्ति नहीं होवै है, उस विना जन्मादि नहीं होवै है, अजन्माको दुःखका संबन्ध नहीं होवै है इसकारणसे तुम देहात्मबुद्धिका प्रयत्नसे त्यागकर देहात्म बुद्धिके त्याग होनेपर फिर जन्मादि दुःखकी प्राप्तिकी संभावना नहीं करनी देहात्मबुद्धिके त्याग होनेपर शुद्धचेतनके आविर्भाव होने पर अज्ञानके नष्ट होनेसे फिर संसारकी प्राप्ति कभी भी न होगी इस कारण देहात्मबुद्धि तुमको छुडाते हैं ॥ १६४ ॥

कर्मेन्द्रियैः पञ्चभिरञ्चितोयं,
प्राणोभवेत्प्राणमयस्तु कोशः ॥
येनात्मवानन्नमयोनुपूर्णः,
प्रवर्त्ततेसौ सकलक्रियासु ॥ १६५ ॥

अन्नमयकोशन्तदनात्मत्वं च निरूप्य क्रमप्राप्तं प्राणमयकोशं निरूपयति कर्मेन्द्रियैरिति ।

पञ्चभिः कर्मेन्द्रियैः वागादिभिः अञ्चितः संयुतः अयं प्राणस्तु प्राणमयकोशो भवेत् भवति येन प्राणमयेन अनुपूर्णः व्याप्तसमस्ततन्त्रिकः असौ अन्नमयोऽनात्माप्यात्मवान्सन् सकलक्रियासु लौकिकवैदिकव्यवहृतिषु प्रवर्तते यतते नह्यन्नमयः प्राणमयमन्तरा कथमपि यतितुमर्हति । अत्र "तस्माद्वाएतस्मादन्नरसमयादन्योन्तरआत्मा प्राणमयः तेनैषपूर्णः" इति श्रुत्यर्थोवर्णितइति बोध्यम् ॥ १६५ ॥

कर्मेन्द्रियैः । पञ्चभिः । अञ्चितः । अयम् । प्राणः । भवेत् । प्राणमयः । तु । कोशः ॥ येन । आत्मवान् । अन्नमयः । अनुपूर्णः । प्रवर्तते । असौ । सकलक्रियासु ॥ १६५ ॥

अन्नमय कोशका निरूपण किया है अब प्राणमय कोश और तिसको अनात्मताका निरूपण करे हैं।कर्मेन्द्रियैः इति। वाक्

आदि पंच कर्मइन्द्रियोंसे संयुक्त यह पंचप्राण प्राणमय कोश होवै है जिस प्राणमय कोश करके पूर्णहुवा सो अन्नमय कोश अनात्मा भी आत्मावाला हुवा लौकिक वैदिक व्यवहारोंमें यत्न करे है अर्थात् अन्नमय कोश प्राणमयके बलसे ही सर्व क्रिया में प्रवृत्त होवै है ॥ १६५ ॥

नैवात्मापि प्राणमयोवायुविकारो-
गन्तागन्ता वायुवदन्तर्वहिरेषः ॥
यस्माकिञ्चित्क्वापि न वेत्तीष्टमनिष्टं,
स्वं वान्यं वा किञ्चन नित्यं परतन्त्रः ॥ १६६ ॥

आत्मवानित्युक्त्या प्राप्तं प्राणमयस्य मुख्यात्मत्वं प्रत्याचष्टे नैवात्मापीति ।

एषप्राणमयोपि नैवात्मा जीवात्मा यतोऽसौ वायुविकारः अपञ्चीकृतवातपरिणामः । तथाच प्राणमयोनात्मा विकारत्वाद्व्यतिरेके ब्रह्मवदन्वये नभस्वद्वदित्यनुमानं सूचितं वायुपदं स्वरूपाभिप्रायेण विकारत्वमात्रेणैवानात्मत्वासिद्धिरिति बोध्यम्। वायुवच्चायमन्तर्वहिश्च गन्तागन्ता यथा वायुर्भुवनोदरे गच्छति गिरिगुहादिभ्योनिःसृतआगच्छति च गिरिगुहादिषु तथा प्राणोपि देहोदराद्बहिर्गच्छति तस्मिन्नागच्छति चेति गत्यागतिमान्न कूटस्थात्मा भवतीत्यर्थः । तथाच प्राणोनात्मा सक्रियत्वात्पूर्ववदित्यनुमानं सूचितम् किंच प्राणमयस्यात्मत्वे सुषुप्ते चौरादिभिर्द्रव्यापहरणानुपपत्तिर्देशान्तरात् पुत्रागतौ च तद्विज्ञानेन हर्षापत्तिश्चेत्याह यस्मादिति। यस्मात्कारणादिष्टं पुत्रागमनादि अनिष्टं चौरद्रव्यापहारादि किञ्चिदपि क्वापि कदापि स्वं स्वकीयं मित्रादिपरमामित्रादि किञ्चनापि न वेत्ति तेनायमनात्मा ज्ञातव्यः तथाच प्राणोनात्मा जडत्वाद् घटवदित्यनुमानमाज्ञापितं हेतुगर्भितं विशेषणान्तरमाह नित्यं परतन्त्रः सदा स्वातन्त्र्यशून्यःप्राणायामादिष्वन्ययतमेन प्राणनिरोधा-

दिदृष्टेरयं पराधीनत्वान्नात्मेति भावः। तथाच प्राणोनात्मा परतन्त्रत्वादन्नमयादिवदित्यनुमानमावेदितम् ॥ १६६ ॥

न । एव । आत्मा । अपि । प्राणमयः। वायुविकारः । गन्ता। आगन्ता । वायुवद् । अन्तः। वहिः। एषः॥ यस्मात्। किञ्चित्। क्व । अपि । न । वेत्ति । इष्टम् । अनिष्टम् । स्वम् । वा । अन्यम् । वा। किञ्चन । नित्यम् । परतन्त्रः ॥ १६६ ॥

आत्मावाला कहनेसे प्राणमय कोशको आत्मता प्राप्त हुईहै उसका निषेध करेहैं।न इति।यह प्राणमय कोशभी वायुविकार है इससे जीवात्मा नहीं सिद्ध होसकेहै जैसे वायु पर्वतगुफादि से निकसके बाहर जाता है और फिर वहां आता है वैसेही प्राणभी देहसे बाहर जाता है और भीतर आता है और जिस कारणसे इष्ट पुत्रादि अनिष्ट चोरादि अपनेको वा परको किंचित्को किसी कालमें भी नहीं जानता और नित्य पराधीन है तिस कारणसे यह आत्मा नहीं बनसकताहै अर्थात् वायुका विकार होनेसे जड होनेसे पराधीन होनेसे प्राणमयकोश आत्मा नहीं है यह सूचन किया है॥ १६६ ॥

ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्या-
त्कोशोममाहमिति वस्तुविकल्पहेतुः ॥
संज्ञादिभेदकलनाकलितोबलीयां-
स्तत्पूर्वकोशमभिपूर्य्य विजृम्भते यः ॥ १६७ ॥

प्राणमयं तस्यानात्मत्वं चाभिधाय ततोप्यन्तरं मनोमयं निरूपयति ज्ञानेन्द्रियाणीति ।

ज्ञानेन्द्रियाणि श्रोत्रादीनि पञ्च मनश्चेति षट् मनोमयः कोशः स्यात् अस्ति सच ममाहमिति वस्तुविकल्पहेतुः अहं ममेत्यादिस्वरूपोयोवस्तुविकल्पस्तस्य हेतुर्निमित्तमित्यर्थः।आपिच संज्ञादिभेदक-

लनाकलितः संज्ञासंज्ञिसम्बन्धभेदविषया नामरूपाक्रियाभेदविषयाचा याः कलनाः कल्पनास्ताभिः कालितः संवलितः बलीयान् देहापेक्षया प्राणोबली तच्चेष्टायास्तदधीनत्वात्प्राणापेक्षयापि मनोमयोबलिष्ठः एतत्संकल्पायत्तत्वात्तद्व्यापारजातस्येत्यर्थः । योमनोमयस्तत्पूर्वकोशंप्राणमयमाभिपूर्य्याभिव्याप्य विजृम्भते स्फुरति समनोमय इति पूर्वेणान्वयः॥ "तस्माद्वा एतस्मात् प्राणमयादन्योऽन्तरआत्मा मनोमयस्तेनैषपूर्णः" इति श्रुत्यर्थोऽत्र वर्णितः ॥ १६७ ॥

ज्ञानेन्द्रियाणि । च । मनः । च । मनोमयः । स्यात् । कोशः । ममाहमिति वस्तुविकल्पहेतुः ॥ संज्ञादिभेदकलनाकलितः । बलीयान् । तत्पूर्वकोशम् । अभिपूर्य । विजृम्भते । यः ॥ १६७ ॥

अब मनोमय कोशका निरूपण करे हैं । ज्ञानेन्द्रियाणि इति । श्रोत्रादि पंच ज्ञानेन्द्रिय और मन यह छे मनोमय कोश होवे हैं सो मैं हूं मेरा है इत्यादि विकल्पका कारण है संज्ञासंज्ञि संबन्धभेद विषयक नामरूप क्रिया भेदविषय कल्पना करके वेष्टितहै देहादि संघातमें सर्वसे बली है जो मनोमयकोश पूर्व प्राणमय कोशको पूर्णकरके स्फुरण होता है सो अनात्मा मनोमय कोश है ॥ १६७ ॥

पञ्चेन्द्रियैः पञ्चभिरेव होतृभिः,
प्रचीयमानोविषयाज्यधारया ॥
जाज्वल्यमानोबहुवासनेन्धनै-
र्मनोमयाग्निर्वहति प्रपञ्चम् ॥ १६८ ॥

मनोमयं सर्वसंसारनिदानत्वेन निरूपयिष्यन्विषयहोमाधारकुतमुगुपकतया निरूपयति । पञ्चेन्द्रियैरिति ।

पञ्चेन्द्रियैः । ज्ञानेन्द्रियैस्तेषामेव मनोमयेऽन्तर्भावाभिधानात् कर्मेन्द्रियव्यापारेष्वपि ज्ञानेन्द्रियाणां हेतुत्वादेवमुक्तम् । पञ्चभिरेव होतृभिः यजमानेन जीवेन विषयहोमार्थं स्वचैतन्यसत्तां समर्प्य

कीतैर्होमकर्तृभिर्विप्रैरिव प्रचीयमानइतस्ततआकृष्यराशीक्रियमाणवृत्तिकः बहुवासनेन्धनैः नानाविधानुभूतविषयसंस्कारकाष्ठैः। जाज्वल्यमानोदेदीप्यमानस्तत्तद्वृत्तिभिः कालीकराल्यादिसप्तजिह्वाभिरिवोज्ज्वलन्निति यावत् मनोमयाग्निः। मनोमयलक्षणाहवनीयहुतभुक् प्रपञ्चम् संसृतिलक्षणं फलं वहति प्रापयति यथाहि होतृभिः प्रसादितोवह्निः परलोकसृतिफलं वहति तथेन्द्रियैः प्रसादितोमनः संसृतिमेव जीवयजमानाय यच्छति न मोक्षमतस्तस्य प्रसादे मायत्नोविधेय इति भावः॥ १६८॥

पञ्चेन्द्रियैः। पञ्चभिः। एव। होतृभिः। प्रचीयमानः। विषयाज्यधारया॥ जाज्वल्यमानः। बहुवासनेन्धनैः। मनोमयाग्निः। वहति। प्रपञ्चम्॥ १६८॥

विषयोंके होमका आधार अग्निरूप करके मनोमय कोशको निरूपण करे हैं। पञ्चेन्द्रियैः इति। पञ्च ज्ञानेन्द्रिय पञ्च होमकर्ता रूप हैं जैसे यज्ञकर्ता ब्राह्मण होते हैं तिनसे वृद्धिको प्राप्त हुवा विषय संस्काररूप लकड़ी करके विषय भोगरूप घृतकी धारा करके अतिदीप्त हुवा मनोमयरूप आहवनीय अग्नि संसाररूप फलको प्राप्त करे है अर्थात् जैसे होम करके प्रसन्न किया अग्नि परलोकरूप संसारफलको प्राप्त करे है तैसे विषयों करके प्रसन्न किया हुवा मन संसारफलको ही देवैगा मोक्षको भी नहीं देवैगा इस कारण मनकी प्रसन्नतामें यत्न कभी न करना चाहिये॥ १६८॥

न ह्यस्त्यविद्यामनसोतिरिक्ता,
मनोह्यविद्या भवबन्धहेतुः॥
तस्मिन्विनष्टे सकलं विनष्टं,
विजृम्भितेऽस्मिन्सकलं विजृम्भते॥ १६९॥

नन्वविद्यासंसृतिं मयच्छतीति वेदान्तविदां मतं तत्कथमपूर्वमिव मनसः संसृतिप्रवाहकत्वम्मन्यामहे तत्राह नह्यस्त्यविद्येति।
मनसोतिरिक्ता। मनोभिन्ना। अनुत्पादितमनोविकाराऽविद्याः नास्ति किन्तु मनोविकारोदयेनैवाविद्यावन्धनसमर्था। प्रलयादौ तस्याबन्धकत्वादर्शनात्। तथाच मोक्षैहेतुविद्याविरोधिनी बन्धहेतुरविद्येति व्यवहाराद्विद्याविरोधस्य बन्धस्य च मनोद्वारैव सम्भवादावश्यकत्वेन मनएवाविद्येति व्यपदेशमर्हति तस्माद्भवबन्धहेतुर्मनोहि मनएवाविद्येति विज्ञेयम्। नन्वविद्यायाजगदुपादानत्वाभ्युपगमान्मनसस्तत्त्वे सुषुप्तौ मनोनाशे जगन्नश्येत् नचेष्टापत्तिः सुषुप्तपुरुषद्रष्टृत्वाऽभावेपि तदन्येन पुरुषेण दृश्यमानस्य जगतोविनाशस्य वक्तुमशक्यत्वा "नहि दृष्टमपि बाध्यत इति न्यायादिति चेत्तन्नाह तस्मिन्विनष्टइति।" सुषुप्तिकाले सकले विलीने" इति श्रुतेः सुषुप्तौ जगतोलयएव मन्तव्योऽन्यद्रष्टृत्वा तस्य दृश्यत्वं त्वन्यमनसोविद्यमानत्वेन नानुपपन्नमिति भावः। अक्षरार्थस्तु तस्मिन्मनसि विनष्टे लीने सति सकलं मनः कल्पितं जगद्विनष्टं ज्ञातव्यम् पुनश्च जाग्रति सत्यस्मिन्मनसि विजृम्भिते उद्भूते सति सकलं जगद्विजृम्भते उद्भूतं भवति तस्मादन्वयव्यतिरेकाभ्यां मृदादेर्घटादिं प्रतीव मनसोमानमेयादि संसारं प्रति निदानत्वमिति मुख्यमविद्यात्वमस्मिन्नेव प्रतितिष्ठति तस्मात्तन्निरोधे यत्नोविधेयइति भावः॥

नहि। अस्ति। अविद्या। मनसः। अतिरिक्ता। मनः। हि। अविद्या। भवबन्धहेतुः॥ तस्मिन्। विनष्टे। सकलम्। विनष्टम्। विजृम्भिते। अस्मिन्। सकलम्। विजृम्भते ॥१६६॥

अविद्या संसारका हेतु है, आपने मनको संसारका कारण कैसे कहा है, इस शंकाका समाधान करे हैं। हे शिष्य! मनसे भिन्न अविद्या बंधका हेतु नहीं है अर्थात् मनद्वारा ही अविद्या संसारका कारण होवै है। प्रलयमें स्वरूपमात्रसे अविद्या को बंधकता नहीं होवै है इस कारण संसारबन्धनका हेतु मन ही अविद्या है, सोही अविद्याका परिणाम होनेसे अविद्यारूप है

इसकारण मनके नाश होनेसे सर्व संसारबंधन नष्ट होजावे है क्योंकि मनका कल्पित ही संसार है, कल्पकके अभावसे कल्पित का अभाव स्वतः सिद्ध होवै है । और मनके उदय होनेसे सर्व संसारका उदय होवे है इस वास्ते अन्यव्यतिरेकसे मृत्तिकादि को घटादिके प्रति जैसे कारणता है तैसे मनको संसारके प्रति कारणता है वोही अविद्यारूप है उसकी निवृत्तिमें अवश्य यत्न करना चाहिये ॥ १६९ ॥

स्वप्नेर्थशून्ये सृजति स्वशक्त्या,
भोक्त्रादिविश्वं मनएव सर्वम् ॥
तथैव जाग्रत्यपि नोविशेष-
स्तत्सर्वमेतन्मनसोविजृम्भणम् ॥ १७० ॥

मनसोविजृम्भणविनाशयोर्जगद्विजृम्भणविनाशहेतुत्वमभिहितं प्रपञ्चयति द्वाभ्यां स्वप्नेर्थशून्येति ।

स्वप्ने स्वप्नावस्थायाम् । अर्थशून्ये । बाह्यपदार्थाभावेपि । मनएव कर्तृस्वशक्त्या बाह्यसामग्र्यनपेक्षस्वसमर्थतयैव सर्वं भोक्त्रादिविश्वं भोक्तृभोग्यभोगलक्षणं जगत्सृजति रचयति 'न तत्र रथान रथयोगान पन्थानोभवन्ति अथ रथान्रथयोगान्पथः सृजते' इति श्रुतेरिति भावः । दृष्टान्तदृष्टन्दार्ष्टान्तिकेपि दर्शयति । तथैवेति । स्वप्नवदेव । जाग्रत्यपि । मनएव सर्वं सृजति न वाह्यः कश्चिदन्यः स्रष्टुमर्हति ततश्च मानसस्वाप्नविलासवदेव जाग्रन्मानसविलासस्य जगतोमिथ्यात्वम्प्रत्येतव्यम् । ननु स्वप्नप्रपञ्चस्य स्वल्पकालानुभूतस्य कारणसामग्रीविकलस्य मानसत्वेन मिथ्यात्वमस्तु जाग्रत्पदार्थानां तु न तथात्वं भवितुमर्हति तत्तद्रचनायोग्यस्य देशकालादिकारणकलापस्य विद्यमानत्वादतआह । नोविशेषइति स्वाप्नस्य कालस्य जाग्रति वर्तमानेन मनसैव कल्प्यते स्वल्पत्वं, स्वप्ने तु तस्य दीर्घत्वं तेनैव कल्प्यते इति तदवस्थायां तस्य

१ मिथ्यात्वम् । २ मनसैव ।

दीर्घत्वसत्वात्तथा देशादिकारणकलापस्याप्यपूर्वस्यैव तदा निर्माणात्समत्वमेव जाग्रत्स्वप्नयोरित्यर्थः ॥ उपसंहरति तदिति तत्तस्मात्सर्वमेतत् । जाग्रत्स्वप्नदृष्टं जगन्मनसोविजृम्भणं मानसविलासएव न तथ्यं न वा मनोतिरिक्तोपादानता कस्याप्यनात्मनः कार्यवर्गस्य सिद्ध्यतीत्यर्थः ॥ १७० ॥

स्वप्ने । अर्थशून्ये । सृजति । स्वशक्त्या । भोक्त्रादि । विश्वम् । मनः । एव । सर्वम् ॥ तथा । एव । जाग्रति । अपि । नो । विशेषः । तत् । सर्वम् । एतत् । मनसः । विजृम्भणम् ॥

उक्तका विस्तार करे हैं । स्वप्नेइति । स्वप्न अवस्थामें वाह्यपदार्थके अभाव होने पर भी मन ही वाह्यसामग्रीकी सहायता विना ही स्वसामर्थ्य करके ही भोक्ता भोग्य आदि सर्व जगत्को रचता है "तैसे ही" (स्वप्नवत्) जाग्रत्में भी मनही सर्व की रचना करता है यद्यपि स्वप्नके पदार्थ अल्पकाल स्थायी हैं जाग्रत् के बहुकाल स्थायी हैं तथापि यह भी मनकी कल्पना है मिथ्या होनेमें कुछ विशेषता नहीं है तिसं कारणसे जाग्रत् स्वप्न जगत् सर्व मनका ही विलास है लेशमात्र भी अनात्मवर्ग सत्य नहीं है ॥ १७० ॥

सुषुप्तिकाले मनसि प्रलीने,
नैवास्ति किञ्चित्सकलप्रसिद्धेः ॥
अतोमनःकल्पितएव पुंसः,
संसारएतस्य न वस्तुतोस्ति ॥ १७१ ॥

अन्वयं प्रदर्श्य व्यतिरेकं प्रदर्शयंस्तस्मिन्विनष्टे इत्यादिव्याचष्टे सुषुप्तिकालइति ।

सुषुप्तिकाले तत्राविद्यायां स्वोपादानभूतायां मनसि प्रलीने कारणात्मतामापन्ने किञ्चिद्वाह्यमान्तरं वा जगन्नैवास्ति नैव

सिद्ध्यति तत्साधकाभावात् न केवलं जगत्साधकं नास्तीत्यतो जगदभावः सुषुप्तौ, किंतु जागरिते सर्वप्रसिद्धायान किञ्चिदवेदिषमिति स्मृतेरनुमितानुभूतेरपीत्याह । सकलप्रसिद्धेरिति । सकलजनसुप्रसिद्धसुप्तोत्थितस्मृत्यनुमितानुभूतेश्च तदा नैवास्ति किञ्चिदित्यर्थः। उपसंहरति। अतो मनःकल्पित इति। यतो जडवर्गस्य मनसा सहान्वयव्यतिरेकौ ताभ्यां च मानसमेव जगत्सर्वं साधितं तत एतस्य पुंसोऽज्ञजनस्य सर्वोपि संसारो मनःकल्पित एव मिथ्यैव स्वप्नसंसारवदित्यर्थः। एवशब्दार्थमाह न वस्तुतोऽस्ति न भेदवाद्यभिमानानुसारेण ससत्यः स्थातुमर्हतीत्यर्थः। तथा च प्रपञ्चो मिथ्या मानसत्वात्स्वप्नप्रपञ्चवदित्यनुमानं सूचितम्। व्यक्ती भविष्यति चैतद्बहुधा मूले।

सुषुप्तिकाले। मनसि । प्रलीने। न। एव। अस्ति। किञ्चित्। सकलप्रसिद्धेः ॥ अतः । मनःकल्पितः। एव। पुंसः । संसारः। एतस्य । न । वस्तुतः । अस्ति ॥ १७१ ॥

मनके रहनेसे जगत्का होना यह अन्वय कथन किया है अब मनके न रहनेसे जगत्का अभावरूप व्यतिरेक निरूपण करे हैं। सुषुप्तिकाले इति। सुषुप्तिकालमें अविद्यामें जब मन लीन होता है उस समय बाह्य आन्तर किंचित् भी जगत नहीं सिद्ध होवै है, यह वार्ता सबके अनुभवमें प्रसिद्ध है क्योंकि जाग्रत्में आकर जीव कहता है कि मेरेको कुछ मान नहीं हुवा इस कारणसे इस अज्ञानी जीवको सर्व संसार मनकी कल्पनारूप ही है सो मिथ्या है वास्तवसे इसमें सत्यताका लेश मात्रभी नहीं है ॥ १७१ ॥

वायुनाऽऽनीयते मेघः पुनस्तेनैव नीयते ॥
मनसा कल्प्यते बन्धो मोक्षस्तेनैव कल्प्यते ॥ १७२ ॥

न केवलं जगद्बन्ध एव मनोमयायत्त इति मन्तव्यं, तन्निवृत्तिलक्षणमुक्तेरपि तदायत्तत्वादिति सदृष्टान्तमाह वायुनेति । मेघः वारिवाहो वायुना नीयते सूक्ष्मदशामपि निरीक्षणाक्षमाद-

न्तरिक्षात्स्थूलदृशांदृग्गोचरं देशं प्राप्यते पुनः क्षिप्रमेव तत्क्षणं तेनैवातिवेगवता वातेन नीयते देशान्तरं प्राप्यापनीयते। तथा सूक्ष्मदृशामपि निरीक्षणाक्षमादविद्यान्तरिक्षान्मनसा वायुनाऽनुपमजवेन बन्धः प्रपञ्चः कल्प्यते आत्रह्मात्मैक्यबोधं मदर्श्यते गन्धर्वनगरादिवत्पुनश्च तेनैव ब्रह्मात्मैक्यबोधोत्पादनेन मनसैव मोक्षोबन्धनिवृत्तिः कल्प्यते। तथाच बन्धमोक्षावुभावपि मनःस्पन्दनमात्रलक्षणावेव न वस्तुतआत्मनोनित्यमुक्तत्वादतएव श्रुतिरप्याह ॥ 'विमुक्तश्चविमुच्यते'इति।'न निरोधोनचोत्पत्तिर्न बद्धोनच साधकः। न मुमुक्षुर्न वै मुक्तइत्येषा परमार्थता'॥ एतच्चानुपदं प्रपञ्चयिष्यते मूलएवेति बोध्यम् ॥ १७२ ॥

वायुना । आनीयते । मेघः । पुनः । तेन । एव । नीयते ॥ मनसा । कल्प्यते । बन्धः । मोक्षः । तेन । एव । कल्प्यते १७२

बन्धकल्पनावत् मोक्षकल्पना भी मनका ही कर्तव्य है ऐसा निरूपण करे हैं । वायुना इति । सूक्ष्मअन्तरिक्षसे वायुही मेघों को उदय करे है पुनः अतिवेग वाला वायु उसी देशमें मेघकोप्राप्त करे है यह जैसे दृष्टान्त है तैसे ही मायारूप अन्तरिक्षसे अतिवेग वाले मनने संसारबन्धनरूप मेघकी कल्पना की है और ब्रह्मज्ञानके उदयद्वारा मनने ही'' बन्धानिवृत्ति रूप मोक्षकी कल्पना की है यह सर्व मनकी ही लीला है॥ १७२ ॥

देहादिसर्वविषये परिकल्प्य रागं,
बध्नाति तेन पुरुषं पशुवद्गुणेन ॥
वैरस्यमत्र विषवत्सुविधाय पश्चा-
देनं विमोचयति तन्मनएव बन्धात् ॥ १७३ ॥

मनसोबन्धमोक्षकल्पनाहेतुत्वमुक्तं प्रपञ्चयति देहादीति द्वाभ्याम्। तत् मनोमयाख्यं मनएव देहादिसर्वविषये देहेन्द्रियशब्दादौ बन्धनकरं जीवस्य रागं रञ्जनात्मकराजसपरिणामं परिकल्प्योत्पाद्य

तेन स्वपरिणामेन रागेण गुणेन सूत्रेण पुरुषं स्ववशं जीवं बध्नाति देहागारेऽभिमानपाशेन दुःखयति तत्र दृष्टान्तः पशुवदिति। यथा पशुं सूत्रेण पशुस्वामी बध्नाति तथेत्यर्थः।पश्चात् पुण्यपुञ्जोदये विवेकादिसाधनसमुदाये चासन्ने अत्र देहादिविषये विषवद्वैरस्यं जिहासां विधाय उत्पाद्य एनमधिकारिणं तन्मनएवबन्धादुक्तलक्षणात् स्वयमेव कल्पितात् मोचयाति विमुक्तं भावयति ॥ १७३ ॥

देहादिसर्वविषये । परिकल्प्य । रागम् । बध्नाति । तेन । पुरुषम् । पशुवद् । गुणेन ॥ वैरस्यम् । अत्र । विषवत् । सुविधाय । पश्चाद् । एनम् । विमोचयति । तत् । मनः । एव । बन्धात् ॥ १७३ ॥

मनको बन्धमोक्षकी हेतुता जो पूर्व कथन की है उसका विस्तार करे हैं । सो मनोमय कोशरूप मन ही देह इन्द्रिय शब्दादि बन्धन करने वालोंमें जीवको रञ्जनरूप परिणाम को उत्पादन करके तिस रागरूप सूत्र करके स्ववश जीवको देहमें अभिमान फांसी करके दुःख देवै है। जैसे पशुको पशुका स्वामी प्रसिद्ध सूत्रकरके बांधे है तैसेही और निष्काम धर्मके उदयकालमें विवेकादिसे देहादिमें विषवत्, उपरतिको उत्पन्न करके इस अधिकारीको अपनेसे कल्पित बन्धसे रहित करदेता है अर्थात् बन्धकल्पनाका त्याग करदेता है। विमुक्तिकी भावना करता है ॥ १७३ ॥

तस्मान्मनः कारणमस्य जन्तो-
र्बन्धस्य मोक्षस्य च वा विधाने ॥
बन्धस्य हेतुर्मलिनं रजोगुणै-
र्मोक्षस्य शुद्धं विरजस्तमस्कम् ॥ १७४ ॥

तस्माद्बन्धमोक्षान्वयव्यतिरेकशालित्वादस्य जन्तोर्जननाद्यभिमानिनोजीवस्य बन्धस्य मोक्षस्य च वा विधाने मापणे मनः कारणं नन्वेकस्य तस्य कथं परस्परविरुद्धबन्धमोक्षणमापणसामर्थ्यमतआह बन्धस्येति ।

रजोगुणैरजस्तोगुणैराजसैः कार्यैः कामलोभादिभिर्मलिनं सद्बन्धस्य हेतुर्निमित्तं विरजस्तमस्कम् । रजस्तमोमलविकलमतएव शुद्धं मनोमोक्षस्य हेतुः प्रापकमित्यर्थः।तथाच गुणभेदेन मनसोद्वैविध्यादुभयाविधकार्यसामर्थ्यमुपपन्नमिति भावः ॥ १७४ ॥

तस्मात् । मनः । कारणम् । अस्य । जन्तोः । बन्धस्य । मोक्षस्य । च । वा । विधाने ॥ बन्धस्य । हेतुः । मलिनम् । रजोगुणैः । मोक्षस्य । शुद्धम् । विरजस्तमस्कम् ॥ १७४ ॥

बन्धमोक्षका कारण मनको होनेसे इस जीवको बन्धमोक्षके देनेमें मन ही कारण है । शङ्का । बन्धमोक्ष परस्पर विरुद्ध का एक मनही । कैसे कारण है । उत्तर । रजोगुणके कार्य काम लोभादि करके मलिन हुवा मन बन्धका कारण है और राजसतामस मलरहित शुद्ध मन मोक्षका हेतु है गुणभेदसे मनको दोप्रकार होनेसे बन्धमोक्ष दोनोंकी कारणता होवैहै ॥१७४॥

विवेकवैराग्यगुणातिरेका-
च्छुद्धत्वमासाद्य मनोविमुक्त्यै ॥
भवत्यतोबुद्धिमतोमुमुक्षो-
स्ताभ्यां दृढाभ्यां भवितव्यमग्रे ॥ १७५ ॥

विरजस्तमस्कं शुद्धमित्युक्तं तत्र कथं रजस्तमोमलापनयः स्यादित्याकाङ्क्षायामाह । विवेकेत्यादिना ।

विवेकवैराग्यतीव्रतावशात् शुद्धत्वं मोहरागलक्षणमलवैकल्यमासाद्य लब्ध्वा मनोऽस्य पुरुषस्य मुक्त्यै मुक्तिफलाय भवति समर्थं भवति । अतोऽस्माद्धेतोर्बुद्धिमतोविचारशीलस्य मुमुक्षोर्मोक्षाभि-

च्छोरग्रे श्रवणादितः प्रथमं ताभ्यां विवेकवैराग्याभ्यां दृढाभ्यां तीव्रतराभ्यां भवितव्यम् । अधिकारिणा यथाक्रमं मोहरागाविमर्दननिमित्तयोर्विवेकवैराग्ययोर्दार्ढ्यं यतितव्यमिति भावः ॥ १७१ ॥

विवेकवैराग्यगुणातिरेकात् । शुद्धत्वम् । आसाद्य । मनः । विमुक्त्यै ॥ भवति । अतः । बुद्धिमतः । मुमुक्षोः । ताभ्याम् । दृढाभ्याम् । भवितव्यम् । अग्रे ॥ १७५ ॥

रजोगुण तमोगुणरूप मलकी निवृत्ति कैसे होवै है इस शङ्का का समाधान करे हैं। तीव्र विवेक वैराग्यसे मोह रागादिरूप मल रहितताको प्राप्त होकर इस पुरुषका मन मुक्तिलाभमें समर्थ होता है इसकारणसे विचारशील मोक्षकी इच्छावाले पुरुषको श्रवणादिसे प्रथम तीव्र विवेक वैराग्य अवश्य सम्पादन होने चाहिये अधिकारीने दृढ विवेक वैराग्य सम्पादन करने चाहिये यह तात्पर्य है ॥ १७५ ॥

मनोनाम महाव्याघ्रोविषयारण्यभूमिषु ॥
चरत्यत्र न गच्छन्तु साधवोये मुमुक्षवः ॥१७६॥

तद्दार्ढ्यंसाधनं कुसङ्गहानमाह । मनोनामेति । नाम प्रसिद्धोमनोमनोमयोमहाव्याघ्रः द्वैतदार्ढ्यलक्षणकरालदंष्ट्रावासनासन्ततिदशनावल्या भृशं सञ्चर्वणायोद्यतोऽनिशं मृत्युभयमावहन्महाव्याघ्रनाम्ना प्रथितः । विषयारण्यभूमिषु । शब्दादिलक्षणविषयविटपिवनभयङ्करासक्तिभूमिषु चरति सञ्चरति ततोये मुमुक्षवः साधवोविज्ञानसाधनसाधनायोद्यतास्तेऽत्र विषयारण्यभूमिषु न गच्छन्तु न पदं दधतु विषयसङ्गं न कुर्वन्त्वित्ति यावत् । एतेन विषयसङ्गत्यागेन विवेकवैराग्यतीव्रतासिद्ध्यतीति सूचितम् ॥

मनः । नाम । महाव्याघ्रः । विषयारण्यभूमिषु ॥ चरति । अत्र । न । गच्छन्तु । साधवः । ये । मुमुक्षवः ॥ १७६ ॥

विवेक वैराग्यकी दृढताका कारण कुसंगकी निवृत्ति है

ऐसा कहेहैं। मनः इति। प्रसिद्ध है कि जन्म मरणादि भयका हेतु मनरूप महाव्याघ्र है शब्दादिरूप वृक्ष वनकी भूमिओं में विचरता है इसकारणसे जो मोक्षकी इच्छावाले ज्ञानसाधनोंमें उद्यम करते हैं सो विषयबनभूमिमें चरण न रक्खें अर्थात् विषयसंगका त्याग करें। विषयसंगत्याग ही विवेक वैराग्यकी तीव्रता का हेतु है ॥ १७६ ॥

मनः प्रसूते विषयानशेषान्,
स्थूलात्मना सूक्ष्मतया च भोक्तुः ॥
शरीरवर्णाश्रमजातिभेदान्,
गुणक्रियाहेतुफलानि नित्यम् ॥ १७७ ॥

मनसोबन्धहेतुत्वमुक्तं सिंहावलोकनन्यायेन पुनः प्रपञ्चयति मनः प्रसूतइति।

स्थूलात्मना। स्थूलस्वरूपाञ्जाग्रत्युपलभ्यमानान् तथा सूक्ष्मतया च स्वप्ने वर्तमानानशेषान्दृष्टानदृष्टांश्च विषयान्बन्धनहेतून्गजतुरंगादीञ्छब्दादींश्च नामरूपलक्षणान्मनः प्रसूते सृजति एवं भोक्तुर्जीवस्य शरीरवर्णाश्रमजातिभेदान् स्थूलशरीरसम्बन्धनिबन्धनान् चातुर्वर्ण्यचातुराश्रम्यतदवान्तरनानाविधाकृतिग्रहणादिलक्षणलक्षिताऽनेकविधजातिभेदान् गुणक्रियाहेतुफलानि विषयशोभनाध्यासतदवाप्तिसाधनानुष्ठानतद्धेत्वाज्यादिद्रव्यतत्तद्विधिबोधितसुखसम्पल्लक्षणफलानि। नित्यम्। अनवरतम्मनएव सूते नहि मनोन्तरेण किञ्चिदपि सिद्ध्यद्दृश्यते ॥ १७७ ॥

मनः। प्रसूते। विषयान्। अशेषान्। स्थूलात्मना। सूक्ष्मतया। च। भोक्तुः ॥ शरीरवर्णाश्रमजातिभेदान्। गुणक्रियाहेतुफलानि। नित्यम् ॥ १७७ ॥

मनको बन्धकी कारणताको सिंहावलोकन न्यायसे पुनः विस्तारसे वर्णन करे हैं। मनः प्रसूतेइति। स्थूलरूपता करके

जाग्रत्में वर्तमान पदार्थोंको और सूक्ष्मरूपता करके स्वप्नमें दृष्ट अदृष्ट सर्व पदार्थोंको कि जो बन्धनके हेतु हैं तथा गज सिंहादिकोंको मनही रचता है और तैसेही जीवके स्थूलशरीर संबन्धनिमित्तक जाति वर्ण आश्रम आदि विशेष धर्मोंको विषयोंमें शोधनबुद्धि फलसाधक कर्मानुष्ठान आज्यादि द्रव्य स्वर्गादिसुख फलको भी निरन्तर मन ही रचा करता है ॥ मन विना कुछ भी दृश्य नहीं सिद्ध होवै है ॥ १७७ ॥

असंगचिद्रूपममुं विमोह्य,
देहेन्द्रियप्राणगुणैर्निबध्य ॥
अहम्ममेति भ्रमयत्यजस्रं,
मनःस्वकृत्येषु फलोपभुक्तिषु ॥१७८॥

न केवलं विषयप्रसवहेतुत्वमेव मनसः किन्त्वसङ्गस्यापि चिदात्मनोबन्धनेन भ्रमणहेतुत्वमप्यस्य दृश्यतइति महामाहिममनइत्याह। असंगइति ।

अमुम् जीवं वस्तुतोऽसंगचिद्रूपमपि सन्तं विमोह्यासङ्गस्वरूपं स्वं विस्मार्य । देहेन्द्रियप्राणगुणैः । देहादिसङ्घातासङ्गसूत्रेण निबध्य बद्धमिवापाद्य स्वकृत्येषु स्वरचितेषु फलोपभुक्तिषु सुखादिसाक्षात्कारेषु कर्मफलेषु अहंममेति । अहं कर्ता ममेदं भोग्यमित्येवमजस्रं सन्ततम् भ्रमयति अकर्तुरप्यभोक्तुश्च जीवस्य चिदात्मनःकर्तृत्वभोक्तृत्वाध्यासप्रवाहं प्रापयतीति महामहिमामनोमयइति ज्ञेयम् ।१७८

असङ्गचिद्रूपम् । अमुम् ।विमोह्य । देहेन्द्रियप्राणगुणैः । निबध्य ॥ अहम् । मम । इति । भ्रमयति । अजस्रम् । मनः । स्वकृत्येषु । फलोपभुक्तिषु ॥ १७८ ॥

असंग चेतनके भ्रमणका हेतुभी मनको ही कहे हैं । असंग इति । वास्तवसे असंग चितरूप इस जीवको असंगरूप भुला

के देहें इन्द्रिय प्राणादिमें आसक्तिरूप सूत्रकरके बांधके अपनेसे रचेहुवे सुखादि साक्षात्काररूप कर्मफलोंमें में कर्ता हूं मेरा यह भोग्य है ऐसा निरन्तर मनही अकर्ता अभोक्ता जीवको कर्ता भोक्तापनेके अध्यासप्रवाहको प्राप्त करे है, इस प्रकार मनोमय कोश महामहिमा वाला है ॥ १७८ ॥

अध्यासदोषात्पुरुषस्य संसृति-
रध्यासबन्धस्त्वमुनैव कल्पितः ॥
रजस्तमोदोषवतोऽविवेकिनो-
जन्मादिदुःखस्य निदानमेतत् ॥ १७९ ॥

नन्वध्यासस्य जन्मादिदुःखहेतुत्वमिति सएवाविद्येति पदव्यपदेशमर्हति न मनइति चेदध्यासस्यापि तादृशस्य मनोमूलकत्वान्मनोनिदानं संसृतावित्याह। अध्यासदोषादिति।

रजस्तमोदोषवतः रजस्तमोभ्यां विक्षिप्तमूढमानसस्यातएवाविवेकिनः।आत्मानात्मविवेचनाकुशलस्य पुरुषस्य पुरुषाकृतेः पशुप्रायस्याध्यासदोषाच्चिदचित्तादात्म्यभ्रमरूपाद्दोषादनर्थहेतोः संसृतिर्जन्ममरणादिरूपा विविधयोनियातना तस्मादध्यासोऽनर्थहेतुः सोप्यध्यासरूपोबन्धोऽमुनैव मनसैव कल्पितःसम्पादितस्तस्माज्जन्मादिदुःखस्याध्यासजन्यस्यैतदध्यासोपादानं मनोनिदानमादिकारणमित्यर्थः ॥ १७९ ॥

अध्यासदोषात्। पुरुषस्य। संसृतिः। अध्यासबन्धः। तु। अमुना। एव। कल्पितः॥ रजस्तमोदोषवतः। अविवेकिनः। जन्मादिदुःखस्य। निदानम्। एतत्॥ १७९ ॥

शङ्का। जन्मादि दुःखका कारण होनेसे अध्यासको अविद्या कहना उचितहै। उत्तर। अध्यासका भी मन उपादान है इस कारण मन अविद्या है सोही संसारका हेतु है ऐसा कहे हैं।

अध्यासदोषात् इति । रजोगुण तमोगुण करके विक्षिप्त और मूढ जिसका मन है इसीसे आत्मा अनात्माके विवेक करनेमें कुशल नहीं है जो पुरुष तिसको जड चेतनका परस्पर भ्रमरूप दोषसे जन्म मरणादि परंपरा होवै है इस हेतुसे अध्यास अनर्थका हेतु है सो अध्यासरूप बन्ध भी मनका कल्पित है इस कारण जन्मादि दुःखका हेतु अध्यास उसका भी हेतु मन है सोही आदिकारण है ॥ १७९ ॥

अतः प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिनः ॥
येनैव भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम् ॥१८०॥

उक्तं मनसोऽविद्यात्वमुपपादितं चोपसंहरति । अतइति । यतोमनएव संसारबन्धनिदानमविद्यापि नैतदन्तरेण बन्धलेशं दर्शयितुं शक्नोति तस्मान्मनसस्तत्त्वदर्शिनः सर्वतोव्यावृत्तामनोविलासविचारचतुराआत्मदर्शिनोवा पण्डिताआत्मानात्मविवेकनिपुणामनोमनोमयमविद्यां प्राहुः येन मनसा वायुना मातरिश्वनाऽभ्रमण्डलम् । मेघमण्डलीव विश्वं सदेवासुरकिन्नरमानवं जगद्भ्राम्यते घटीयन्त्रमिवोर्ध्वमधश्च नीयते ॥ १८० ॥

अतः । प्राहुः । मनः । अविद्याम् । पण्डिताः । तत्त्वदर्शिनः ॥ येन । एव । भ्राम्यते । विश्वम् । वायुना । इव । अभ्रमण्डलम् ॥

मनको अविद्या रूपता उपपादन की है उसकी समाप्ति करे हैं। अतः इति । जिस हेतुसे मनही संसारबन्धका कारण है और अविद्या भी मनसे विना बन्धन नहीं करसकती तिसकारण मनके स्वरूपको ठीक२ जाननेवाले आत्मा अनात्माके विवेक में निपुण मनोमयको ही अविद्या कहते हैं जिस मन करके वायुसे मेघसमूह वत्, देवदैत्यादि सर्व जगत् (घटीयन्त्रवत्) ऊर्ध्व अधोगतिको प्राप्त होता है ॥ १८० ॥

तन्मनःशोधनं कार्यं प्रयत्नेन मुमुक्षुणा ॥

विशुद्धे सति चैतस्मिन्मुक्तिः करफलायते॥ १८१ ॥

अध्यासादिमलशालित्वेन मनोमलिनमिति सूचितं तदुपयोगमाह । तन्मनःशोधनमिति ।

मुमुक्षुणा प्रयत्नेन विवेकवैराग्यादिक्षारक्षालनोद्योगेन तन्मनःशोधनं तस्य मलिनमनसः शोधनं कार्यमवश्यकर्तव्यमेतदर्थमेव हि मानवं जन्म यद्वा यस्मादुक्तरीत्या मनोमहामलिनंतस्मात्तस्य शोधनमित्यर्थः । मनःशोधनस्य महाफलमाह । विशुद्धे सतीत्यादिना । एतस्मिन्मनसि विशुद्धे सति विनिवृत्तरागादिदोषमले सति मुक्तिः करफलायते करबिल्वमिव निःसन्दिग्धा लब्धा भवतीत्यर्थः ॥

तत्मनःशोधनम् । कार्य्यम् । प्रयत्नेन । मुमुक्षुणा॥ विशुद्धे। सति । च । एतस्मिन् । मुक्तिः । करफलायते ॥ १८१ ॥

अध्यासादि मल वाला होनेसे मनका शोधन अवश्य कर्तव्य है ऐसा कहेहैं । तन्मनः शोधनम् इति । मुमुक्षु पुरुषने प्रयत्न करके विवेक वैराग्यादि साबुन लगानेके उद्यमको करके तिस मलिन मनकी शुद्धि करनी उचित है इसी वास्ते मनुष्य-जन्म प्राप्त हुवा है तिस मनके रागादि मलके नाश होनेपर शुद्ध होनेसे जैसे संशय विपर्ययसे रहित अपने हाथमें बेल का फल दीखता है तैसे ही संशय विपर्ययरहित मुक्तिफल प्राप्त होवे है इस कारण मनकी शुद्धि अवश्य कर्तव्य है ॥ १८१ ॥

मोक्षैकसक्त्या विषयेषु रागं,
निर्मूल्य संन्यस्य च सर्वकर्म ॥
सच्छ्रद्धया यः श्रवणादिनिष्ठो-
रजःस्वभावं सधुनोति बुद्धेः ॥ १८२ ॥

ननु मनोनैर्मल्यं सत्त्वोद्रेके सति भवति सत्त्वोद्रेकश्च न बुद्धेरजःस्वभावविधूननमन्तरा भवति तस्यारजःस्वभावविधूननं चासंभाव्य सम्पादनमतआह । मोक्षैकसक्त्येति ।

योऽधिकारी मोक्षैकसक्त्या मोक्षमुख्यप्रेम्णा । विषयेषु रागम् रजोगुणकार्यं निर्मूल्य समुत्पाट्य सर्वं च सकामकर्म संन्यस्य 'काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः' इत्युक्तेः दूरतो हित्वा सच्छ्रद्धया सद्ब्रह्मविश्वासेन पितृवत्कल्याणकरेण श्रवणादिनिष्ठो निरन्तरं वेदान्तोपदेशश्रवणाद्यावृत्तितत्परः सपुरुषो बुद्धेरजःस्वभावं धुनोति राजसीं वृत्तिं निवार्य विशुद्धसत्त्वप्रधानचेता भवति ततश्च मनोनैर्मल्येन मुक्तिभाग्भवतीत्यर्थः ॥ १८२ ॥

मोक्षैकसक्त्या । विषयेषु । रागम् । निर्मूल्य । संन्यस्य । च सर्वकर्म ॥ सच्छ्रद्धया । यः । श्रवणादिनिष्ठः । रजःस्वभावम् । सः । धुनोति । बुद्धेः ॥ १८२ ॥

सत्वगुणकी वृद्धिसे मनकी निर्मलता होतीहै सो रजोगुणी स्वभाव दूर करे विना होवै नहीं सो रजोगुणी स्वभाव दूर होना अशक्य है, इस शङ्काका समाधान करे हैं । हेशिष्य ! जो अधिकारी मोक्षमें मुख्यप्रेमसे विषयोंमें रजोगुणके कार्य रागको विनाशकरके सर्व सकामकर्मको त्यागके सत्यरूप ब्रह्म में विश्वास करके निरन्तर वेदान्तके श्रवणादिको पुनः पुनः करता है सो पुरुष बुद्धिके रजोगुणी स्वभावको दूर करलेता है, अर्थात् राजसीवृत्तिको निवारण करके चित्तके सत्वगुणको वृद्ध करता है उसीसे मनकी निर्मलता द्वारा मोक्षभागी होताहै १८२

मनोमयो नापि भवेत्परात्मा,
ह्याद्यन्तवत्त्वात्परिणामिभावात् ॥
दुःखात्मकत्वाद्विषयत्वहेतो-
र्द्रष्टा हि दृश्यात्मतया न दृष्टः ॥ १८३ ॥

सप्रपञ्चं मनोमयं निरूप्य तस्यानात्मत्वं सहेतुकमाह । मनोमयो नापीति ।

मनोमयोपि न परात्मा भवेद्भवति । आद्यन्तवत्त्वात् । 'अन्त-

मयꣳहि सोम्य मनः" इतिश्रुतेरुत्पत्तिमत्त्वात् । "अस्य प्रयतोवाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्।" इति श्रुतेर्विनाशवत्त्वाच्चेत्यर्थः।तथा परिणामिभावात् परिणामित्वात् । "कामः सङ्कल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मनएव" इति श्रुतेस्तस्य सविकारत्वादित्यर्थः । सर्वानुभवसिद्धपरमप्रीतिसिद्धपरमानन्दरूपत्वविरुद्धम्मनोविकारविशेषमेव हेतुत्वेनोपादत्ते दुःखात्मकत्वादिति । नच चिदात्मवन्मनस्यपि परोपाधिकमेव दुःखभानमास्तामिति हेत्वासिद्धिरिति वाच्यम् मनोविलासमन्तरा दुःखसत्तायाः साधयितुमशक्यत्वादिति भावः । विषयत्वहेतोर्विषयत्वाच्चेत्यर्थः। ननु विषयत्वं व्यभिचार्यात्मनोप्यहंप्रत्ययविषयत्वादन्यथाऽऽत्मापि परोक्षोऽभ्युपगतोभवेदित्यनात्मैवाभिहितोभवेदिति चेत्तत्राह । द्रष्टा हीति । हि यतोद्रष्टा चिदात्मा दृश्यात्मतया । दृश्यस्वरूपेण न दृष्टोन साक्षात्कृतोविचारशीलैः । तथाच चिद्भास्यत्वरूपदृश्यत्वलक्षणविषयत्वस्यानात्मत्वे हेतुत्वाच्चिदात्मनश्च चिद्भास्यत्वाभावान्न हेतुर्व्यभिचारी। एतत्सूचयितुमेवात्र हेतुपदमुपात्तमिति बोध्यम् । "येनात्मवान्प्राणमयोऽथ पूर्णः" इति वाक्यमत्र पठितव्यं पूर्ववत् । "तस्माद्वा एतस्मात्प्राणमयादन्योन्तरआत्मा मनोमयस्तेनैष पूर्णः" इतिश्रुतिरत्रानुसन्धेया ॥ १८३ ॥

मनोमयः । न । अपि । भवेत् । परात्मा । हि । आद्यन्तवत्त्वात् । परिणामिभावात् ॥ दुःखात्मकत्वात् । विषयत्वहेतोः। द्रष्टा । हि । दृश्यात्मतया । न । दृष्टः ॥ १८३ ॥

मनोमय कोशका विस्तारसे निरूपण किया है अब उसको अनात्मताका निरूपण करे हैं । मनोमयइति।मनोमयकोश भी परआत्मा नहीं होसके हैं आदि अन्तवाला होनेसे अर्थात् उत्पत्ति विनाशवाला होनेसे।और परिणामवाला होनेसे और दुःखरूप होनेसे और विषयत्व हेतुसे भी आत्मा द्रष्टा है सो

चेतनरूप होनेसे दृश्यरूप करके कभी दृष्ट नहीं है ॥ १८३ ॥

बुद्धिर्बुद्धीन्द्रियैः सार्द्धं सवृत्तिः कर्तृलक्षणः ॥
विज्ञानमयकोशः स्यात्पुंसः संसारकारणम् ॥ १८४ ॥

मनोमयकोशस्य स्वरूपमनात्मत्वञ्च निरूप्य विज्ञानमयं निरूपयति । बुद्धिरिति ।

बुद्धीन्द्रियैः । पञ्चभिर्ज्ञानेन्द्रियैः।सार्द्धं सह तत्सहकृता।सवृत्तिः साहंकारादिः । कर्तृत्वलक्षणः । कर्ताहमिति प्रत्ययलक्ष्यः । विज्ञानमयकोशः स्यादस्ति सएव च पुंसः । बुद्ध्यभिमानिनोजनस्य । संसारकारणम् । जन्मपरम्परासम्पादकः ॥ १८४ ॥

बुद्धिः । बुद्धीन्द्रियैः । सार्द्धम् । सवृत्तिः । कर्तृलक्षणः॥ विज्ञानमयकोशः । स्यात् । पुंसः । संसारकारणम् ॥ १८४ ॥

अब मनोमय कोशका स्वरूप और उसको अनात्मत्व निरूपण करे हैं । बुद्धिः इति । पञ्चज्ञानेन्द्रियोंके सहित अहंकार सहित मैं कर्ता हूं इस प्रतीतिका लक्ष्य है सो बुद्धि विज्ञानमय कोश होता है सोही बुद्धिके अभिमानी जीवको संसारका कारण है अर्थात् जन्म मरणका हेतु है ॥ १८४ ॥

अनुव्रजच्चित्प्रतिबिम्बशक्ति-
विज्ञानसंज्ञः प्रकृतेर्विकारः ॥
ज्ञानक्रियावानहमित्यजस्रं,
देहेन्द्रियादिष्वभिमन्यते भृशम् ॥ १८५ ॥

विज्ञानमयमेव विशिष्य विशदयति । अनुव्रजच्चिदिति ।

विज्ञानमयेलोकान्तरं वा विषयदेशं वा व्रजति सत्यनुव्रजन्ती चित्प्रतिबिम्बशक्तिर्यस्य सतथा प्रकृतेर्जगदुपादानभूतायामायाविकारः कार्यम् । ज्ञानक्रियावान् । ज्ञानक्रियाशक्तिसम्पन्नः । यद्यप्ययं ज्ञानेन्द्रियैर्युक्तस्तथापि कर्मेन्द्रियक्रियाजालस्य ज्ञानपूर्वकत्वात्क्रियाशक्तिमानप्ययमिति भावः । अयमेव चित्प्रतिबिम्ब

समन्वितोदेहेन्द्रियादिष्वहमित्यजस्रं भृशमभिमन्यतेऽभिमानी भवतीत्यर्थः ॥ १८५ ॥

अनुव्रजच्चित्प्रतिविम्बशक्तिः। विज्ञानसंज्ञः। प्रकृतेः। विकारः॥ ज्ञानक्रियावान्। अहम्। इति। अजस्रम्। देहेन्द्रियादिषु। अभिमन्यते। भृशम्॥ १८५॥

विज्ञानमयकोशको ही विशेषरूपसे स्पष्ट कहे हैं। अनुव्रजत् इति। जब विज्ञानमय कोश लोकान्तरको जाता है वा विषयदेशको जाता है तब उसमें चेतनशक्तिका जो प्रतिविम्ब है सोभी गमन करते वत् प्रतीत होता है। और मायाका कार्यरूप है ज्ञान-क्रियाशक्तिसम्पन्न है, विज्ञानमय नामवाला कोशही चेतन के प्रतिविम्बयुक्त होनेसे देह इन्द्रियादिमें निरन्तर अहंकारका अभिमानी होवै है॥ १८५॥

अनादिकालोयमहंस्वभावो-
जीवः समस्तव्यवहारवोढा ॥
करोति कर्माण्यपि पूर्ववासनः,
पुण्यान्यपुण्यानि च तत्फलानि॥ १८६॥

अजस्रमहमित्यभिमन्यते इत्यभिहितं विशदयति। अनादिकालोऽयमिति।

अयं विज्ञानमयोऽहंस्वभावोऽहमिति प्रतीतेर्गोचरआश्रयश्चानादिकालीन विद्यमानआदिकालउत्पत्तिसमयोयस्य सतथा अन्यथा कृतहान्यकृताभ्यागमप्रसङ्गः जीयोजीवनाभिमानी जीवाभिधानः समस्तव्यवहारवोढा। लौकिकवैदिकव्यवहाराणां निर्वाहकः।" विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च " तिश्रुतेः। नहि जीवमन्तरा शवप्रायेण सङ्घातेन किञ्चिदपि व्यवहर्तुं शक्यते इति भावः। तथाच सङ्घातप्रवृत्तिश्चेतनप्रयोज्या जडप्रवृत्तित्वाद्रथादिप्रवृत्तिवदित्यनुमानमपि सूचितं मन्तव्यम्। ननु समस्तव्यवहारवोढा चेत-

स्य स्वातन्त्र्यापत्तिः । "स्वतन्त्रः कर्ता" तिसूत्रात् । तथाच पुण्यव्यवहारमिच्छन्नपुण्ये प्रवर्तेत प्रवर्तते तु पुण्यमिच्छन्नपि पापाचरणे तत्राह । करोतीति । पूर्ववासनः । पूर्वानुष्ठितशुभाशुभकर्मवासनावासितः सन् पुण्यान्यपुण्यानि च कर्माणि करोति तथाच पूर्वोपार्जितवासनानुन्नः सन्ननिष्टेष्वप्यपुण्येषु प्रवर्तमानोन व्यवहारवोढृत्वाभावं भजतेऽन्यजीवाप्रयोज्यस्य स्वक्रियासमर्थस्यैव स्वातन्त्र्यादिति भावः । अपि च तत्फलानि पुण्यापुण्यफलानि सुखदुःखनिवृत्तिरूपाणि भुङ्क्ते इत्युत्तरेण सम्बन्धः ॥ १८६ ॥

अनादिकालः । अयम् । अहंस्वभावः । जीवः । समस्तव्यवहारवोढा ॥ करोति । कर्माणि । अपि । पूर्ववासनः । पुण्यानि । अपुण्यानि । च । तत्फलानि ॥ १८६ ॥

अहंकार अभिमानको स्पष्ट करे हैं । अनादिकाल इति । यह विज्ञानमय कोश अहं ऐसी प्रतीतिका आश्रय है और उत्पत्तिकालसे रहित है, जीवनके अभिमान वाला जीवनामा है लौकिक वैदिक व्यवहारोंके निर्वाह करने वाला है । पूर्वकालकी ये शुभ अशुभ कर्मोंकी वासना करके युक्त हुवा पुण्य पापरूप कर्मोंको करता है इसी हेतुसे पुण्यकर्मकी इच्छा करताहुवा भी वासनाके वश पापकर्ममें प्रवृत्त होवे है । और पुण्य पापकर्मोंके फल सुख दुःख रूपको भोगता है १८६

भुङ्क्ते विचित्रास्वपि योनिषु व्रज-
न्नायाति निर्यात्यधऊर्ध्वमेषः ॥
अस्यैव विज्ञानमयस्य जाग्रत्-
स्वप्नाद्यवस्थाः सुखदुःखभोगः ॥ १८७ ॥

फलभुक्तिप्रकारमाह । भुङ्क्तइति ।

एषजीवोविज्ञानमयः॥विचित्रासु। विविधाकृतिजातिमतीषु योनिषु

योनिनिर्गतेषु मनुष्यपश्वादिभेदभिन्नशरीरेषु । व्रजन् । गच्छन् । अधऊर्ध्वमायाति निर्याति चेति,सर्वव्यवहारवोढेत्युक्तं निर्वहतीत्यर्थः । किंचास्यैव विज्ञानमयस्य न शुद्धचिद्धातोर्जाग्रत्स्वप्नाद्यवस्थाः सुखदुःखभोगश्च भवन्ति ॥ १८७ ॥

भुङ्क्ते । विचित्रासु । अपि । योनिषु । व्रजन् । आयाति । निर्याति । अधः।ऊर्ध्वम् । एषः ॥ अस्य। एव । विज्ञानमयस्य। जाग्रत्स्वप्नाद्यवस्थाः । सुखदुःखभोगः ॥ १८७ ॥

अब फलभोगके प्रकारको दिखावें हैं । भुंक्ते इति । यह विज्ञानमय जीव नाना प्रकारके आकार जाति वाले मनुष्य पशु आदि शरीरोंमें गमन करता हुवा नीचे ऊंचेको आता जाता है और इस विज्ञानमय जीवकी ही " जाग्रत् स्वप्न सुषुप्ति आदि अवस्था और सुख दुःखका भोग भी होता है ॥ १८७ ॥

देहादिनिष्ठाश्रमधर्मकर्म-
गुणाभिमानं सततं ममेति ॥
विज्ञानकोशोयमतिप्रकाशः,
प्रकृष्टसान्निध्यवशात्परात्मनः ॥
अतोभवत्येषउपाधिरस्य,
यदात्मधीः संसरति भ्रमेण ॥ १८८ ॥

प्रतिबिम्बवादमुपपाद्यावच्छेदवादमप्यावेदयितुमुपक्रमते । देहादीति ।

परात्मनः । शुद्धचिद्धातोः । प्रकृष्टसान्निध्यवशात् । अत्यन्तसामीप्यात्तदवच्छिन्नत्वादित्यर्थः । अयं विज्ञानमयकोशः । अतिप्रकाशोबाह्यान्तःकरणज्ञानसम्पादनकरः स्वयं च सर्वविज्ञानसम्पन्नोदेहादिनिष्ठाश्रमकर्मक्रियागुणाभिमानं शरीरादिसङ्घाते कल्पितानां वर्णाश्रमधर्माणां क्रियागुणादीनां चाभिमानं ममेत्याकारं सततमनादिकालप्रवाहपतितं करोतीति शेषः।यतोयदात्मधीः।यस्मि-

न्ध्यस्तात्मतादात्म्योयमात्मा भ्रमेण संसरति संसृतिमनुभवति। अतस्ततोऽस्यात्मनएषउपाधिर्भवति तथाच स्वसन्निधिवशेन स्वधर्माणां कर्तृत्वादीनामात्मनि भानहेतुत्वाज्जपाकुसुमादिकं स्फटिकस्येव विज्ञानमयश्चिदात्मनउपाधिर्भवति तेनैव सर्वव्यवहारनिर्वाहे प्रतिविम्बकल्पना नातीवोपयुज्यतइति भावः । नचावच्छेदवादे घटाद्यवच्छिन्नचैतन्यस्यापि कुतोन जीवत्वमिति वाच्यं प्रतिविम्बवादेपि समानत्वात् नहि घटादौ न चैतन्यप्रतिविम्बइत्यत्रास्ति किञ्चिन्मानं चैतन्यसान्निधानस्य सर्वत्राविशेषात् । नच स्वच्छत्वाभावेन न तत्प्रतिविम्बभानमिति न जीवत्वापत्तिरिति वाच्यममापि स्वच्छत्वाभावेन न तद्धर्मभानमिति समानत्वात्तदवच्छिन्नत्वे स्वच्छत्वस्याप्रयोजकत्वेपि तद्धर्मभाने प्रयोजकत्वात् "दारोपे सति निमित्तानुसरणं नतु निमित्तमस्तीत्यारोपः" इति न्यायेन घटादिधर्माणामात्मनि भानाभावेन न घटादीनामुपाधित्वं विज्ञानमयस्य धर्माणान्तु तत्र भानेन तस्योपाधित्वमव्याहतमेवैतत्सूचनायैव प्रकृष्टसान्निध्यवशादित्यत्र प्रकृष्टपदमुपात्तमिति बोध्यम् ॥ १८८ ॥

देहादिनिष्ठाश्रमधर्मकर्मगुणाभिमानम् । संततम् । मम । इति ॥ विज्ञानकोशः । अयम् । अतिप्रकाशः । प्रकृष्टसान्निध्यवशात् । परात्मनः ॥ अतः । भवति । एषः । उपाधिः । अस्य । यदात्मधीः । संसरति । भ्रमेण ॥ १८८ ॥

प्रतिविम्ब वादका उपपादन किया अब अवच्छेदवादको विज्ञापन करे हैं । देहादि इति। शुद्ध चेतनकी अत्यन्त समीपता होनेसे तिससे अवच्छिन्न होनेसे यह विज्ञानमय कोश वाह्य आन्तर ज्ञानको सम्पादन करे है और स्वयं विज्ञानसम्पन्न होकर शरीरादि संघातमें कल्पित वर्णाश्रमधर्मोंका क्रिया गुणादिका यह मेरे हैं इस प्रकारके निरन्तर अभिमानको करे है इसी कारण यह आत्माकी उपाधि है[14] और जिसमें

अपना तादात्म्याध्यास करके विपरीत ज्ञानसे संसारी होताहै। इस कारणसे इस आत्माकी यह उपाधि होवै है। जैसे समीपतासे पुष्पके नील पीतादिरूप स्फटिकमें दीखते हैं तैसे ही बुद्धिकी समीपतासे चेतनमें सर्वव्यवहार प्रतीतिका निर्वाह होसके है इस कारण प्रतिविम्बकी आवश्यकता नहीं है, इसमें विशेष शास्त्रार्थ संस्कृत टीकामें देखलेना ॥१८८॥

योयं विज्ञानमयः प्राणेषु हृदि स्फुरत्ययं ज्योतिः॥
कूटस्थः सन्नात्मा कर्ता भोक्ता भवत्युपाधिस्थः ॥१८९॥

अवच्छेदवादमेव सप्रमाणं कर्तुं श्रुत्यर्थम्प्रकाशयति योयमिति। प्राणेषु सामीप्ये सप्तमी लक्षणा वा बुद्धिकर्मेन्द्रियपञ्चवाय्वाख्यपञ्चदशप्राणसमीपस्थः। हृदि। हृदयस्थबुद्धावन्तर्वर्तमानं ज्योतिरात्मा। "ज्योतिषां ज्योति" रिति श्रुतेः। अयम्। अपरोक्षः स्फुरति। चकास्ति। योऽयं सविज्ञानमयः। ज्ञानकरणबुद्धिप्रायः। सर्वव्यवहारेषु तत्प्रधानः सर्वव्यवहारबोढेत्युक्तेरित्यर्थः। सचायमात्मा वस्तुतः। कूटस्थोपि विज्ञानमयोपाधिस्थोबुद्ध्यवच्छिन्नः सन्नकर्तापि कर्तृतादात्म्याध्यासात्कर्तैवैवमभोक्तापि भोक्तृतादात्म्याध्यासाद्भोक्तेव भवतीत्यर्थः। तथाच कतमआत्मेति प्रश्ने "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योति" रित्यादिः। समाधानपरा श्रुतिरेवावच्छेदवादे मानमितिसूचितमेवं "बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रोप्यपरोपि दृष्टः।" इति श्रुतिरप्यनुसन्धेया॥ १८९॥

यः। अयम्। विज्ञानमयः। प्राणेषु। हृदि। स्फुरति। अयम्। ज्योतिः॥ कूटस्थः। सन्। आत्मा। कर्ता। भोक्ता। भवति। उपाधिस्थः॥ १८९॥

अब अवच्छेदवादको सप्रमाण करनेके वास्ते श्रुतिके अर्थका प्रकाश करे हैं। पञ्च ज्ञानेन्द्रिय पञ्च कर्मेन्द्रिय प्राण अपानादि पञ्च प्राण इस प्रकार पञ्चदश इन प्राणोंके समीपस्थित और

हृदयकमलमें स्थित बुद्धिके अन्तर वर्तमान ज्योतिस्वरूप अपरोक्ष प्रकाशता है जो यह ज्ञानका करणप्रधान हुवा कूटस्थ है तौ भी विज्ञानमय उपाधि करके परिच्छिन्न हुवा अकर्ता अभोक्ता भी है परंच कर्ता भोक्ताके संग तादात्म्याध्याससे कर्ता भोक्ता होता है ऐसे वेदकी श्रुति कहती है इस कारण अवच्छेद वाद श्रुतिप्रमाण सिद्ध है ॥ १८९ ॥

स्वयं परिच्छेदमुपेत्य बुद्धे-
स्तादात्म्यदोषेण परं मृषात्मनः ॥
सर्वात्मकः सन्नपि वीक्षते स्वयं,
स्वतः पृथक्त्वेन मृदोघटानिव ॥ १९० ॥

सूचितमवच्छेदवादं विशदमभिदधाति । स्वयमिति ।
यद्वा नन्वविद्यापरिच्छेदोबुद्धिपरिच्छेदोवा योजीवभावहेतुरभिहितः । सोपि सनिमित्तोवाच्यस्तन्निमित्तञ्च न निर्वक्तुं शक्यतेऽविद्यानत्कार्यभिन्नस्यानात्मनोनिरूपणानर्हत्वादिति तत्राह । स्वयमिति । सर्वात्मकः सन्नपि । अयमात्मा । बुद्धेर्विज्ञानमयस्य । परिच्छेदमवच्छिन्नत्वं स्वयं निर्निमित्तमनादिमित्यर्थः । उपेत्य । अनुभूय ततः परं मृषात्मनोमिथ्यास्वरूपस्य देहादिसंघातस्य तादात्म्यदोषेण । कल्पिततादात्म्येन । अज्ञो मृदः पृथक्त्वेन घटादीनिव स्वतः स्वस्मात्पृथक्त्वेन मृषात्मनोदेहपुत्रकलत्रादीन् । स्वयं वीक्षते नात्मानं सर्वात्मानं पश्यतीत्यर्थः । तथाचाविद्याद्युपाधिसम्बन्धस्यानादित्वेन परिच्छेदोप्यनादिरिति न निमित्तान्वेषणेन मनः खेदनीयमिति भावः ॥ १९० ॥

स्वयम् । परिच्छेदम् । उपेत्य । बुद्धेः । तादात्म्यदोषेण । परम् । मृषात्मनः ॥ सर्वात्मकः । सन् । अपि । वीक्षते । स्वयम् स्वतः । पृथक्त्वेन । मृदः । घटान् । इव ॥ १९० ॥

सूचन किये अवच्छेद वादको स्पष्ट कहते हैं । स्वयम् इति ।

यह आत्मा सर्वात्मा हुवा भी विज्ञानमयके परिच्छिन्नत्व अनादिको अनुभव करके उससे अनन्तर मिथ्यास्वरूप देहादिके कल्पित तादात्म्य करके अज्ञानी मृत्तिकासे भिन्न घटादिवत् अपनेसे पृथक्रूपकरके मिथ्यास्वरूप देह पुत्र कलत्रादि अनात्माको सर्वात्मा अपना स्वरूप देखता है ॥ १९० ॥

उपाधिसम्बन्धवशात्परात्मा,
ह्युपाधिधर्माननुभाति तद्गुणः ॥
अयोविकारानविकारिवह्निव-
त्सदैकरूपोपि परः स्वभावात् ॥ १९१ ॥

उपाधिधर्माणामुपहिते भाने दृष्टान्तमाह । उपाधिसम्बन्धवशादिति ।

अव्यक्तादपि परः सन्सर्वेषामात्मा चिदात्मा स्वभावात् । सदैकरूपोपि निर्विकारस्वभावोपि । स्वभावादविद्यातः परोपि वा । उपाधिसम्बन्धवशात् । आविद्यायाबुद्धेर्वोपाधेःसंबन्धवशतः । अयोविकारान् । हस्तवितस्त्यादिपरिमाणगुरुत्वादीन् । अविकारिवह्निवत् । अयोगोलकस्थहस्तावितस्त्यादिपरिमाणपरिच्छिन्नत्वगुरुत्वाभावव दग्निवदेवोपाधिधर्मानविद्याबुद्धिगतमूढत्वकर्तृत्वादीन् तद्गुणः । उपाधिगतगुणवानिव वर्त्तमानोऽनुभाति । अनुकुर्वन्निव लक्ष्यते नच तथासति दोषेण गुणेन वाऽणुमात्रेणापि संलिप्यतइति भावः ॥

उपाधिसम्बन्धवशात् । परात्मा । हि । उपाधिधर्मान् । अनुभाति । तद्गुणः ॥ अयोविकारान् । अविकारिवह्निवत् । सदा । एकरूपः । अपि । परः । स्वभावात् ॥ १९१ ॥

उपाधिधर्मोंका उपहितमें भान होनेमें दृष्टान्त कहेहैं । उपाधिइति । मायासे भी जो परे है सर्वका जो चेतन आत्मा स्वाभाविक सदा एकरूप भी है अर्थात् निर्विकार स्वभाव है तौभी अविद्या अथवा बुद्धिके संबन्धसे लोहेके विकारोंको निर्विकार

अग्निमें भानवत्, उपाधिगतगुणोंवाला अपनेको मानता प्रतीत होवै है अर्थात् अनुकरण करता दीखे है परन्तु उपाधिके गुण दोषसे लिप्त नहीं होता है ॥ १९१ ॥

शिष्यउवाच ।

भ्रमेणाप्यन्यथा वाऽस्तु जीवभावः परात्मनः ॥
तदुपाधेरनादित्वान्नानादेर्नाशइष्यते ॥ १९१ ॥

एतावता प्रबन्धेन शिष्यप्रश्नः समाहितस्तथाहि देहादिसङ्घाताध्यासोबन्धः स्वरूपाज्ञानावरणाविक्षेपतश्चायमागतस्तेनैव प्रतिष्ठितेन चास्य प्रतिष्ठा तन्तुप्रतिष्ठयेव पटस्य ब्रह्मात्मैक्यसाक्षात्कारेण चास्य बन्धस्य विनिवृत्तिर्विमोक्षः। अविद्यादिदेहविषयान्तं जडजातमनात्मा जडजातस्य साक्षी चिदात्मा च परमात्मेति सामान्येन समाधानमभिहितमाकर्ण्य विशेषवर्णने समुत्सुकमेव गुरुमालक्ष्यान्तरैवान्तःसमुदितां काञ्चिच्छङ्कालतामुच्चिच्छेदयिषुः शिष्यउवाच भ्रमेणापीति द्वाभ्याम् ।

हेश्रीगुरो मोक्षलक्ष्मीलक्षणलक्षितगुरो परात्मनोदेहादिसङ्घातभिन्नस्यात्मनश्चेतनस्य रथगत्या सारथिनइव देहादिसङ्घातगत्याऽनुमितस्य जीवभावोजीवत्वं भ्रमेण विपर्यज्ञानेनान्यथा वा प्रमाज्ञानेनवाऽस्तु भवतु न तत्र विवदे चिदात्मनोजीवत्वासिद्धेः कथमपि सम्भवे बन्धसम्भवात्तदपनोदे दुःखविनिवृत्त्या सुखावाप्तेःसम्भवादिति भावः । तथापि मतद्वयेपि तदुपाधेराविद्यादेरनादित्वाद् 'जामेकामि'तिश्रुतेर्युक्तेश्चानादिपदार्थस्य चात्मवन्न नाशइष्यते आत्मानित्यत्वस्यास्तिकेनामूढेनास्वीकारादिति भावः ॥ १९२ ॥

शिष्यः । उवाच ॥ भ्रमेण । अपि । अन्यथा । वा । अस्तु । जीवभावः । परात्मनः ॥ तदुपाधेः । अनादित्वात् । न । अनादेः । नाशः । इष्यते ॥ १९२ ॥

अब शिष्य प्रश्न करता है । भ्रमेण इति । हे श्रीगुरो ! जैसे

१ अन्तरेत्यव्ययं मध्यार्थकम् ।

रथगतिसे सारथिका अनुमान होता है तैसेही देहादिकी चेष्टा से देहादिसे भिन्न आत्माका ज्ञान होता है तिस चेतनको जीवपना भ्रमसे हो वा प्रमासे हो इसमें हम विवाद नहीं करते तथापि अविद्या वा बुद्धि उपाधिको अनादि होनेसे अनादिभावका नाश नहीं होता है जैसे आत्माका विनाश नहीं इष्ट है तैसे ही उपाधिका भी नाश न होना चाहिये॥१९२॥

अतोस्य जीवभावोपि नित्या भवति संसृतिः॥
न निवर्तेत तन्मोक्षः कथं मे श्रीगुरो वद॥१९३॥

यत उपाधेरनाशस्ततोऽस्य चेतनस्य जीवभावोपि न निवर्तेत । संसृतिश्च नित्या अविनाशिनी भवति उपाधिनित्यतयोभयनित्यत्वस्यार्थसिद्धत्वादिति भावः । ततश्च तन्मोक्षस्तस्य जीवस्य बन्धनिवृत्तिः कथं भवेदिति प्रश्नस्योत्तरं मे मह्यं वदोपादिशेत्यर्थः॥१९३॥

अतः । अस्य । जीवभावः । अपि । नित्या । भवति । संसृतिः॥ न । निवर्तेत । तन्मोक्षः । कथम् । मे । श्रीगुरो । वद॥१९३॥

उपाधिके नाश न होनेसे इस जीवको जीवभावकी भी निवृत्ति होवै नहीं और संसारभी निरन्तर होता है उपाधिकी अनिवृत्ति होनेसे इन दोनोंकी निवृत्ति होवै नहीं । इस कारण से जीवके बन्धकी निवृत्ति कैसे होवै,इस प्रश्नका उत्तर मेरे प्रति आप श्रीगुरुजी कथन करो॥१९३॥

श्रीगुरुरुवाच ।

सम्यक् पृष्टं त्वया विद्वन्सावधानेन तच्छृणु॥
प्रामाणिकी न भवति भ्रान्त्या मोहितकल्पना॥१९४॥

श्रीगुरुस्तु शास्त्रज्ञं शिष्यमालक्ष्य प्रश्नं प्रशंसयन्क्रमेणाप्यन्यथा

वेत्यन्यथापदश्रुतिमक्षममाणोजीवभावं चेतनस्य भ्रमसिद्धमावेद यति । सम्यगिति ।

हेविद्वन् । तर्कशास्त्रवेदनसम्पन्न त्वया तार्किकमतावलम्बिना सम्यक् पृष्टमात्मनि गगनादौ चाग्निनाशित्वानादित्वयोर्व्यभिचारदर्शनासहचारेण साहचर्यन्दृष्टमतस्तथा पृष्टम् । तथापि जीवभावोऽन्यथा वा भवत्वित्येव तु प्रथममयुक्तमुक्तं यतोभ्रान्त्या मोहितकल्पना विपरीतप्रत्ययलुप्तविवेकानां तार्किकाणां जीवभावसत्त्वकल्पना । प्रामाणिकी । प्रमाणसिद्धा न भवति । अन्यथा देहात्मत्वकल्पनापि प्रामाणिकीत्युक्तं भवेत्तन्न वक्तुं शक्यते तस्मादेषापि कल्पना तद्वदप्रामाणिकी ततोन चिदात्मनोजीवभावस्तथ्योभवितुमर्हतीति प्रथमं मन्तव्यमिति भावः ॥ १९४ ॥

सम्यक् । पृष्टम् । त्वया । विद्वन् । सावधानेन । तत् । शृणु॥ प्रामाणिकी । न । भवति । भ्रान्त्या । मोहितकल्पना १९४

शिष्यको शास्त्रज्ञाता जानकर प्रश्नकी प्रशंसा करते हुवे चेतनको जीवभाव भ्रमसिद्ध है ऐसा गुरुजी वर्णन करे हैं।सम्यक् इति । हे तर्कज्ञानयुक्तिकुशल ! तुमने न्यायमतका आलम्बन करके ठीक पूँछा है परंच जीवभाव प्रमासे होवै यह तुमने अयुक्त कहा है, जीवभावकी सत्यत्व कल्पना विवेकशून्य पुरुषोंकी है प्रमाण करके सिद्ध नहीं है अप्रमाणसिद्ध कल्पना जैसे देहात्मता नहीं मानी जाती तैसे ही यहभी नहीं मानी जाती है, इस कारण जीवभाव चेतनको भ्रान्तिसिद्ध मिथ्या है प्रथम सावधान मन कर ऐसा निश्चय करो॥ १९४॥

भ्रान्तिं विना त्वसङ्गस्य निष्क्रियस्य निराकृतेः ॥
न घटेतार्थसम्बन्धोनभसोनीलतादिवत् ॥ १९५ ॥

प्रामाणिकी न भवतीत्युक्तं तत्र हेतुमाह भ्रान्तिमिति । असङ्गस्य । स्वसमसत्ताकसंयोगादिलक्षणसम्बन्धविकलस्य। "असङ्गोह्ययं पुरुष" इति श्रुतेः । निष्क्रियस्य । कूटस्थस्य । "निष्कलं

निष्क्रिय" मिति श्रुतेः। हेतुगर्भितविशेषणमाह। निराकृतेरिति। "अस्थूलमनण्वह्रस्व" मिति प्रभृतिश्रुतिभ्योनिराकारस्यार्थसम्बन्धोवस्तुतोऽनर्थेनापि लौकिकदृष्ट्यार्थप्रथां प्राप्तेन द्वैतेन सम्बन्धोनभसोगगनस्यासङ्गस्वेत्यादिविशेषणत्रयविशिष्टस्य नीलतादिवत् नीलतादिभिर्दूरस्थाज्ञजनकल्पितैर्नीलवर्णादिभिरिव भ्रान्तिं विना न घटेत न युज्येत न प्रमाणमार्गमारोहेदित्यर्थः। यदि तस्य द्वैतसम्बन्धएव भ्रान्तिसिद्धस्तर्हि तदायत्तोजीवभावः कथं सत्योभवेदिति भावः॥ १९५॥

भ्रान्तिम्। विना। तु। असङ्गस्य। निष्क्रियस्य। निराकृतेः। न। घटेत। अर्थसम्बन्धः। नभसः। नीलतादिवत् ॥ १८५॥

पूर्व कथनमें हेतु कहे हैं। भ्रान्तिम् इति। यथार्थ संयोगादि संबन्धरहित कूटस्थ स्थूल सूक्ष्मादि आकार रहित चेतन आत्मा को शब्दादि पदार्थोंके संग संबन्ध नहीं बनता है जैसे पूर्वोक्त विशेषणयुक्त आकाशका नीलादि वर्णोंके संग सम्बन्ध नहीं बने है तैसे ही यहां भी द्वैत प्रपञ्चका संबन्ध असम्भव है जैसे आकाशमें नीलरूपादिका संबन्ध भ्रमसे भान होवै है तैसेही आत्मामें द्वैत प्रपञ्चका संबन्ध भ्रममात्र सिद्ध है भ्रमसे विना तो वास्तव नहीं है॥ १९५॥

स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य,
प्रत्यग्बोधानन्दरूपस्य बुद्धेः॥
भ्रान्त्या प्राप्तोजीवभावोन सत्यो-
मोहापाये नास्त्यवस्तुस्वभावात्॥ १९६॥

उक्तमेव विवृणोति स्वस्येति।

द्रष्टुः। साक्षादिति सम्बन्धेन साक्षिणइत्यर्थः। निर्गुणस्य। "साक्षी चेताः केवलोनिर्गुणश्चे" तिश्रुतेः। "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यदि" ति श्रुतेः। गुणगणशून्यस्य

निर्दोषस्येत्यपि पूरणीयम् । अक्रियस्य प्रत्यग्बोधानन्दरूपस्य सर्वान्तरसच्चिदानन्दलक्षणस्य स्वस्यात्मनोजीवभावोजीवत्वधर्मो बुद्धेरन्तःकरणस्य भ्रान्त्या तादात्म्यमत्या प्राप्तः कल्पितः।न सत्योनिरुपाधिकस्तथ्यः सच भ्रान्तिमात्रसिद्धोमोहोपादानोमोहापाये भ्रमनिदानाज्ञाननिवृत्तौ नास्ति न विद्यते वंशोरगादिवदवस्तुस्वभावात् । अवस्तुस्वरूपत्वादित्यर्थः । यथा वंशस्वरूपाज्ञानेन भ्रमतोभातोपि नागादि वस्तु न भवति वंशसम्यग्विज्ञानेनाज्ञाननिवृत्तौ तदभावस्यैवावलोकनात्तथा चिदात्मयाथात्म्याज्ञानतोभातस्य जीवभावस्य भ्रान्तिसिद्धस्वरूपस्य चिदात्मयाथात्म्यविज्ञानेऽभावस्यैवावलोकनान्न सत्योजीवभाव इति भावः ॥ १९६ ॥

स्वस्य । द्रष्टुः । निर्गुणस्य । अक्रियस्य । प्रत्यग्बोधानन्दरूपस्य । बुद्धेः ॥ भ्रान्त्या । प्राप्तः । जीवभावः । न । सत्यः । मोहापाये । न । अस्ति । अवस्तुस्वभावात् ॥ १९६ ॥

पूर्वोक्तका विवरण करेहैं । स्वस्य इति । साक्षीरूप निर्गुण निर्दोष क्रियारहित सर्वसे अनन्तर सत् चित् आनन्दस्वरूप आत्माको जीवत्व धर्म है सो अन्तःकरणकी भ्रान्ति करके प्राप्तहुवाहै सो सत्य नहींहै उसका उपादान मोह है उस मोह (अज्ञान) की निवृत्ति होनेसे विद्यमान नहीं रहताहै रज्जुसर्पादिवत्, अवस्तु स्वरूप होने से ॥ १९६ ॥

यावद्भ्रान्तिस्तावदेवास्य सत्ता,
मिथ्याज्ञानोज्जृम्भितस्य प्रमादात् ॥
रज्ज्वां सर्पोभ्रान्तिकालीनएव,
भ्रान्तेर्नाशे नैव सर्पोपि तद्वत् ॥ १९७ ॥

नतु ब्रह्मविदुषामपि जीवामीति मतेरनुभवसिद्धत्वादभ्रान्तानुभवस्य च प्रामाणिकत्वाज्जीवत्वं सत्यमेष्टव्यमिति चेन्नेत्याह यावदिति ।

यद्वा जीवत्वस्य कल्पितत्वं प्रसाध्य संसृतेरपि तथात्वं साधयति यावदिति। अस्य जीवत्वस्य संसारस्य च मिथ्याज्ञानोज्जृम्भितस्य मिथ्याभूताज्ञानजन्यस्य प्रमादात् स्वरूपविज्ञानसाधनेषु प्रयत्नासम्पादनाद् । यावद्भ्रान्तिस्तावदेव सत्ता आरोपितासद्रूपता अज्ञानाधिष्ठानयाथात्म्यज्ञाने तु न जीवत्वसंसारौ सत्तां लभते इति भावः। तत्र दृष्टान्तमाह। रज्ज्वामिति। यथा प्रमादतो मन्दान्धकारे वर्तमानायां रज्ज्वां दोषदूषितदृष्ट्या दृष्टः सर्पोभ्रान्तिकालीनएव प्रातिभासिकएव न व्यावहारिकोभ्रान्तेस्तु नाशेऽधिष्ठानरज्जुस्वरूपप्रमयानिवृत्तौ सर्पोपि प्रातिभासिकोपि नैवावबुध्यते तद्वत्तथेत्यर्थः। तथाच ब्रह्मविद्वांसोपि जीवामि। इति न स्वदृष्ट्या व्यवहरन्ति किन्तु परभाषया परोबोधनीयइति न्यायेनाज्ञदृष्ट्या नुवदन्ति स्वदृष्ट्या तु शुद्धाद्वैतचिदात्माहमित्येवाभिलपन्ति परस्परमिति भावः॥ १९७॥

यावद्। भ्रान्तिः। तावद् । एव। अस्य। सत्ता। मिथ्याज्ञानोज्जृम्भितस्य। प्रमादात्॥ रज्ज्वाम्। सर्पः। भ्रान्तिकालीनः। एव। भ्रान्तेः। नाशे। न। एव। सर्पः। अपि। तद्वत्॥

ब्रह्मज्ञानीको भी मैं जीवता हूं ऐसी प्रतीति होनेसे जीवत्वधर्म वास्तव होना उचित है। इस शङ्काका समाधान करे हैं। यावत् इति। जीवत्वधर्म और संसारकी मिथ्यारूप अज्ञानजन्य होनेसे आत्मज्ञानके साधनोंमें प्रयत्नके न करनेसे जब तक भ्रान्ति है तबतक सत्ता है अर्थात् आरोपित सत्य रूपता है। जैसे मन्द अन्धकारमें सर्प भ्रान्तिकालमें ही होता है भ्रान्तिके नाश होनेसे सर्प भी और उसका ज्ञानभी नहीं रहता इस कारण प्रातिभासिक सत् है तैसेही जीवत्वादि प्रातिभासिक धर्म हैं ब्रह्मज्ञानीका व्यवहार तो अज्ञानी पुरुषोंकी दृष्टिके अनुसारी है, अपने अनुभवसे वह जीवन मरणादि नहीं मानते॥ १९७॥

अनादित्वमविद्यायाः कार्य्यस्यापि तथेष्यते ॥
उत्पन्नायां तु विद्यायामाविद्यकमनाद्यपि ॥१९८॥

जीवभावस्य संसारस्य च कल्पितत्त्वमभिधायोपाधेरनादित्वेनाविनाशित्वमापादितं येन जीवभावसंसारयोर्नित्यत्वमापादयितुं संभाव्यते तत्प्रत्याख्यातुं पक्षे हेतुसत्त्वमङ्गीकरोति।अनादित्वमिति।

चिदात्मोपाधिरविद्या च वुद्धिश्चेत्युभयोरपि अनादित्वमिष्टं वेदान्ताचार्यस्येति हेतुसद्भावेन प्रश्नोयुज्यते तवेति भावः । अन्वयस्तु अविद्यायाः कार्यस्यापि तथाऽनादित्वमिष्यतइति स्फुटएव। तथापि ब्रह्मात्मैक्यलक्षणायां विद्यायामुत्पन्नायामाविद्यकमविद्याकार्यमन्तःकरणादिअनाद्यपि ॥ १९८ ॥

अनादित्वम् । अविद्यायाः । कार्य्यस्य । अपि । तथा। इष्यते॥ उत्पन्नायाम् । तु । विद्यायाम् । आविद्यकम् । अनादि । अपि॥

चेतन आत्माका उपाधि अविद्यारूप कारण और बुद्धिरूप कार्य इन दोनोंको ही अनादिता वेदान्ताचार्यको इष्ट है इस हेतुसे इनका विनाश भी आत्मावत्, न होना चाहिये यह प्रश्न बनताहै । तथापि जीव ब्रह्मकी एकतारूप अभेदको ग्रहण करनेवाली ब्रह्मविद्याके उत्पन्न होनेपर अविद्या तत्कार्य अन्तःकरण अनादि भी हैं तौभी नष्ट होवै है ॥ १९८ ॥

प्रबोधे स्वप्नवत्सर्वं सह मूलं विनश्यति ॥
अनाद्यपीदं नो नित्यं प्रागभावइव स्फुटम् ॥१९९॥

सर्वमनात्मजातं प्रबोधे जागरे प्राप्ते स्वप्नवत् स्वप्नदृष्टगजादिकमिव सहमूलं साविद्यं विनश्यति । नन्वनादित्वेनाविनाशानुमानव्याधेः किमौषधमिति चेत्तत्राह । अनाद्यपीदं नो इति। प्रागभावइवानाद्यपीदं साविद्यं जडजातं प्रागभावइव नो नित्यमनित्यं स्फुटमुपलभ्यते ॥ १९९ ॥

प्रबोधे । स्वप्नवत् । सर्वम् । सह । मूलम् । विनश्यति ॥

अनादि । अपि । इदम् । नो । नित्यम् । प्रागभावः । इव । स्फुटम् ॥ १९९॥

जैसे जाग्रत् अवस्थामें स्वप्नदृष्ट सर्व अनात्मपदार्थोंका नाश होवै है तैसे ही आत्मज्ञानरूप जाग्रत्के होनेपर मूल अविद्याके सहित दृश्य नष्ट होवै है यद्यपि यह जड जगत् अनादि भी है तथापि प्रागभाववत् अविनाशी नहीं है जैसे स्पष्ट प्रागभावका नाश होता है तैसे ही जडका नाश होता है॥१९९

अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः॥
यद्बुद्ध्युपाधिसम्बन्धात्परिकल्पितमात्मनि ॥२००॥

स्फुटमित्युक्तस्यार्थं स्फुटयति । अनादेरपीति ।

अनादेरपि प्रागभावस्य विध्वंसोवीक्षितः । प्रत्यक्षमनुपलब्धः तथाचानादित्वस्य प्रागभावे सत्वेपि विनाशित्वाभावस्यासत्वाद्धेतुर्व्यभिचारदोषदुष्टोन साध्यसाधनक्षमइति भावः । वीक्षितइत्युक्त्वा यदि प्रागभावस्य विनाशोन स्यात्तर्हि घटादिस्वरूपमेव नोपलभ्येत स्वप्रागभावविनाशात्मत्वाद्घटादेः स्वप्रागभावध्वंसनियम्यत्वाद्वेति सूचितमिति बोध्यम् । नचानादिभावत्वस्य हेतुकरणान्नव्यभिचारइति वाच्यम् । अविद्यातत्कार्यसाधारणभावत्वस्यानिरुक्तेरविद्यायाः सदसदादिवैलक्षण्यवद्भावाभावविलक्षणत्वस्याप्यभ्युपगमेन भावत्वस्यापि तत्राभावादिति संक्षेपः । ननु जीवत्वमौपाधिकमिति कृत्वा भवतु कल्पितं तथाप्युपाधिस्वरूपस्य तु सत्ताभ्युपगन्तव्या तथा तत्संसर्गस्याप्यौपाधिकस्यान्यथा जीवत्वाद्यारोपासिद्धेरित्येतावतैवाद्वैतक्षतिरतआह । यद्बुद्ध्युपाधीति । यस्यबुद्ध्युपाधेः संबन्धादात्मनि शुद्धे चैतन्ये कल्पितमारोपितं जीवत्वं तदुपाधिस्वरूपं न सत्यं चिद्भिन्नत्वादित्यग्रिमेणान्वयः ॥ २०० ॥

अनादेः । अपि । विध्वंसः । प्रागभावस्य । वीक्षितः ॥ यद्बुद्ध्युपाधिसम्बन्धात् । परिकल्पितम् । आत्मनि ॥२००॥

पूर्वोक्तका विवरण करे हैं । अनादि प्रागभावका भी विनाश दीखनेमें आता है जो कभी प्रागभावका नाश न होवै तौ घटादि कार्य पदार्थोंकी प्रतीति ही न होवैगी इसकारण प्रतियोगिसे स्वप्रागभावका विनाश अवश्य अङ्गीकार करना उचित है तैसे ही जिस बुद्धि आदि उपाधिके संबन्धसे आत्मामें जीवभाव कल्पित है सो अनात्म होनेसे अनित्य है ऐसा आगेके श्लोकके संग संबन्ध कर लेना ॥ २०० ॥

जीवत्वं न ततोन्यस्तु स्वरूपेण विलक्षणः ॥
सम्वन्धस्त्वात्मनोबुद्धया मिथ्याज्ञानपुरःसरः॥२०१

तर्हि तद्वदेवोपहितोपि मिथ्यास्यान्नेत्याह ततोऽन्यास्त्विति । उपाधेरन्यउपहितस्तु स्वरूपेण चैतन्यात्मना विलक्षणोमिथ्याविलक्षणः सत्यइत्यर्थः । स्वरूपेणेत्युक्तिस्तूपहितत्वाकारेण तस्य तथात्वेपि चिद्रूपतया सत्यत्वं मन्तव्यमन्यथा निराधिष्ठानभ्रमाभ्युपगमापत्तिरिति सूचनाय यद्वा जीवत्वस्य कल्पितत्वमत्रोपसंहृतं तथाच यस्यतोजीवत्वमुपाधिसम्बन्धादात्मनि कल्पितं ततस्तत्र सत्यमिति शेषः । शेषं पूर्ववत् । बुद्धया स्वोपाधिभूतान्तःकरणेन सह स्वात्मनः प्रत्यगभिन्नपरमात्मनः संबन्धस्तु न सत्यः किन्तु मिथ्याज्ञानपुरःसरः मिथ्याभूताऽज्ञानप्रयोज्यस्तथा चोपाधिस्तत्संबन्धश्चेति द्वावपि अनृतावात्मा तु कल्पनाधिष्ठानत्वादतएवेति भावः ॥ २०१ ॥

जीवत्वम् । न । ततः । अन्यः । तु । स्वरूपेण । विलक्षणः ॥ सम्बन्धः । स्वात्मनः । बुद्ध्या । मिथ्याज्ञानपुरःसरः ॥२०१॥

अथवा जिस उपाधिके सम्बन्धसे चेतनमें जीवत्व कल्पित है सो बुद्धि आदि उपाधि सत्य नहीं है किन्तु मिथ्या है और तिस उपाधिसे अन्य जो जीव आत्मा है सो अपने चेतनरूपसे तौ मिथ्यासे विलक्षण सत्यरूप है और उपाधिविशिष्ट

स्वरूप तो उसका भी मिथ्या है । और अन्तःकरणके संग चैतन आत्माका सम्बन्ध तो सत्य नहीं है किन्तु मिथ्या ज्ञान पूर्वक है इससे यह सिद्ध हुवा कि उपाधि और उसका संवन्ध दोनों मिथ्या हैं और आत्मा अधिष्ठानरूप सत्य है ॥२०१॥

विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा ॥
ब्रह्मात्मैकत्वविज्ञानं सम्यग्ज्ञानं श्रुतेर्मतम् ॥२०२॥

ननु भवतूपाधेर्मिथ्यात्वं तथापि तन्निवर्तकं वाच्यं नात्मज्ञानं तन्निवर्तकं तस्य तदुत्पन्नस्य तन्निवर्तने सामर्थ्याभावान्नहि मृदुत्पन्नः कलशो मृदं विनाशयितुमर्हति तस्मान्निवर्त्तकानिरूपणादुपाधेरपि चिदात्मवत्सत्यत्वमभ्युपगम्यतामिति चेत्तत्राह । विनिवृत्तिरिति ।

तस्योपाधेर्विनिवृत्तिर्विनाशो भवेद्भवति सम्यग्ज्ञानेन अबाधितार्थविषयकविज्ञानेन नान्यथा न कर्मोपासनादिना । यथा चैतत्तथा निरूपितं पुरस्तात् तत्किं सांख्यादिवत्प्रकृतिपुरुषान्यत्वज्ञानं नेत्याह ब्रह्मात्मैकत्वेत्यादि । ब्रह्मण आत्मनश्चैकत्वमभेदस्तस्य विज्ञानं साक्षात्कारः सम्यग्ज्ञानं श्रुतेर्मतम् "अयमात्मा ब्रह्म" त्यादिश्रुतितात्पर्यविषय इत्यर्थः । तथाचाज्ञानकार्यस्यापि ब्रह्मबोधस्याज्ञाननिवर्तकत्वं काष्ठाग्निजन्यकाष्ठसंयोगस्य काष्ठनाशकत्वमिव नानुपपन्नमिति भावः ॥ २०२ ॥

विनिवृत्तिः । भवेत् । तस्य । सम्यग्ज्ञानेन । न । अन्यथा ॥ ब्रह्मात्मैकत्वविज्ञानम् । सम्यग्ज्ञानम् । श्रुतेः । मतम् ॥२०२॥

उपाधिका निवर्तक कौन है । आत्मज्ञानको अज्ञानजन्य होनेसे निवर्तकता वने नहीं इस शङ्काका समाधान करे हैं । जैसे अग्निके संग काष्ठका संयोग काष्ठजन्य भी है तौभी उस की निवृत्ति होवै है तैसे अज्ञानजन्य होने पर भी आत्मब्रह्मज्ञान अज्ञानरूप उपाधिका निवर्तक होसके है इसकारण तिसे

१ आत्मज्ञानस्य । २ उपाधिजन्यस्य ।

अज्ञानादि उपाधिका यथार्थ ज्ञानसे विनाश होवै है कर्म वा उपासना आदि किसी अन्य प्रकारसे विनाश नहीं होवै है जीव ब्रह्मकी एकताके ज्ञानको ही यथार्थ ज्ञान कहे हैं ऐसा वेदके अन्त वाक्योंको स्वीकृत है ॥ २०२ ॥

तदात्मानात्मनोःसम्यग्विवेकेनैव सिध्यति॥
ततोविवेकः कर्तव्यः प्रत्यगात्मसदात्मनोः ॥२०३॥

तद् । ब्रह्मात्मैकत्वविज्ञानम् । आत्मानात्मनोश्चिदचितोः । सम्यग् विवेकेन । जडमनात्मजातं कल्पितं चैतन्यमात्मस्वरूपं सदा विनाशविधुरमिति प्रभृति दृढविवेकज्ञानेन । सिध्यति । उत्पद्यते। अद्वैतनिश्चयस्य द्वैतमिथ्यात्वनिश्चयपुरःसरत्वादिति भावः । ततस्तस्मात्प्रत्यगात्मसदात्मनोर्विवेकः कर्तव्यः। जीवब्रह्मणोरुपाधिपरित्यागेन शुद्धचैतन्यनिश्चयोदयाय यत्नो विधेय इत्यर्थः ॥ २०३ ॥

तद् । आत्मानात्मनोः । सम्यग्विवेकेन । एव । सिध्यति ॥ ततः । विवेकः । कर्तव्यः । प्रत्यगात्मसदात्मनोः ॥ २०३ ॥

सो जीव ब्रह्मकी एकताका ज्ञान जडचेतनके विवेकसे उत्पन्न होवै है आत्मासे भिन्न सर्व जड कल्पित है, चेतन आत्मा अविनाशी है,ऐसा विवेकका स्वरूप है। तिस हेतुसे जीव ब्रह्मकी उपाधियोंका त्याग करके शुद्धचैतन्यके निश्चयरूप बोधके वास्ते उद्यम करना उचित है ॥ २०३॥

जलं पङ्कवदत्यन्तं पङ्कापाये जलं स्फुटम् ॥
यथा भाति तथात्मापि दोषाभावे स्फुटप्रभः॥२०४॥

विवेकफलं सदृष्टान्तमाह ।जलमिति ।
यथा जलं स्वभावेन निर्मलमपि सलिलमत्यन्तं पङ्कवत् मलिनपङ्कसंसर्गादत्यन्तं मलिनमाभाति । कतकरेण्वादिना शोधनेन पङ्कापाये । पङ्ककृतावृतिवियोगे यथा पूर्वं जलं स्फुटम् । स्वच्छमाभात्यालोक्यते तथाऽऽत्मापि स्वभावतएव स्वच्छः सन्नविद्या-

तोमलिनदेहादिवदाभातोपि दोषाभावे । अविद्यावरणनिवृत्तौ । स्फुटप्रभः । अनावृतप्रकाशः । प्रतीयतइत्यर्थः ॥ २०४ ॥

जलम् । पङ्कवद् । अत्यन्तम् । पङ्कापाये । जलम् । स्फुटम् ॥ यथा । भाति । तथा । आत्मा । अपि । दोषाभावे । स्फुटप्रभः ॥

विवेकमें दृष्टान्त कहे हैं । जलं पङ्कवत् इति । जैसे जल और पङ्क मिले हुवे होते हैं उसमें कतकरेणु औषधके संबन्ध से पंकके निवृत्तहुवे जल अत्यन्त निर्मल प्रतीत होवैहै । तैसे ही आत्मा स्वभावसे स्वच्छ है तथापि अविद्याऽऽवरणके सम्बन्ध होनेसे मलिन देहादिवत् प्रतीत होता है और अविद्याऽऽवरण के निवृत्त होनेपर निरावरण स्वरूप प्रतीत होवै है ॥ २०४ ॥

असन्निवृत्तौ तु सदात्मना स्फुटं,
प्रतीतिरेतस्य भवेत्प्रतीचः ॥
ततोनिरासः करणीयएव,
सदात्मनः साध्वहमादिवस्तुनः ॥ २०५ ॥

एतदेव विवृणोति । असन्निवृत्तौ त्विति ।

असतोमिथ्याभूतस्याविद्याद्युपाधेर्निवृत्तौ विनाशे तु एतस्यात्यन्तसन्निहितस्य । प्रतीचः । आन्तरस्य चिदात्मनः सदात्मना । अद्वयानन्दरूपेण स्फुटम् । संशयविपर्ययनिरासेन । प्रतीतिः साक्षात्कारो भवेत् ततस्तस्माद्धेतोः सदात्मनः सकाशादहमादिवस्तुनोऽन्तःकरणादेरवस्तुनोपि वस्तुवद्भासमानस्य साधु यथा भवति तथा निरासोविवेचनं करणीयएव कर्तव्योन प्रमादेन समयोयापनीय इति भावः ॥ २०५ ॥

असन्निवृत्तौ । तु । सदात्मना । स्फुटम् । प्रतीतिः । एतस्य । भवेत् । प्रतीचः ॥ ततः । निरासः । करणीयः । एव । सदात्मनः । साधु । अहमादिवस्तुनः ॥ २०५ ॥

इसी वार्ताका विवरण करे हैं । असन्निवृत्तौ इति । मिथ्या-

रूप अविद्यादि उपाधिके विनाश होनेपर तो अत्यन्त समीप आन्तर चित्रूप आत्माका अद्वैत आनन्दरूप करके संशय विपर्ययरहित साक्षात्कार होता है तिस कारणसे संत् आत्माके सकाशसे अवस्तुभूत वस्तुवत् प्रतीयमान अन्तःकरणादिका समीचीन रीतिसे विवेक करना योग्य है, विवेक करनेमें समय व्यतीत करना उचित है, व्यर्थ समय खोना अनुचित है २०५

अतोनायं परात्मा स्याद्विज्ञानमयशब्दभाक् ॥
विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः ॥
दृश्यत्वाद्व्यभिचारित्वान्नानित्योनित्यइष्यते २०६

विज्ञानमयकोशस्य स्वरूपं चिदात्मोपाधित्वं च प्रपञ्चितं सम्प्रति तस्यात्मत्वनिरासप्रकारं विवेकविज्ञानार्थमाह । अतोनायमिति । अतोवक्ष्यमाणहेतुनिकरतोऽयं विज्ञानमयशब्दभाक् विज्ञानमयशब्दवाच्यः परमात्मा न स्यान्न भवति । तानेव हेतूनाह विकारित्वादित्यादिना । कामसङ्कल्पादिविकारशालित्वादित्यर्थः । जडत्वात् । चिद्भिन्नत्वात् । परिच्छिन्नत्वहेतुतः । देशकालवस्तुपरिच्छेदवत्त्वाद् । दृश्यत्वात् । चिद्भास्यत्वात् । व्यभिचारित्वात् । सुषुप्तावात्मनोभानेप्यस्याभानेन व्यभिचारोबोध्यः । किंचानित्योविज्ञानमयः कोशोनित्योह्यात्माऽतोयं तद्रूपोनेष्यते नित्यत्वानित्यत्वयोः परस्परविरोधेन तयोरेकत्रासमावेशादिति भावः । घटादिवदिति दृष्टान्तस्तु स्फुटत्वान्नोक्तः ॥ २०६ ॥

अतः । न । अयम् । परात्मा । स्याद् । विज्ञानमयशब्दभाक् ॥ विकारित्वात् । जडत्वात् । च । परिच्छिन्नत्वहेतुतः ॥ दृश्यत्वाद् । व्यभिचारित्वात् । न । अनित्यः । नित्यः । इष्यते २०६

विज्ञानमय कोशका स्वरूप और चिदात्माके प्रति उपाधिरूपता वर्णन की है अब उसको आत्मभिन्नताका प्रकार विवेकज्ञानार्थ कहे हैं। अतः इति। आगे जो हेतुसमूह कहने हैं उनसे

यहै विज्ञानमय शब्दवाच्य परमात्मा नहीं है । उन हेतुओंको कहे हैं, कामादि विकारवाला होनेसे, जडत्वधर्म वाला होनेसे, देश काल वस्तुपरिच्छेद वाला होनेसे । दृश्य होनेसे सुषुप्तिमें आत्माके भान होने पर भी विज्ञानका अभानरूप व्यभिचार होनेसे और अनित्य विज्ञानमय नित्य आत्मा कैसे माना जासकताहै किन्तु नहीं मानसकते। नित्यत्व अनित्यत्व धर्मोंका एकधर्मीमें समावेश नहीं बनसके है, इहां घटादिवत् यह दृष्टान्त स्पष्ट होनेसे नहीं कहा है ॥ २०६ ॥

आनन्दप्रतिबिम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता,
स्यादानन्दमयप्रियादिगुणकः स्वेष्टार्थलाभोदयः ॥
पुण्यस्यानुभवे विभाति कृतिनामानन्दरूपः स्वयं,
सर्वोनन्दति यत्र साधु तनुभृन्मात्रः प्रयत्नं विना २०७

विज्ञानमयस्यानात्मत्वन्निरूप्य क्रमप्राप्तमानन्दमयं निरूपयति । आनन्दप्रतिबिम्बेति ।

तमोजृम्भिता । अविद्याविलासलक्षणा सत्त्वप्रधानेति च बोध्यमिति केचित् । आनन्दप्रतिबिम्बचुम्बिततनुः । आनन्दरूपात्मनः प्रतिबिम्बेन चुम्बिता आलिङ्गिता तनुराकृतिर्यस्यां सा तथा चिदानन्दप्रतिबिम्बसमन्वितेति यावत् । आनन्दमयः स्यात् । सच प्रियादिगुणकः प्रियमोदप्रमोदधर्मकः स्वस्येष्टोयोर्थस्तस्य लाभेनोदयआविर्भावोयस्य सः अत्र इष्टदर्शनं प्रियं तल्लाभोमोदस्तद्भोगः प्रमोदइति ज्ञातव्यम् । सच पुण्यस्य परप्रसादहेतुकर्मजन्यादृष्टस्यानुभवे उद्भवे सति कृतिनां कृतसुकृतानां विभाति विशेषतोभाति तत्र तनुभृन्मात्रः सर्वोपि प्राणभृत । प्रयत्नं विना सुखसामग्रीसम्पादनप्रयासमन्तरेणैव आनन्दरूपोभूत्वा स्वयं साधु यथा भवति तथा नन्दति सम्प्रसीदतीत्यर्थः ॥ २०७ ॥

आनन्दप्रतिबिम्बचुम्बिततनुः । वृत्तिः । तमोजृम्भिता । स्यात् ।

आनन्दमयः । प्रियादिगुणकः । स्वेष्टार्थलाभोदयः ॥ पुण्यस्य । अनुभवे । विभाति । कृतिनाम् । आनन्दरूपः । स्वयम् । सर्वः । नन्दति यत्र । साधु । तनुभृन्मात्रः । प्रयत्नम् । विना ॥ २०७ ॥

विज्ञानमय कोशको अनात्मत्व निरूपण करदिया है अब क्रमसे प्राप्त आनन्दमय कोशका निरूपण करे हैं । आनन्द इति । अविद्याका परिणामरूप सत्वगुण प्रधान आनन्दरूप आत्माके प्रतिविम्बकरके युक्तस्वरूप है जिसका सो तामस वृत्ति आनन्दमय कोश होवै है सो प्रिय मोद प्रमोद धर्मवाला है, स्वको इष्टअर्थके लाभ करके जिसका आविर्भाव होवै है। इहां इष्टके दर्शनको प्रिय कहे हैं, तिसका लाभ मोद और भोग प्रमोद कहावै है । परम प्रसाद हेतुकर्मजन्य अदृष्टके आविर्भाव होनेसे जिन्होंने पुण्यकर्म किये हैं उनको विशेषतः भान होवै है सो आनन्दरूप है तिसमें सर्व प्राणधारी जीव सुख सामग्री सम्पादनके यत्न विनाही आनन्दरूप होकर अच्छीतरह सम्यक् प्रसन्न होवै है ॥ २०७ ॥

आनन्दमयकोशस्य सुषुप्तौ स्फूर्तिरुत्कटा ॥
स्वप्नजागरयोरीषदिष्टसंदर्शनादिना ॥ २०८ ॥

आनन्दमयकोशविषयं विशेषमाह । आनन्दमयकोशस्येति । विरोधिवृत्तीनां समस्तानां सान्तःकरणानां सुषुप्तौ लीनत्वादानन्दमयकोशस्य स्फूर्तिः । स्फुरणम् । उत्कटा पूर्णा भवति स्वप्नजागरयोस्त्विष्टसंदर्शनलाभादिना यावदन्तर्मुखावृत्तिस्तावद्भवन्तीस्फूर्तिरीषदेव भवतीत्यर्थः ॥ २०८ ॥

आनन्दमयकोशस्य । सुषुप्तौ । स्फूर्तिः । उत्कटा ॥ स्वप्नजागरयोः । ईषद् । इष्टसंदर्शनादिना ॥ २०८ ॥

आनन्दमय कोशमें कुछ विशेष वर्णन करे हैं । आनन्दमयकोशस्य इति । सर्व विरोधिवृत्तियोंको सुषुप्तिमें लीन

होने करके आनन्दमय कोशका स्फुरण पूर्ण होवै है और स्वप्न जाग्रत्में तौ इष्ट वस्तुके दर्शनादिकरके जितना काल वृत्ति अन्तर्मुख होती है उतना काल स्फुरण अल्प आनन्द का होवै है ॥ २०८ ॥

नैवायमानन्दमयः परात्मा,
सोपाधिकत्वात्प्रकृतेर्विकारात् ॥
कार्यत्वहेतोः सुकृतक्रियाया-
विकारसङ्घातसमाहितत्वात् ॥ २०९ ॥

आनन्दमयं निरूप्य तस्यानात्मत्वं सहेतुकमाह नैवायमिति। आनन्दमयोनैव परात्मा भवितुमर्हति। सोपाधिकत्वात्। प्रियमोदाद्युपाधिविशिष्टत्वात्। प्रकृतेरविद्याया विकारात्कार्यत्वात्। भावप्रधानोनिर्देशः सुकृतक्रियायाः पुण्यकर्मणः। कार्यत्वहेतोः। कार्यत्वादत्र न पुनरुक्तिः। शङ्कया स्वरूपप्रदर्शनार्थत्वादस्य ग्रन्थस्य हेतुस्तु कार्यत्वात्मैवप्रत्येतव्यः। विकारसंघातसमाहितत्वादन्नमयादिषु विकारसङ्घातेषु सम्यगाहितत्वात्स्थापितत्वात्तेष्वेव श्रुतौ पठितत्वादितिथावदानन्दमयइति विकारार्थमयट्श्रुतेश्चेत्यपि बोध्यमित्यर्थः ॥ २०९ ॥

न। एव। अयम्। आनन्दमयः। परात्मा। सोपाधिकत्वात्। प्रकृतेः। विकारात् ॥ कार्यत्वहेतोः। सुकृतक्रियायाः। विकारसङ्घातसमाहितत्वात् ॥ २०९ ॥

अब आनन्दमयको अनात्मत्व कहे हैं। न इति। यह आनन्दमय कोश परमात्मा होनेके योग्य नहीं है प्रियमोदादि उपाधिविशिष्ट होनेसे तथा अविद्याका विकार होनेसे तथा पुण्यकर्मका कार्य होनेसे तथा अन्नमयादि विकारसंघात में सम्यक् स्थापित होनेसे और आनन्दमय शब्दमें विकारार्थक मयट् शब्दका श्रवण होनेसे भी ॥ २०९ ॥

पञ्चानामपि कोशानां निषेधे युक्तितः श्रुतेः ॥
तन्निषेधावधिः साक्षी बोधरूपोवशिष्यते ॥२१०॥

पञ्चकोशापवादस्य ब्रह्मात्मैक्यविज्ञाने उपयोगमाह । पञ्चानामपीति सार्द्धद्वाभ्याम् ।

अन्नमयाद्यानन्दमयान्तानां पञ्चानामपि कोशानामात्मावरकाणां श्रुतेःवक्ष्यमाणाया "अस्थूलमनण्वह्रस्वमदीर्घमि" त्यादिश्रुतेः युक्तितः पुरस्तादभिहितायाअनात्मत्वसाधकानुमानाच्च विनापि च समुच्चयोभवतीत्युक्तेः । निषेधे । आत्मनोऽपवादे अनात्मत्वेन कल्पितत्वे निश्चिते इत्यर्थः । तन्निषेधावधिः कल्पितापवादाधिष्ठानं साक्षी प्रमाणव्यापारमन्तरैव प्रकाशकोबोधरूपश्चैतन्यात्मा । अवशिष्यते । अबाध्यलक्षणोऽव्यवस्थितइति निश्चीयते इत्यर्थः ॥२१०॥

पञ्चानाम् । अपि । कोशानाम् । निषेधे । युक्तितः । श्रुतेः ॥
तन्निषेधावधिः । साक्षी । बोधरूपः । अवशिष्यते ॥ २१० ॥

पञ्चकोशके अनात्मत्व निरूपणका ब्रह्म आत्माकी एकताके ज्ञानमें उपयोग कहे हैं । पञ्चानाम् इति । अन्नमयादि पञ्च आत्माके आवरणका हेतु भूतकोशोंका आत्माकी स्थूलतादिका निषेधक श्रुतिसे और पूर्वोक्त युक्तिसे अर्थात् अनुमानसे आत्मताका अभाव होनेसे कल्पितके निषेधका अधिष्ठान प्रमाणव्यापाराविना प्रकाशक ज्ञानरूप चैतन्य आत्म अबाध्यस्वरूप स्थित है ऐसा निश्चय होता है ॥ २१० ॥

योयमात्मा स्वयंज्योतिःपञ्चकोशविलक्षणः॥
अवस्थात्रयसाक्षीसन्निर्विकारोनिरञ्जनः ॥
सदानन्दःसविज्ञेयः स्वात्मत्वेन विपश्चिता ॥२११॥

यआत्मा स्वयंज्योतिरवेद्यत्वेसत्यपरोक्षव्यवहारयोग्यः पञ्चकोशविलक्षणः पञ्चकोशातीतः । "एतमन्नमयमात्मानमुपसंक्रामती" त्यारभ्यैतमानन्दमयमात्मानमुपसंक्रामतीत्यन्तैः श्रुतिव-

चोऽभिगीतः। निर्विकारोजन्मादिषड्भावविकारवर्जितः निरञ्जनः। अविद्यानावृतः सदानन्दः अविनाश्यानन्दस्वरूपः। सोयमवस्थात्रयसाक्षी जाग्रदाद्यवस्थाप्रकाशकोऽसङ्गोनिर्लेपोविपश्चिता श्रुतियुक्त्यनुभूतिकुशलेन स्वात्मत्वेन सुखात्मत्वेन विज्ञेयः विज्ञातव्यः साक्षात्कर्तव्यइत्यर्थः। तत्साक्षात्कृतये यतितव्यं न प्रमदितव्यमितिभावः ॥ २११ ॥

यः। अयम्। आत्मा। स्वयंज्योतिः। पञ्चकोशविलक्षणः॥ अवस्थात्रयसाक्षी। सन्। निर्विकारः। निरञ्जनः॥ सदानन्दः। सः। विज्ञेयः। स्वात्मत्वेन। विपश्चिता ॥ २११ ॥

जो यह आत्मा अवेद्य होकर अपरोक्ष व्यवहारके योग्य है, पञ्चकोशोंसे अतीत है जन्मादि षड्भाव विकारसे रहित है, अविद्याकृत आवरणरहित है, अविनाशी आनन्दरूप है सोही अवस्थात्रयका साक्षी अर्थात् जाग्रत् आदि अवस्थाका प्रकाशक है, निर्लेप है, श्रुतियुक्ति अनुभवमें कुशल पुरुषने अपना आत्मा है ऐसा साक्षात्कार करना उचित है उसके साक्षात्कारमें यत्न करना चाहिये, प्रमाद न करना चाहिये ॥ २११ ॥

शिष्यउवाच ।

मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पञ्चसु ॥
सर्वाभावं विना किञ्चिन्न पश्याम्यत्र हे गुरो ॥
विज्ञेयं किमु वस्त्वस्ति स्वात्मनात्मविपश्चिता ॥ २१२ ॥

आत्मनि जीवभावस्य संसृतेस्तन्निमित्तोपाधेस्तत्संसर्गस्य च कल्पितत्वं प्रदर्शितं, प्रदर्शितं च पञ्चानामपिकोशानामनात्मत्वम्। आत्मा च तन्निषेधावधिरवशेषितस्तत्रशिष्यः शिष्यान्तराणामपरिपक्वमतीनां शून्यवादिकुसङ्गेन सर्वशून्यविश्वासोमाभूदतःशून्यवादं स्वानभीष्टमपि निषेधार्थमुपादाय शङ्कते मिथ्यात्वेनेति।

हे गुरो एतेषु पञ्चसु कोशेषु मिथ्यात्वेन मिथ्यात्वव्याप्यविकारित्वादिना निषिद्धेषु अनात्मरूपतया व्यवस्थापितेषु तदन्यस्याभ-

तीतेरत्र पिण्डे ब्रह्माण्डे च सर्वाभावं सर्वशून्यं विना न किञ्चिदपि पश्यामि संभावयामि तर्केण विजानामि वा ततश्चात्मविपश्चिता आत्मविचारविचक्षणेन स्वात्मना विज्ञेयं साक्षात्कर्तव्यं वस्तु किमु अस्ति उ इत्यत्रायं वितर्के न किमप्यस्तीति मे भातीति भावः । अयम्भावः सर्वं वस्त्वभावान्तं वस्तुत्वाद्दीपकालिकावदभ्रवद्विद्युद्वच्चेति तर्केण सर्वस्याभावग्रस्तत्वादभावावधिकं दृश्यं सच सर्वाभावोऽविनाशी सर्वाभावत्वाद्व्यतिरेके घटादिवत्तद्विनाशकानुपलम्भाच्च योहि तद्विनाशकः कल्प्येत सोऽपि तत्प्रतियोगिमध्ये प्रविष्टो न तं विहन्तुं शक्नोति तद्विनाशकस्य तदप्रतियोगित्वात्तत्प्रतियोगिनश्च तदविनाशकत्वात्। नच घटप्रागभावप्रतियोगी घटो भवति स्वप्रागभावविनाशकइति प्रकृतेपि तथास्त्विति वाच्यं प्रतियोगिभ्रमेणाभावतिरोभावेपि प्रतियोगिनाऽभावस्य नाशाभावादन्यथाप्रतियोगिनोनित्यत्वापत्तिर्नच नाशेसत्येव तस्य न नित्यत्वमितिवाच्यं नाशस्याप्यभावानतिरेकात्, एकएवह्यखण्डोऽभावः आविर्भवंस्तिरोभवंश्च नाशप्रागभावशब्दाभ्यामभिलप्यते, नहि मध्यस्थेन घटादिना तस्य स्वरूपमन्यथयितुं शक्यते आदावन्ते चासतः प्रतियोगिनोमध्ये आभासमात्रत्वात् उत्पत्तिस्वीकारे तु बन्ध्या सूनुः खप्रसूनादिकमप्युत्पद्येत तस्मान्मध्ये भ्रममात्रजीवनोघटादिर्न स्वाभावं विनाशयितुं पारयति स्वस्यैवासत्वादेवमेव सर्वत्र। तथा च प्रकृते सर्वाभावस्य न प्रतियोगी कश्चिदपि विनाशने समर्थइति सोऽविनाशीसिद्धः। अप्रतियोगिनश्च वस्तुनएवाभावेन विनाशकत्वाभावः नचैवमेव चेतनोप्यविनाशी सेद्धुमर्हति इति वाच्यं तस्य भावत्वे विनाशावश्यं भावाद्घटादिवदन्यथा घटादयोपि तथा स्युरिति न किञ्चिदपि नश्येत् नच चेतनत्वादविनाशित्वं तस्यानुमातव्यम्। चेतनत्वस्य भावत्वव्याप्यत्वेनविनाशनिवारणेऽसामर्थ्यान्नहि यत्सामान्यधर्मेणापद्यतेतत्तद्विशेषधर्मेणापनुद्यतेऽन्यथा जलत्वधर्मेणापाद्यमानशैत्यस्य नदीप्रवाहत्वादिनापनोदापात्तेस्तस्मान्न भावविशेषचेतनत्वेनाविनाशानुमानं चेतने कस्मिंश्चिदपि कर्तुं शक्यते। यदि

१ सर्वाभावम्। २ स्वप्रतियोगिनापि सर्वाभावोविनाश्यते इति भाव्यम्।

चेतनत्वमभावत्वव्यप्योभावत्वविरोधी कश्चिद्धर्मइत्युच्यते तर्हि चेतनस्याभावस्वरूपत्वस्वीकारेण सर्वाभावान्तःप्रवेशइति सोऽविनाशी स्वतः सिद्धोनोप्यभिमतोविनाशकानिरूपणात्। नच सर्वस्यासत्ये सर्वाभावोन सेद्धुं शक्यते इति वाच्यं विपरीताभिधानात् सर्वस्य सत्वे हि न कस्याप्यभावोनिरूपयतुं शक्येत सर्वस्य सत्यत्वादेवासर्वस्यासत्वे तु सुतरां तदभावःसिद्ध्यति,सर्वस्यासत्वादेव। प्रतियोगिसत्वमतिर्हि अभावधियं प्रतिबध्नाति तया तस्याविरोधात्। न प्रतियोग्यसत्वं तेन तस्याअविरोधादिति हृदि निधेहि। नचैवं शशशृङ्गादेरप्यभावापत्तिरिति वाच्यं भावानवबोधनात्। शशशृङ्गादेरभावमापादयमानोदेवानां प्रियोब्रवीतु भवान् किन्तेषां भावं मन्यते नवा नेति चेदभावमभ्युपगच्छन्न भावापादने कथं न लज्जति मन्यते चेत्तर्हि लोकोत्तरप्रज्ञोभवान्दर्शयतु तान्घटादिवच्च तदभावमप्यभ्युपगच्छतु ततोनुचितैव तदभावापत्तिरित्यवेहि। नच सर्वमध्येऽभावस्यापिप्रविष्टत्वात्तस्याप्यभावे सर्वभावासिद्धिरभावे च न सर्वाभावोऽभावस्यैवाभावाभावादिति वाच्यं सर्वशब्दस्य भावमात्रपरत्वेन भावमात्राभावस्यैव सर्वाभावपदार्थत्वात नहि सर्वशब्देनाभावोग्रहीतुं शक्यते भ्रममात्रजीवनैर्भावैः सर्वाभावस्य तिरोहिततया तेन समं सर्वशब्दस्य शक्तिग्रहाभावात्।तदाविर्भावे च सर्वशब्दस्यैवाभावात् प्रयोक्तुश्चाप्यसत्वेन सर्वशब्देन तदभिधानस्यासम्भवात् नच सर्वाभावे प्रमाणस्य प्रमातुश्चासत्वान्न सर्वाभावसिद्धिरितिवाच्यं दत्तोत्तरत्वात्, प्रमातृप्रमाणसत्वे हि सर्वाभावएव न सिद्ध्येत तदसत्वस्यैव सर्वाभावसंपादकत्वात्तस्मात्सर्वस्य प्रमेयस्य तत्साधकयोः प्रमाणप्रमात्रोश्चाभावात्स्वतः सिद्धः सर्वाभावोन प्रमाणप्रमाताएव पेक्षते तस्मात्साधूक्तं सर्वाभावं विना न किञ्चित्पश्यामीतीतिसंक्षेपः ॥ २१२ ॥

मिथ्यात्वेन।निषिद्धेषु।कोशेषु। एतेषु। पञ्चसु ॥ सर्वाभावम्। विना। किञ्चित्। न। पश्यामि। अत्र। हेगुरो ॥ विज्ञेयम्। किमु। वस्तु। अस्ति। स्वात्मना। आत्मविपश्चिता ॥२१२॥

अदृढबुद्धि शिष्योंका शून्यवादीके संगसे सर्वशून्यतावाद

१ अस्माकमपि ।

में विश्वास न होवै इसलिये शून्यवादके खण्डनार्थ शिष्य शून्यवादीकी तर्फसे शङ्का करे है। मिथ्यात्वेन इति। हे गुरुदेवजी! इन पांच कोशोंको आपने मिथ्यात्वके व्याप्यविकारित्वादि हेतुकरके निषेध किया है जिससे इन पञ्चकोशोंको अनात्मता सिद्ध हुई है, इँहा पिण्डमें और ब्रह्माण्डमें अन्य किसी पदार्थकी प्रतीति होवै नहीं, समष्टि व्यष्टिरूपसे पञ्चकोशही दीखते हैं, उनके अभाव होनेसे सर्वाभावरूप शून्यकी ही सिद्धि होती है सो ठीक है, अनुमानसे सर्वके अभावकी ही सिद्धि होवे है, जो जो पदार्थ है सो अभावकरके ग्रसा हुवा है दीपशिखावत्, इस अनुमानसे सर्वशून्यता विनां मैं कुछ नहीं सम्भावना कर सकता हूं। इसकारण आत्माके विचारमें चतुर पुरुषने अपने आत्मरूपसे किस वस्तुका साक्षात्कार करना चाहिये। उ अव्यय वितर्क अर्थमें, अर्थात् कोई स्थिर वस्तु नहीं है सर्वाभाव ही सिद्ध है ॥ २१२ ॥

श्रीगुरुरुवाच ।

सत्यमुक्तं त्वया विद्वन्निपुणोसि विचारणे ॥
अहमादिविकारास्ते तदभावोऽयमप्यनु ॥२१३॥
सर्वे येनानुभूयन्ते यः स्वयं नानुभूयते ॥
तमात्मानं वेदितारं विद्धि बुद्ध्या सुसूक्ष्मया॥२१४॥

एवं शिष्यशङ्कामुपश्रुत्य पाखण्डखण्डनकोविदआचार्यउवाच। सत्यमुक्तमिति ।

हे विद्वन् शून्यवादमन्यदीयमप्यनूद्य प्रश्नोत्तरप्रवर्तनेन जिज्ञासुमतिशोधनप्रकारं जानन्, त्वं विचारणे सत्यवस्तुनिर्णयप्रकारे निपुणोऽसि, स्वयमज्ञइव भूत्वा प्रश्नमापाद्य श्रोतृशङ्काविनिवर्त-

नाभिमुखं देशिकं कर्तुं विचक्षणोऽसि। त्वया सत्यमुक्तं यथा शून्यवादिनां वादस्तथैवानूदितमित्यर्थः। परन्तु त्वं तु तत्र माविनोदेपि विश्वासं कुथास्तेषांवादस्य तर्कमात्रकल्पितस्य मिथ्यात्वादन्यथाग्रहेऽर्थभ्रंशानर्थावाप्तिदोषावाप्तेस्तस्मादहमादिविकाराअहंकारादयोयं विकारास्तथा तदभावस्तेषामहमादीनामभावोयं सौपुप्तानुभवसिद्धस्ते सर्वे भावाभावायेनानुभूयन्ते प्रकाश्यन्ते यश्च स्वयमन्येन नानुभूयते नप्रकाश्यते तं वेदितारं भावाभावसाक्षिणं सुसूक्ष्मया विचारान्तःप्रविष्टया सर्वतोव्यावृत्य साक्षिप्रवणया बुद्ध्या विद्धि साक्षात्कुरु "दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि" रित्युक्तेरित्यर्थः। अयं भावः। सर्वाभावः स्वतः सिद्धोऽविनाशीचेति यदभिधीयते भवता तत्रोच्यते सर्वाभावस्य स्वतःसिद्धत्वं कथमवगतं भवता सर्वस्य साधकाभावादितिचेत्सर्वाभावस्यापि साधकाभावादसिद्ध्या सर्वस्य स्वतःसिद्धिरस्तु कं विशेषं निभालयसे सर्वतदभावयोः, सर्वाभावोऽभिहितानुमानसिद्धइति चेत्तर्हि न स्वतःसिद्धइति मन्तव्यम्। अनुमानासिद्धत्वेपि स्वीकृते सर्वाभावस्य न निस्तारस्तथाहि सर्वाभावसाधकं यदनुमानं मन्यसे तत्स्वाभाथमपि विषयीकरोति न वा नाद्यस्तस्य हेतुना समंव्याप्तेरग्रहात्स्वाभावसिद्धौ स्वस्यैवासिद्धेरसिद्धौ च साध्यव्याप्तेरग्रहान्नस्वाभावगोचरता तस्य यदिच किञ्चिदनुमानं स्वेतरसर्वाभावसाधकं तदभावसाधकन्त्वनुमानान्तरं भविष्यतीत्युच्यते तर्हि तदनुमानान्तरस्यैव सत्वेन न सर्वाभावोऽसिद्धस्तदभावसाधनार्थमनुमानान्तरादिसमाश्रयणे त्वनवस्थापत्त्या न सर्वाभावः सिद्ध्येत किंच सर्वसिद्धिमन्तरा न सर्वाभावोऽभावस्य सप्रतियोगिकत्वादन्यथा भावइत्येव सिद्ध्येत नच तथा भवितुमर्हति। अभावस्य भावप्रतियोगिकनिषेधरूपतया भावासिद्धिमन्तराऽसिद्धेरन्यथा न इत्येव सिद्ध्येत नच तदपि निःशङ्कं सिद्ध्यति निषेधस्य निषेद्धव्यसापेक्षत्वात्।नदसिद्ध्या निषेधस्यासिद्धेःसर्वस्य भावस्य च सिद्ध्यभ्युपगमे तु न सर्वाभावः स्वात्मानं लभेत। किञ्च कुत्रायं सर्वाभावो वर्त्तते तदपि वक्तव्यं किं सर्वाभावाधिष्ठानं भावोऽभावोवा नाभावोऽभावस्य सर्वाभावानतिरेकादाधिष्ठेयस्याधिष्ठानत्वासम्भवादधिष्ठानाधिष्ठेयभावस्य भिन्ननिष्ठत्वान्नापि भावस्तस्य सर्वान्तर्भा-

वे सर्वाभावप्रतियोगिकुक्षिप्रविष्टतयाधिष्ठानत्वासम्भवात् नह्यभावप्रतियोगितामनुभूयाभावाधिष्ठानतामालम्बमानं किञ्चिद्दृष्टचरंप्रतियोग्यनुयोगिभावस्य भिन्नानिष्ठत्वादन्यथासर्वाभावाधिष्ठानं सर्वमेवेति वक्तुमपि भवता शक्यत्वेन न कस्याप्यभावः सेद्धुमर्हेदिति सर्वाभावं साधयितुं प्रवृत्तेन लोकोत्तरप्रज्ञेन भवता सर्वमेवसाधितं भवेदितिदिक् नच निराधिष्ठानएव सर्वाभावोऽभिप्रेतोममेति भवता भणितुं शक्यते निराधिष्ठानस्याभावत्वाभावात् "सद्व्यामभावोनिरूप्यते" इति प्राज्ञसिद्धान्तादन्यथा तस्य निष्प्रतियोगिकत्वस्याप्यभ्युपगमे सति न सर्वस्य किञ्चिच्छिन्नमभावप्रतियोगित्वादेवं चापूर्वोयं निष्प्रतियोगिकोनिरनुयोगिकश्चाभावः सर्वाभावनामा कश्चिद्भवताभ्यूहितोनूनं यस्य महिम्ना न किञ्चिद्भावस्य च्छिन्नं प्रत्युत सएव गगनकमलकल्पः कल्पनामतिवर्तते ननु नापूर्वः सर्वाभावः किन्त्वभावएवाखण्डोदण्डायमानो निखिलभावप्रतियोगिकोऽहङ्काराधिष्ठानः यत्रघटादयः सर्वे प्रतियोगिभावमालभन्ते कल्पितात्मानइति चेत्तर्हि तदधिष्ठानमहङ्कारोऽकल्पितोभवताऽभाणितद्प्रतियोगित्वादन्यथा तदधिष्ठानत्वानुपपत्तिस्तत्र वक्तव्यमहङ्कारोजडात्मा तदधिष्ठानामिति कस्य प्रतीतिगोचरः किंच सुषुप्त्यादौ तदभावाद्यधिष्ठानमन्यदेवेष्टव्यं स्वाभावं प्रतिस्वस्यानधिष्ठानत्वात्तस्मादहङ्कारान्तजडवर्गस्य भावमभावं च भासयंश्चिदात्मैवाधिष्ठानामिति मन्तव्यं भवता ततश्च न सर्वाभावः सिद्ध्यति दृश्याभावस्तु चिदात्मनि सुप्रसिद्धइत्यलम् ॥ किंच सर्वाभावः ससाक्षिकोऽसाक्षिकोवा नान्त्योऽसाक्षिकस्य तस्य नरशृङ्गनिभस्याभ्युपगमे भवतएवकोविदशिरोमणित्वात् किंच तत्साधको भवानपि तत्साक्षी न वा न चेदन्धस्य रूपनिरूपणइव तव सर्वाभावनिरूपणे प्रवृत्तस्य वचसि त्वादृशस्यैव विश्वासो भवेन्नास्मदादेर्विवेकचक्षुषइत्यत्रेहि तत्साक्ष्यसि चेत्तत्प्रतियोगिसर्वमध्ये प्रविष्टोसि न वा प्रविष्टोसि चेन्न तत्साक्ष्यसि स्वाभावं प्रति स्वस्यासाक्षित्वात्स्वाभावसमये स्वस्यैवाभावादन्यथा स्वाभावासिद्धेर्न प्रविष्टश्चेत्तर्हि तवाभ्युपगमविषयोन सर्वाभावस्तवैव सर्वाभावप्रतियोगिभिन्नस्य विद्यमानत्वात् मदतिरिक्तस्य सर्वस्याभावएवसर्वाभावःसएव च ममाभ्युपगमविषयइतिचेत्तर्हि तद्द्रष्टुस्तवाभ्युपगमविषयोन सर्वाभावःकिन्तु दृश्याभावस्त

द्रष्टुरभावस्यासिद्धेरिति दृश्याभावएव सिद्धः सचात्मनस्तव सूक्ष्मात्सूक्ष्मतरस्य भास्यतां भजते त्वन्तु चिदात्मा सर्वात्मा सर्वभावाभावसाक्ष्यसीति सत्पक्षोऽवलम्बनीयोन्यायनिपुणेन त्वयेति संक्षेपः ॥

सत्यम् । उक्तम् । त्वया । विद्वन् । निपुणः । असि । विचारणे ॥ अहमादिविकाराः । ते । तदभावः । अयम् । अपि । अनु ॥ २१३ ॥

अन्यमतको लेकर शिष्यकी शङ्का शून्यवादके खण्डनार्थ है, इस अभिप्रायका ज्ञाता गुरुदेवजी उत्तर देते हैं। सत्यमइति। हे चतुरबुद्धि वाले शिष्य ! तुम सत्य वस्तुके निर्णय करनेमें चतुर हो तुमने ठीक कहा है, शून्यवादीका मत ऐसा ही है जैसा तुमने कहाहै । परंच नास्तिकमतमें विनोदकरके भी न प्रवृत्त होना चाहिये, क्योंकि बुद्धि कलङ्कित होजाती है, अब शून्यवाद का खण्डन श्रवण करो । अहंकारादि जो विकार हैं और उनका जो सुषुप्तिमें यह अभाव है, तिन सर्व भाव अभावका जिसै करके भान होता है उसको जान, ऐसा उत्तर श्लोकके संग अन्वय करलेना ॥ २१३ ॥

सर्वे । येन । अनुभूयन्ते । यः । स्वयम् । न । अनुभूयते ॥ तम् । आत्मानम् । वेदितारम् । विद्धि । बुद्ध्या । सुसूक्ष्मया २१४

अहंकारादि भाव अभाव सर्व जिसकरके अनूभूत होते हैं और जो आप दूसरेकरके अनुभूत नहीं होता तिसै सर्वके ज्ञाता आत्माको अपनी सूक्ष्मबुद्धिसे जान ॥ २१४ ॥

तत्साक्षिकं भवेत्तत्तद्यद्यद्येनानुभूयते ॥
कस्याप्यननुभूतार्थे साक्षित्वं नोपयुज्यते ॥ २१५ ॥

ननु मयाऽननुभूतोऽपि सर्वाभावोमत्साक्षिकोभवत्विति चेत्तत्राह । तत्साक्षिकमिति ।

यद्यद्वस्तु येनसाक्षिणाऽनुभूयते स्वानुभवारूढीक्रियते तत्तद्वस्तु

तत्साक्षिकं ससाक्षी यस्येति तत्तथा तथाचानुभवमात्रप्रयोज्यत्वं साक्षित्वस्येतिभावः। अननुभूतार्थे साक्षिणाऽज्ञातेऽर्थे साक्षित्वमहमस्य साक्षीतिवाङ्मात्रेण विश्वस्तं साक्षित्वं कस्याप्यास्तिकनास्तिकसाधारण्येन प्राणभृन्मात्रस्य नोपयुज्यते न वस्तुसाधकमन्यथा त्वदननुभूतनरशृङ्गस्य साक्षित्वमपि त्वयि विश्वस्तं सदसतोपि स्वरूपं साधयेदिति सतोभावार्थं प्रयतमानेन भवतासतोपिभावः साधितः स्यादितिमाऽननुभूतार्थे साक्षित्वमात्मनि मंस्थाइतिभावः ॥ २१५ ॥

तत्साक्षिकम् । भवेत् । तत् । तत् । यद् । यद् । येन । अनुभूयते ॥ कस्य । अपि । अननुभूतार्थे । साक्षित्वम् । न । उपयुज्यते ॥ २१५ ॥

जो जो पदार्थ जिस जिसकरके अनुभूत होता है सो सो पदार्थ तिस साक्षीकरके सिद्ध होवै है और नहीं अनुभूत किये पदार्थमें किसीको भी साक्षिपना बनै नहीं अर्थात् जो सर्वाभावका कोई साक्षी नहीं है तौ सर्वाभावका कोई साधक नहीं होनेसे सर्वाभाव सिद्ध होवै नहीं और जो सर्वाभावका साक्षी मानोगे तौ भी साक्षीका ही सद्भाव होनेसे सर्वाभाव नहीं सिद्ध होवै है ॥२१५॥

असौ स्वसाक्षिकोभावोयतः स्वेनानुभूयते ॥
अतः परं स्वयं साक्षात्प्रत्यगात्मा न चेतरः॥२१६॥

ननुभावा भावसाक्षिणोभावेपि कश्चित्साक्षीवाच्यः सोसाक्षिकश्चेत्सर्वाभावएवासाक्षिकोमन्तव्योऽविशेषादिति चेत्तत्राह। असाविति। यतोहेतोः स्वेनात्मनैव नान्येनानुभूयतेऽतोऽसौ सर्वाधिष्ठानचिदात्मा स्वसाक्षिकः ॥ ननु सर्वाभावोपि स्वसाक्षिकोभवत्वित्युक्तमेवेत्यतआह । भावइति भावस्य खलु भास्करादेरयं स्वभावोदृश्यते तथा चिदात्मनोपि मन्तुमुचितएवाभावस्य त्वयं स्वभावोऽदृष्टचरत्वादसम्भवीत्यर्थः ॥ ननु भावत्वेनाभाववैलक्षण्यं तु घटादेरप्यस्ति

तथाच तेषामपि स्वसाक्षिकत्वं स्यादितिचेन्नेत्याह। प्रत्यगात्मेति। अयं खलु सर्वान्तरत्वादेवं विधमहिमाभवतु घटादेस्तु बाह्यत्वान्नतथात्वमितिभावः। प्रत्यगात्मनोऽप्यन्योब्रह्मात्मा स्यात्साक्षीतिचेत्तत्राह परंस्वयमिति प्रत्यगात्मैव परंब्रह्म स्वयं नचेतरः परइति सएव स्वसाक्षिकइति सिद्धम्॥ २१६॥

असौ। स्वसाक्षिकः। भावः। यतः। स्वेन। अनुभूयते॥ अतः। परम्। स्वयम्। साक्षात्। प्रत्यगात्मा। न। च। इतरः॥ २१६॥

भाव अभावके साक्षीका कोई साक्षी मानेंगे तौ आगे वैसे ही भानसे अनवस्था होगी, न मानेंगे तौ असाक्षी सर्वाभाव ही क्यों न रहे, इस शङ्काका उत्तर कहे हैं। असौ इति। जिस कारण अपने करके ही सर्वाधिष्ठान चेतन आत्मा प्रतीत होता है सो आत्मा स्वसाक्षिक कहाता है और अभाव पदार्थ स्वप्रकाश अदृष्ट होनेसे स्वप्रकाश बने नहीं, आत्माको भावरूप होनेसे स्वप्रकाशता बने है। यद्यपि अभाव विलक्षण होनेसे घटादिको भी स्वप्रकाशता प्राप्त होवै है तथापि आत्मा सर्वके अन्तर है, उसका ऐसा स्वभाव सम्भव है, घटादिको बाह्य होने से स्वप्रकाशता बाधित है। इसकारण यह आत्मा आपही साक्षात् परब्रह्मरूप है, इससे अन्य इसका साक्षी दूसरा कोई नहीं है॥ २१६॥

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योसौ समुज्जृम्भते,
प्रत्यग्रूपतया सदाहमहमित्यन्तः स्फुरन्नैकधा॥
नानाकारविकारभागिनइमान् पश्यन्नहंधीमुखा-
न्नित्यानन्दचिदात्मनास्फुरतितंविद्धिस्वमेतंहृदि २१७

एतदेव प्रपञ्चयति जाग्रदित्यादिना।

योऽसौ चिदात्मा सदा सर्वास्वप्यवस्थासु अहमित्यहमित्याकारेण सर्वदेहेष्वन्तरेकधा स्फुरति तथाच घटकरकाद्युपाधिभेदेपि गगनमित्येकाकारेणावभासमानस्य गगनस्येव देवतिर्यङ्मनुष्यादिदेहभेदेप्यहमित्येकाकारेण भासमानस्यात्मनः खण्डमुण्डादिव्यक्तिभेदेप्यभिन्नस्य गोत्वस्येवैकत्वं नित्यत्वं च सिद्धमिति भावः। देहभेदवदवस्थाभेदेपि नात्मभेदः स्फुटमेकत्वावभासनादित्याह। जाग्रदित्यादिना जाग्रत्स्वप्नसुषुप्तिषु प्रत्यग्रूपतया सर्वान्तरात्मरूपतया स्फुटतरं समुज्जृम्भते विलसति स्वप्नदृष्टपदार्थानां जाग्रति स्मरणमात्मैकत्वं स्फोरयति आत्मभेदेऽन्येन दृष्टस्यान्येन स्मरणानुपपत्तिरितिभावः। स एव च नानाकारविकारभागिनोनानाविधविकारशालिन इमानहंधीमुखान् अहंबुद्धिविषयानन्तःकरणादीन् पश्यन् प्रमाणमन्तरा प्रकाशयन् हृदि स्वमानसे नित्यानन्दचिदात्मना स्फुरति तमेतमहमिति सामान्याकारेण सर्वत्र देहेषु प्रत्यग्रूपतया चावस्थासु जाग्रदादिषु साक्षिरूपतया च हृदि स्फुरन्तं स्वमात्मानं विद्धि भोःशिष्य निश्चिनु मातदभावं कदापि मंस्थाइतिभावः॥ २१७॥

जाग्रत्स्वप्नसुषुप्तिषु। स्फुटतरम्। यः। असौ। समुज्जृम्भते। प्रत्यग्रूपतया। सदा। अहम्। अहम्। इति। अन्तः। स्फुरन्। नैकधा॥ नानाकारविकारभागिनः। इमान्। पश्यन्। अहंधीमुखान्। नित्यानन्दचिदात्मना। स्फुरति। तम्। विद्धि। स्वम्। एतम्। हृदि॥ २१७॥

इसीको विस्तारसे कहे हैं। जाग्रत् इति। जो चेतन जाग्रत् स्वप्न सुषुप्ति आदि अवस्थामें अहं अहं रूप करके सर्वान्तर आत्मरूपसे स्फुरण होता हुवा स्पष्ट प्रतीत होता है सोही आत्मा नाना प्रकार विकार वाले अहंकार बुद्धि विषय अन्तःकरणादिको प्रमाण व्यापार विना प्रकाशता हुवा अपने हृदय में नित्य आनन्द चेतनरूपकरके प्रकाशता है, अहं ऐसा सामान्याकारसे सर्व देहोंमें प्रत्यग्रूप करके जाग्रत् आदि अवस्था

में साक्षिरूपकरके हृदयमें प्रकाशमान् इस आत्माको जान उसके अभावको कदापि न मान ॥ २१७ ॥

घटोदके बिम्बितमर्कबिम्ब-
मालोक्य मूढो रविमेव मन्यते ॥
तथा चिदाभासमुपाधिसंस्थं,
भ्रान्त्याहमित्येव जडोऽभिमन्यते ॥ २१८ ॥

हृदि स्फुरन्तमित्युक्तं तत्र शुद्धबिम्बस्फुरणमुपदर्शयिष्यन्नज्ञजनानुभवमनुवदति । घटोदके इति ।

यथा मूढो मोहावृतमतिरविवेकिजनो घटोदके घटाभ्यन्तरसलिले बिम्बितं प्रतिबिम्बितमर्कबिम्बमर्कप्रतिरूपकमर्कस्य स्वरूपमालोक्य रविं सूर्यमेव मन्यते जानाति तथोपाधिसंस्थं बुद्ध्युपाधिनिष्ठं चिदाभासं चितश्चेतनस्य शुद्धस्य प्रतिबिम्बमेव भ्रान्त्या भ्रमेण जडो विचाररहितोऽहमित्यभिमन्यते नतु शुद्धं चिद्धातुं बिम्बमात्मानमवगच्छतीत्यर्थः ॥ २१८ ॥

घटोदके । बिम्बितम् । अर्कबिम्बम् । आलोक्य । मूढः । रविम् । एव । मन्यते ॥ तथा । चिदाभासम् । उपाधिसंस्थम् । भ्रान्त्या । अहम् । इति । एव । जडः । अभिमन्यते ॥ २१८ ॥

शुद्ध बिम्बरूप आत्माके बोधार्थ अज्ञानी जनोंके अनुभवका अनुवाद करे हैं। घटोदकम् इति। जैसे अज्ञानकरके आच्छादित बुद्धि अविवेकी पुरुष घटके अन्तर जलमें प्रतिबिम्बित हुवे सूर्यके समान आभासको देखकर उसको सूर्य ही मानते हैं तैसें ही बुद्धि आदि उपाधिमें प्रतिबिम्बरूप चेतन शुद्धके प्रतिबिम्बको भ्रमकरके विचारशून्य पुरुष मैंहूं ऐसा मानता है, शुद्ध जो चेतन बिम्बरूप आत्मा है उसको नहीं जानता ॥ २१८ ॥

घटं जलं तद्गतमर्कबिम्बं,

विहाय सर्वं विनिरीक्ष्यतेऽर्कः ॥
तटस्थएतत्त्रितयावभासकः,
स्वयंप्रकाशोविदुषा यथा तथा ॥ २१९ ॥

उपाधिदृष्ट्याऽन्यथा भानमभिधायोपाधिदृष्टिपरित्यागे तु शुद्धभानमभिदधाति । घटमिति ।

यथा विदुषा विचारचतुरचित्तेन घटं कुम्भं जलं तदभ्यन्तरवर्त्तिसलिलं तद्गतं घटोदकप्राप्तमर्कबिम्बं रविप्रतिबिम्बं च सर्वमेतत्त्रयं विहाय दृष्टिविमुखीविधायैतत्त्रितयावभासकस्तटस्थोनिरुक्तोपाधिसंसर्गशून्यः शून्यस्थोर्कः स्वयंप्रकाशः स्वभासनेभासकान्तरानपेक्षः निरीक्ष्यते निर्दोषनयनाभ्यां स्फुटमालोक्यते तथा ॥२१९॥

घटम् । जलम् । तद्गतम् । अर्कबिम्बम् । विहाय । सर्वम् । विनिरीक्ष्यते । अर्कः ॥ तटस्थः । एतत्त्रितयावभासकः । स्वयम् प्रकाशः । विदुषा । यथा । तथा ॥ २१९ ॥

उपाधिदृष्टिसे अन्यथा भान कहा है अब उपाधिदृष्टिके त्यागसे शुद्ध भानको कहे हैं । घटम् इति । जैसे विचारचतुर चित्तवाले पुरुषने कुम्भ और तिसके अन्तर जल और तिसमें गत प्रतिबिम्बितरूप सूर्य इन तीनोंकी तरफसे दृष्टिको उठाकर इन तीनोंका प्रकाशक उपाधि तीनसे हीन आकाशस्थित स्वके प्रकाशमें प्रकाशकान्तरकी अपेक्षारहित सूर्य जैसे निर्दोष नेत्रोंकरके देखा जाता है तैसे ही २१९

देहं धियं चित्प्रतिबिम्बमेवं,
विसृज्य बुद्धौ निहितं गुहायाम् ॥
द्रष्टारमात्मानमखण्डबोधं,
सर्वप्रकाशं सदसद्विलक्षणम् ॥ २२० ॥

१ आकाशस्थः ।

देहं स्थूलशरीरं धियं बुद्धिमेवं तथा चित्प्रतिबिम्बं चित्चैतन्यस्य प्रतिबिम्बमाभासं विसृज्य विहाय दृष्टयेतिशेषः । गुहायां बुद्धौ निहितं स्थितं द्रष्टारं साक्षिभूतमखण्डबोधम् विनाशविधुरज्ञानस्वरूपं सर्वप्रकाशं स्वाध्यस्तसकलस्फूर्तिनिमित्तं सदसद्विलक्षणम् । सदसद्भ्यां स्थूलसूक्ष्माभ्यां कार्यकारणाभ्यां वा विलक्षणम् विविक्तस्वभावम् ॥ २२० ॥

देहम् । धियम् । चित्प्रतिविम्बम् । एवम् । विसृज्य । बुद्धौ । निहितम् । गुहायाम् ॥ द्रष्टारम् । आत्मानम् । अखण्डबोधम् । सर्वप्रकाशम् । सदसद्विलक्षणम् ॥ २२० ॥

स्थूलशरीर बुद्धि और उसमें चैतन्यका प्रतिविम्बरूप चिदाभासको दृष्टि विमुखकरके बुद्धिरूप गुफामें स्थित साक्षीरूप अविनाशी ज्ञानस्वरूप अपनेमें अध्यस्त जडमात्रके भानमें निमित्त स्थूल सूक्ष्म वा कार्य कारणसे विविक्तस्वरूप आत्माको ॥ २२० ॥

नित्यं विभुं सर्वगतं सुसूक्ष्म-
मन्तर्बहिःशून्यमनन्यमात्मनः ॥
विज्ञाय सम्यङ्निजरूपमेतत्-
पुमान् विपाप्मा विरजोविमृत्युः ॥ २२१ ॥

नित्यम् । विनाशविकलम् । विभुम् । व्यापनशीलं वेदान्तनये तार्किकनयवत्सर्वमूर्तसंयोगित्वं विभुत्वं न तस्य गगनादावपि भावात्किन्तु स्वाध्यस्तसर्वतादात्म्यमेव तदित्याह सर्वगतमिति स्वाध्यस्ते सर्वस्मिन् गगनादौ नागादौ मालादीवानुगतमित्यर्थः । सुसूक्ष्मम् । सूक्ष्मेभ्योऽपि वियदादिभ्यः सूक्ष्ममित्यर्थः । "सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तदि" तिश्रुतेः । अन्तर्बहिःशून्यम् । बाह्याभ्यन्तरभेदरहितमित्यर्थः ॥ "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमि" तिश्रुतेः । आत्मनः स्वस्मादनन्यमभिन्नं 'सतआत्मे'तिश्रुतेः । एतदुपदर्शितलक्षणं निजरूपं स्वस्वरूपं सम्यग्विज्ञाय असं-

द्विधाविपर्यस्तं साक्षात्कृत्य पुमान् पूर्णात्मदर्शी स्वयं न कुतश्चिद्बिभेतीत्यन्वयः । 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने' तिश्रुतेरितिभावः ॥ पुंसो विशेषणानि विपाप्मेत्यादीनि। विपाप्मा विध्वस्तदुष्कृतो विरजा विगतराजसदोषः। विरजो विमृत्युरितिपाठे तु निजरूपविशेषणं विरजइतीति बोध्यं विमृत्युः । विगतविषयासक्तिप्रमादकः ॥ २२१ ॥

नित्यम् । विभुम् । सर्वगतम् । सुसूक्ष्मम् । अन्तर्बहिःशून्यम् । अनन्यम् । आत्मनः ॥ विज्ञाय । सम्यक् । निजरूपम् । एतत् । पुमान् । विपाप्मा । विरजः । विमृत्युः ॥ २२१ ॥

विनाशरहित व्यापक अपनेमें अध्यस्त आकाशादिमें अनुगत आकाशादि सूक्ष्म पदार्थोंसे भी सूक्ष्म बाह्य अन्तर भेदसे रहित अपनेसे अभिन्न ऐसे स्वरूप वाला निज(अपने) संशय विपर्ययसे रहित, साक्षात्कार करके पूर्ण आत्माका ज्ञाता आप किसीसे भयको नहीं प्राप्त होताहै ऐसा आगे श्लोक के संग अन्वय है,सो प्राप्त होनेवाला पुरुष कैसा है जिसके पाप-कर्म नष्ट होगये हैं,राजसदोष भी जिसमें नहीं हैं, विषयासक्ति रूप प्रमाद भी जिसमें नहीं है सो निर्भयपदको प्राप्त होवै है॥

विशोकआनन्दघनोविपश्चि-
त्स्वयं कुतश्चिन्न बिभेति कश्चित्॥
नान्योस्ति पन्था भवबन्धमुक्ते-
र्विना स्वतत्त्वावगमं मुमुक्षोः ॥ २२२ ॥

ततश्च विशोकः शोकमूलाविद्यावरणरहितः । आनन्दघनः आनन्दमात्रात्मा विपश्चित् । नित्यज्ञानस्वरूपस्तद्बोद्धा वा । नचात्र वर्णाश्रमादिविशेषधर्मस्य नियमइत्याह । कश्चिदिति । कोपि वर्णी वाश्रमी वा भवतु सर्वोपि साधनसम्पन्नोऽत्राधिकारी ज्ञातव्यइतिभावः। तथाच " तदुपर्यपि बादरायणः सम्भवादि " तिसूत्रम् ॥

अस्यैवात्मज्ञानस्य मुक्तिनिदानत्वमाह नान्योस्तीति। मुमुक्षोः। बन्धान्मोक्तुमिच्छोः। स्वतत्त्वावगमं विना विहाय अन्यथा अन्यशब्देन पुनरुक्त्यापत्तिः स्वस्वरूपस्य याथात्म्यज्ञानं विना। भवबन्धमुक्तेः। संसारबन्धननिवृत्तेरन्योभिन्नः पन्था मार्गोनास्तीत्यर्थः। 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये' तिश्रुतेरितिभावः ॥२२१॥

विशोकः। आनन्दघनः। विपश्चित्। स्वयम्। कुतश्चित्। न। बिभेर्ति। कश्चित् ॥ न। अन्यः। अस्ति। पन्थाः। भवबन्धमुक्तेः। विना। स्वतत्त्वावगमम्। मुमुक्षोः ॥ २२२ ॥

शोकका मूल कारण अविद्या रूप आवरणरहित आनन्दमात्र स्वरूप नित्य ज्ञानस्वभाव कोईभी वर्णी वा आश्रमी होवै सर्वही पुरुष विवेकादि साधनसम्पन्न ब्रह्मविद्याका अधिकारी है सो किसँसे भी भयको नहीं प्राप्त होता है और मुमुक्षु पुरुषको आत्मज्ञानको त्यागके बन्धानिवृत्तिका कर्म वा उपासना साधन नहीं है ॥ २२२ ॥

ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम् ॥
येनाद्वितीयमानन्दं ब्रह्म सम्पद्यते बुधैः॥ २२३॥

उक्तमेव विवृणोति ब्रह्माभिन्नत्वेति।
ब्रह्मणा निरुपाधिकचैतन्येन सहात्मनोयदभिन्नत्वं वस्तुतोभेदराहित्यन्तस्य विज्ञानं साक्षात्कारः भवमोक्षस्य संसारबन्धमुक्तेः कारणं प्राप्तिहेतुःयेन निरुक्तविज्ञानेन बुधैः ब्रह्मनिष्ठैरद्वितीयं द्वैतवर्जितमानन्दम् ब्रह्म संपद्यते अमानन्दमितिनपुंसकत्वमार्षमानन्दशब्दस्य नियमतः पुंस्त्वात्।बुधइति प्रथमान्तपाठन्तु सम्यक्प्रतीमः

ब्रह्माभिन्नत्वविज्ञानम्। भवमोक्षस्य। कारणम् ॥ येन। अद्वितीयम्। आनन्दम्। ब्रह्म। सम्पद्यते। बुधैः ॥ २२३ ॥

निरुपाधि चैतन्यके साथ जो आत्माका अभेद ज्ञान

साक्षात्काररूप है सो संसारबन्ध निवृत्तिकी प्राप्तिका हेतु है जिसे ब्रह्मात्माके अभेद साक्षात्कार करके ब्रह्मनिष्ठ द्वैतवर्जित आनन्दरूप ब्रह्मको प्राप्त होवै हैं ॥ २२३ ॥

ब्रह्मभूतस्तु संसृत्यै विद्वान्नावर्तते पुनः ॥
विज्ञातव्यमतः सम्यग्ब्रह्माभिन्नत्वमात्मनः॥२२४॥

कर्मोपासनाभ्यां विज्ञानस्य वर्णितस्य विशेषं फलतोवर्णयति ब्रह्मभूतस्त्विति ।

ब्रह्मभूतोनिरस्ताविद्योविगतजीवभावादिर्विद्वान् ब्रह्मनिष्ठः पुनर्ब्रह्मीभावात्पश्चात्संसृत्यै जन्मजरादिबन्धाय नावर्तते नागच्छति ब्रह्माण्डेऽतोहेतोः । पुनरावृत्तिहेतुकर्मादिविहायापुनर्भवायात्मनः स्वस्य ब्रह्माभिन्नत्वं ब्रह्मणा शोधिततत्पदार्थेनाभिन्नत्वमत्यन्ताभेदः सम्यग्विज्ञातव्यमपरोक्षीकर्तव्यमित्यर्थः ॥ २२४ ॥

ब्रह्मभूतः । तु । संसृत्यै । विद्वान् । न । आवर्तते । पुनः॥ विज्ञातव्यम् । अतः । सम्यग् । ब्रह्माभिन्नत्वम् । आत्मनः ॥

ब्रह्मज्ञानकी कर्मउपासनाके फलांशसे विशेपता वर्णन करे हैं । ब्रह्मभूत इति । जिसकी अविद्या निवृत्त हुई है,जीवभाव जिसका दूर होगया है ऐसा ब्रह्मनिष्ठ ब्रह्मभावसे पीछे जन्म जरादि बन्धनके लिये नहीं आता है, ब्रह्माण्डमें इस कारण पुनः आगमनका कारण कर्मको त्यागके शोधित त्वम्पदार्थके साथ आत्माके अत्यन्त अभेद साक्षात्कार करना उचित है ॥ २२४ ॥

सत्यं ज्ञानमनन्तं ब्रह्म विशुद्धं परं स्वतः सिद्धम् ॥
नित्यानन्दैकरसं प्रत्यगभिन्नं निरन्तरंजयति॥२२५॥

किं लक्षणं पुनस्तद्ब्रह्म यदभिन्नत्वं स्वस्य सम्यग्ज्ञातव्यमुपदिश्यते नच ब्रह्म विनालक्षणं मुमुक्षुणा लक्षयितुं शक्यते इत्याशङ्कायामाह । सत्यमिति ।

अत्र लक्ष्यं ब्रह्म सत्यादीनि लक्षणानि इतरव्यवच्छेदो लक्षणार्थस्तथाहि लक्षणवाक्येन तत्तद्विशेषणैरितरव्यावृत्तस्वरूपेण लक्ष्यं प्रत्याय्यते गन्धवती पृथिवीति लक्षणवाक्येन यथा जलादिव्यावृत्तस्वरूपेण पृथिवी प्रत्याय्यते तथात्रापि सत्यज्ञानादिविशेषणैरितरव्यावृत्तस्वरूपेण ब्रह्म प्रत्याय्यते तत्र सत्यज्ञानशब्दौ ब्रह्मणः स्वरूपसमर्पणेन सार्थकावनन्तशब्दस्त्वन्तवद्वस्तुव्यावृत्त्यैव सार्थकः। एवमानन्दशब्दोपि स्वरूपमेवसमर्पयति। नित्यादिविशेषणानितु विनाशादिवारणायैवेत्यलम्। अत्र सत्यादिशब्दार्थानां न परस्परं सम्बन्धो "गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यादि" ति न्याया "न्नहि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके" इति प्रसिद्धेश्च सर्वे सेवकाराजानमिव सत्यादीनि सर्वाणि विशेषणानि ब्रह्मण्येव समनुयन्ति, विशेष्यन्तु ब्रह्मैव, वेद्यतयाविवक्षितत्वात्। यद्यपि बृहत्त्वाद्ब्रह्मेति योगबलेनापि ब्रह्मज्ञातुं शक्यते तथापि योगस्यास्ति किमपि महद्वास्त्विति बोधोत्पादनेनापि सार्थकत्वादितरव्यावृत्तस्वरूपबोधनाथ लक्षणवाक्यमावश्यकम्। तत्राव्याकृतादिब्रह्मशब्दवाच्यतया सजातीयं प्रसिद्धम्। "मम योनिर्महद्ब्रह्म तस्मिन्गर्भन्दधाम्यह" मित्यादौ। परिच्छिन्नत्वेन च विजातीयं घटादिप्रसिद्धम् तस्मात्सजातीयविजातीयवृन्दाद्व्यावृत्तस्य स्वरूपस्य बोधनार्थत्वात् सत्यादिवाक्यं सार्थकमित्यलम्। स्वस्वरूपव्यभिचार्यनृतमुच्यते स्वस्वरूपाव्यभिचारि च सत्यमित्यभिधीयते ततश्च स्वस्वरूपव्यभिचारिविकारमात्रमनृतम्। "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यम्।" इति श्रुतेः। सदेव सत्यमित्यवधारणश्रुतेश्च। ब्रह्मैव सत्यं सत्यमेव च ब्रह्मेत्यन्वयार्थः। अनेन जाड्यव्यावृत्तिः परिच्छेदव्यावृत्तिश्च लभ्यते जडस्य परिच्छिन्नस्य च सर्वस्यानृतत्वात्। ज्ञानं ब्रह्मेत्यनेन चानृतपरिच्छेदव्यावृत्तिर्लभ्यते स्वप्रकाशस्य बाधाविषयत्वात्परिच्छेदग्राहकप्रमाणाविषयत्वादेवमनन्तंब्रह्मेत्यनेनापि जाड्यानृतव्यावृत्तिर्लभ्यते परिच्छिन्नस्यैव जडत्वादनृतत्वाच्च लक्षणमपि चैकैकं वैकल्पिकमदुष्टमेवमन्यत्रापि बोध्यमिति काश्चित्। आचार्यस्यतु मन्दमतिव्युत्पादनायैकमेवेदं लक्षणवाक्यमित्याभिप्रायः॥ सत्यं ज्ञा-

नमनन्तंब्रह्मेति श्रुतिस्थशाङ्करभाष्यपर्यालोचनया तथैव निर्णयादिति बोध्यम् । ज्ञानं ज्ञप्तिरवगतिर्भावसाधनोज्ञानशब्दः सत्यानन्ताभ्यां सह ब्रह्मणोविशेषणत्वान्नहि सत्यताऽनन्तताच ज्ञानस्य करणत्वेऽधिकरणत्वे वोपपद्यते करणाधिकरणयोर्ज्ञानस्य सत्यत्वानन्तत्वयोरदृष्टत्वादद्वैतश्रुतिविरोधापत्तेश्च तच्च ब्रह्मैव ज्ञानं ज्ञानमेव च ब्रह्मेति ज्ञानं ब्रह्मेत्यन्वयार्थः । ज्ञानं चैतन्यं तेन जाड्यव्यावृत्तिः सिद्धा तर्त्कि लौकिकज्ञानवदन्तवन्नेत्याह । अनन्तमिति । अन्तोदेशतः कालतोवस्तुतश्चेति त्रिविधः सनास्ति यस्य तदनन्तंदेशकालवस्तुपरिच्छेदविधुरमित्यर्थः।तत्र देशतोऽन्तोऽत्यन्ताभावप्रतियोगित्वम् । कालतोन्तोद्विविधः प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वं च वस्तुनोन्तोभेदप्रतियोगित्वमितिविवेकः । अत्र प्रथमपादे तैत्तरीयश्रुतिरेव स्वरूपतोदर्शितेति बोध्यम् । परम् । अत्यन्तं विशुद्धमविद्यातत्कार्यमलविनिर्मुक्तं स्वतः सिद्धम् । प्रमाणानपेक्षस्वभावं स्वप्रकाशमिति यावत् । नित्यानन्दैकरसम् । नित्यमविनाशितदेवानन्दस्वरूपमेकरसं कूटस्थं प्रत्यगभिन्नं प्रतीचा शोधितत्वंपदार्थेनाभिन्नम् । 'तत्सृष्ट्वा तदेवानुप्राविशदि' तिश्रुतेः । निरन्तरमवाद्यं चेति शेषः । जयति सर्वोत्कृष्टं मोक्षधामात्मना वर्तते । एतादृशं यच्चैतन्यं तदेव ब्रह्मेति लक्षणवाक्यार्थः ॥ २२५ ॥

सत्यम् । ज्ञानम् । अनन्तम् । ब्रह्म । विशुद्धम् । परम् । स्वतःसिद्धम् ॥ नित्यानन्दैकरसम् । प्रत्यगभिन्नम् । निरन्तरम् । जयति ॥ २२५ ॥

जिस ब्रह्मका आत्माके साथ अभेद साक्षात्कार करना उपदेश कियाहै उसका लक्षण कहे हैं । सत्यम् इति । तीनों कालों में अबाध्यस्वरूप चैतन्यस्वरूप देश काल वस्तु परिच्छेदसे रहित,अत्यन्त विशुद्ध अर्थात् अविद्या तत्कार्यमलसे रहित प्रमाण निरपेक्ष स्वरूप अर्थात् स्वप्रकाश अविनाशि आनन्द एकरस कूटस्थ शोधित जीवस्वरूपसे अभिन्न बाह्य आभ्यन्तर भेदसे

रहित ऐसा जो चैतन्य है सोही ब्रह्म है सो सर्वसे उत्कृष्ट मोक्ष धामरूपसे वर्तमान है ॥ २२५ ॥

सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात् ॥
न ह्यन्यदस्तिकिञ्चित् सम्यक् परमार्थतत्त्वबोधदशायाम् ॥

ननु ब्रह्मैव सत्यमित्युक्तं नोपपद्यते घटः सन् पटः सन्नित्यादिप्रतीतितोघटादेरपि सत्यत्वसिद्धेरतआह । सदिदमिति ।

इदमेव ब्रह्म सत्सत्यं न घटादि सति घटादीनां कल्पितत्वात् तदनुवेधेनैव घटादेः सत्त्वस्फूर्तेरभ्युपगमात् । किंचेदं परमाद्वैतं परममुत्कृष्टंसत्तदेवाद्वैतं सजातीयविजातीयस्वगतभेदशून्यम् अद्वैतत्वमुपपादयति । स्वस्मादिति । स्वस्मादन्यस्य वस्तुनोजगतोऽभावात् । "नेह नानास्ति किञ्चने" ति श्रुतेरिति भावः । ननु न हि दृष्टेऽनुपपन्नमिति न्यायात्प्रत्यक्षादिप्रमाणप्रमितपदार्थानामभावोन सेद्धुमर्हति "नेहनानास्ति किञ्चने" ति श्रुतेस्तु नानापदस्य भावप्रधाननिर्देशत्वमाश्रित्य परमात्मनि नानात्वनिषेधरूपोऽर्थोवर्णनीयोऽन्यथा "तस्माद्वा एतस्मादात्मनआकाशः सम्भूतः" इत्यादिसृष्टिश्रुतीनां मूकीभावापात्तिरित्यतआह । न ह्यन्यदस्तीति । परमार्थतत्त्वबोधदशायाम् । परमार्थतत्त्वस्य परमात्मनोबोधदशायां साक्षात्कारोदयसमये अन्यदधिष्ठानब्रह्माभिन्नं किञ्चित् । स्वल्पमपि । सम्यक्स्वतन्त्रसत्ताकं नह्यस्ति नैवास्ति यद्यपि निरुक्तबोधतः पूर्वमपि तदन्यन्नास्त्येव तथापि तदसत्त्वमज्ञानतोनभातमासीद्बोधोदयेऽज्ञानापनोदे तु तदेवदृश्यासत्त्वमभिव्यज्यते इति भावः।प्रत्यक्षादिप्रमाणान्यपि निरुक्तबोधतः पूर्वमेव घटादिसत्त्वं साधयन्ति "देहात्मप्रत्ययोयद्वत्प्रमाणत्वेन कल्पितः।लौकिकं तद्वदेवेदं प्रमाणन्त्वात्मानिश्चयादि"त्युक्तेः।लौकिकं घटादिज्ञानम् । आआत्मनिश्चयादितिच्छेदः तच्च सत्त्वं शुक्तिरजतादिसत्वसमं प्रतिभासमात्रशरीरमिति "नेह नानास्ती"ति श्रुतेर्नकुताश्चिद्भयमिति न भावप्रधाननिर्देशेनार्थान्तरवर्णनं सम्भवति। सृष्टिश्रुतयस्तु शुद्धे चिदात्मनि जगदारोपपराइति न ताभिरपि विरोधस्तदुक्तं "मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथंचने"

ति तस्मादद्वैतं सत्यमिति सिद्धमितिभावः ॥२२६॥

सद् । इदम् । परमाद्वैतम् । स्वस्माद् । अन्यस्य । वस्तुनः । अभावात् ॥ नहि । अन्यद् । अस्ति । किञ्चित् । सम्यक् । परमार्थतत्त्वबोधदशायाम् ॥ २२६ ॥

"घटःसन्, पटः सन्" इत्यादि प्रतीतिसे घटादि भी सत्य सिद्ध होवें हैं, ब्रह्मही सत्यरूप है कैसे मानेंगे, इस शङ्काका समाधान करेहैं । सत् इति । हे शिष्य! ब्रह्मही सत्य है, सत्रूप ब्रह्ममें घटादि कल्पित होनेसे सत्यरूपतासे प्रतीत होवें हैं और ब्रह्म उत्कृष्टहै। सजातीय विजातीय स्वगत भेदसे रहित है, ब्रह्मसे भिन्न वस्तुका अभाव होनेसे ब्रह्म अद्वैत सत् है । परमार्थरूप ब्रह्मके साक्षात्कार कालमें अधिष्ठानरूप ब्रह्मसे भिन्न स्वल्पभी स्वतन्त्र सत्तावाला कोईपदार्थ नहीं है, ज्ञानसे प्रथम उनकी सत्ता अज्ञानसे दीखती भ्रममात्र है । जगत्की उत्पत्ति कहने वाली श्रुति ब्रह्ममें आरोप दिखावें है जगत्की सत्तामें प्रमाण नहीं है ॥

यदिदं सकलं विश्वं नानारूपं प्रतीतमज्ञानात् ॥
तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषम् ॥२२७॥

अधिष्ठानातिरेकेण विश्वस्याज्ञानकृतं नानात्वं ब्रह्मरूपेण त्वेकत्वमित्याह । यदिदमिति ।

यदिदं सकलं निःशेषंविश्वं जगदज्ञानादधिष्ठानस्य ब्रह्मणोऽबोधान्नानारूपं देवतिर्यङ्मनुष्यादिरूपं प्रतीतं प्रत्यक्षानुमानादिमानतोभातं तत्सर्वं निखिलं प्रत्यस्ताशेषभावनादोषम् । प्रत्यस्ता नित्यनिरस्ता भावना रूपा कल्पना रूपा दोषा यस्मिंस्तत्सर्वकल्पनाविनिर्मुक्तं ब्रह्मैव न ब्रह्मणोऽतिरिच्यमानं किमपि दृश्यतइत्यर्थः ॥२२७॥

यद् । इदम् । सकलम् । विश्वम् । नानारूपम् । प्रतीतम् । अज्ञानात् ॥ तत् । सर्वम् । ब्रह्म । एव । प्रत्यस्ताशेषभावनादोषम् ॥ २२७ ॥

ब्रह्ममात्रकी सत्यताको प्रकारान्तरसे कहे हैं। यद्इति। जो यह सर्व जगत् है सो अज्ञानको अधिष्ठान ब्रह्मके अबोध से देव पशु मनुष्यादि रूपसे प्रत्यक्ष अनुमानादि प्रमाणोंसे प्रतीत होवै है सो सर्व जिसमें त्रिकालमें भी कल्पनारूप दोष नहीं हैं सो ऐसा सर्व कल्पनारहित ब्रह्मरूप ही है, ब्रह्मसे भिन्न कुछ नहीं है॥ २२७॥

मृत्कार्यभूतोपि मृदोन भिन्नः,
कुम्भोस्ति सर्वत्र तु मृत्स्वरूपात्॥
न कुम्भरूपं पृथगस्ति कुम्भः,
कुतोमृषा कल्पितनाममात्रः॥ २२८॥

ननु कथं नानात्मकं विश्वमेकात्मकं स्यान्नानात्वैकत्वयोर्विरुद्धत्वादित्याशङ्कायां नानात्मनोप्येकात्मकत्वे दृष्टान्तमाह। मृत्कार्यभूतोपीति।

कुम्भः कलशोमृत्कार्यभूतोपि मृदोमृत्तिकायाः कार्यभूतोपि कारकव्यापारकृताभिव्यक्तिमानपि अपिशब्दान्नानारूपेण भातोपीत्यपि बोध्यम्। मृदोभिन्नोनास्तिमृदात्मत्वमवधूय कुम्भस्वरूपानुपलब्धेः। ननु पृथुबुध्नोदराद्याकारोघटोऽतिरिच्यतएवातदाकारायामृदइत्यतआह। सर्वत्रास्त्विति। सर्वत्र व्यवहारभूमौ कुम्भरूपं दृश्यमानं घटस्वरूपं मृत्स्वरूपान्नपृथगस्ति पृथुबुध्नोदराद्याकारस्तु भ्रान्तिकल्पितइति भावः। नन्वेवं चेत्तर्हि कुम्भएव नसिद्ध्येत्तदाकारातिरिक्तकुम्भस्वरूपानिरूपणादितिचेत्तत्राह। कुम्भः कुतइति। कुतः कस्मात्कारणात्कुम्भइत्युच्यते नकस्मादपि तथाच तत्स्वरूपासिद्धेरिष्टापत्तिरितिभावः। कथं तर्हि कुम्भशब्दप्रवृत्तिस्तत्राह मृषेति। मिथ्यैव खलु कल्पितनाममात्रः कल्पितश्चासौ कथनमात्रात्मा कुम्भोनपदार्थस्तत्र मृदतिरेकेण सिद्ध्यति मालाऽतिरेकेण फणीवेति भावः॥ एतेन “वाचारम्भणं विकारोनामधेय” मिति श्रुतिः सिद्धान्तःस्फोरितः। एवमेव मृदादीनामपि स्वरूपं स्वस्वकारणव्यतिरेकेण न से-

द्धुमर्हति ततस्तदपि नाममात्रं यत्र च नामावसानं तत्सत्यं ब्रह्म। "यतोवाचोनिवर्तन्तेऽप्राप्य मनसा सह" तिश्रुतेरिति तात्पर्यम् ॥

मृत्कार्य्यभूतः । अपि । मृदः । न । भिन्नः । कुम्भः।अस्ति। सर्वत्र । तु । मृत्स्वरूपात् ॥ न । कुम्भरूपम् । पृथग् । अस्ति । कुम्भः । कुतः । मृषाकल्पितनाममात्रः ॥ २२८ ॥

नानारूप विश्व कैसे एक ब्रह्मरूप होसके है, नानात्व एकत्वका विरोध होनेसे इस आशङ्काको दृष्टान्तसे निवारण करे हैं। मृत्कार्यभूतः इति । जैसे कुम्भ मृत्तिकाका कार्यरूप भी है और नानारूपसे भान भी होताहै परंच मृत्तिकास्वरूपसे भिन्न नहीं हैं, व्यवहारभूमिमें दृश्यमान घटस्वरूप मृत्तिकास्वरूप से पृथक् नहीं है, गोला ग्रीवादि आकार और नाम उसके कल्पित हैं, किस कारणसे कुम्भ कहते हैं, केवल मृत्तिकाका ही मिथ्या कुम्भ नाम कल्पना करी है, अतिरिक्त मृत्तिकासे कुम्भ कुछ वस्तु नहीं है ॥ २२८ ॥

केनापि मृद्भिन्नतया स्वरूपं,
घटस्य संदर्शयितुं न शक्यते ॥
अतोघटः कल्पितएव मोहा-
न्मृदेव सत्यं परमार्थभूतम् ॥ २२९ ॥

नन्ववयवेभ्योऽवयवी भिन्नोऽभ्युपगन्तव्योऽन्यथा सर्वस्य कार्यस्य परमाणुमात्रत्वे महत्त्वैकत्वप्रत्यक्षानुपपत्तिर्नचैकैकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वं दूरस्थस्यैककेशस्याप्रत्यक्षत्वेपि तत्समूहस्येवोपपन्नमितिवाच्यं दूरस्थकेशस्याणुत्वाभावेनादृष्टान्तभूमित्वाद्दूरे तस्याप्रत्यक्षत्वं तु दूरत्वदोषेण नत्वणुतया समीपे तस्यैव प्रत्यक्षत्वात्, परमाणूनां तु महत्त्वाभावेन समूहस्यापि प्रत्यक्षत्वानुपपत्तिस्तदवस्थैवातिरिक्तावयविस्वीकारे तु तस्य महत्त्वा-

त्प्रत्यक्षत्वमव्याहतमिति परमाणुमृदोऽतिरिक्तएव घटइति चेत्त-त्राह । केनापीति ।

केनापि तार्किकेण विधिना वापि घटस्य स्वरूपं पृथुबुध्नोदराद्यात्मकं मृद्भिन्नतया मृत्स्वरूपातिरिक्ततया संदर्शयितुमुपपाद्यप्रकाशयितुं न शक्यते, न पार्यते, सत्यारम्भवादे सति च परमाणुवादाभ्युपगमे पूर्वोक्तशङ्कापिशाचिकाऽवसरं लभेतापि परन्तु वेदान्तमते "वाचारम्भणमि" त्यादिश्रुतेर्विवर्तवादस्यैव सिद्धान्तितत्वान्नशङ्काप्रसरइत्याह अतोघटइति । यतोघटोमृदोभिन्नतया न सिद्ध्यति ततइत्यर्थः । घटोमोहान्मृत्स्वरूपाज्ञानात्कल्पितएव घटस्य कल्पितत्वे किमवशिष्टमित्यतआह मृदेवसत्यमिति । मृदेव मृत्स्वरूपमेव सत्यमवशिष्टं सत्यपदार्थमाह परमार्थभूतमिति । मृत्तिकेत्येव सत्यमिति श्रुतेर्घटापेक्षया मृत्तिकैव परमार्थभूतेतिभावः ॥ २२९ ॥

केन । अपि । मृद्भिन्नतया । स्वरूपम् । घटस्य । संदर्शयितुम् । न । शक्यते ॥ अतः । घटः । कल्पितः । एव । मोहात् । मृद् । एव । सत्यम् । परमार्थभूतम् ॥ २२९ ॥

जलाहरणादि कार्यका साधक होनेसे मृत्तिकासे घट भिन्न मानना उचित है, इस आशङ्काका उत्तर कहे हैं । केन इति । किसी पुरुषकरके वा ब्रह्माकरके[1] भी घटका स्वरूप मृत्तिकाके स्वरूपसे अतिरिक्त दिखानेमें समर्थ नहीं होयाजाता । इस कारणसे मृत्तिकाके स्वरूपके अज्ञानसे घट कल्पित ही है घटको मिथ्या होनेसे घटकी अपेक्षासे मृत्तिकाका स्वरूप ही सत्य अवशिष्ट रहता है सोही घटकी अपेक्षासे परमार्थरूप है । जलाहरणादि कार्य तो अवस्थान्तरापन्न मृत्तिकासे ही होवै हैं, मृत्तिकाभिन्न घटसे होवै नहीं ॥ २२९ ॥

सद्ब्रह्मकार्यं सकलं सदेवं,

---

[1] चतुर्मुखेन ।

तन्मात्रमेतन्न ततोन्यदस्ति ॥
अस्तीति योवक्ति न तस्य मोहो--
विनिर्गतोनिद्रितवत्प्रजल्पः ॥ २३० ॥

दृष्टान्तसिद्धं दार्ष्टान्तिके दर्शयति सदिति ।

एवं तथा सकलं स्थूलं सूक्ष्मं च सद्ब्रह्मकार्यं सद्रूपस्य ब्रह्मणः कार्यं यिवर्तं सद्ब्रह्मैवाधिष्ठानात्मकत्वाद्विवर्तस्य किं भेदाभेदवादिमतवत्स्वरूपेण कारणरूपेण च जगदुभयात्मकमुक्तं नेत्याह तन्मात्रमेतदिति । एतत्कार्यजातं तन्मात्रं[1] सन्मात्रं सदेवेति तथा ततः सतोऽन्यन्नास्ति कारणातिरिक्तकार्यस्वरूपानिरूपणान्नोभयात्मता प्रामाणिकीतिभावः।ननु सतो भिन्नस्यापि जगतः स्वकीयं सत्त्वमस्तीति तार्किका वदन्ति कथमन्यथा घटः सन्निति प्रतीतिः सिद्ध्येत् नहि घटाद्यधिष्ठानब्रह्मणः सत्त्वं सन्निति प्रतीतौ स्फुरति ब्रह्मणोरूपादिहीनत्वेन चाक्षुषादिप्रतीत्यविषयत्वादितिचेत्तत्राह अस्तीति योवादी सत्कार्यं सकलं सतो भिन्नमस्तीति वक्ति ब्रवीति तस्यैवं विरुद्धं ब्रुवतोमोहोऽबोधोन[2] विनिर्गतोन निवृत्तोयतः सतो भिन्नस्य सत्वमित्युक्तेस्तेजोभिन्नस्य तेजस्त्वमित्युक्तेरिव व्याघातरूपत्वात् नच नाना सन्तः सन्ति येनैकसद्भेदस्य सदन्तरे सत्वमेकघटव्यक्तेर्भेदस्य घटान्तरइव भवेत् तार्किकाभिमतसत्तयेव सर्वत्रानुगतेनैकेनैव सता सर्वबाधावधिना ब्रह्मणा सर्वत्र सद्व्यवहारोपपत्तौ नाना सत्तास्वीकारे प्रमाणाभावात् नच रूपादिविहीनस्य ब्रह्मणोन सन् घटइत्यादिचाक्षुषादिप्रतीतिविषयत्वं घटतइति वाच्यं रूपहीनस्यापि कालस्येहेदानीं घटइत्यादिचाक्षुषादिप्रत्यक्षविषयत्ववद्ब्रह्मणोपि सन् घटइत्यादिप्रत्यक्षविषयत्वसम्भवात्प्रतिनियतेन्द्रियग्राह्यग्रहणेच रूपादीनां हेतुत्वात्सर्वप्रतीतिसाधारण्येन स्फुरणस्वभावस्य सतः प्रतीतौ सत्तायाइव रूपाद्यनपेक्षणात् अन्यदीयरूपेणापि सतः स्वर्णस्येव प्रतीतिसम्भवाच्चेति दिक् । ननु कथमेवं सति तार्किकोनिपुणमतिरन्यथा वदति तत्राह निद्रितवदिति । सच निद्रितवत् निद्रादोषावृतबुद्धिमानिव प्रजल्पे वाचालइत्यर्थः ॥ २३० ॥

१ सन्मात्रम् । २ तमसः ॥

सद्ब्रह्मकार्यम् । सकलम् । सत् । एवम् । तन्मात्रम् । एतत् । न । ततः। अन्यत्। अस्ति। अस्ति । इति । यः । वक्ति । न । तस्य। मोहः। विनिर्गतः । निद्रितवत्प्रजल्पः ॥२३०॥

दृष्टान्तसिद्ध अर्थको दार्ष्टान्तिकमें दिखावे हैं। सद्ब्रह्म इति। इसप्रकार स्थूल सूक्ष्म प्रपञ्च सत्रूप ब्रह्मका कार्य (विवर्त) है सो ब्रह्मरूप ही है ,विवर्तको अधिष्ठानरूप होनेसे कार्य समूह सत्रूप ही है तिस सत्रूप ब्रह्मसे अन्यरूप नहीं है, कारणसे भिन्न कार्यका स्वरूप निरूपण होवे नहीं। जो नैयायिक ऐसा कहते हैं कि सत्का कार्य सर्व जगत् सत्से भिन्न है,ऐसा विरुद्ध कथन करने वाले वादीका अज्ञान नष्ट नहीं हुवा है जैसे तेजसे भिन्न तमको तेजरूप कहना विरुद्ध है तैसे ही सत्से भिन्न जगत्को सत्रूप कहना भी विरुद्ध है, इस कारण नैयायिकका कथन निद्राको प्राप्त हुवे पुरुषके कथनवत् प्रलाप मात्र ही है,प्रामाणिक वाक्य नहीं है॥२३०॥

ब्रह्मैवेदं विश्वमित्येव वाणी,
श्रौती ब्रूतेऽथर्वनिष्ठा वरिष्ठा ॥
तस्मादेतद्ब्रह्ममात्रं हि विश्वं,
नाधिष्ठानाद्भिन्नताऽरोपितस्य ॥ २३१ ॥

अत्रार्थेऽथर्वश्रुतिं प्रमाणयति ब्रह्मैवेदमिति ।

ब्रह्मैवेदं विश्वमित्येव । "ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेणाधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठमि" त्यात्मकैवाथर्वनिष्ठाऽऽथर्वणिकानां मुण्डकोपनिषद्गता वरिष्ठा अपौरुषेयतया निरस्तसमस्तदोषा प्रमाणशिरोमणिभूता श्रौती वैदिकी "श्रुतिस्तु वेदो विज्ञेयः" इति स्मृतेः वाणी शब्दप्रमाणलक्षणावाक् ब्रूते इदं विश्वं ब्रह्मेत्येव वदति तस्माच्छ्रुतिप्रमाणात् एतद्विश्वं हि निश्चितं ब्रह्ममात्रं ब्रह्मस्वरूपमेव यतआरोपितस्य शुक्ति-

रजतरज्जुभुजङ्गादेरधिष्ठानाच्छुक्तिरज्ज्वादेर्भिन्नताऽतिरिक्ता सत्ता नेत्यर्थः ॥ २३१ ॥

ब्रह्म । एव । इदम् । विश्वम् । इति । एव । वाणी । श्रौती । ब्रूते । अथर्वनिष्ठा । वरिष्ठा ॥ तस्माद् । एतत् । ब्रह्ममात्रम् । हि । विश्वम् । न । अधिष्ठानाद् । भिन्नता । आरोपितस्य ॥ २३१ ॥

इसी अर्थमें अथर्ववेदकी श्रुतिका प्रमाण दिखावैं हैं । ब्रह्म- इति । यह सर्व जगत् सर्वश्रेष्ठ ब्रह्मरूप ही है ऐसी ही अथर्व वेदकी मुण्डक उपनिषद्में श्रुतिरूप वाणी बोलती है सो श्रुति निर्दोष अपौरुषेय वाक्य होनेसे प्रमाणरूप है तिसै श्रुतिरूप दृढ प्रमाणसे निश्चयकरके यह जगत् ब्रह्मस्वरूप ही है जिस कारण आरोपित रजत आदिकी शुक्ति आदि अधिष्ठानसे अतिरिक्त सत्ता नहीं है ॥ २३१ ॥

सत्यं यदि स्याज्जगदेतदात्मना,
न तत्त्वहानिर्निगमाप्रमाणता ॥
असत्यवादित्वमपीशितुः स्या-
न्नैतत्त्रयं साधु हितं महात्मनाम् ॥ २३२ ॥

ननु ब्रह्मश्रद्धालो! ते ब्रह्म च जगच्चेत्युभयमपि सत्यमस्तु स्वातन्त्र्येण, सर्वेषां पदार्थानां स्वातन्त्र्येण वर्तमानानां सत्यत्वस्य प्रत्यक्षादिप्रमाणसिद्धत्वाज्जगत्सत्यत्वविद्वेषे च ते निमित्तं नोपलभ्यते निर्निमित्तविद्वेषस्य च महात्मनामत्यन्तान्याय्यत्वादिति चेत्तत्राह । सत्यं यदीति ।

जगद्यदि एतदात्मना एषोऽभिहितलक्षणोयआत्मा तद्रूपेण एतज्जगदात्मनात्मस्वरूपेण वा यदि सत्यं न स्यात्किन्तु स्वयमेव सत्यं स्यात्तर्हि वक्ष्यमाणं दोषत्रयं स्यात् । अथवा आत्मना स्वरू-

पेणैवैतज्जगद्यदि सत्यं स्यात्तर्हि दोषत्रयं स्यात्। न तत्त्वहानिः तत्त्वस्य वस्तुभूतस्य जगतोऽद्वैतस्य हानिर्न स्यादित्यद्वैतासिद्धिः स्यात्। पूर्वत्र व्याख्यानेपि तत्त्वस्याद्वैतस्य हानिः स्यात्। आत्मान्यस्य सतोविद्यमानत्वे 'ब्रह्मैवेदममृतं पुरस्ता' दित्यादिश्रुत्यभिहितस्याद्वैततत्त्वस्य हानिर्लोपोऽवश्यं स्यादित्यर्थः। यद्वा। एतज्जगदात्मना सह सात्मकमेव सत्यं न स्यादात्मा च जगच्चेत्युभयमपि मिथ्या स्यात्तदा शून्यमेव सर्वाभावात्मकं स्यात्तर्हि तत्त्वहानिः सत्याधिष्ठानालाभस्तर्हि निरधिष्ठानभ्रमोऽनुपपन्नोऽभ्युपगतोभवेदित्यर्थः। तथाच सति निगमाप्रमाणता जगद्भ्रमव्यपोहेनाधिष्ठानतत्त्वाद्वैतबोधकानां ब्रह्मैवेदं नेह नानास्तीत्यादीनां निगमानां वेदवचसामप्रमाणताऽबाधितार्थविषयकप्रमानुत्पादकता स्यादीशितुश्च निगमोपदेष्टुरीशस्यासत्यवादित्वं मिथ्याप्रलापित्वमपि स्यादितीश्वरस्येश्वरतैव हापिता भवता स्यादिति दोषत्रयमापतेत्तस्माद्ब्रह्मात्मना जगत्सत्यं स्वरूपेण तु मृषेत्येव वैदिकमतमास्थेयमिति भावः। ननु नैतद्दोषत्रयं किन्तु गुणत्रयं त्वन्तु भ्रमेणान्यथा ब्रवीषि तथाहि तत्त्वस्यैवाभावेन न तत्त्वहानिर्दोषोनहि वन्ध्यात्मजहानिर्दोषः कस्यापि सम्मतः तत्त्वस्य स्वतः सिद्धिः परतोवा स्वतश्चेद्वेदवैयर्थ्यं तत्त्वस्य स्वतएव सिद्धत्वात्स्वतः सिद्धे वेदप्रमाणस्याप्रवृत्तेश्च प्रवृत्तौ स्वतः सिद्धत्वव्याघातः नापि परतः सिद्धिस्त्वन्मते परस्यैवाभावेन तेन[1] तस्यासाधनादन्यथाऽद्वैतासिद्धिस्तस्मात्स्वतः परतोवा तत्त्वस्य सिद्ध्यभावात्तत्त्वस्यैवाभावेन न तत्त्वहानिर्दोषायते किन्तु सर्वाभावसाधकतया गुणायतएवेतिमन्तव्यम्। नापि निगमस्याप्रमाणतादोषस्तत्प्रमाणता हि प्रमितिकरणता प्रमितिश्चाबाध्यार्थविषयकं ज्ञानं तत्रार्थस्याबाध्यत्वमेवासिद्धमिति। कुतस्तज्ज्ञानस्य प्रमात्वं कुतश्च तत्करणस्य प्रमाणत्वमिति भ्रमकरणानां निगमानामप्रमाणता गुणायतएव न दोषायते। निगमप्रमाणतयाऽर्थस्याबाध्यत्वमबाध्यार्थज्ञानकरणतया च निगमप्रमाणतेत्यन्योन्याश्रयदोषदुष्टा चैषा प्रमाणता नच मानान्तरेणाबाध्यत्वं तत्त्वस्य[2] प्रसाध्य तस्मिन्निगमप्रमाण्यं। निगममात्रप्रमेयत्वस्य।

१ परेण। २ तत्त्वस्य ॥

रजतरज्जुभुजङ्गादेरधिष्ठानाच्छुक्तिरज्ज्वादेर्भिन्नताऽतिरिक्ता सत्ता नेत्यर्थः ॥ २३१ ॥

ब्रह्म । एव । इदम् । विश्वम् । इति । एव । वाणी । श्रौती । ब्रूते । अथर्वनिष्ठा । वरिष्ठा ॥ तस्माद् । एतत् । ब्रह्ममात्रम् । हि । विश्वम् । न । अधिष्ठानाद् । भिन्नता । आरोपितस्य ॥ २३१ ॥

इसी अर्थमें अथर्ववेदकी श्रुतिका प्रमाण दिखावैं हैं । ब्रह्मइति । यह सर्व जगत् सर्वश्रेष्ठ ब्रह्मरूप ही है ऐसी ही अथर्ववेदकी मुण्डक उपनिषद्में श्रुतिरूप वाणी बोलती है सो श्रुति निर्दोष अपौरुषेय वाक्य होनेसे प्रमाणरूप है तिसै श्रुतिरूप दृढ प्रमाणसे निश्चयकरके यह जगत् ब्रह्मस्वरूप ही है जिस कारण आरोपित रजत आदिकी शुक्ति आदि अधिष्ठानसे अतिरिक्त सत्ता नहीं है ॥ २३१ ॥

सत्यं यदि स्याज्जगदेतदात्मना,
न तत्त्वहानिर्निगमाप्रमाणता ॥
असत्यवादित्वमपीशितुः स्या-
न्नैतत्त्रयं साधु हितं महात्मनाम् ॥ २३२ ॥

ननु ब्रह्मश्रद्धालोऽस्ते ब्रह्म च जगच्चेत्युभयमपि सत्यमस्तु स्वातन्त्र्येण, सर्वेषां पदार्थानां स्वातन्त्र्येण वर्तमानानां सत्यत्वस्य प्रत्यक्षादिप्रमाणसिद्धत्वाज्जगत्सत्यत्वविक्षेपे च ते निमित्तं नोपलभ्यते निर्निमित्तविक्षेपस्य च महात्मनामत्यन्तान्याय्यत्वादिति चेत्तत्राह । सत्यंयदीति ।

जगद्यदि एतदात्मना एषोऽभिहितलक्षणोऽयआत्मा सद्रूपेण एतज्जगदात्मनात्मरूपेण वा यदि सत्यं न स्यात्किन्तु स्वयमेव सत्यं स्यात्तर्हि वक्ष्यमाणं दोषत्रयं स्यात् । अथवा आत्मना स्वरू-

पेणैवैतज्जगद्यदि सत्यं स्यात्तर्हि दोषत्रयं स्यात्। न तत्त्वहानिः तत्त्वस्य वस्तुभूतस्य जगतोऽद्वैतस्य हानिर्न स्यादित्यद्वैतासिद्धिः स्यात्। पूर्वत्र व्याख्यानेपि तत्त्वस्याद्वैतस्य हानिः स्यात्। आत्मान्यस्य सतोविद्यमानत्वे 'ब्रह्मैवेदममृतं पुरस्ता' दित्यादिश्रुत्यभिहितस्याद्वैततत्त्वस्य हानिर्लोपोऽवश्यं स्यादित्यर्थः। यद्वा। एतज्जगदात्मना सह सात्मकमेव सत्यं न स्यादात्मा च जगच्चेत्युभयमपि मिथ्या स्यात्तदा शून्यमेव सर्वाभावात्मकं स्यात्तर्हि तत्त्वहानिः सत्याधिष्ठानालाभस्तर्हि निरधिष्ठानभ्रमोऽनुपपन्नोभ्युपगतोभवेदित्यर्थः। तथाच सति निगमाप्रमाणता जगद्भ्रमव्यपोहेनाधिष्ठानतत्त्वाद्वैतबोधकानां ब्रह्मैवेदं नेह नानास्तीत्यादीनां निगमानां वेदवचसामप्रमाणताऽबाधितार्थविषयकप्रमानुत्पादकता स्यादीशितुश्च निगमोपदेष्टुरीशस्यासत्यवादित्वं मिथ्याप्रलापित्वमपि स्यादितीश्वरस्येश्वरतैव हापिता भवता स्यादिति दोषत्रयमापतेत्तस्माद्ब्रह्मात्मना जगत्सत्यं स्वरूपेण तु मृषेत्येव वैदिकमतमास्थेयमिति भावः। ननु नैतद्दोषत्रयं किन्तु गुणत्रयं त्वन्तु भ्रमेणान्यथा ब्रवीषि तथाहि तत्त्वस्यैवाभावेन न तत्त्वहानिर्दोषोनहि वन्ध्यात्मजहानिर्दोषः कस्यापि सम्मतः तत्त्वस्य स्वतः सिद्धिः परतोवा स्वतश्चेद्वेदवैयर्थ्यं तत्त्वस्य स्वतएव सिद्धत्वात्स्वतः सिद्धे वेदप्रमाणस्याप्रवृत्तेश्च प्रवृत्तौ स्वतः सिद्धत्वव्याघातः नापि परतः सिद्धिस्तवमते परस्यैवाभावेन तेन तस्यासाधनादन्यथाऽद्वैतासिद्धिस्तस्मात्स्वतः परतोवा तत्त्वस्य सिद्ध्यभावात्तत्त्वस्यैवाभावेन न तत्त्वहानिर्दोषायते किन्तु सर्वाभावसाधकतया गुणायतएवेतिमन्तव्यम्। नापि निगमस्याप्रमाणतादोषस्तत्प्रमाणता हि प्रमितिकरणता प्रमितिश्चाबाध्यार्थविषयकं ज्ञानं तत्रार्थस्याबाध्यत्वमेवासिद्धमिति। कुतस्तज्ज्ञानस्य प्रमात्वं कुतश्च तत्करणस्य प्रमाणत्वमिति भ्रमकरणानां निगमानामप्रमाणता गुणायतएव न दोषायते। निगमप्रमाणतयाऽर्थस्याबाध्यत्वमबाध्यार्थज्ञानकरणतया च निगमप्रमाणतेत्यन्योन्याश्रयदोषदुष्टा चैषा प्रमाणता नच मानान्तरेणाबाध्यत्वं तत्त्वस्य प्रसाध्य तस्मिंन्निगमप्रमाण्यं। निगममात्रप्रमेयत्वस्य।

१ परेण। २ तत्त्वस्य॥

'तं त्वौपनिषदं पुरुषं पृच्छामी' त्यादिनिगमसिद्धस्य विलोपापत्तेः प्रमाणान्तरेणार्थस्याबाध्यत्वनिश्चयेन निगमनैष्फल्यापत्तेरनुवादकत्वापत्तेश्च प्रमाणान्तरस्यापि कथं प्रमाणतेति पर्यनुयोगापत्तेश्चेति न निगमाप्रमाणतादोषः, किन्तु सर्वाभावसम्पादकतया गुणएव तत्प्रमाणत्वे हि न सर्वाभावः स्वात्मानं लभते तदप्रमाणत्वे तु प्रतियोगिसाधकप्रमाणाभावेन सर्वाभावःस्वतःसिद्धइति बोध्यम्। एवं निगमप्रणेतुरपीशत्वाभावेनासत्यवादित्वस्य गुणत्वादन्यथा पूर्वोक्तदिशासर्वाभावासिद्धेर्वेदप्रमाणत्वेन तत्प्रणेतुरीशत्वमीशप्रणीतत्वेन च तत्प्रामाण्यमित्यन्योन्याश्रयदोषेण नेश्वरासिद्धिरात्मानं लभते प्रमाणान्तरेणेश्वरसिद्धावभ्युपगतायां तु वेदप्रामाण्यमसिद्धं प्रमाणान्तरस्यैव च कथमप्रसिद्धेश्वरे प्रामाण्यमिति पर्यनुयोगप्रसक्तेरपरिहारादिति न निगमप्रणेतुरसत्यवादित्वं दोषः किन्तु गुणएवेति चेन्नैवमित्याह । नैतत्त्रयमिति।एतत्पूर्वाभिहितमेतेषां त्रयमिति वा। त्रयं तत्त्वहानिर्निगमाप्रमाणतेशितुश्चासत्यवादित्वमिति दोषत्रयं महात्मनां विचारगम्भीरचेतसां न साधुहितम्। साधु च हितं च न भवति किन्तु विचारेण विनैव कल्पितमात्रत्वादसाधु अनर्थप्रदत्वाद्वाऽसाधु हितस्य परमार्थस्य भ्रंशनहेतुत्वादाहितं च भवतीत्यर्थस्तथाहि न तावत्तत्त्वासिद्धिःस्वतःसिद्धत्वात्तत्त्वस्य तत्प्रत्याख्यातुरभावादेव च तत्सिद्धिर्नच ममैव प्रत्याख्यातुः सत्त्वात्कथं प्रत्याख्यातुरभावइति वाच्यं त्वत्सिद्धेरेव तत्त्वसिद्धेरन्यथा कथमहं प्रत्याख्यातेत्याचष्टे भवान्विचक्षणः। नहि त्वं तत्त्वतोऽभिन्नोयेन स्वसिद्धिमता त्वया तत्त्वासिद्धिः साधयितुं शक्यते सर्वात्मत्वात्तत्त्वस्य किञ्चिदात्मनः परिच्छिन्नत्वे तत्त्वाभावत्वात् । सर्वात्मत्वे द्वैतसिद्ध्याऽद्वैततत्त्वासिद्धिरितिचेन्न सर्वात्मत्वादेवाद्वैतसिद्धेर्निष्प्रत्यूहत्वात् किञ्चिदात्मत्वे हि ततोऽन्यदपि किञ्चिदवशिष्येत सर्वात्मत्वे तु सर्वस्याप्यविद्याकल्पितस्यैतदात्मन्यन्तर्भावादद्वैतसिद्धिः स्वतःसिद्धा मन्तव्या। नच स्वतःसिद्धत्वे तत्त्वस्य निगमवैयर्थ्यं स्वतः सिद्धत्वज्ञप्त्यर्थत्वादन्यथा स्वतः सिद्धत्वस्यापि दुर्बोधत्वापत्तेः। अत्र चात्मानमेव स्वतः सिद्धमपि स्वतःसिद्धत्वे

१ त्रयोवेदस्यकर्तारोभण्डधूर्तनिशाचराइत्युक्तेरितिभावः ॥

विवदमानं निगमाविचारविकलमालोक्य तद्व्यतिरेकं निश्चिनु तस्मात्तत्त्वं स्वतःसिद्धमिति तदसिद्धिर्महादोषइत्यवेहि प्रथमस्यासाधुत्वं दोषस्य। मोक्षस्य तत्त्वात्मत्वात्तत्त्वासिद्ध्या मोक्षासिद्धिर्व्यावहारिकस्यापि सुखस्य तत्त्वमन्तरास्फुरणासिद्ध्या च तत्त्वासिद्धिरिति बोध्यमिति दिक्। एवं निगमाप्रमाणतापि दोषएव प्रमाणता हि प्रमितिकरणतैव तत्त्वज्ञानं च तत्त्वस्याबाध्यत्वादबाध्यार्थविषयकतया प्रमैव तत्त्वस्याबाध्यत्वं च बाधकानिरूपणात् सर्वेषां प्रमाणानां तत्त्वाधीनसत्ताकतया तत्त्वबाधने सामर्थ्यविकलत्वात्तस्य स्वतःसिद्धत्वेन तत्रसाधकतया बाधकतया वा कस्यापि प्रमाणस्याप्रवृत्तेः प्रमातुश्च प्रत्याख्यातुर्गतिरुक्तैव तस्मात्तत्त्वस्य बाधकाभावेनाबाध्यत्वादबाध्यार्थप्रमाकरणत्वेन निगमप्रमाणता सिद्धैव शब्दप्रामाण्यापवादकस्य भ्रमप्रमादविप्रलिप्सादेरभावेन निगमप्रामाण्यस्य व्यवस्थितत्वाच्चेति तदप्रमाण्ये प्रमानुत्पत्त्या जन्माद्यनर्थप्राप्तिरिति निगमाप्रामाण्यमसाधु, तथैव मोक्षासिद्धिरिति निगमाप्रामाण्यमहितं चेति चिन्त्यम्। वेदप्रणेतुश्चेशत्वं सर्वज्ञत्वाद्योहि यत्प्रणेता स ततोऽप्यधिकतरार्थविज्ञानइति प्रसिद्धं लोके वेदानां च सर्वार्थावद्योतिनामनेकशाखाभेदभिन्नानामनेकविद्यास्थानोपबृंहितानां कर्ताकथमनीशोऽसर्वज्ञः सम्भाव्येत तस्यासत्यवादित्वमपि वेदाविश्वासोत्पादनद्वारात्तत्त्वमार्गविमुखताकरत्वादसाधु परमार्थाप्रापकत्वाच्चाहितमिति ध्येयम् पूर्वव्याख्यानद्वये तु दोषत्रयस्यानिष्टत्वमिष्टविघातकत्वं च स्पष्टमेवेति विज्ञातव्यमित्यलम् ॥ २३२ ॥

सत्यम्। यदि। स्याद्। जगद्। एतद्। आत्मना। न। तत्त्वहानिः। निगमाप्रमाणता॥ असत्यवादित्वम्। अपि। ईशितुः। स्यात्। न। एतत्। त्रयम्। साधुहितम्। महात्मनाम्॥ २३२॥

जो तुमको सत्‌रूप ब्रह्ममें अतिश्रद्धा है तो ब्रह्म भी सत्य रहो, जगत् भी स्वतन्त्र सत् रहो, अनेक सत्पदार्थ प्रत्यक्षादि प्रमाणों से दीखते हैं इस शङ्काका समाधान करे हैं। सत्यम् इति।

जो कभी यह जगत् अपने स्वरूपसे ही स्वतन्त्र सत् होवे तो सत्य वस्तुकी निवृत्ति न होनेसे आत्मावत् जगत्की निवृत्ति न होगी और ज्ञानसे संसारकी निवृत्तिको कथन करने वाले वेदवाक्य भी अप्रमाण होजावेंगे और वेदवाक्योंका उपदेशक ईश्वरको भी मिथ्यावादिता प्राप्त होगी, महात्मा विचारवान् पुरुषोंको यह तीनें दोष अंगीकार करने अच्छे नहीं हैं २३२

ईश्वरोवस्तुतत्त्वज्ञोन चाहं तेष्ववस्थितः ॥
नच मत्स्थानि भूतानीत्येवमेव व्यचीक्लृपत् २३३॥

ननु भवतु निगमानां प्रणेता सत्यवादी जगदीश्वरो भवतु च निगमाः प्रमाणं तथापि नाद्वैतं निगमानां तात्पर्यगोचरो यद्धानिस्तत्त्वहानिनाम्ना दोषत्रये गणिता 'द्वा सुपर्णा सयुजा सखाये'ति प्रभृतिनिगमेषु जीवेशाद्वैताभिधाना'न्मृत्तिकेत्येव सत्यमि'ति निगमादौ मृत्तिकादीनामपि ब्रह्मवदेवाधिष्ठानत्वसत्यत्वयोरभिधानाच्चेत्यत आह । ईश्वरइति ।

ईश्वरस्तदवतारः। 'एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् ।'इत्युक्तेः । वस्तुतत्त्वज्ञः वेदतात्पर्यगोचरवस्तुस्वरूपाभिज्ञः।'मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना । मत्स्थानि सर्वभूतानी' त्यात्मनि ब्रह्मरूपे जगदारोपमभिधाय 'नचाहं तेष्ववस्थित'इत्यपवादमेतदग्रेपि नचमत्स्थानि भूतानी त्यपवादमेवाद्वैततत्त्वस्य निगमगोचरस्य बोधनार्थं समर्थितवानित्यर्थः । तथाच निगमतात्पर्यगोचरो यदि तत्त्वं द्वैतं स्यात्तर्हि तदपवादं भगवान्नाभ्यधादभिहितस्तु तदपवादोऽद्वैतमेव तत्त्वमवगमयति। "द्वासुपर्णे" तिश्रुतिस्तु सोपाधिकनिरुपाधिकयोः स्वरूपं जीवेशयोरुपदर्श्य सोपाधिकस्य भोक्तृत्वमनुवदन्ती निरुपाधिकस्याभोक्तृत्वं ग्राहयन्ती न द्वैततात्त्विकत्वे प्रामाण्यमालम्बते । यद्वा पैङ्गिरहस्यब्राह्मणव्याख्यया बुद्धिक्षेत्रज्ञयोः स्वरूपबोधने पर्यवसन्ना श्रुतिर्नद्वैततत्त्वे पर्यवस्यति तथाहि। 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीती'त्यनश्नन्नन्योऽभिपश्यति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति तदेतत्सत्त्वंयेनस्वप्नंपश्य-

त्यश्चयोयं शारीरउपद्रष्टा सक्षेत्रज्ञइती'ति । व्यचीक्लृपत् समर्थितवान् कृपूसामर्थ्ये इति धातुपाठात् ॥ २३३ ॥

ईश्वरः । वस्तुतत्त्वज्ञः । न । च । अहम् । तेषु । अवस्थितः ॥ न । च । मत्स्थानि । भूतानि । इति । एवम् । एव । व्यचीक्लृपत् ॥ २३३ ॥

ईश्वरका अवतार भगवान् श्रीकृष्णदेव वस्तुके स्वरूपका यथार्थ ज्ञाता, सर्व जगत् मेरेकरके व्याप्त है, मैं सर्वका अधिष्ठान हूं ऐसा अपने स्वरूपमें जगत्का आरोप कहके फिर कहते हैं। मैं जगत्में स्थित नहींहूं, भूत मेरेमें स्थित नहीं हैं ऐसा ही अपवाद (निषेध) गीतामें कहते भये हैं । इस वाक्यसे अधिष्ठानकी सत्तासे जगत्सत्ता को मानता है, स्वतन्त्र जगत्सत्ता का ईश्चर भी निषेध ही समर्थन करता भया है ॥ २३३॥

यदि सत्यं भवेद् विश्वं सुषुप्तावुपलभ्यताम् ॥
यन्नोपलभ्यते किञ्चिदतोऽसत्स्वप्नवन्मृषा ॥२३४॥

विश्वस्यात्मना सत्यत्वमपाकृतमपि स्फुटबोधनाय पुनरपाकरोति । यदीति ।

विश्वं जगद्यदि सत्यं स्वातन्त्र्येण सत्तावद्भवेत्स्यात्तदा सुषुप्तौ बाह्यान्तःकरणलयावस्थायामप्युपलभ्यतां मनीयतां सत्यस्य सार्वदिकत्वादिति भावः। यद्यतस्तत्र किञ्चित्स्थूलं सूक्ष्मं वा जगन्नोपलभ्यतेऽतस्स्वप्नवत् स्वप्नप्रतीतगजादिवद्विश्वमसदसत्पदार्थमाह मृषेति मिथ्येत्यर्थः ॥ २३४ ॥

यदि । सत्यम् । भवेद् । विश्वम् । सुषुप्तौ । उपलभ्यताम् ॥ यत् । न । उपलभ्यते । किञ्चिद् । अतः । असत् । स्वप्नवत् । मृषा ॥ २३४ ॥

पूर्वोक्तका स्पष्ट विस्तारसे निरूपण करे हैं । जगत् जो कभी स्वतन्त्र सत्ता वाला होता तव अन्तर बाहरके करणोंका लय

अवस्थारूप सुषुप्तिमें भी प्रतीत होता, सत्य वस्तुको सर्वदा विद्यमान होनेसे जिस कारण सुषुप्तिमें स्थूल सूक्ष्म जगत् किञ्चित् भी नहीं प्रतीत होता इस कारण स्वप्नके प्रतीत पदार्थोंवत् सर्वजगत् असत् मिथ्यारूप है, इसकी अधिष्ठान सत्तासे ही सत्प्रीति होवै है ॥ २३४ ॥

अतः पृथङ्नास्तिजगत्परात्मनः,
पृथक्प्रतीतिस्तु मृषा गुणादिवत् ॥
आरोपितस्यास्ति किमर्थवत्ता-
धिष्ठानमाभाति तथा भ्रमेण ॥ २३५ ॥

विश्वस्य स्वातन्त्र्येण सत्त्वाभावे फलितमाह । अतइति ॥

यतोजगन्मिथ्या ततः परमात्मनः विशुद्धचेतनतः पृथङ्नास्ति ननु पार्थक्यप्रतीतेरनुभवसिद्धायाः का गतिस्तत्राह पृथक्प्रतीतिस्त्वति ।गुणादिवत्गगनादौ नीलगुणादिप्रतीतिवत्परात्मनोजगतः पृथक्प्रतीतिस्तु मृषा मिथ्यैव ब्रह्मैवेदमिति सावधारणश्रुतेरिति भावः । नन्वारोपितस्यापि तात्कालिकी सत्ता वाच्येति चेन्नत्याह। आरोपितस्येति । आरोपितस्य भ्रमविषयस्य । अर्थवत्ता अर्थेन परमार्थेन सता तुल्योऽर्थवान् तस्य भावस्सत्तापरमार्थतुल्यता स्वतन्त्रसत्तावत्तेति यावत् आस्ति किं किमाक्षेपे नास्तीत्यर्थः कथं तर्हि भानमतआह। अधिष्ठानमिति। तथाभ्रमेणारोपितरूपेणाधिष्ठानमेवाभाति प्रतीयते आरोपितन्तु त्रैकालिकाभावप्रतियोगीत्यर्थः ॥ २३१ ॥

अतः । पृथक् । न । अस्ति । जगत् । परमात्मनः । पृथक् । प्रतीतिः । तु । मृषा । गुणादिवत् ॥ आरोपितस्य । अस्ति । किम् । अर्थवत्ता । अधिष्ठानम् । आभाति । तथा । भ्रमेण ॥ २३५ ॥

जगत्की स्वतन्त्र सत्ताके निषेधका फल कहे हैं। अतःइति। जिस कारण जगत् मिथ्या है इस कारण शुद्ध चेतनसे जगत् भिन्न नहीं है और परमात्मासे जगत्की भिन्नरूप करके

जो प्रतीति है सो आकाशमें नीलरूप प्रतीतिवत् मिथ्या है। आरोपित पदार्थकी अर्थवत्ता (यथार्थके तुल्य सत्तावत्ता) क्या है[14] अर्थात् स्वतन्त्र सत्ता नहीं अधिष्ठान ही आरोपित रूपसे प्रतीत होवै है, आरोपित पदार्थ तौ तीनों कालमें अधिष्ठानमें नहीं है। किन्तु भ्रमसिद्ध प्रातिभासिक है ॥ २३५ ॥

भ्रान्तस्य यद्यद्भ्रमतः प्रतीतं,
ब्रह्मैव तत्तद्रजतं हि शुक्तिः ॥
इदन्तया ब्रह्म सदैव रूप्यते,
त्वारोपितं ब्रह्मणि नाममात्रम् ॥ २३६ ॥

अधिष्ठानमाभातीत्युक्तं विवृणोति । भ्रान्तस्येति ।

भ्रान्तस्य । विपर्ययशालिनोयद्यद्वस्तु भ्रमतोभ्रमेण प्रतीतं भातं ब्रह्मव्यतिरिक्ततया ज्ञातं तत्तत्पदार्थजातं ब्रह्मैव हि यतोलोकप्रसिद्धभ्रमस्थलेपि शुक्तिरेव रजतं भातं न रजतमतिरिक्तं, रजतं वा भ्रमभातं शुक्तिरेव ततोनातिरिच्यते प्रकृतेपीदं जगदतिरिक्तं नास्त्येव किन्तु इदन्तयाऽनात्मतया ब्रह्मैव सदाभ्रमसमयेपि रूप्यते निरूप्यतेऽधिष्ठानस्वरूपानभिज्ञैः । आरोपितं जगत्तु ब्रह्मणि नाममात्रमेव न वस्तुस्वरूपं कदापि वाचारम्भणश्रुतेरितिभावः ॥ २३६ ॥

भ्रान्तस्य । यद् । यद् । भ्रमतः । प्रतीतम् । ब्रह्म । एव । तत् । तद् । रजतम् । हि । शुक्तिः ॥ इदन्तया । ब्रह्म । सदा । एव । रूप्यते । तु । आरोपितम् । ब्रह्मणि । नाममात्रम् ॥ २३६ ॥

पूर्वोक्तका विवरण करे हैं। भ्रान्तस्यइति । विपरीत ज्ञान वाले पुरुषको जो जो वस्तु भ्रमकरके ब्रह्मभिन्न प्रतीत होवै है सो सो पदार्थसमूह ब्रह्म ही है जिसं कारण लोकप्रसिद्ध भ्रमस्थल में भी शुक्ति ही रजतरूपकरके ज्ञात होवै है और प्रतीत रजत शुक्तिसे भिन्न नहीं है, प्रकृतमें भी यह जगत् अतिरिक्त नहीं है किन्तु अनात्मतारूपकरके ब्रह्म ही भ्रम समयमें भी

अधिष्ठानके स्वरूपको अज्ञानी पुरुषने निरूपण कियाजाताहै इस वास्ते जगत् ब्रह्ममें नाममात्र ही है वास्तव नहीं है २३६

अतः परंब्रह्म सदद्वितीयं,
विशुद्धविज्ञानघनं निरञ्जनम् ॥
प्रशान्तमाद्यन्तविहीनमक्रियं,
निरन्तरानन्दरसस्वरूपम् ॥ २३७ ॥

एतावता जगतोऽनात्मनइदं पदार्थस्य स्वरूपं प्रदर्शितं सम्प्रति शुद्धपरमात्मस्वरूपमैक्योपयोगिचतुर्भिर्निरूपयाति । अतः परमिति । यतः कल्पितं जगत्कालत्रयेपि, सत्तां न लभतेऽतोहेतोः परंब्रह्मैव स्वयं स्वरूपेणैव किञ्चिदिदं यत्किञ्चिज्जगच्चकास्ति दृश्यते यत्किञ्चिचेदमनात्मजातं चकास्ति दृश्यते तत्परंब्रह्मैवेत्यग्रेतनेनान्वयः परब्रह्मणोविशेषणानि विशिष्य स्वरूपबोधनार्थम्प्रदर्शयाति । सदद्वितीयमिति । सत् । त्रिकालाबाध्यं सदेव सत्यमिति श्रुतेः। अद्वितीयम् । निर्द्वैतम् । एकमेवाद्वितीयमिति श्रुतेः । विशुद्धविज्ञानघनम् । विनाशादिमलविकलकेवलबोधस्वरूपम् । सैन्धवघनश्रुतेः । निरञ्जनम् । निरस्ताविद्यावरणम् । 'निरवद्यं निरञ्जनमि'ति श्रुतेः । प्रशान्तम् । निरस्तरागादिमलम् । आद्यन्तविहीनम् । उत्पत्तिविनाशविधुरम् 'अजोनित्यः' इति श्रुतेः । अक्रियम् । "निष्कलं निष्क्रियमि"ति श्रुतेः । निरन्तरानन्दरसम् । अखण्डानन्दलक्षणम् । "नित्यं विज्ञानमानन्दं ब्रह्मे"ति श्रुतेः ॥ २३७ ॥

अतः । परम् । ब्रह्म । सद् । अद्वितीयम् । विशुद्धविज्ञानघनम् । निरञ्जनम् ॥ प्रशान्तम् । आद्यन्तविहीनम् । अक्रियम् । निरन्तरानन्दरसस्वरूपम् ॥ २३७ ॥

अनात्मरूप जगत्का स्वरूप निरूपण किया है अब एकता का उपयोगी परमात्माका स्वरूप निरूपण करेहैं, चार श्लोकों से । अतः इति । जिस कारण कल्पित जगत् तीनों कालोंमें सत् नहीं है, इस कारण ब्रह्म ही स्वरूपकरके ही जो कुछ जगत् है

अनात्मरूप दीखता है सो सर्व ब्रह्म ही है ऐसा आगेके श्लोकके साथ सम्बन्ध है । परब्रह्मके विशेषस्वरूपबोधक विशेषणों को कहे हैं । सतइत्यादि। त्रिकाल अबाध्य, द्वैतरहित, विनाशादि मलसे रहित, ज्ञानस्वरूप, अविद्याकृत आवरणशून्य, रागादि मलरहित, उत्पत्ति-विनाशवर्जित, चलनादि क्रियाशून्य, अखण्ड आनन्दरूप ॥ २३७ ॥

निरस्तमायाकृतसर्वभेदं,
नित्यं सुखं निष्कलमप्रमेयम् ॥
अरूपमव्यक्तमनाख्यमव्ययं,
ज्योतिःस्वयं किञ्चिदिदं चकास्ति ॥ २३८ ॥

निरस्तमायाकृतसर्वभेदम् । निरस्तादूरतोपास्ता मायाकृता आविद्यकाः सर्वे भेदाजीवेश्वरजगद्भेदायास्मिन् तत्तथा "नेह नानास्ति किञ्चन" नात्र काचनभिदास्तीत्यादिश्रुतेः नित्यमविनाशिसुखं दुःखप्रातिकूलस्वभावम्। निष्कलं निरवयवमप्रमेयम्। "तदप्रमेयमि"ति श्रुतेः। अरूपम्। रूपरसादिशून्यम्। "अशब्दमस्पर्शमरूपमव्ययमि"ति श्रुतेः। अव्यक्तमतीन्द्रियम्। अनाख्यं नामप्रवृत्तिवर्जितम्। "यतोवाचोनिवर्तन्ते" इति श्रुतेः। अव्ययम्। निर्विकारम्। ज्योतिः। चैतन्यस्वरूपम् ॥ २३८ ॥

निरस्तमायाकृतसर्वभेदम् । नित्यम् । सुखम् । निष्कलम् । अप्रमेयम् ॥ अरूपम् । अव्यक्तम् । अनाख्यम् । अव्ययम् । ज्योतिः । स्वयम् । किञ्चित् । इदम् । चकास्ति ॥ २३८ ॥

अविद्याकृत जीव ईश्वर जगत्के सर्व प्रकारके भेदोंसे रहित, अविनाशिरूप, दुःखविपरीतस्वभाव, निरवयव, प्रमाका अविषय, रूप रसादिसे शून्य, अतीन्द्रिय, नामप्रवृत्तिसे वर्जित,

निर्विकार चैतन्यस्वरूप ब्रह्म ही है जो कुछ जगत् प्रतीत होवै है सो उससे भिन्न नहीं है ॥ २३८ ॥

ज्ञातृज्ञेयज्ञानशून्यमनन्तं निर्विकल्पकम् ॥
केवलाखण्डचिन्मात्रं परंतत्त्वं विदुर्बुधाः ॥ २३९ ॥

ज्ञातृज्ञेयज्ञानशून्यम्। ज्ञात्रादित्रिपुटीकल्पनाविकलम्। अनन्तम्। देशकालवस्तुपरिच्छेदशून्यम्। निर्विकल्पकम् अद्वैतरूपत्वान्नाना-धर्मपुरस्कारेण प्रवर्तनशीलानां विकल्पानामविषयं निर्विशेषमिति वा केवलाखण्डचिन्मात्रम्। निर्द्वैताविनाशिचैतन्यस्वभावम्। परम्। मायायाः परम्। तत्त्वम्। सर्वबाधावधिभूतं परंब्रह्म बुधाब्रह्मनिष्ठा-विदुर्विजानन्ति ये त्वज्ञास्तेषां न बुद्धिगोचरोऽयमात्मेति भावः ॥

ज्ञातृज्ञेयज्ञानशून्यम्। अनन्तम्। निर्विकल्पकम् ॥ केवला-खण्डचिन्मात्रम्। परम्। तत्त्वम्। विदुः। बुधाः ॥ २३९ ॥

ज्ञाता ज्ञान ज्ञेयादि त्रिपुटी कल्पनारहित देश-काल-वस्तु-परिच्छेदशून्य अद्वैतरूप होनेसे नाना धर्मोंको ग्रहणकरके प्रवृत्त होनेवाले विकल्पोंका अविषय है। अद्वैत अविनाशी चैतन्यस्वरूप मायासे परे सर्वके बाधका अवधिरूप ब्रह्मको ब्रह्मनिष्ठ विद्वान् जानते हैं और जो अज्ञानी पुरुष हैं उनकी बुद्धिका विषय यह आत्मा नहीं है ॥ २३९ ॥

अहेयमनुपादेयं मनोवाचामगोचरम् ॥
अप्रमेयमनाद्यन्तं ब्रह्म पूर्णमहं महः ॥ २४० ॥

अहेयम्। अत्याज्यं नानिष्टमित्यर्थः। अनुपादेयम्। आत्मस्वरूप-त्वान्नोपादातुमुचितं शक्यं वा मनोवाचामगोचरम्। "यतोवाचो-निवर्तन्तेऽप्राप्यमनसा सह" इति श्रुतेः। अप्रमेयं परिमातुमशक्यम् अनन्तापारश्रुतेः। पूर्णं ब्रह्म। 'पूर्णमदः पूर्णमिदम्' इति प्रभृति श्रुतेः। महोऽलौकिकतेजोऽहं प्रत्यगभिन्नतया व्यवस्थितमिति भोः शिष्य विजानीहि न प्रमादं विधेहीत्यर्थः ॥ २४० ॥

अहेयम्। अनुपादेयम्। मनोवाचाम्। अगोचरम्॥ अप्रमेयम्। अनाद्यन्तम्। ब्रह्म। पूर्णम्। अहम्। महः॥ २४०॥

त्यागके अयोग्य अर्थात् अनिष्ट भिन्न है नित्य प्राप्त आत्मस्वरूप होनेसे ग्रहणके योग्य नहीं है, मन वाणीका अविषय परिमाणके अयोग्य अर्थात् जो मापनेमें नहीं आता है, आदि अन्तसे रहित, सर्वमें पूर्णरूप व्यापक है, अलौकिक तेजरूप सर्व आन्तर आत्मासे अभिन्नरूप स्थित है ऐसा हे शिष्य! तुम निश्चय कर आलस्य मत करो॥ २४०॥

तत्त्वंपदाभ्यामभिधीयमानयो-
र्ब्रह्मात्मनोः शोधितयोर्यदीत्थम्॥
श्रुत्या तयोस्तत्त्वमसीति सम्य-
गेकत्वमेव प्रतिपाद्यते मुहुः॥ २४१॥

आत्मानात्मविवेकउपसंहृतः सम्प्रति महावाक्यजन्याखण्डबोधप्राप्तिप्रकारमावेदयितुं प्रथमं तत्त्वमसीति महावाक्यगतपदार्थशोधनप्रकारमाह। तत्त्वंपदाभ्यामिति।

तत्त्वमसीति श्रुत्या तत्त्वंपदाभ्यां तद्युष्मच्छब्दाभ्यामभिधीयमानयोर्वाच्ययोर्ब्रह्मात्मनोरीशजीवयोस्तयोरेव शोधितयोर्निरुपाधिकयोरित्थमनेन प्रकारेण यदि मुहुर्नवकृत्वउपदेशेन सम्यगबाधितमेकत्वमभेदः प्रतिपाद्यते बोध्यते॥ २४१॥

तत्त्वंपदाभ्याम्। अभिधीयमानयोः।ब्रह्मात्मनोः।शोधितयोः। यदि। इत्थम्॥ श्रुत्या। तयोः। तत्त्वमसि। इति। सम्यग्। एकत्वम्। एव। प्रतिपाद्यते। मुहुः॥२४१॥

आत्मा अनात्माके विवेकका प्रकरण पूर्ण करदिया है अब तत्त्वमसि इस महावाक्यगत पदार्थशोधनके प्रकारको निरूपण करे हैं। तत्त्वंपदाभ्याम् इति। तत्त्वमसि इस श्रुति करके तत् त्वं शब्दोंकरके वाच्य ईश्वर जीव जो निरुपाधिक

शुद्ध हैं तिसका इस प्रकार नेववार उपदेशंकरके बोधन किया जो अभेद है सो प्रतिपादन किया है ॥ २४१ ॥

ऐक्यं तयोर्लक्षितयोर्न वाच्ययो-
र्निगद्यतेऽन्योन्यविरुद्धधर्मिणोः॥
खद्योतभान्वोरिव राजभृत्ययोः,
कूपाम्बुराश्योः परमाणुमेर्वोः ॥ २४२ ॥

तदा तयोर्लक्षितयोरैक्यमभेदोमन्तव्योनत्वन्योन्यविरुद्धधर्मिणोः परस्परसामानाधिकरण्यरहितधर्मवतोर्वाच्ययोः शक्ययोरैक्यमित्यन्वयः। विरुद्धधर्मिणोरैक्याभावे दृष्टान्तमाह खद्योतभान्वोरिवेति। यथा खद्योतसूर्ययोः कूपाम्बुराश्योः कूपसागरयोः परमाणुमेर्वोश्चैकत्वं विरुद्धधर्मित्वादसम्भवि तथा प्रकृतेपीत्यर्थः॥२४२॥

ऐक्यम्। तयोः। लक्षितयोः। न। वाच्ययोः। निगद्यते। अन्योन्यविरुद्धधर्मिणोः॥ खद्योतभान्वोः। इव। राजभृत्ययोः। कूपाम्बुराश्योः। परमाणुमेर्वोः ॥ २४२ ॥

तब जीव ईश्वर जो लक्ष्यस्वरूप शुद्ध हैं उनका अभेद कहा है, परस्पर विरुद्धधर्म वाले शक्योंका अभेद नहीं है। जैसे सूर्य और पटबीजना कूप सागर परमाणु सुमेरु इनका एकत्व परस्पर विरुद्ध होनेसे असम्भव है तैसेही विशिष्ट जीव ईश्वर का अभेद असम्भव है॥ २४२ ॥

तयोर्विरोधोऽयमुपाधिकल्पितो-
न वास्तवः कश्चिदुपाधिरेषः ॥
ईशस्य माया महदादिकारणं,
जीवस्य कार्यं शृणु पञ्चकोशम्॥ २४३ ॥

ननु तत्त्वंपदलक्षितयोरपि पदार्थयोः परस्परं भेदादैक्यालाभ एवेत्यतआह। तयोरिति।

तयोर्जीवब्रह्मणोर्विरोधो भेदउपाधिकल्पितअनाद्यविद्याद्युपाध्यारोपितोऽस्ति न वास्तवोन सत्यः कश्चित्कोपि भेदः। सर्वभेदाः। कल्पिताश्चेत्किं वक्तव्यं जीवब्रह्मणो भेदेउपाधिश्चैषवक्ष्यमाणोबोध्यः यद्वा एषभेदकउपाधिरपि न कश्चिद्वास्तवोयदि भेदकस्योपाधेर्वास्तवत्वं नास्ति तर्हि कथं तत्कृत भेदस्य वास्तवत्वमित्याशयः।सचोपाधिरीशस्य ब्रह्मणोमाया या माया महदादिजगत्कारणं महतत्त्वादीनां तत्त्वानां कारणीभूताऽनिर्वचनीया पूर्वमुपदर्शिता तथाच कारणोपाधिरीश्वरइत्यर्थः।ननु सर्वप्रपञ्चस्य मायामयत्वान्नजीवोपाधिरुपादिष्टइति चेच्छृणु पञ्चकोशमुक्तलक्षणं कार्यम्मायायाजीवस्योपाधिमयेहि तथाच कार्योपाधिर्जीवइति भावः। तथाच'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इत्यर्थोभिहितइति बोध्यम्। तथा च भेदस्यौपाधिकत्वादुपाधिविशिष्टे तस्य सद्भावेपि लक्ष्ये उपाधिविकले न भेदावस्थितिर्निमित्त भेदानभ्युपगमादितिभावः॥२४३॥

तयोः। विरोधः। अयम्। उपाधिकल्पितः। न। वास्तवः। कश्चिद्। उपाधिः। एषः॥ ईशस्य। माया। महदादिकारणम्। जीवस्य। कार्यम्। शृणु। पञ्चकोशम्॥ २४३॥

तत्त्वं पदार्थ जो लक्षित हैं उनका भी भेद होनेसे अभेद कैसे बने इस शङ्काका उत्तर कहे हैं। तयोः इति। तिन जीव ब्रह्मका यह भेद माया पञ्चकोशरूप उपाधिसे कल्पित है सत्य नहीं है जबके कोई भी उपाधि वा सर्व पदार्थका भेद कल्पित है तो जीव ब्रह्मका भेद कल्पित है इसमें तो कहना ही क्या है सो उपाधि महत्तत्त्वादि पदार्थोंका कारण अनिर्वचनीय माया ईश्वरकी उपाधि है और उस मायाका कार्य पञ्चकोशरूप जीव की उपाधिको श्रवण कर॥ २४३॥

एतावुपाधी परजीवयोस्तयोः,
सम्यङ्निरासे न परोन जीवः॥
राज्यं नरेन्द्रस्य भटस्य खेटक-

स्तयोरपोहे न भटो न राजा ॥ २४४ ॥

उपाधिविशिष्टे भेदस्थितिमभिधायोपाधिरहिते भेदाभावमाह। एतावुपाधी इति।

एतौ मायापञ्चकोशौ परजीवयोः। ईशजीवयोस्तयोश्चावस्तुभूतयोरुपाध्योः। सम्यङ्निरासे। मिथ्यात्वेनाभावे निश्चिते न परईश्वरनामा न जीवोजीवनामापि न किन्तु शुद्धं ब्रह्मैवैकमवशिष्टमेकत्वम् एकस्यौपाधिकमनेकत्वं स्वतश्चैकत्वमित्यत्र दृष्टान्तमाह राज्यमित्यादिना। यथा कस्यचिदेकस्यैव पुरुषस्य राज्यमुपाधिमुपगतस्य राजेतिव्यपदेशोऽथच तस्यैव भटानुकृतिमातन्वानस्य खेटकमुपाधिमुपगतस्य भटइति व्यपदेशस्तस्यैव राज्यखेटकापोहे न राजेति न भटेति च व्यपदेशोभवति किन्तु पुरुषमात्रस्वरूपमवशिष्टं भवति तथा प्रकृतेपीति द्रष्टव्यमिति समुदायार्थः। नरेन्द्रस्य राज्यमुपाधिर्भटस्य च खेटकउपाधिस्तयोरुपाध्योरपोहेऽपवादे न भटो न राजेति व्यपदिश्यते इत्यन्वयस्तु स्पष्टएव॥२४४॥

एतौ। उपाधी। परजीवयोः। तयोः। सम्यक्। निरासे। न। परः। न। जीवः॥ राज्यम्। नरेन्द्रस्य। भटस्य। खेटकः। तयोः। अपोहे। न। भटः। न। राजा॥ २४४॥

उपाधिविशिष्टमें भेदस्थिति कहकर उपाधिरहितमें भेदके अभावको कहे हैं। एतौ इति। माया और पञ्चकोश यह दोनों ईश्वर जीवकी उपाधि हैं तिनको मिथ्यात्व जानकर जब अभाव निश्चय किया तो न ईश्वर नाम वाला और न जीव नाम वाला रहता है किन्तु शुद्ध ब्रह्म ही एक बचता है इसमें दृष्टान्त कहते हैं जैसे किसी एक पुरुषको राज्यकी उपाधि होनेसे राज शब्दका प्रयोग होता है और उसको ही खेटक उपाधिधारके लीला करनेसे भटको व्यवहार होता है और राज्य खेटक दोनों उपाधिके त्यागसे उसी पुरुषका राजा भट शब्दसे व्यवहार नहीं होता किन्तु पुरुषमात्र स्वरूप बाकी

बचताहै तैसेही जीव ईश्वरमें भी जानलेना ॥ २४४ ॥

अथातआदेशइति श्रुतिः स्वयं,
निषेधति ब्रह्मणि कल्पितं द्वयम् ॥
श्रुतिप्रमाणानुगृहीतबोधा-
त्तयोर्निरासः करणीयएव ॥ २४५ ॥

ननूक्तयोर्जीवपरोपाध्योर्निरासोऽप्रमाणकत्वाद्धेयएवेति चेन्नेत्याह। अथातइति।

"अथातआदेशोनेति नेति नह्येतस्मादिति नेत्यन्यत्परमस्ति" इत्येवं रूपा बृहदारण्यकगता श्रुतिः स्वयं प्रमाणान्तरसाहाय्यमन्तरैव ब्रह्मणि शुद्धे कल्पितमारोपितं द्वयं द्वैतं स्वभिन्नमनात्मजातं निषेधति तदनात्मत्वेन तदसंसर्गित्वेन च बोधयति ततश्च श्रुतिप्रमाणानुगृहीतबोधात्। वेदप्रमाणसम्मताद्बोधादुक्तानुमानवृन्दात्तयोः कार्यकारणोपाध्योर्निरासोऽपवादः करणीयएव कर्तव्यएव बोधनीयएवेति यावत्। नाप्रमाणशङ्कया हेयइति भावः ॥२४५॥

अथातः। आदेशः। इति। श्रुतिः। स्वयम्। निषेधति। ब्रह्मणि। कल्पितम्। द्वयम् ॥ श्रुतिप्रमाणानुगृहीतबोधात्। तयोः। निरासः। करणीयः। एवम् ॥२४५॥

उपाधिके निरासमें प्रमाण दिखाते हैं। अथ इति। अथातआदेशोनेति नेति इत्यादि श्रुति प्रमाणान्तरकी सहायतासे विना ही शुद्ध ब्रह्ममें आरोपित द्वैत अनात्म पदार्थका निषेध करे है इस कारण श्रुतिप्रमाणोंसे जन्य बोधसे तिनें कार्य कारणरूप उपाधियोंका निषेध करना उचित है ॥ २४५॥

नेदं नेदं कल्पितत्वान्न सत्यं,
रज्जुदृष्टव्यालवत्स्वप्नवच्च ॥
इत्थं दृश्यं साधु युक्त्या व्यपोह्य,

ज्ञेयः पश्चादेकभावस्तयोर्यः ॥ २४६ ॥

निषेधश्रुतिस्थनेतिनेतिपदार्थमाह । नेदं नेदमिति ।
इदंस्थूलमिदं च सूक्ष्मम् नात्मात्मसंसर्गि वा किन्त्वारोपितमेवे-त्यर्थः । नद्वयमात्मतादात्म्यस्यात्मसंसर्गित्वस्य च निषेधायेति बो-ध्यम् । स्थूलं सूक्ष्मं च न सत्यं नाबाध्यं कल्पितत्वात्कल्पनाविषय-त्वात् । ननु कल्पनायाविशिष्टविषयत्वेनाधिष्ठानस्यापि तद्विषय-त्वात्तस्य वास्यापि सत्यत्वमेव कुतोनेष्यते तत्राह । रज्जुदृष्टेत्या-दिना । रज्जुदृष्टव्यालवत् । रज्ज्वां दृष्टस्य व्यालस्येव । स्वप्नवच्च स्वप्ने दृष्टगजतुरगादेरिव चेत्यर्थः । अधिष्ठानस्य कल्पनाविशेष्यत्वे-पि कल्पनाप्रकारत्वाभावान्न व्यभिचारः कल्पितत्वपदेन च कल्प-नाप्रकारत्वस्यैव बोधादिति भावः । इत्थमनेनाभिहितप्रकारेण दृश्यं चिद्भास्यं जगद्युक्त्या श्रुत्यनुगृहीतानुमानेन साधु यथा स्यात्तथा व्यपोह्यापवाद्य मनसस्तत्र सत्यत्वबुद्ध्यपहारएव व्यपोहोन तु गृही-तव्यावहारिकनागादेरिवापहारइति सूचयति साधुपदम् । पश्चा-दुपाध्योर्भेदप्रतिभासहेत्वोर्निरासानन्तरं तयोर्जीवब्रह्मणोर्यएक-भावऐक्यमद्वैतं सज्ञेयोनिश्चेयइत्यर्थः ॥ २४६ ॥

न । इदम् । न । इदम् । कल्पितत्वात् । न । सत्यम् । रज्जुदृष्टव्यालवत् । स्वप्नवत् । च ॥ इत्थम् । दृश्यम् । साधु । युक्त्या । व्यपोह्य । ज्ञेयः । पश्चात् । एकभावः । तयोः । यः २४६

निषेध श्रुतिमें स्थित नेति पदका अर्थ कहे हैं । न इति । स्थूल आत्मा नहीं है, सूक्ष्म आत्मा नहीं है तैसे ही कारण देह अविद्या भी आत्मा नहीं है और आत्माके संग इनका संबन्धभी कुछ नहीं है और यह त्रिकाल अबाध्य नहीं है, कल्पना का विषय होनेसे रज्जुमें दृष्ट सर्पवत् और स्वप्नमें दृष्ट हस्ती अश्वादिवत् इस प्रकार चेतनकरके भास्य जगत् श्रुति सहकृत अनुमानकरके भली रीतिसे निषेधकरके उपाधि जो

१ अधिष्ठानस्य । २ दृश्यस्यापि ॥

भेदप्रतीतिका हेतु है इनके निषेधके अनन्तर जीव ब्रह्मका जो ऐकभाव अर्थात् अद्वैत है सो जानने योग्य है यहां भली रीतिका तात्पर्य यह है कि यहां सत्यत्व बुद्धिके त्यागका नाम निषेध है, स्वरूपसे पदार्थका निषेध नहीं है ॥ २४६ ॥

ततस्तु तौ लक्षणया सुलक्ष्यौ,
तयोरखण्डैकरसत्वसिद्धये ॥
नालं जहत्या न तथाऽजहत्या,
किन्तूभयार्थात्मिकयैव भाव्यम् ॥ २४७ ॥

सोपाधिकयोरैक्यमयोग्यमतउपाधिनिरासेनायोग्यतां व्युदस्य लक्षितैक्यं बोद्धव्यमित्युपदिष्टं श्रुत्या लक्षणाविषयस्य लक्ष्यत्वाल्लक्षणामवश्यं प्रकाशयिष्यति देशिकइति शिष्याभिप्रायज्ञोगुरुराह। ततस्त्विति।

यतउपाधिनिरासः साधुसम्पाद्यस्ततस्तौ प्रत्यग्बोधाद्वयानन्दौ सुलक्ष्यौ निरायासतोलक्षणया बोधयितुं शक्यौ अखण्डैकरसात्मबोधोदयाय जहदजहल्लक्षणामेव मुख्यां ख्यापयितुं लक्षणाद्वयं चान्यत्र प्रवर्तयितुं क्षममिहाक्षममिति प्रख्यापयति तयोरित्यादिना तयोर्लक्षितयोः शुद्धस्वरूपयोरखण्डैकरसत्वसिद्धये अखण्डैकरसत्वस्य असंसृष्टकूटस्थशुद्धस्वरूपस्य सिद्धये निश्चयाय जहत्याऽलं न जहती न समर्थेत्यर्थः। तथाऽजहत्या लक्षणयापि नालं किन्तु परन्तु उभयार्थात्मिकयैव। उभौ विशेष्यभागाववयवौ यस्याखण्डार्थस्य सउभयः सएवार्थो विषयोयस्यावृत्तेः सा उभयार्था सैवात्मा स्वरूपं यस्याजहदजहल्लक्षणायाः सा तथा विशिष्टैकदेशपरमार्थभूताव्यभिचारिविशेष्यमात्रगोचरवृत्त्याजहदजहल्लक्षणयैवनान्यया भाव्यं भवितव्यम्। नान्या जहती वाऽजहती वा लक्षणात्र सत्तां लभतेइत्यर्थः। अत्रायं भावः। लक्षणा त्रिविधा जहत्यजहतीजहदजहतीचेति जहति त्यजन्ति स्वार्थं पदानि यस्यां सा जहत्स्वार्था सैवाभिधीयते जहतीति न जहति स्वार्थं तानि यस्यां सा अजह-

१ उभादुदात्तोनित्यमित्यत्रयवेऽयज्नत्ययः।

त्स्वार्थां सैवोच्यतेऽजहतीति । जहती च सैवाजहती चेति जहदजहतीति समासः। शक्यमर्थमनवगाह्याशक्यस्य शक्यसम्बन्धिनोऽवगाहनाज्जहतीत्युच्यते।शक्यसम्बन्धिमात्रविषयेति यावत् यद्यपि गङ्गायां घोषइत्यत्र प्रसिद्धलक्षणास्थलेपि वक्तुस्तीरमात्रतात्पर्यसत्त्वे सम्भवति सा तथापि गङ्गातीरत्वस्य पूर्वमुपस्थितस्य वक्तुस्तात्पर्यसत्त्वे लक्ष्यतावच्छेदकत्वस्य सत्त्वात्साऽजहत्स्वार्थापीति न तत्केवलमस्याएवोदाहरणं किन्तु जहत्स्वार्थोदाहरणं विषं भुंक्ष्वेति। अत्र यद्यपि विषभक्षणं कर्त्तव्यान्वययोग्यं किन्तु कृतंसत्सद्योव्यापादयतीति नान्वयानुपपत्तिरूपं लक्षणाबीजं तथापि पितुः शत्रुगृहाद्भोजननिवृत्तौ तात्पर्यात्तात्पर्यानुपपत्तेरेव च मुख्यलक्षणाबीजत्वात्तदनुपपत्त्या वाक्यस्य तत्र लक्षणास्वीकारादत्र जहतीलक्षणा स्वार्थंविहाय शत्रुगृहभोजननिवृत्तिरशक्यान्तर्भूता लक्ष्येति संक्षेपः यत्र हि शक्यार्थमवगाह्यैवाशक्यार्थावगाहनं तत्राजहती लक्षणा शक्यार्थतत्संसर्गिविषयत्वमिति यावत्। यथा काकेभ्योदधिरक्ष्यतामित्यत्र तात्पर्यानुपपत्तिमूलका लक्षणा दध्युपघातकत्वेन रूपेण काकाकाकदधिभक्षकसाधारणविषयत्वात्। यथावा शुक्लोघटइत्यत्र शुक्लपदे लक्षणा। अत्र हि शुक्लशब्दः स्वार्थं शुक्लगुणं तत्संसर्गिणमाश्रयं च गोचरयन्नुक्तलक्षणलक्षणाश्रयो भवति। यत्र विशिष्टवाचकः शब्दः स्वार्थैकदेशं विहायैकदेशे वर्तते तत्र जहदजहल्लक्षणा शक्यैकदेशमात्र विषयासेति यावत्।यथा मूले वक्ष्यमाणासोयं देवदत्तइत्यत्र।अत्र हि तदिदं पदवाच्ययोस्तद्देशतत्कालैतद्देशैतत्कालविशिष्टयोःस्वरूपयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वम् एवमेव तत्त्वमसि इत्यादौ तत्पदशक्यस्य मायालक्षणकारणोपाधिविशिष्टस्य युष्मच्छब्दवाच्येन पञ्चकोशलक्षणकार्योपाधिविशिष्टेनैक्यस्यायोग्यत्वादैक्यसिद्ध्यर्थं स्वरूपमात्रं निरुपाधिकं शुद्धं लक्ष्यतइति भवत्यत्र जहदजहल्लक्षणेति। केचित्तु सोयं देवदत्तस्तत्त्वमसीत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेपि न लक्षणा शक्त्युपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोरेवान्वयबोधाविरोधात्। यथा घटोऽनित्यइत्यत्र

१ न शक्यमन्तर्भूतं यस्यां सा।

घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिस्तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाभ्युपगमः यथानित्योघटइति अत्र घटपदाद्धटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा। एवमेव तत्त्वमस्यादिवाक्येपि न लक्षणा शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावादन्यथा गेहे घटोघटे रूपं घटमानयेत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वं लक्षणया स्यात्तस्मात्तत्त्वमसीति वाक्ये आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या। जहदजहल्लक्षणोदाहरणन्तु काकेभ्योदधि रक्ष्यतामित्यादिकमेव तत्र शक्यकाकत्वपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काके ऽकाके च काकशब्दस्य प्रवृत्तेरजहल्लक्षणा लक्षणन्तु शक्यार्थविशिष्टविषयकत्वं तेन काकेभ्योदधि रक्ष्यतामित्यत्र नातिव्याप्तिः काकादेः शक्यार्थस्य विषयत्वेन दध्युपघातकत्वाविशिष्टविषयत्वेपि शक्यार्थकाकत्वाविशिष्टाविषयत्वाभावाज्जहदजहल्लक्षणायास्तत्र विषयत्वात्। अजहल्लक्षणोदाहरणन्तु शुक्लोघटइत्यादिकमेवेति वदन्ति। एतन्मते काकेभ्योदधि रक्ष्यतामित्यत्र शुनककाकादेरेकदेशत्वाभावेन शक्याशक्यविशेष्यकवृत्तित्वमित्येव जहदजहल्लक्षणालक्षणं विवक्षणीयमिति बोध्यम्। यद्वा लक्षणाद्वैविध्यमेवास्तु काकेभ्योदधिरक्ष्यतामित्यत्रापि पूर्वोक्तलक्षणाऽजहल्लक्षणैवास्तु माभूत्र लक्षणात्रैविध्यप्रकारइति च तेषामाशयइत्यलम्। अत्र कश्चिदाचष्टे येन रूपेण पदार्थोपस्थितिस्तेन रूपेण पदार्थानां वाक्यार्थस्तत्वयावाच्योन्यथाऽतिप्रसङ्गात् एवं विशिष्टरूपेणोपस्थितयोस्तत्त्वंपदार्थयोरत्यन्तविरुद्धत्वेन कथमभेदवाक्यार्थान्वयः स्यात्ततोनिर्विकल्पकरूपेणोपस्थित्यर्थं तत्त्वंपदार्थयोस्तत्त्वमस्यादिवाक्येषु लक्षणाङ्गीकारः नचानित्योघटइत्यत्रापि लक्षणा स्यादिति वाच्यम्। तत्र विशिष्टव्यक्तेरनित्यत्वान्वये बाधकाभावादत्र विशिष्टैक्यस्य प्रत्यक्षादिप्रमाणविरुद्धत्वाच्च गेहे घटइत्यादावपि घटादेर्विशिष्टवृत्तित्वे बाधकाभावान्न लक्षणा

१ अभिहितलक्षणलक्ष्या।

विशिष्टवृत्तिधर्मस्य विशेषणवृत्तित्वमिति न्यायस्याप्रमाणिकत्वादिति बोध्यम्। तस्मान्निर्विकल्पकचिद्रूपेण तत्त्वंपदार्थयोरुपस्थित्यर्थं तत्त्वमस्यादिवाक्येषु लक्षणाङ्गीकरणमिति दिगिति। अपरे तु विना शक्तिं लक्षणां च सुषुप्तोत्थापकवाक्यवत्तत्त्वमस्यादिवाक्येनैवाचिन्तशक्त्याऽऽत्मतत्त्वप्रतिपादनं नच विना सम्बन्धं पदार्थबोधनेऽतिप्रसङ्गः लक्षणापक्षेपि तुल्यत्वात्। शक्यसम्बन्धरूपस्यानेकसाधारणत्वात् तात्पर्यविशेषान्नियमइति चेत्तस्यापि सर्वान्प्रत्यविशेषात् कश्चिदेव तात्पर्यविशेषमवधारयति न सर्वइति चेत्तर्हि हन्त पुरुषगतएव कश्चिद्विशेषोनिर्दोषत्वरूपोनियामकः सचास्मिन्पक्षेपि न दण्डवारितः तथाच यादृशस्य शुद्धान्तःकरणस्य तात्पर्यानुसन्धानपुरःसरं लक्षणया वाक्यार्थबोधो भवद्भिरङ्गीक्रियते तादृशस्यैव केवलः शब्दविशेषोऽखण्डसाक्षात्कारं विनापि संबन्धेन जनयतीति किमनुपपन्नमिति। एतस्मिन्पक्षे शब्दवृत्त्यविषयत्वा"यतोवाचोनिवर्त्तन्ते"इति सुतरामुपपन्नं लक्षणापक्षे शक्त्येति वाच्यं लक्षणया वाक्प्रवृत्तेरभ्युपगमाच्छक्तिपक्षे च श्रुतिरेवोदासीनाऽस्माकं तु न कोपि दोषइति बोध्यम्। तथाचाहुः। "दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः। शब्दशक्तेरचिन्त्यत्वाद्विद्मस्तं मोहहानतः॥ अगृहीत्वैव सम्बन्धमभिधानाभिधेययोः। हित्वा निद्रां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः॥ जाग्रद्वन्न यतः शब्दं सुषुप्तौ वेत्ति कश्चन। ध्वस्तेऽतोज्ञानतोऽज्ञाने ब्रह्मास्मीति भवेत्फलम्॥ अविद्याघातिनः शब्दाद्याहं ब्रह्मेति धीर्भवेत्। नश्यत्यविद्यया सार्द्धं हत्वा रोगमिवौषधमि"ति। तस्मादचिन्त्यशक्तिरेव गरीयसीत्याचक्षते। आचार्याभिप्रायस्तु जिज्ञासुबोधनार्थं लक्षणापक्षएव गरीयान्। "यतोवाचोनिवर्तन्ते"इति श्रुतेर्न शक्तिपक्षः। अचिन्त्यशक्तिपक्षस्त्वचिन्त्यशक्तिसम्पन्नेषु विद्वत्स्वेवोपयुज्यतेइति नचैकपदेनैव शुद्धाद्वैतब्रह्मबोधसमर्पणसम्भवे महावाक्ये पदान्तरवैयर्थ्यमिति वाच्यम्। पदस्य स्ववृत्तिद्वारापदार्थोपस्थापकत्वेपि तदनुभवजनने तस्य सामर्थ्याभावात्पदान्तरेण संहत्य तु वाक्यभावावलम्बनेनाखण्डब्रह्मानुभवजनने निष्प्रत्यूहत्वात्पदान्तरस्यावश्यकत्वान्नच वाक्यस्य दर्शपूर्णमासादिवाक्यवत्परोक्षज्ञानजनकत्वस्वाभाव्यान्म-

ह्वावाक्यादपरोक्षब्रह्माभेदबुद्धिर्न स्यादिति वाच्यम्। दशमस्त्वमसीत्यादिवाक्यस्याप्यपरोक्षज्ञानजनकत्वदृष्टेरत्राप्यपरोक्षज्ञानजनने बाधकाभावात्पदार्थपारोक्ष्यनिबन्धनं हि शब्दस्य परोक्षज्ञानजनकत्वमात्मनस्तु यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुत्या साक्षादपरोक्षतया तत्र शब्दस्य परोक्षज्ञानजनकत्वमित्युक्तेरेव व्याहतत्वात्॥ २४७॥

ततः। तु। तौ। लक्षणया। सुलक्ष्यौ। तयोः। अखण्डैकरसत्वसिद्धये॥ न। अलम्। जहत्या। न। तथा। अजहत्या। किन्तु। उभयार्थात्मिकया। एव। भाव्यम्॥ २४७॥

उपाधि निरासकरके शुद्ध पदार्थका बोध किस वृत्तिसे होवे है इस शङ्काका उत्तर कहे हैं। तत इति। जिस कारण उपाधिका निषेध विना यत्नसे होवे है तिस कारण आन्तर बोध अद्वैतानन्द विना यत्न लक्षणाकरके बोधित होसके हैं॥ शुद्धस्वरूपोंके अखण्ड (असंग) कूटस्थ शुद्धस्वरूपके निश्चय वास्ते जहती लक्षणा नहीं समर्थ है तैसे ही अजहती लक्षणा भी समर्थ नहीं है किन्तु जहत् अजहत् (भागत्याग) लक्षणा ही शुद्धबोधमें प्रवृत्त होनेमें समर्थ है उसीसे शुद्धों का स्वरूप बोध होगा॥ २४७॥

सदेवदत्तोयमितीह चैकता,
विरुद्धधर्मांशमपास्य कथ्यते॥
यथा तथा तत्त्वमसीतिवाक्ये,
विरुद्धधर्मानुभयत्र हित्वा॥ २४८॥

जहदजहल्लक्षणायालौकिकमुदाहरणं प्रदर्शयन्प्रकृते महावाक्ये तां योजयति। सदेवदत्तोयमित्यादिद्वाभ्याम्।

सोयं देवदत्तइतीह इत्यत्र विरुद्धांशं तदेतद्देशकालादिकमपास्य निरस्य एकता वा एकतैव व्यक्तिमात्रस्य यथा कथ्यते न्यायविद्भिर्म-

च्यते तथा तत्त्वमसीतिस्वरूपे वाक्ये महावाक्ये उभयत्र जीवेशयोर्विरुद्धधर्मान्हित्वा विहाय ॥ २४८ ॥

सः । देवदत्तः । अयम् । इति । इह । वा । एकता । विरुद्धधर्मांशम् । अपास्य । कथ्यते ॥ यथा । तथा । तत् । त्वम् । असि । इति । वाक्ये । विरुद्धधर्मान् । उभयत्र । हित्वा ॥ २४८ ॥

प्रथम जहत् अजहत् लक्षणाके लौकिक उदाहरणको दिखाते हैं । सइति । सोऽयंदेवदत्तः (पूर्व देखा पुरुष यही है) इस वाक्यमें पूर्व देशकालादिविरुद्ध अंशका त्यागकर व्यक्तिमात्र की एकताका न्यायज्ञाता जैसे कथन करते हैं तैसे ही तत्त्वमसि इस वेदके महावाक्यमें जीव ईश्वरके (सर्वज्ञ अल्पज्ञ) विरुद्धधर्मको त्यागकर अभेद निश्चय कराता है ऐसे आगे श्लोकके साथ सम्बन्ध करना ॥ २४८ ॥

संलक्ष्य चिन्मात्रतया सदात्मनो-
रखण्डभावः परिचीयते बुधैः ॥
एवं महावाक्यशतेन कथ्यते,
ब्रह्मात्मनोरैक्यमखण्डभावः ॥ २४९ ॥

उभयोश्चिन्मात्रतया स्वरूपं संलक्ष्य निश्चित्य बुधैः विवेकिभिः सदात्मनोः । अद्वयानन्दप्रत्यग्बोधयोः । अखण्डभावः । अभेदः परिचीयते साक्षात्क्रियतइत्यर्थः एवम् । अनेनैव प्रकारेण । महावाक्यशतेन महावाक्यैरन्यैरपि शतशब्दो बहुत्वमाह ब्रह्मात्मनोः शोधितयोरीशजीवयोरैक्यमेकत्वम् । किं संख्यारूपमैक्यं नेत्याह । अखण्डभावइति । अभेदइत्यर्थः कथ्यते वर्ण्यते तथाच प्रज्ञानं ब्रह्मायमात्माब्रह्माहंब्रह्मास्मीत्यादावपि पूर्वोक्तरीत्यैव वाक्यार्थवर्णनं कार्यमितिभावः ॥ २४९ ॥

संलक्ष्य । चिन्मात्रतया । सदात्मनोः । अखण्डभावः । परि-

चीयते। बुधैः॥ एवम्। महावाक्यशतेन। कथ्यते। ब्रह्मात्मनोः। ऐक्यम्। अखण्डभावः॥ २४९॥

जीव ईश दोनोंकी चेतनमात्रताका निश्चयकरके विवेकी पुरुषोंने अद्वयानन्द प्रत्यग्बोधका अभेद साक्षात्कार किया जाता है इसी प्रकार अन्य अनेक महावाक्योंकरके शोधित जीव ब्रह्मकी अभेदरूप एकता बोधन करीती है॥ २४९॥

अस्थूलमित्येतदसन्निरस्य,
सिद्धं स्वतोव्योमवदप्रतर्क्यम्॥
अतोमृषामात्रमिदं प्रतीतं,
जहीहि यत्स्वात्मतया गृहीतम्॥
ब्रह्माहमित्येव विशुद्धबुद्ध्या,
विद्धि स्वमात्मानमखण्डबोधम्॥ २५०॥

उपाधिनिषेधमुखेन विशुद्धाखण्डात्मबोधोमहावाक्यार्थनिरूपणेनोपपादितः सम्प्रतिशिष्यानवधानतानिवृत्त्यैतमेवार्थं सार्द्धेन श्लोकीकृत्य ग्राहयति। अस्थूलमित्यादिना।

भोःशिष्य। अस्थूलमनण्वित्यादिवाक्येन यदेतदनात्मजातमसत्सदात्मनि कल्पितं तन्निरस्य सत्यमिदं न भवतीति निषिध्य स्वतःसिद्धं परानपेक्षस्वभावं व्योमवदसङ्गमप्रतर्क्यमेकरूपत्वात्तर्काविषयमात्मानं विद्धीत्यन्वयः।यस्मादेवं वेदोपदेशोऽतस्तस्माद्यत् देहेन्द्रियादिपञ्चकोशलक्षणं जगत्स्वात्मतया मुख्यचिदात्मस्वरूपेण प्रतीतं भातमतएव च तथैव गृहीतं दृढं हृदि स्थापितं तदिदं मृषामात्रं मिथ्यैव न सत्यमतोजहीहि मास्वात्मस्वभावं मंस्थाः अथच स्वमात्मानमखण्डबोधमलुप्तचित्स्वभावं ब्रह्माहमित्येव नान्यथा विशुद्धबुद्ध्या निर्मलविवेकवत्या मत्या विद्धि साक्षात्कुरु॥ २५०॥

अस्थूलम्। इति। एतद्। असद्। निरस्य। सिद्धम्। स्वतः। व्योमवद्। अप्रतर्क्यम्॥ अतः। मृषामात्रम्। इदम्।

प्रतीतम् । जहीहि । यत् । स्वात्मतया । गृहीतम् ॥ ब्रह्म । अहम् । इति । एव । विशुद्धबुद्ध्या । विद्धि । स्वम् । आत्मानम् । अखण्डबोधम् ॥ २५० ॥

पूर्वोक्त अर्थको अतिस्पष्टकरके निरूपण करे हैं । अस्थूलम् इति । हे शिष्य ! अनात्मसमूह असत् (आत्मामें कल्पित) है इसको अस्थूलम् इति आदि वाक्यकरके यह सत्य नहीं है ऐसा निषेधकरके अन्यकी अपेक्षासे रहित सिद्धस्वरूप आकाशवत् असंग एकरूप होनेसे तर्कका अविषय आत्माको जान, जिसकारण वेदका ऐसा उपदेश है तिस कारण देहेन्द्रियादि जगत् मुख्य चेतन आत्माका रूपकरके जो तुमको भान होता था इसीसे तुमने हृदयमें दृढरूपसे उसको स्थापन किया था सो यह सर्व मिथ्या ही है सत्य नहीं है इसीसे उसको आत्मरूप मत मानो और अपने आत्माको अविनाशी चेतन ब्रह्मरूप मैं हूं इस प्रकारसे ही विवेकयुक्त बुद्धिसे साक्षात्कार करो ॥

मृत्कार्यं सकलं घटादिसततं मृन्मात्रमेवाहितं,
तद्वत्सज्जनितं सदात्मकमिदं सन्मात्रमेवाखिलम् ॥
यस्मान्नास्ति सतःपरं किमपि तत्सत्यं सआत्मास्वयं,
तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम् २५१

वर्णितं महावाक्यार्थमेव शिष्यमतिद्रढिम्ने स्थूणानिखननन्यायेन नानादृष्टान्ततोयुक्तितश्च वर्णयति षघट्केन । मृत्कार्यमिति ।

भोःशिष्य घटादिस्वरूपं मृत्कार्यम् सकलं सर्वं यत्त्वया सततं स्वबुद्धावाहितं सत्यमिति भ्रान्त्या स्थापितं तन्मृन्मात्रमेवेत्येतदपिच विचारदृष्ट्या बुद्धावाहितमेव तद्वद्घटादिवदेव इदमाखिलं सज्जनितं सतउत्पन्नं जगत्सन्मात्रमेव । मात्रशब्दार्थं वर्णयन्नेवतत्त्वमाह यस्मा-

१ अतिदृढतायै ।

रसतः सद्ब्रह्मणः परमन्यत्किमपि स्वल्पमपि नास्ति प्रातिभासिकमपि न सिद्ध्यति ब्रह्मणएवाधिष्ठानस्य तद्रूपेण स्फुरणात्तत् सत्सत्यमविनाशिब्रह्म सआत्मा सर्वेषां नःस्वयं नतु देहादिवत्परलब्धसत्ताकस्तस्मात्सर्वेषां नस्तदात्मकत्वात् तदन्यस्याभावाच्च यत्प्रशान्तममलं निर्मलं परं कार्यकारणतोविलक्षणमद्वयमद्वैतं ब्रह्मशुद्धसच्चिदानन्दलक्षणं तत्त्वमसि त्वंभवसि न ततोऽन्योसि कश्चिदित्यर्थः ॥ २५१ ॥

मृत्कार्य्यम्। सकलम्। घटादि। सततम्। मृन्मात्रम्। एव। आहितम्। तद्वत्। सज्जनितम्। सदात्मकम्। इदम्। सन्मात्रम्। एव। अखिलम्॥ यस्मात्। न। अस्ति। सतः। परम्। किमपि। तत्। सत्यम् सः। आत्मा। स्वयम्। तस्मात्। तत्। त्वम्। असि। प्रशान्तम्। अमलम्। ब्रह्म। अद्वयम्। यत्। परम्॥ २५१ ॥

पूर्वोक्त महावाक्यार्थको नाना दृष्टान्तसे वर्णन करे हैं। मृत्कार्यम् इति। हेशिष्य! घटादि स्वरूप सकल मृत्तिकाका कार्य जो तुमने अपनी बुद्धिमें निरन्तर भ्रान्तिकरके सत्यरूपकरके स्थापन किया है सो घटादि मृत्तिकामात्र ही है यह भी विचारदृष्टिकरके बुद्धिमें स्थापित ही है घटादिवत् यह सर्व जगत् सत्से उत्पन्न हुवा है सो सत्रूप ही है जिस कारण सत् ब्रह्मसे अन्य अल्पवस्तु भी नहीं है सो अविनाशी ब्रह्म हमारे सर्वका आपही आत्मा है इस कारण हम सर्वको ब्रह्मरूप होनेसे अधिष्ठानरूप ब्रह्मही हमारे रूपसे प्रकट हुवा है इस कारण हम सर्वको ब्रह्मरूप होनेसे तिस ब्रह्मसे अन्यका अभाव होनेसे जो शान्त है, निर्मल है, कार्य कारणसे विलक्षण है, अद्वैत है, शुद्ध सत् चित्

आनन्द स्वरूप ब्रह्म है सो तूं है तिससे अन्य कोई नहीं है॥

निद्राकल्पितदेशकालविषयज्ञात्रादि सर्वं यथा,
मिथ्या तद्वदिहापि जाग्रति जगत्स्वाज्ञानकार्यत्वतः ॥
यस्मादेवमिदं शरीरकरणप्राणाहमाद्यप्यस-
त्तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम्॥ २५२॥

यथा निद्राकल्पितदेशकालविषयज्ञात्रादि निद्रादोषेण कल्पिताः कल्पनारूपतयैव भाता देशाद्यास्तत्र देशो गजतुरगादिविहारयोग्यः, कालः स्वप्नदृष्टजन्मजरादियोग्यो, विषयास्तत्कालीना दृश्या गजतुरगादयः ज्ञाता तेषां द्रष्टा विविधचरित्रः ते आदयो यस्य तत्तथा सर्वं मिथ्या दृष्टनष्टस्वभावं तद्वत्तथा इह अस्मिन्देशे दृश्यमानं जाग्रत्यपि जाग्रदवस्थायामपि वर्त्तमानं मिथ्या कुतः स्वाज्ञानकार्यत्वतः। स्वाश्रितं यदज्ञानं तत्कार्यत्वादित्यर्थः प्रतिज्ञाहेतूदाहरणान्यभिधायोपनयनिगमने आह । यस्मादिति । यस्माद्धेतोरिदं शरीरकरणप्राणाहमाद्यपि देहेन्द्रियप्राणाहङ्कारादिकमप्येवं स्वाज्ञानकार्यं तस्मादसन्मिथ्यैव यस्माच्चेदमसत्तस्मादेदहेतोरुपाधेरभावात्तदुक्तलक्षणं प्रशान्तममलमद्वयं यत्कारणं परं ब्रह्म तत्तदेव त्वमसि नान्योसीत्यर्थः । त्वशब्दोत्रात्मवाची ॥ २५२ ॥

निद्राकल्पितदेशकालविषयज्ञात्रादि । सर्वम् । यथा । मिथ्या । तद्वत् । इह । अपि । जाग्रति । जगत् । स्वाज्ञानकार्य्यत्वतः ॥ यस्माद् । एवम् । इदम् । शरीरकरणप्राणाहमादि । अपि । असत् । तस्मात् । तत् । त्वम् । असि । प्रशान्तम् । अमलम् । ब्रह्म । अद्वयम् । यत् परम् ॥ २५२ ॥

निद्रादोषकरके कल्पनारूपकरके प्रतीत हुवा देश और तिसमें हस्ती अश्व आदिके व्यवहारयोग्य, काल स्वप्नमें दृष्ट जन्म जरा आदि योग्य, विषय हस्ती आदि और उनका ज्ञाता (द्रष्टा) अनेक प्रकारकी लीला करने वाला इत्यादि सर्व जगत् जैसे

मिथ्या है, तैसे इस देशमें जाग्रत्‌में भी जो दीखता है जगत् सोभी मिथ्या है, अज्ञानका कार्य होनेसे, जिसे कारण देह इन्द्रिय प्राण अहंकारादि भी अज्ञानका कार्य है तिस कारण मिथ्या हैं तिसे कारण भेदके हेतुका अभाव होनेसे शान्तआदि विशेषण वाला ब्रह्म ही तू है ॥ २५२ ॥

यत्र भ्रान्त्या कल्पितं तद्विवेके,
तत्तन्मात्रं नैव तस्माद्विभिन्नम् ॥
स्वप्ने नष्टं स्वप्नविश्वं विचित्रं,
स्वस्माद्भिन्नं किन्तु दृष्टं प्रबोधे ॥ २५३ ॥

ननु ब्रह्मयदाविनाशि परमार्थभूतं विश्वंमाभूत्तथापि तद्भिन्नं व्यावहारिकं प्रातिभासिकं वास्तु ततोऽप्युपाधिसद्भावेन न मे ब्रह्माभेदइति चेत्तत्राह । यत्रेति ।

यद्वस्तु सर्पादिकं यत्र मालादौ भ्रान्त्या भ्रमेण कल्पितमवर्त्तमान-मेव भातं तद्विवेके तस्याधिष्ठानस्यमालादेर्विवेके विविच्य विशेष-स्वरूपेण साक्षात्कारे तत्कल्पितं वस्तु तन्मात्रं मालादिमात्रमेव प्रमीयते तस्मादधिष्ठानान्मालादितोविभिन्नंभेदभाग् नैव भवति। यथाच स्वप्नविश्वं विचित्रं गजतुरगादिदृष्टं यत्त्वदादिभिस्तत्स्वप्ने नष्टं दृष्टमेव नष्टं प्रबोधे जागरे स्वस्मात्त्वदादितोद्रष्टुरात्मनोभिन्नं किन्तु दृष्टं न किमपि स्वप्नदृष्टं प्रबोधे स्वस्माद्भिन्नं केनापि दृष्ट-मिति स्वात्मानमेव तथा भातं मन्यस्व स्वातिरिक्तं व्यावहारिकं प्रातिभासिकं वाणुमात्रमपि किमपि मामंस्थाइत्यर्थः ॥ २५३ ॥

यत्र । भ्रान्त्या । कल्पितम् । तद्विवेके । तत् । तन्मात्रम् । न । एव । तस्माद् । विभिन्नम् ॥ स्वप्ने । नष्टम् । स्वप्नविश्वम् । विचित्रम् । स्वस्माद् । भिन्नम् । किम् । नु । दृष्टम् । प्रबोधे ॥

परमार्थसत्ता जगत्‌की नहीं है ऐसा कहा है अब व्यावहारिक प्रातिभासिक सत्ताका भी निषेध करे हैं । यत्र इति । जो

वस्तु सर्पादि मालादिमें भ्रमसे कल्पनासे प्रतीतहुवे उहांहै नहीं तिसें मालादि अधिष्ठानके विवेक साक्षात्कार होने पर सो काल्पित पदार्थ मालादि अधिष्ठानमात्र ही प्रतीत होवै है, माला-दिसे भिन्नताको ग्रहण करने वाला नहीं होवै है और जैसे स्वंप्नग्रवस्थामें नाना प्रकारके गज अश्व आदि दीखते हैं सो दृष्ट हुवे ही नष्टस्वभाव वाले हैं, जाग्रत्में अपनेसे भिन्न किसीने नहीं देखे इसकारण अपनेसे भिन्न किसीको मत मान, अपने को ही अनेकरूप हुवा मान ॥२५३॥

जातिनीतिकुलगोत्रदूरगं,
नामरूपगुणदोषवर्जितम् ॥
देशकालविषयातिवर्त्ति यत्,
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५४ ॥

भागत्यागलक्षणया निरुपाधिकशुद्धं चिन्मात्रं महावाक्यलक्ष्य-मित्यभिहितं तत्रमायातत्कार्योपाधित्यागेन सर्वे विकल्पानिरस्ता-इत्यप्युक्तप्रायमेव तच्छ्रवणेनोत्तमाधिकारिणामात्मसाक्षात्कार-सम्भवेपि मध्यमाधिकारिणामुक्तात्मभावनाऽवश्यं कर्तव्या यथा-त्मसाक्षात्कारोनिष्प्रत्यूहो भवेदित्यतस्तत्त्वमसीति नवकृत्वउप-देशं वैदिकं दशकृत्वोदशाभिः पद्यैः सर्वोपाधिविनिर्मुक्तब्रह्मभावना-सिद्धये सम्यगावर्त्तयति। जातीत्यादिना।

यद्ब्रह्म जातिनीतिकुलगोत्रदूरगम् । ब्राह्मणत्वक्षत्रत्वादयोलो-कवेदप्रसिद्धानेकव्यक्तिसमवेताएकाकारप्रत्ययगम्याजातयः, राज-नीतिधर्मनीत्यादयोविविधानीतयः, पितृकुलं गुरुकुलमित्यादीनि कुलानि, प्रवराध्यायप्रसिद्धानि भारद्वाजादीनि गोत्राणि च तेभ्यो-दूरगन्तैरसंस्पृष्टमित्यर्थः । "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमि"ति श्रुतेः नामरूपगुणदोषवर्जितम् । चैत्रमैत्रादिनामभिः, शुक्लनीला-दिभीरूपैः, उपकारादयोगुणाः, अपकारादयोदोषाः, अथवा सत्त्वा-दयः सन्तोषादयोवा गुणा, लोभादयोदोषास्तैर्वर्जितम् । देशकाल-

विषयातिवर्ति। अङ्गवङ्गादयो देशाः भूतादयः कालाः शब्दादयो विषयास्तानतिवर्तितुं शीलमस्य तत्तथा यत्तदुक्तस्वरूपं ब्रह्म तत्त्वमसि तत्स्वरूपमेवात्मनि मनसि भावय चिन्तयस्व निदिध्यासस्वेति यावत्॥ २५४॥

जातिनीतिकुलगोत्रदूरगम्। नामरूपगुणदोषवर्जितम्॥
देशकालविषयातिवर्त्ति। यत्। ब्रह्म। तत्। त्वम्। असि। भावय। आत्मनि॥ २५४॥

उत्तम अधिकारीको उपदेश किया अब मध्यम अधिकारीको दश श्लोकोंसे वेदोक्त नववार अभ्यासद्वारा आत्मबोधका प्रकार वर्णन करे हैं। जातिइति। जो ब्रह्म ब्राह्मणत्व क्षत्रियत्वादिजाति, राजनीति धर्मनीति आदि नीति, पितृकुल गुरुकुल इत्यादि कुल, भारद्वाजादि गोत्र इनके संबन्धसे रहित है और चैत्र मैत्र आदि नाम, शुक्ल नीलादिरूप, उपकारादि गुण, अपकारादि दोष इनसे रहित है। अंग वंग आदि देश, भूत आदि काल, शब्द आदि विषय इनके संबन्धसे रहित है उसको तुम अपना स्वरूप मनमें चिन्तनकर अर्थात् निदिध्यासन कर २५४

यत्परं सकलवागगोचरं,
गोचरं विमलबोधचक्षुषः॥
शुद्धचिद्घनमनादि वस्तु यद्,
ब्रह्म तत्त्वमसि भावयात्मनि॥ २५५॥

यत्सर्ववेदान्तप्रसिद्धं परमविद्यातत्कार्यातीतं सकलवागगोचरं जातिगुणक्रियासम्बन्धादिशब्दप्रवृत्तिनिमित्तशून्यत्वात्सर्वासां वाचामविषयभूतं विमलबोधचक्षुषः। महावाक्यजन्यासंभावनादिमलविकलबुद्धिवृत्तिरूपस्य लोचनस्य गोचरं विषयीभूतं स्वप्रकाशस्याप्युक्तवृत्तिनियर्त्याज्ञानविषयत्वेनैव तद्वृत्तिविषयत्वव्यपदेशोन विरुध्यते। शुद्धचिद्घनम्। विषयाश्रयविनिर्मुक्तप्रज्ञानैकपिण्ड-

मनादिकार्यकारणविनिर्मुक्तं यदेवं भूतं वस्तु बाधरहितं तद्ब्रह्म त्वमसि तत्साक्षात्चिकीर्षयाऽहंतद्ब्रह्मैवास्मीति यावत्साक्षात्कारं सत्कारनैरन्तर्याभ्यामात्मनि भावयेति भावः ॥ २५५ ॥

यत् । परम् । सकलवागगोचरम् । गोचरम् । विमलबोधचक्षुषः ॥ शुद्धचिद्घनम् । अनादि । वस्तु । यद् । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २५५ ॥

सर्व वेदान्तप्रसिद्ध जो अविद्या और उसके कार्यसे अतीत है, सर्व वाणीका अविषय है, असंभावनादि मलरहित, महावाक्यजन्य ज्ञानरूप नेत्रका विषय है, निर्मल चैतन्यरूप कार्यकारणरहित ऐसा बाधरहित ब्रह्म तूं है, अपने हृदयमें मैं ऐसा हूं ऐसा निदिध्यासनरूप भावना कर ॥ २५५ ॥

षड्भिरूर्मिभिरयोगि योगिहृ-
द्भावितं न करणैर्विभावितम् ॥
बुद्ध्यवेद्यमनवद्यमस्ति य-
द्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५६ ॥

षड्भिरूर्मिभिर्जरामरणक्षुत्पिपासाशोकमोहाख्यैरूर्मिवद्भवसागरे देहालाबुसमारूढं मूढं जीवमितस्ततश्चोत्क्षिपद्भिर्देहप्राणमनोधर्मैरयोगि सदाऽसंस्पृष्टं योगिहृद्भावितम् योगिभिर्हृदयेषु हार्दान्धतमसापनुत्तये भावितं सदा समाधिविषयतां नीतं न करणैर्विभावितम् । रूपादिज्ञानसाधकतमैश्चक्षुरादिभिर्न विभावितं नावगाहितम् । बुद्ध्यवेद्यम् स्थूलासंस्कृतबुद्ध्यगोचरीभूतं यच्चानवद्यमगर्ह्यम् । अस्ति सत्तामात्रं तद्ब्रह्म त्वमसीति पूर्ववत् ॥ २५६ ॥

षड्भिः । ऊर्मिभिः । अयोगि । योगिहृद्भावितम् । न । करणैः । विभावितम् ॥ बुद्ध्यवेद्यम् । अनवद्यम् । अस्ति । यद् । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २५६ ॥

जैसे समुद्रमें तरंग होते हैं तैसे संसारसागरमें जीवको विक्षेपके हेतु जरा मरण क्षुधा पिपासा शोक मोहरूप छै ऊर्मि (तरंग) जो देह-प्राण-मनके धर्म हैं उनके साथ असंबद्ध ब्रह्म है, योगिजन जिसको हृदयमें चिन्तन करते हैं, रूपादि ज्ञानोंके साधन नेत्रादिकरके नहीं विषय किया अशुद्धबुद्धिका अविषय है जो निर्दोष है सत्तामात्र स्वरूप है, सो ब्रह्म तू है, अपने हृदयमें निरन्तर चिन्तन कर ॥ २५६ ॥

भ्रान्तिकल्पितजगत्कलाश्रयं,
स्वाश्रयं च सदसद्विलक्षणम् ॥
निष्कलं निरुपमानवद्धि यद् ,
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५७ ॥

भ्रान्तिकल्पितजगत्कलाश्रयम्। भ्रान्तिकल्पितस्य जगतःकलानां प्राणादीनां कल्पनानामाश्रयमधिष्ठानं स्वयं च स्वाश्रयमनन्याश्रयं निराकारत्वाचिदाकारत्वाभ्यामाश्रयानपेक्षत्वात्तस्येति भावः। "स्वे महिम्नि प्रतिष्ठितः" इति श्रुतेः सदसद्विलक्षणम्। सत्स्थूलमसत्सूक्ष्मं ताभ्यां विलक्षणं भिन्नमित्यर्थः। निष्कलं निरवयवम्। "अपाणिपादोजवनोग्रहीता" इत्यादिश्रुतेः यद्धि निरुपमानवत्। उपमितिरुपमानं भावे ल्युट् उपमानस्याभावोनिरुपमानम् निर्मक्षिकवदव्ययीभावोऽर्थाभावे, निरुपमानमुपमाभावोऽस्यास्तीति तथा। "न तस्य प्रतिमास्ति" "न तत्समश्चाभ्यधिकश्च दृश्यते" "न त्वत्समोस्त्यभ्यधिकः कुतोऽन्य" इत्यादिश्रुतिस्मृतिभ्यः सगुणस्य सावयवस्य च वस्तुनोगुणावयवादिभिर्हि साम्यं भवेन्निर्गुणस्य निरवयवस्य च तस्योपमानं न किमपि भवितुमर्हतीति भावः। तद्ब्रह्मत्वमसीति पूर्ववत् ॥ २५७ ॥

भ्रान्तिकल्पितजगत्कलाश्रयम्। स्वाश्रयम्। च। सदस-

द्विलक्षणम् ॥ निष्कलम् । निरुपमानवद् । हि । यद् । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २५७ ॥

भ्रान्तिकरके कल्पित जगत्की कल्पनाका अधिष्ठान है, निराकार होनेसे और चेतन होनेसे अपने आश्रयकी अपेक्षा-रहित है, स्थूल सूक्ष्मसे भिन्न है, निरवयव है, उपमाके अभाव वाला है, गुण अवयवादिके अभावसे उपमा होनी जिसकी बने नहीं सो ब्रह्म हे शिष्य ! तू है ॥ २५७ ॥

जन्मवृद्धिपरिणत्यपक्षय-
व्याधिनाशनविहीनमव्ययम् ॥
विश्वसृष्ट्यवविघातकारणं,
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५८ ॥

जन्मवृद्धिपरिणत्यपक्षयव्याधिनाशनविहीनम् जन्मोत्पत्तिः, वृद्धिरवयवोपचयः, परिणतिः परिणामोऽपक्षयः क्षीणता, व्याधि-ज्वरादिराधेरप्युपलक्षणमिदं, नाशनं मृत्युर्विनाशइति यावत् । एतैर्विकारैर्विहीनं विकलम् । जन्मपदमस्तीत्यस्याप्युपलक्षणं तेन षड्भावविकारानिरस्तावेदितव्याःयद्वा यास्कमुनिपठितषड्भाव-विकारेष्वास्तित्वस्य गणितस्यापि विकारत्वाभावमभिप्रेत्य तद्वि-हाय व्याधिविकारेण षट्त्वसङ्ख्यामापूर्य षड्भावविकारान् प्रद-र्श्यात्मनि ते निरस्ताइति बोध्यम्। यतः षड्विकारविकलमतएवा-व्ययम् । व्ययोविकारस्ताद्विवर्जितम् । विश्वसृष्ट्यवविघातकारणम् । विश्वस्य जगतः सृष्टेरवनस्य विघातस्य च कारणमित्यर्थः । जगज्ज-न्मस्थितिसंहृतिनिदानमिति भावः । तद्ब्रह्म त्वमसीत्यर्थः ॥२५८॥

जन्मवृद्धिपरिणत्यपक्षयव्याधिनाशनविहीनम् । अव्ययम् ॥ विश्वसृष्ट्यवविघातकारणम् । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २५८ ॥

जो ब्रह्म उत्पत्ति वृद्धि परिणाम क्षीणता ज्वरादिरोगविनाश इन विकारोंसे रहित है, विनाशसे रहित है, जगत्के उत्पत्ति स्थिति विनाशका कारण है सो ब्रह्म तू है ॥ २५८ ॥

अस्तभेदमनपास्तलक्षणं,
निस्तरङ्गजलराशिनिश्चलम् ॥
नित्यमुक्तमविभक्तमूर्ति य-
द्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५९ ॥

अस्तभेदम्। निरस्तजीवेशजगद्भेदम्। अनपास्तलक्षणं न अपास्तं तिरोहितं लक्षणं स्वरूपं यस्य तत्तथा सर्वप्रत्ययेषु सद्रूपतया ब्रह्मणः स्फुरणाभ्युपगमादितिभावः। निस्तरङ्गजलराशिनिश्चलम् निस्तरङ्गोनिश्चेष्टोयोजलराशिः सागरस्तद्वन्निश्चलमचलं गम्भीरमित्यर्थः। नित्यमुक्तम्। त्रैकालिकबन्धात्यन्ताभाववत्। अविभक्तमूर्ति वस्तुपरिच्छेदविधुरम्। "अविभक्तं च भूतेषु विभक्तमिव च स्थित"मिति स्मृतेः यदेतादृशं ब्रह्म तत् त्वमसि॥ २५९॥

अस्तभेदम्। अनपास्तलक्षणम्। निस्तरङ्गजलराशिनिश्चलम्॥ नित्यमुक्तम्। अविभक्तमूर्ति। यत्। ब्रह्म। तत्। त्वम्। असि। भावय। आत्मनि॥ २५९॥

जो जीव ईश्वर जगत्के भेदसे रहित है, प्रकट स्वरूप है, चेष्टारहित समुद्रवत् गम्भीर है, तीनों कालमें वन्धके संबन्धसे शून्य है, वस्तु परिच्छेदरहित है ऐसा ब्रह्म हे शिष्य! तू है॥ २५९॥

एकमेव सदनेककारणं,
कारणान्तरनिरास्यकारणम् ॥
कार्यकारणविलक्षणं स्वयं,
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६० ॥

एकमेवाद्वितीयमेव सदविनाशि, भवद्वा अनेककारणमनेकेषां

चितामचितां च कारणम् 'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाःसहस्रशः प्रभवन्ते सरूपाः' तस्माद्वाएतस्मादात्मनआकाशः सम्भूतआकाशाद्वायुर्वायोरग्निः" इत्यादिश्रुतिभ्यः कारणान्तरानिरास्यकारणम् । कारणान्तरं निरसितुं शीलं येषां वेदान्तानाम् । "नचास्य कश्चिज्जनिता" इत्यादीनां तैः प्रमाणैरकारणं कारणशून्यमित्यर्थः । कार्यकारणविलक्षणम् । मायातत्कार्यविषमस्वभावं स्वयं परानपेक्षं ब्रह्म त्वमसि ॥ २६० ॥

ऐक्रम् । एव । सद् । अनेककारणम् । कारणान्तरानिरासिअकारणम् ॥ कार्यकारणविलक्षणम् । स्वयम् । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २६० ॥

सत्रूप है, सजातीयादि भेदसे रहित है, जड चेतन अनेक प्रकारके संसारका कारण है, ब्रह्मभिन्न कारणका निषेध करनेवाले वेदान्तोंकरके अकारणरूप जो बोधन किया है अर्थात् जिसका कारण कोई नहीं है माया और उसके कार्यसे विषम स्वभाव वाला है अन्यकी अपेक्षासे रहित है सो ब्रह्म तू है॥ २६०॥

निर्विकल्पकमनल्पमक्षरं,
यत्क्षराक्षरविलक्षणं परम् ॥
नित्यमव्ययसुखं निरञ्जनं,
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६१ ॥

निर्विकल्पकम् । संशयविपर्ययादिविकल्पशून्यम् । अनल्पम् अपरिच्छिन्नम् । अक्षरम् क्षरणविवर्जितम् । "अक्षरं नक्षरं विद्यादश्नोतेर्वा सरोक्षरमि" त्युक्तेः । क्षराक्षरविलक्षणम् । शरीराविद्याविलक्षणम् "क्षरःसर्वाणि भूतानि कूटस्थोऽक्षरउच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इति स्मृतेः । नित्यमविनाशि अव्ययसुखम् । नित्यानन्दलक्षणम् । निरञ्जनमविद्यानावृतं ब्रह्म यत्तत्त्वमसि ॥ २६१ ॥

निर्विकल्पकम् । अनल्पम् । अक्षरम् । यत् । क्षराक्षरविलक्षणम् । परम् ॥ नित्यम् अव्ययसुखम् । निरञ्जनम् । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २६१ ॥

संशय विपर्यय आदि विकल्पोंसे रहित है, अपरिच्छिन्न है, क्षरणसे वर्जित है, शरीर अविद्यासे विलक्षण है, सर्वसे उत्कृष्ट है, अविनाशि है, निर्विकार सुखरूप है, अविद्याकृत आवरणसे रहित है ऐसा ब्रह्म हे शिष्य! तू है ॥ २६१ ॥

यद्विभाति सदनेकधा भ्रमा-
न्नामरूपगुणविक्रियात्मना ॥
हेमवत्स्वयमविक्रियं सदा,
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६२ ॥

यत्सद्भ्रमादनेकधा नामरूपगुणविक्रियात्मना हेमवद्विभाति यथैकमपि सुवर्णं भ्रमादेव कटकादिनानाविधनामरूपादिभिर्विभाति तथा सद्ब्रह्मापि सदैकमपि देवतिर्यगादिनानाविधनामरूपादिभिर्भ्रमादेव भाति स्वयं चाविक्रियं निर्विकारं नामरूपादिप्रपञ्चस्य विवर्तमात्रत्वादिति भावः । तद्ब्रह्म त्वमसि ततोऽहं ब्रह्मैवास्मीति सदाऽऽत्मनि भावय ॥ २६२ ॥

यद् । विभाति । सद् । अनेकधा । भ्रमात् । नामरूपगुणविक्रियात्मना ॥ हेमवत् । स्वयम् । अविक्रियम् । सदा । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २६२ ॥

जैसे एक सुवर्ण भ्रमसे कटक कुण्डलादि नाना प्रकारके नाम रूपादिकरके भान होवै है तैसे सत्ब्रह्म एकही देवै पशु मनुष्य आदि नाना प्रकारके नामरूपादिकरके भ्रमसे प्रतीत होता है और आप निर्विकार है, नाम रूपात्मक प्रपञ्चको विवर्त

मात्र होनेसे विकारकी प्राप्ति नहीं है सो ब्रह्म तू है ॥ २६२ ॥

यच्चकास्त्यनपरं परात्परं,
प्रत्यगेकरसमात्मलक्षणम् ॥
सत्यचित्सुखमनन्तमव्ययं,
ब्रह्म तत्त्वमसि भावयात्मनि ॥ २८३ ॥

यद्ब्रह्म अनपरम् । यस्मात्परं नापरमस्ति किञ्चि"त्तदेतद्ब्रह्मापूर्वमनपरमि"त्यादिश्रुतिभ्योन विद्यमानमपरं यस्मात्तत्तथा स्वयमित्यर्थः । चकास्ति दीप्यते इति भावः । परात् कार्यवर्गतः परस्मादज्ञानात्परं तदस्पृष्टं प्रत्यगेकरसम् सर्वान्तरकूटस्थरूपम् । आत्मलक्षणम् मुख्यात्मस्वरूपम् । सत्यचित्सुखं सच्चिदानन्दस्वरूपम् । अनन्तम् । त्रिविधपरिच्छेदविकलम् । अव्ययम् । अपक्षयाविनाशवर्जितम् । त्वमसीति निरन्तरं तदेवाहमस्मीत्यात्मनि भावयेति भावार्थः ॥

यत्[१] । चकास्ति । अनपरम्[२] । परात्[३] । परम्[४] । प्रत्यगेकरसम्[५] । आत्मलक्षणम् ॥ सत्यचित्सुखम्[६] । अनन्तम्[७] । अव्ययम्[८] । ब्रह्म । तत् । त्वम् । असि । भावय । आत्मनि ॥ २६३ ॥

जो ब्रह्म पर[१]से रहित है, केवल स्वरूप प्रकाशता है, कार्यसमूह[२] से पर जो अज्ञान है तिससे भी पर[३] है उसके संबन्धसे रहित है, सर्व[४] से अन्तर कूटस्थ है, मुख्यात्मा[५]का स्वरूप है, सत्[६] चित् आनन्द स्वरूप है, देश[७] कालादि परिच्छेदरहित है, अपक्षीणता[८] विनाश करके वर्जित है सो ब्रह्म तू है ॥ २६३ ॥

उक्तमर्थमिममात्मनि स्वयं,
भावयेत्प्रथितयुक्तिभिर्धिया ॥

---

१ यस्मात्परमवधिभूतमपरमन्यन्नास्ति किन्तु ब्रह्मैव सर्वावधिभूतं निरवधिरित्यर्थः ।

संशयादिरहितं कराम्बुव-
त्तेन तत्त्वनिगमोभविष्यति ॥ २६४ ॥

उक्तायाब्रह्मात्मभावनायाः फलं प्रदर्शयन्नाह। उक्तमर्थमिति। उक्तम्। दशश्लोक्याभिहितम्। इमम्। साक्षादनुभूयमानम्। अर्थम्। परमार्थभूतं ब्रह्मात्मैक्यलक्षणम्। आत्मनि। स्वान्तःकरणे प्रथितयुक्तिभिः वेदानुकूलसत्तर्कैः धिया शुद्धबुद्ध्या स्वयं भावयेद्यः कश्चिदहर्निशं चिन्तयेत्। तेन। सर्वथाऽसम्भावनाविपरीतभावनानिरासक्रमेणोक्तार्थभावनापरिपाकेन तस्य कराम्बुवत्। करस्थसलिलवत्। संशयादिरहितं यथा भवति तथा। तत्त्वनिगमः। तत्त्वस्य नित्याद्वयब्रह्मस्वरूपस्य निगमोऽवगमोनिश्चयः साक्षात्कारइति यावत्। भविष्यति। उदेष्यतीत्यर्थः। "ततस्तु तं पश्यते निष्कलं ध्यायमान" इतिश्रुतेः। अम्बुग्रहणं शान्तिलाभस्यापि सूचनाय यथा दूरतोदृष्टेपि जले पिपासोः सन्तोषउदेति करपुटप्राप्ते तु तस्मिन् शैत्यस्पर्शोऽवश्यमुदेति तदुत्तरक्षणे पाने तु शान्तिरेव निःसंशयमनुभूयते तथा शब्दतोब्रह्मात्मनि श्रुतेपि विषयतृष्णानिवृत्त्या कश्चिद्विलक्षणः सन्तोषउदेति तद्भावनया तु विचित्रैव काचिदात्मशान्तिरनुभूयते तदुत्तरक्षणे तत्साक्षात्कारे तु सर्वथा शान्तिरुदेति इति भावः ॥ २६४ ॥

उक्तम्। अर्थम्। इमम्। आत्मनि। स्वयम्। भावयेत्। प्रथितयुक्तिभिः। धिया ॥ संशयादिरहितम्। कराम्बुवत्। तेन। तत्त्वनिगमः। भविष्यति ॥ २६४ ॥

इन दश श्लोकोंमें जो कहा है साक्षात् अनुभूत होरहा है परमार्थरूप ब्रह्म जीवका एकत्व अपने अन्तःकरणमें वेदानुकूल सत्य युक्तियोंकरके शुद्धबुद्धिकरके जो दिन रात्रि चिन्तन करे तिसके करनेसे असम्भावना विपरीतभावनाके निरास होने करके तिस पुरुषको संशयादिरहित हस्तमें जैसे जल

१ तदुक्तं भगवता "शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति" इति।

का साक्षात्कार होता है तैसे तिसंकरके नित्य अद्वैत ब्रह्मस्वरूप का साक्षात्कार उदय होवैगा ॥ २६४ ॥

सम्बोधमात्रं परिशुद्धतत्त्वं,
विज्ञाय सङ्घे नृपवच्च सैन्ये ॥
तदाश्रयःस्वात्मनि सर्वदा स्थितो-
विलापय ब्रह्मणि विश्वजातम् ॥ २६४ ॥

ब्रह्मसाक्षात्कारलभ्यां ब्रह्मात्मना स्थितिं ब्रह्मनिष्ठाभिधामाभिदधाति । सम्बोधमात्रमिति ।

सैन्ये । सेनायाम् । नृपवत् । सेनास्वामिनं नरपतिमिव चकारः पादपूर्णौ।सङ्घे शरीरेन्द्रियादिसङ्घाते तत्स्वामिनम्।संबोधमात्रम्। नित्यचिद्रूपम्। परिशुद्धतत्त्वम् निरस्तसमस्ताविद्यातत्कार्यमलम् विज्ञाय भावनापरिपाकेन साक्षात्कृत्य तदाश्रयः तस्याभिहितसंघातस्याश्रयोऽधिष्ठानं भूत्वा स्वात्मनि ब्रह्मात्मनि सर्वदा । भोजनादिव्यवहारसमयेऽपिस्थितः लब्धनिष्ठः सन् विश्वजातम् । जडजातम् ब्रह्मणि स्वात्मतया साक्षात्कृते विलापय नेदं ब्रह्मणोऽन्यत्किञ्चिदपि कटकादिकमिव हेम्नइति विजानीहि न कदापि प्रमादेन विश्वमणुमात्रमपि सत्यं मंस्थाइति भावः ॥ २६५ ॥

सम्बोधमात्रम् । परिशुद्धतत्त्वम् । विज्ञाय । संङ्घे । नृपवत् । च । सैन्ये ॥ तदाश्रयः । स्वात्मनि । सर्वदा । स्थितः । विलापय । ब्रह्मणि । विश्वजातम् ॥ २६५ ॥

ब्रह्म साक्षात्कारसे प्राप्त होनेवाली ब्रह्मनिष्ठाको कहे हैं । सम्बोधमात्रम् इति । सेनामें सेनाके स्वामी राजावत्, देहादि संघातमें संघातका स्वामी नित्य चेतनरूप अविद्या और उसके कार्यरूप मलसे रहितको साक्षात्कारकरके तिस संघात का अधिष्ठान होकर ब्रह्मरूप आत्मामें सर्वदा व्यवहारकालमें भी निष्ठा हो प्राप्त होकर जड प्रपञ्चको आत्मरूप साक्षात् किये

ब्रह्मात्मामें विलापन कर अर्थात् कटकादि जैसे सुवर्णसे भिन्न नहीं तैसे प्रपञ्च ब्रह्मसे भिन्न नहीं है ऐसा निश्चय कर कदापि प्रपञ्चको सत्य मत मान ॥ २६५ ॥

बुद्धौ गुहायां सदसद्विलक्षणं,
ब्रह्मास्ति सत्यं परमद्वितीयम् ॥
तदात्मना योत्र वसेद्गुहायां,
पुनर्न तस्याङ्ग गुहाप्रवेशः ॥ २६६ ॥

ब्रह्मनिष्ठायाः फलमाह । बुद्धाविति ।

बुद्धौ जडचेतनाध्यवसायलक्षणायां गुहायां सदसद्विलक्षणं परमाद्वितीयं सत्यं ब्रह्मास्ति विद्यते सर्वत्र विद्यमानस्यापि बुद्धिगुहोपलब्धिस्थानं वेदवर्णितमस्तीत्यर्थः। तदात्मना ब्रह्मस्वरूपेण योब्रह्मविदत्र गुहायां वसेत् । ब्रह्मनिष्ठामभिहितामेकाग्रतया सम्पादयेद्बुद्धितादात्म्यादित्यागेन सदा ब्रह्मनिष्ठायां लीयेत अङ्ग हेशिष्य तस्य ब्रह्मनिष्ठस्य पुंसः पुनर्गुहाप्रवेशोमातृकुक्षिप्रवेशोन हेत्वाभावाज्जन्मलाभोन भवतीत्यर्थः । अत्र पुनर्ग्रहणेनेह जीवद्दशायामपि न देहादिकं किञ्चिन्मन्यते ब्रह्मनिष्ठया विलापितत्वात्तस्य विदेहइव जीवन्मुक्तिसुखमनुभूय पुनश्च न भवान्तरं भवतीति ब्रह्मनिष्ठा जीवन्मुक्तिसुखकरीति सूचितम् ॥ २६६ ॥

बुद्धौ । गुहायाम् । सदसद्विलक्षणम् । ब्रह्म । अस्ति । सत्यम् । परम् । अद्वितीयम् ॥ तदात्मना । यः । अत्र । वसेद् । गुहायाम् । पुनः । न । तस्य । अङ्ग । गुहाप्रवेशः ॥ २६६ ॥

ब्रह्मनिष्ठाका फल कहे हैं । बुद्धौ इति । जडचेतनका निश्चयरूप गुफामें स्थूल सूक्ष्म विलक्षण उत्कृष्ट अद्वैत अविनाशि ब्रह्म विद्यमान है, सर्वस्थानोंमें विद्यमानका बुद्धि स्थान उपलब्धिका साधन है ऐसाकरके वेदमें वर्णन किया है । ब्रह्मरूपकरके जो ब्रह्मवेत्ता इस गुफामें एकाग्रताकरके ब्रह्मनिष्ठाको

संपादन करे हे शिष्य ! तिसे ब्रह्मनिष्ठ पुरुषको मौताके उदररूप गुफामें प्रवेश नहीं होता है अज्ञानरूप कारणके अभावसे फिर जन्मादि संसारमें नहीं आता है ॥ २६६ ॥

ज्ञाते वस्तुन्यपि बलवती वासना नादिरेषा,
कर्ता भोक्ताप्यहमिति दृढा यास्य संसारहेतुः ॥
प्रत्यग्दृष्ट्यात्मनि निवसता सापनेया प्रयत्ना-
न्मुक्तिं प्राहुस्तदिह मुनयोवासनातानवं यत् ॥२६७॥

ब्रह्मनिष्ठायाजीवन्मुक्तिसुखाभिप्रापकत्वप्रकारमाह। ज्ञातइति। वस्तुनि परमात्मानि ज्ञाते निश्चितेपि एषा सर्वानुभवसिद्धाऽनादिरनेकजन्मपरम्परार्जिता बलवती विवेकेनापि दुश्छेद्या बलिष्ठाहं कर्ता भोक्तास्मीत्याकारा वासना संस्कारः तस्याः सद्भावे दोषोत्पादमाह। येत्यादिना अस्य जीवस्य यासंसारहेतुर्जन्मादिनिदानं "यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवती"ति श्रुतेः। "यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तन्तमेवैति कौन्तेय सदा तद्भावभावितः॥"इति स्मृतेश्च सा चोक्तदोषदुष्टा प्रत्यग्दृष्ट्या देहेन्द्रियादिभ्योऽसज्जडदुःखात्मकेभ्यः प्रातिलोम्येन सच्चिदानन्दरूपेणाश्वतिभासते इति प्रत्यक्। यद्वा प्रकर्षेण त्यजति जडजातमन्धतमसं स्वयंज्योतिःस्वरूपेणेति प्रत्यक् साक्षी चिदात्मा तद्दृष्ट्या आत्मनि निवसता ब्रह्मनिष्ठेनापनेया सदाब्रह्मनिष्ठया विनिवर्त्या। ननु किमेतस्याअपनयेसमुद्योगेन ब्रह्मसाक्षात्कारेण स्वयमेषापनेष्यतइति चेन्नेत्याह। प्रयत्नादिति। ब्रह्मसाक्षात्कारस्याविद्याविनाशनेन विदेहमुक्तिकरत्वेपि वासनापनयोन विना ब्रह्मनिष्ठया तथाच जीवन्मुक्तिसुखं वासनापनयेएव सिद्ध्यति वासनापनयश्च ब्रह्मनिष्ठयैव सिद्ध्यति ब्रह्मनिष्ठा च स्वप्रयत्नं महान्तमपेक्षतइति भावः। अत्र मुनीनां सम्मतिमाह इह जीवत्येवास्मिन्कलेवरे मुक्तिं बन्धनिवृत्तिं जीवन्मुक्तिमित्यर्थः किंजीवन्मुक्तिस्वरूपमाहुस्तत्राह। यदिति। यद्वासनातानवं कर्तृभोक्तृत्ववासनापनयस्वरूपं यत्तदेव जीवन्मुक्तिस्वरूपं मुनयः "प्रजहाति यदा कामान्सर्वा-

न्पार्थं मनोगतानात्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते" इत्यादिना स्थितप्रज्ञलक्षणमाचक्षाणाव्यासादयो महर्षयः प्राहुः प्रोचुरित्यर्थः। अत्र तानवपदग्रहणं शरीरधारणार्थं वासनानां प्रारब्धवशतोऽनुवृत्तावपि विपरीतप्रत्ययाजनकत्वेनोत्खातदंष्ट्रोरगवद्वर्तमानानामप्यकिञ्चित्करत्वं सूच्यते। एतदभिप्रायकमेवापनयेति पदमन्यथा विनाशयेत्येवावददिति भावः॥ २६७॥

ज्ञाते। वस्तुनि। अपि। बलवती। वासना। अनादिः। एषा। कर्ता। भोक्ता। अपि। अहम्। इति। दृढा। या। अस्य। संसारहेतुः॥ प्रत्यग्दृष्ट्या। आत्मनि। निवसता। सा। अपनेया। प्रयत्नात्। मुक्तिम्। प्राहुः। तद्। इह। मुनयः। वासनातानवम्। यत्॥ २६७॥

ब्रह्मनिष्ठाको जीवन्मुक्तिसुख–प्रापकता निरूपण करे हैं।

ज्ञाते इति। परमात्माके निश्चित होनेपर सर्वानुभवसिद्ध अनेक जन्मपरंपरासे सम्पादित विवेकसे विना दुरुच्छेद मैं कर्ता भोक्ता हूं ऐसी वासनारूप संस्कार जो इस जीवको जन्मादिका कारण है तिसको ब्रह्मनिष्ठने मैं साक्षीरूप हूं इस प्रकार की ब्रह्मनिष्ठाकरके निवृत्त करना चाहिये इसमें प्रमाद न करना चाहिये प्रयत्नसे निवृत्त करना उचित है जीवन्मुक्तिकी सिद्धिमें वासनानिवृत्ति हेतु है वासनानिवृत्तिमें ब्रह्मनिष्ठा हेतु है, ब्रह्मनिष्ठामें प्रबल प्रयत्नकी अपेक्षा है। जीवत्कालमें ही ऐसी शरीरमें बन्धनिवृत्तिरूप जीवन्मुक्ति वासनाका सूक्ष्मरूपसे शिथिल होने रूपको व्यासादि मुनि कहते हैं जो वासनाकी शिथिलता सो ही जीवन्मुक्ति है॥ २६७॥

अहं ममेति योभावोदेहाक्षादावनात्मनि॥
अध्यासोयं निरस्तव्योविदुषा स्वात्मनिष्ठया॥२६८॥

ब्रह्मनिष्ठया वासनातानवेऽध्यासनिरासोऽर्थसिद्धइत्याह । अहंममेतीति ।

देहाक्षादौ देहेन्द्रियादौ अनात्मनि आत्मभिन्ने आदिशब्देनात्मग्रहणशङ्कास्यात्तन्निवृत्तयेऽनात्मनीति अहं ममेति अहं स्थूलो ममेन्द्रियाणीत्यादिस्वरूपोयोभावोबुद्धिवृत्तेः सद्भावोभ्रमइत्यर्थः । अयमध्यासोनाम सच स्वात्मनिष्ठया पूर्वोक्तया ब्रह्मनिष्ठया विदुषा ब्रह्मविदा निरस्तव्योविनाशनीयइत्यर्थः ॥ २६८ ॥

अहम् । मम । इति । यः । भावः । देहाक्षादौ । अनात्मनि ॥ अध्यासः । अयम् । निरस्तव्यः । विदुषा । स्वात्मनिष्ठया ॥ २६८ ॥

ब्रह्मनिष्ठासे वासना शिथिल होनेसे अध्यासका नाश अर्थात् सिद्ध होवे है ऐसा कहे हैं । अहम् इति । देह इन्द्रियादि आत्मभिन्न पदार्थोंमें मैं स्थूल हूं, मेरे इन्द्रिय हैं इत्यादि वृत्तिका सद्भाव जो है यह ही अध्यास है उसको विद्वानने ब्रह्मनिष्ठाकरके निवृत्त करना चाहिये ॥२६८॥

ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ॥
सोहमित्येव सद्वृत्त्याऽनात्मन्यात्ममतिं जहि ॥२६९॥

ननु जपाकुसुमस्येदं लौहित्यं न स्फटिकस्येति विवेकेपि स्फटिके लौहित्यानुवृत्तिवदनात्मनि देहादावात्ममतिरनुवर्त्तते बहुधा यत्ने कृतेपि न निवर्त्तेत नच तन्निवृत्तिमन्तरा ब्रह्मनिष्ठाशतेनापि जीवन्मुक्तिसुखमाविर्भावयितुं शक्यते तत्राह ज्ञात्वेति ।

बुद्धिः । अन्तःकरणं तस्य तद्वृत्तिसाक्षिणं तद्वृत्तीनामध्यवसायादिलक्षणानां बुद्धिवृत्तीनां च साक्षिणं साक्षात्प्रकाशकं प्रत्यगात्मानमुक्तलक्षणं स्वात्मानं ज्ञात्वा निश्चित्य सोहं सः साक्षी चिदात्माहं प्रत्यगात्मा इत्येव सद्वृत्त्या इत्याकारिकया सद्वृत्त्या । अबाधितार्थविषयकज्ञानेन प्रमयेत्यर्थः । 'योहं सोसौ योसौ सोहं'

मिति'योसावादित्ये पुरुषः सोऽहमस्मी' तिप्रभृतिश्रुतिभ्यः अनात्मनि देहेन्द्रियादौ आत्ममतिम्। आत्मबुद्धिं जहि विनिवर्तय हन्तेरूपमिदं जहातेरिति तु कस्यचिद्भ्रमएव ॥ २६९॥

ज्ञात्वा । स्वम् । प्रत्यगात्मानम् । बुद्धितद्वृत्तिसाक्षिणम् ॥
सः।अहम्।इति।एवं।सद्वृत्त्या।अनात्मनि। आत्ममतिम्। जहि ॥

सोपाधिक अध्यास होनेसे स्फटिकमें लाल रंगका जैसे विवेक होनेपर भी भान होवै है तैसे ही विवेक होनेपर भी अनात्मके धर्मोंका आत्मामें भान प्राप्त होवै है इसीसे जीवन्मुक्तिकी सिद्धि कैसे होवैगी इस शङ्काका उत्तर कहे हैं। ज्ञात्वा इति। अन्तःकरण और उसकी वृत्तियोंका साक्षिरूप साक्षात्प्रकाशक सर्व अन्तर आत्माको निश्चयकरके सो साक्षी अन्तरात्मा मैं हूं इस प्रकारकी यथार्थ ज्ञानरूप वृत्ति करके।देह इन्द्रिय आदि अनात्मामें आत्मबुद्धिका नाशकर ॥

भावार्थः—सोपाधिक अध्यासस्थलमें भी पुष्पकी लाली की स्फटिकमें प्रतीतिमात्र होवै है और यह लालरंग स्फटिकका है ऐसा भ्रम कदापि होवै नहीं विवेक ज्ञानसे अविवेकका नाश होनेसे कारणके अभावसे भ्रमरूप कार्यका उदय होना दुर्लभ है तैसे आत्माके और अनात्माके विवेक होनेपर परस्पर धर्मोंका भ्रम भान होवै नहीं प्रतीति मात्रको साधक बाधकता होवै नहीं ॥ २६९ ॥

लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् ॥
शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु॥२७०॥

ननु लोकदेहशास्त्रानुरोधेन वर्तमानस्य मे कथं ब्रह्मनिष्ठा भविष्यति, तेषां त्यागे लोकापवादाद्यनर्थपरम्परा स्यादत्यागे तु ब्रह्मनिष्ठायाअलाभेन नाध्यासनिवृत्तिरित्युभयतोदोषस्तत्राह। लोकानुवर्तनमिति।

लोकानुवर्तनम् । लोकाचारमनामयप्रश्नादि लोकमर्यादया प्राप्तं त्यक्त्वा हित्वा । तथा देहानुवर्तनम् । अभ्यङ्गचन्दनालेपादिकं देहात्मवादिदृष्ट्या प्राप्तं त्यक्त्वा परित्यज्य । एवं शास्त्रानुवर्तनम् । शास्त्राणामध्ययनाध्यापनचिन्तनादिकं त्यक्त्वा विहाय "पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषत" इत्युक्तेः स्वाध्यासापनयमात्मनोऽनर्थरूपस्यात्मन्यनात्मभ्रमस्य विनाशं कुरु। अकिञ्चित्कराल्लोकापवादाद्भिभ्यतो लोकयात्रादिषु समाहितस्याध्यासापनयार्थमप्रयतमानस्य च ते लोकसन्तोषोऽध्यासापनोदश्चेत्युभयमसिद्धं स्यात् । "न विद्यते खलु कश्चिदुपायः सर्वलोकपरितोषकरोयः । सर्वथा स्वहितमाचरणीयं किं करिष्यति जनोबहुजल्पः ॥" इत्युक्तेः । देहपोषणादौ तत्परत्वे चाध्यासवृद्धिरध्ययनाध्यापनादिपरायणत्वे दूषणभूषणखण्डनमण्डनादिचिन्तनान्मनसोनुपरतेरध्यासाऽऽग्रहादयोदोषावर्द्धेरन्नध्यासानिवृत्त्या मुक्त्यसिद्धिश्चेति भावः ॥ २७० ॥

लोकानुवर्तनम् । त्यक्त्वा । त्यक्त्वा । देहानुवर्तनम् ॥ शास्त्रानुवर्तनम् । त्यक्त्वा । स्वाध्यासापनयम् । कुरु ॥ २७० ॥

लोक देह और शास्त्रोंके अनुसार चलनेसे ब्रह्मनिष्ठा नहीं सिद्ध होती और ब्रह्मनिष्ठा सिद्ध होवै तो लोकयात्रादिमें फरक आता है इस शङ्काका उत्तर कहे हैं। लोकानुवर्तनम् इति। आइये, अच्छे प्रसन्न हो, कुटुंबादि आनन्दमें हैं ऐसा लोकाचारका त्यागकरके तथा तैलमर्दन चन्दनलेपादि देहसुख और सौन्दर्य मति करनेको त्यागके तैसे ही पठन पाठनादि शास्त्रोंके त्यागके अपने भ्रमको निवृत्त कर । भ्रमनिवृत्ति विना शास्त्रादिका पठन पाठन भी निष्फल है ॥ २७० ॥

लोकवासनया जन्तोः शास्त्रवासनयापि च ॥
देहवासनया ज्ञानं यथावन्नैव जायते ॥२७१॥

ननु ब्रह्मज्ञानिनोमे कर्त्तव्याभावाद्विधिप्रतिषेधाविषयत्वाद्भवन्तु लोकाचारादयः किञ्चिन्नमत आह । लोकवासनयेत्यादिना ।

स्याद्विधिप्रतिषेधाविषत्वं ते यदि त्वं सम्यग्ज्ञानी स्याः, ज्ञानमेव तु सम्यक् तव दुर्लभं यतोजन्तोर्भवादृशस्य लोकवासनया लोकामपि तुष्यन्त्वतोलोकानुवृत्तिर्मया विधेयेति वासनयाऽऽचरतस्तथा शास्त्रवासनया। शास्त्राण्यधीतानि मयावश्यमध्याप्यान्यन्यथा विस्मृतानि दीर्घेण समयेन स्युःपुनश्च विद्वज्जनगोष्ठ्यां प्रश्नप्रवृत्तौ मेमूकीभावे महतीस्यादप्रतिष्ठेत्येवं शास्त्रवासनयाऽध्यापनादिकमाचरतस्तथा देहवासनया यदिमे देहोविनाभ्यङ्गाद्यसंस्कृतःस्यात्स्यात्तदा दौर्गन्ध्यादिना मालिन्यं वैरूप्यादिना च स्याददर्शनीयतेत्येवं वासनया प्रतिदिनं देहशोधनमाचरतोमूढप्रायस्य वाचिकज्ञानिनोयथावज्ज्ञानं सम्यग्ज्ञानं ब्रह्मणोनैव जायते नोत्पद्यते वैराग्यविवेकाद्यभावनात्मसाक्षात्कारस्तस्य दुर्लभोवाचिकज्ञानन्तु पिपासितस्य जलेन शान्तोस्मीति वदतोऽन्यथावादिनोविपर्ययज्ञानवन्नाध्यासापनोदनहेतुरित्यर्थः ॥

लोकवासनया। जन्तोः। शास्त्रवासनया। अपि। च ॥ देहवासनया। ज्ञानम्। यथावत्। न। एव। जायते ॥ २७१ ॥

ब्रह्मज्ञानीको विधिनिषेधका अभाव होनेसे लोकाचारादि करनेमें क्या हानि है इस शङ्काका उत्तर कहे हैं। लोकवासनया इति। हे शिष्य ! यथार्थ पूर्ण ब्रह्मज्ञानीको लोकवासना होवैही नहीं और जिसको होवै हैं उसको यथार्थज्ञानही नहीं हुवाहै ऐसा निश्चय करना चाहिये क्योंकि जो पुरुष लोकसन्तोष निमित्तक आचरण करता है और शास्त्र मैंने पठन किये हैं मेरेको विस्मृत होजावेंगे तो विद्वानोंकी सभामें मेरा निरादर होगा ऐसा विचारकर शास्त्रके पुनः २ पठन पाठनका जो आचरण करता है और मैं शरीरको तैलादिकरके शोधन न करूंगा तो कुरूप होजावेगा,चन्दनादि संस्कार न करूंगा तो दुर्गंधि आवेगी ऐसे विचारकर देहके शोधनमें लगेहुवे वाचिकज्ञानीको यथार्थ ज्ञान कदापि नहीं होता है क्योंकि यह तीन प्रकारकी

वासना अनात्मदृष्टि विना होवै नहीं, अनात्मदृष्टि जब तक बनी है तब तक अद्वैत आत्माके यथार्थ ज्ञानकी आशाभी नहीं होती इन वासनाके रहनेपर भी जो अपनेको ज्ञानी मानता है सो भूखा जैसे मनोरथ भोजनसे अपनेको तृप्त माने तैसे ही उसका ज्ञान मनोरथमात्र है ॥ २७१ ॥

संसारकारागृहमोक्षमिच्छो-
रयोमयं पादनिबन्धशृङ्खलम् ॥
वदन्ति तज्ज्ञाः पटु वासनात्रयं,
योऽस्माद्विमुक्तः समुपैति मुक्तिम् ॥ २७२ ॥

वासनात्रयवतोज्ञानं यथावन्न जायते इत्यभिहितं सम्प्रतिवासनात्रयस्य बन्धहेतुत्वं मुक्तिप्रतिकूलत्वं चाचष्टे । संसारकारागृहमोक्षमिति ।

तज्ज्ञाब्रह्मविदोवासनात्रयं लोकदेहशास्त्रवासनात्रयं संसारकारागृहमोक्षमिच्छोः संसारएव कारागृहं बन्धनागारं तस्मान्मोक्षं निवृत्तिमिच्छतोमुमुक्षोरयोमयं लोहमयमतिदृढमित्यर्थः । पटु निपुणं पादनिबन्धशृङ्खलं पादबन्धननिमित्तं निगडं वदन्ति यथाऽयोमयेन निगडबन्धेन कारागृहे बद्धोजनोदुःखमेवानुभवति न सुखलेशं लभते तथाऽनेन वासनात्रयेणापि बद्धोजीवोजन्मादिदुःखमेवानुभवेन्न जीवन्मुक्तिसुखमिति भावः । यश्चास्माद्वासनात्रयाद्विमुक्तोवियुक्तः समुक्तिम् । जीवन्मुक्तिं समुपैति प्राप्नोति तथाचाभिहितवासनात्रयाद्विमुक्तिरेव जीवन्मुक्तिलाभयुक्तिरितिभावः ॥ २७२ ॥

संसारकारागृहमोक्षम् । इच्छोः । अयोमयम् । पादनिबन्धशृङ्खलम् ॥ वदन्ति । तज्ज्ञाः । पटु । वासनात्रयम् । यः । अस्माद् । विमुक्तः । समुपैति । मुक्तिम् ॥ २७२ ॥

वासना तीन मुक्तिके प्रतिकूल हैं और बन्धका हेतु हैं ऐसा निरूपण करे हैं । संसारइत्यादि । ब्रह्मवेत्ता पुरुष लोके शास्त्र

देहोंकी तीन :वासनाको संसाररूप जेलखानेसे छूटनेकी ईच्छावाले मुमुक्षुको लोहेका रचाहुवा अतिदृढ पाँदबन्धनका हेतु बेड़ी कहते हैं अर्थात् इन तीन वासनाकरके बन्धन ही होता है और जो ईस वासना तीनसे रहित है सो जीवन्मुक्तिके सुखको अनुभव करता है इस कारण इस वासना तीनसे छुटनेसे ही बन्धसे छूटना और मुक्तिसुखभागी होना होता है ॥ २७२ ॥

जलादिसंसर्गवशात्प्रभूत-
दुर्गन्धधूताऽगरुदिव्यवासना ॥
संघर्षणेनैव विभाति सम्यग्,
विधूयमाने सति बाह्यगन्धे ॥ २७३ ॥

नन्वभिहिता त्रिधा वासना नित्यामोदाभिव्यक्तिलक्षणावासनायां ज्ञानप्रसादलभ्यायां सत्यामकिञ्चित्करीति चेदनात्मवासनया तिरोभूतत्वादात्मवासनैव तन्निवृत्तिमन्तरा नोद्भवितुं प्रभवतीति सदृष्टान्तं द्वाभ्यामाह। जलादिति।

अगरुदिव्यवासना। अगरुचन्दनस्यात्यद्भुता वासना आमोदः जलादिसंसर्गवशाद्दुर्गन्धसलिलसम्बन्धात् प्रभूतदुर्गन्धधूता ततउद्गतोयउत्कटःपूतिगन्धस्तेन धूता तिरस्कृताऽऽवृतासती संघर्षणेन बाह्यगन्धे औपाधिके दुर्गन्धे सम्यग्विधूयमाने निःशेषं निवृत्ते सति सत्येव विभाति। उद्भवति यथाऽयं दृष्टान्तस्तथा ॥ २७३ ॥

जलादिसंसर्गवशात्। प्रभूतदुर्गन्धधूता। अगरुदिव्यवासना। संघर्षणेन। एव। विभाति। सम्यग्। विधूयमाने। सति ॥ बाह्यगन्धे ॥ २७३ ॥

१ नित्यानन्देत्यर्थः। अत्र वासनासंस्कारस्तथा च ब्रह्मानन्दसंस्कारसन्तत्यां विशतयामित्यर्थः ॥

उक्त तीन वासना मोक्षवासनाके प्रतिबन्धद्वारा बन्धका हेतु हैं ऐसा निरूपण करेहैं । जलादीति । मलयागिरिचन्दनकी अद्भुत सुगन्धि जलके संबन्धसे उदय हुई दुर्गन्धिसे तिरस्कृत अर्थात् आच्छादित हुई है परंच चन्दनके संघर्षण करनेसे बाह्य दुर्गन्धिके नष्ट होजानेसे हीं प्रकट होती है ॥ २७३ ॥

अन्तःश्रितानन्तदुरन्तवासना-
धूलीविलिप्ता परमात्मवासना ॥
प्रज्ञातिसंघर्षणतोविशुद्धा,
प्रतीयते चन्दनगन्धवत् स्फुटम् ॥ २७४ ॥

परमात्मवासना नित्यामोदाभिव्यक्तिः अन्तःश्रितानन्तदुरन्तवासनाधूलीविलिप्ता । अन्तःकरणे श्रिता स्थिता या अनन्ता संख्यामतीता दुरन्ता दुर्भेद्या वासना नानाविधविषयभावनास्ताएव धूलीवदाच्छादकत्वसाम्याद्धूलीरूपास्ताभिर्विलिप्ता अनुद्भूतेत्यर्थः।प्रज्ञातिसंघर्षणातः विशुद्धबुद्धेः सर्वदा ब्रह्मनिष्ठतापादनेन विशुद्धा विगतानात्मवासना सती चन्दनगन्धवत् । संघृष्टागरुचन्दनामोदवत् । स्फुटं प्रतीयते।अभिव्यक्ता प्रकाशते इत्यर्थः।'ईशावास्यमिदꣳसर्वं यत्किञ्चिज्जगत्यांजगत् । तेन त्यक्तेन भुञ्जीथामागृधः कस्यस्विद्धनम् ॥' इति श्रुत्यर्थउक्तोत्रेतिबोध्यम् ॥ २७४ ॥

अन्तःश्रितानन्तदुरन्तवासनाधूलीविलिप्ता । परमात्मवासना ॥ प्रज्ञातिसंघर्षणतः । विशुद्धा । प्रतीयते । चन्दनगन्धवत् । स्फुटम् ॥ २७४ ॥

तैसे ही परमात्माकी वासना अन्तःकरणमें स्थित अगणित अखण्ड विषय–वासनारूप धूलीकरके आच्छादित है शुद्धबुद्धिकी सर्वदा ब्रह्मनिष्ठाके संपादनरूप संघर्षणकरके अनात्मवासनासे रहित होकर संघर्षण किये चन्दनकी सुगन्धिवत स्पष्ट प्रतीत होवै है ॥ २७४॥

अनात्मवासनाजालैस्तिरोभूतात्मवासना ॥
नित्यात्मनिष्ठया तेषां नाशे भाति स्वयं स्फुटम् ॥ २७५ ॥

उक्तमेव विवृणोति । अनात्मेति ।

आत्मवासना । आत्मामोदाभिव्यक्तिरनात्मवासनाजालैः अनात्मनां देहादीनां या वासनाः पूतिगन्धलक्षणाभावनास्तासां जालैर्निकरैस्तिरोभूताऽऽवृतासत्यसतीव विद्यमाना नित्यात्मनिष्ठया नित्याद्वयब्रह्मात्मैक्यस्थित्या । तेषामनात्मवासनाजालानां नाशे समूलघाते स्वयं प्रकाशान्तरनिरपेक्षतयास्फुटमसंदिग्धमविपर्यस्तं यथा भवति तथा भाति दीप्यतइत्यर्थः ॥ २७५ ॥

अनात्मवासनाजालैः । तिरोभूता । आत्मवासना ॥ नित्यात्मनिष्ठया । तेषाम् । नाशे । भाति । स्वयम् । स्फुटम् २७५

पूर्वोक्तका ही विवरण करे हैं। अनात्मइति। आत्माके आनन्द की अभिव्यक्ति देहादिकी दुर्गन्धिरूप उक्तवासनाके समूह करके आच्छादित हुई असतके वत् होरही है । नित्य अद्वैत ब्रह्मनिष्ठाकरके अनात्मवासना समूहके नाश होनेपर प्रकाशान्तरकी अपेक्षासे विना संशय विपर्यय विना प्रकाशे है॥ २७५॥

यथा यथा प्रत्यगवस्थितं मन-
स्तथा तथा मुञ्चति बाह्यवासनाम् ॥
निःशेषमोक्षे सति वासनाना-
मात्मानुभूतिः प्रतिबन्धशून्या ॥ २७६ ॥

नन्वनात्मपदार्थानामानन्त्यात्तद्वासनाअप्यनन्तास्ताश्चैकात्मगोचरयैकया ब्रह्मनिष्ठया कथं विनाशयितुं शक्याइति चेत्तत्राह यथा यथेति। मनः अन्तःकरणम् यथा यथा प्रत्यगवस्थितं प्रतीचि सर्वान्तरे साक्ष्यात्मनि अवस्थितं निष्ठां लभते तथा तथा बाह्यवासनामनात्मनां बाह्यानां देहेन्द्रियवित्तसुतादीनां वासनां मुञ्चति बाह्यवासनामुक्तोभवति एवं रीत्या शनैः शनैरात्मनि प्रतितिष्ठता मनसा दृढव-

लिष्ठब्रह्मनिष्ठालाभेन वासनानामनात्मवासनानां निःशेषमोक्षे सर्व-थाध्वंसे सति प्रतिबन्धशून्या अनात्मवासनालक्षणप्रतिबन्धविधुरा आत्मानुभूतिःआत्मामोदाभिव्यक्तिरुद्भवति सैव जीवन्मुक्तिरित्यर्थः

यथा । यथा । प्रत्यगवस्थितम् । मनः । तथा । तथा । मुञ्च-ति । बाह्यवासनाम् ॥ निःशेषंमोक्षे । सति । वासनानाम् । आ-त्मानुभूतिः । प्रतिबन्धशून्या ॥ २७६ ॥

विषयवासनाको अनन्त होनेसे एक ब्रह्मवासनासे उन-की निवृत्ति कैसे होगी । इस शङ्काका उत्तर कहे हैं । यथा इति । अन्तःकरण जैसे जैसे साक्षी आत्मामें निष्ठाको प्राप्त होवै है तैसे तैसे देह इन्द्रिय वित्त सुत आदिकी वासनाको त्यागता है इस प्रकार धीरे २ आत्मनिष्ठा करनेसे अनात्म पदार्थोंकी वासनाका सर्वथा विनाश होनेपर अनात्मवासनारूप प्रति-बन्धकसे रहित आत्मानन्दकी अभिव्यक्ति होवै है सो ही जीव-न्मुक्ति है ॥ २७६ ॥

स्वात्मन्येव सदा स्थित्वा मनो नश्यति योगिनः ॥
वासनानां क्षयश्चातः स्वाध्यासापनयं कुरु ॥ २७७ ॥

जीवन्मुक्तिसुखाभिव्यक्तिहेतुत्वादात्मनिष्ठोपादेया परमार्थावहा हेया चानर्थपरंपरावहाऽध्यासपरंपरेत्याह नवभिः स्वात्मन्येवेति ।

योगिनः आत्मनि मनोयोजनशीलस्य ब्रह्माभ्यासिनः स्वात्मनि अद्वयात्मनि सदास्थित्वैव निष्ठां लब्ध्वैव मनोनश्यति सर्वसंकल्पसं-न्यासि भवति योगारूढपदव्यपदेशं लभते "सर्वसंकल्पसंन्यासी यो-गारूढस्तदोच्यते" इति स्मृतेः । अतश्च वासनानामनात्मगोचराणां मनोऽधीनत्वात्तस्मिन्नष्टे क्षयोनाशस्तासामप्यर्थासिद्धो भवति अतस्त-स्मादध्यासस्य सकलानर्थप्रसवबीजत्वादात्मवासनातिरोधायकत्वेना-नर्थकरत्वाच्च तस्यापनयं ब्रह्मनिष्ठया निवृत्तिं कुर्वित्यर्थः ॥ २७७ ॥

स्वात्मनि । एव । सदा । स्थित्वा । मनः । नश्यति । योगिनः ॥

वासनानाम्। क्षयः। च। अतः। स्वाध्यासापनयम्। कुरु॥ २७७

जीवन्मुक्ति सुखका हेतु होनेसे ब्रह्मनिष्ठा ग्रहण योग्य है जन्मादि अनर्थका कारण होनेसे भ्रम परम्पराका त्याग करना उचित है। ऐसा नव श्लोकोंसे वर्णन करे हैं। स्वात्मनि इति। आत्मामें मनको योजन करने वाले पुरुषका अद्वैत आत्मामेंही सर्वकाल निष्ठाको प्राप्तहोकर मन सर्वसंकल्पसे रहित होजाताहै इसकारण अनात्मवासनाको मनके अधीन होनेसे मनके नाशसे तिनका भी नाश होवै है अर्थात् सिद्ध होता है इस कारण अनात्माके अध्यासको सकल अनर्थका कारण होनेसे उसकी ब्रह्म-निष्ठाकरके निवृत्ति करनी उचित है सो तुम कर॥ २७७॥

तमोद्वाभ्यां रजः सत्त्वात्सत्त्वं शुद्धेन नश्यति॥

तस्मात्सत्त्वमवष्टभ्य स्वाध्यासापनयं कुरु॥२७८॥

ननु गुणत्रयस्याध्यासनिमित्तस्य सद्भावात्कथमध्यासापनयस्त-त्राह। तमइति।

तमः प्रमादालस्यादिनिदानं तमोगुणोद्वाभ्यां रजः सत्त्वाभ्यां सन्मा-र्गप्रवृत्तिपरमात्मबोधाख्यप्रकाशकारणाभ्यां प्रवृद्धाभ्यां नश्यति स्वका-र्यन्तामसमुत्पादयितुं नक्षमते।तयोश्च मध्ये रजसोऽतिचपलत्वान्निश्च-लात्सत्त्वादेकाग्रताहेतोर्विनाशोभवतीत्याह रजइति।सत्त्वाद्रजोनश्य-तीत्यन्वयः। ननु सत्त्वस्यनाशकाभावान्निर्गुणात्मनिष्ठायाअलाभोऽत-आह सत्त्वमिति शुद्धेन सत्त्वेन मलिनं सत्त्वं नश्यति ननु तर्हि सत्त्वस्य शुद्धस्यावशेषइति चेत्तत्राह तस्मादिति यस्माच्छुद्धसत्त्वस्य ब्रह्मनिष्ठा-रूपेण परिणतस्यानवशेषस्तस्मात्कारणात्सत्त्वं सात्त्विकं ब्रह्मभावेना-वस्थानमवष्टभ्यावलम्ब्य स्वाध्यासापनयं कुरु पूर्ववत्॥ २७८॥

तमः। द्वाभ्याम्। रजः। सत्त्वात्। सत्त्वम्। शुद्धेन। न-श्यति॥ तस्मात्। सत्त्वम्। अवष्टभ्य। स्वाध्यासापनयम्। कुरु॥ २७८॥

अध्यासके कारण गुणत्रयके विद्यमान होनेपर अध्यासकी निवृत्ति कैसे होगी इस शङ्काको वारण करे हैं। तमःइति। प्रमाद आलस्यादिका कारण तमोगुण है,शुभमार्गमें प्रवृत्तिका कारण रजोगुण और परमात्माके ज्ञानका कारण सत्त्वगुण,इन के अधिक होनेसे सो तमोगुण अपना कार्य तामसके उत्पादन करनेमें असमर्थ होजावै है और तिन दोनोंमें रजोगुणको अति चंचल होनेसे ऐकाग्रताके हेतु सत्त्वगुणसे विनाश होवैहै शुद्ध सत्त्वसे मलिन सत्त्वका नाश होवैहै शुद्ध सत्त्वगुणको ब्रह्मनिष्ठारूपकरके स्थित होनेसे अपने अध्यासको नाशकर ॥२७८॥

प्रारब्धं पुष्यति वपुरिति निश्चित्य निश्चलः ॥
धैर्यमालम्ब्य यत्नेन स्वाध्यासापनयं कुरु ॥२७९॥

ननु गुणत्रयपरित्यागेन सदा ब्रह्मणि तिष्ठतोमे कथं शरीरस्थितिस्तात्स्थितिमंतरा च कथं ब्रह्मनिष्ठा जीवन्मुक्तिसुखं चेत्यतआह। प्रारब्धमिति।

वपुर्मे शरीरं प्रारब्धं येन प्राग्भवीयेन स्वोपार्जितेन कर्मवृन्देन रचितं तदेव पुष्यति स्वफलप्रसवेन पास्यतीति निश्चित्य निश्चयं चेतसि निधाय नितरां च धैर्यमालम्ब्य यत्नेन ब्रह्मनिष्ठाभ्यासेन स्वाध्यासेत्यादिप्रथमवत् ॥ २७९ ॥

प्रारब्धम्। पुष्यति। वपुः। इति। निश्चित्य। निश्चलः॥ धैर्यम्। आलम्ब्य। यत्नेन। स्वाध्यासापनयम्। कुरु २७९

तीन गुणोंके त्याग होनेसे शरीरकी स्थिति कैसे होगी, शरीरस्थिति विना ब्रह्मनिष्ठा कैसे प्राप्त होगी और जीवन्मुक्ति सुख कैसे मिलेगा इस शङ्काका उत्तर कहेहैं।प्रारब्धम् इति। पूर्वजन्मसम्पादित कर्मसमूहकरके रचित मेरा शरीर है इसको प्रारब्धकर्म ही अपने फलको देकर पालना करेगा ऐसा चित्त

में निश्चय कर निश्चल होके निरन्तर धीरजको धारणकरके ब्रह्मनिष्ठाके अभ्यासकरके अपना अध्यास दूरकर ॥ २७ ॥

नाहं जीवः परंब्रह्मेत्यतद्व्यावृत्तिपूर्वकम् ॥
वासनावेगतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८० ॥

अन्वयमुखेनाध्यासापनयमुक्त्वा निषेधमुखेनाप्याह नाहमिति। अहं शुद्धचिदात्मा परंकार्यकारणव्यतिरिक्तं नतु जीवोजीवभावावलम्बीतित्येवमतद्व्यावृत्तिपूर्वकं तद् ब्रह्म तन्न भवतीत्यतद्ब्रह्माभिन्नतया कल्पितं तस्यातस्यकार्यकारणलक्षणानात्मवर्गस्य व्यावृत्तिर्निषेधस्तत्पुरःसरमित्यर्थः। वासनावेगतः। द्वैतसंस्कारलक्षणदुर्गन्धवासनाप्राबल्येन प्राप्तस्य स्वाध्यासस्यापनयमित्यर्थः ॥ २८० ॥

न। अहम्। जीवः। परम्। ब्रह्म। इति। अतद्व्यावृत्तिपूर्वकम् ॥ वासनावेगतः। प्राप्तस्वाध्यासापनयम्। कुरु ॥

अन्वयमुखसे अध्यासनिवृत्तिको कहा है अब व्यतिरेक मुखसे निरूपण करे हैं। न इति। मैं शुद्ध चेतन कार्य कारण से भिन्न ब्रह्मरूप हूं जीवभावको आश्रय करने वाला नहीं हूं तिसे ब्रह्मसे भिन्न कार्य कारणरूप अनात्मसमूहके निषेध पूर्वक द्वैत संस्काररूप दुर्गन्धिरूप वासनाके बलसे प्राप्त अपने अध्यासको दूरकर ॥ २८० ॥

श्रुत्या युक्त्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मनः॥
क्वचिदाभासतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८१ ॥

ननु कादाचित्काभासमात्राध्यासस्यानर्थकरत्वाभावात्सर्वदाऽध्यासानुवृत्तोस्तु मय्यप्यभावान्नैवमहं नियोज्यइति चेत्तत्राह श्रुत्येत्यादिना श्रुत्या "ब्रह्मैवेदममृतं पुरस्ता"दित्यादिकया युक्त्या मत्तोदृश्यं न भिद्यते मदधीनसत्ताकत्वाद्यद्यदधीनसत्ताकं तत्ततो न भिन्नं मालाऽध्यस्तनागादिवत् इत्यादिबहुधाऽभिहितयुक्तिसमाख्यानुमानादिना।

तथा स्वानुभूत्या समाधिसमयेऽनुभूयमानाद्वैतात्मानुभवेन। आत्मनः सार्वात्म्यं सर्वात्मतामपरिच्छेदं ज्ञात्वा साक्षात्कृत्य क्वचित् कदाचिदप्याभासत आभासमात्रेणापि प्राप्तमध्यासमिति पूर्ववत् । यथा धूलध्वजस्य मात्रापि तृणादिना संधुज्योपचयेन बहुदहति दाखं तथा कादाचित्काध्यासोऽप्यनर्थविषयतृणसंयोगेनोपचीयानर्थपरंपरामावहेदिति साऽप्यवश्यमुक्तप्रकारेणापनेतव्यइतिभावः ॥ २८१ ॥

श्रुत्या । युक्त्या । स्वानुभूत्या । ज्ञात्वा । सार्वात्म्यम् । आत्मनः ॥ क्वचिद् । आभासतः । प्राप्तस्वाध्यासापनयम् । कुरु २८१॥

सर्वदा अध्यासको दुःखकी हेतुता है कदाचित् अध्यास होनेसे क्या हानि है इस शङ्काको निवारण करे हैं । श्रुत्याइति। पूर्व पश्चिमादि दिशामें दृश्यमान दृश्य सर्व ब्रह्मरूप है इस श्रुति करके जो जिसके आधीन सत्तावाला पदार्थ होवै है सो उससे भिन्न नहीं होवै है जैसे मालासे भिन्न मालामें कल्पित सर्प नहीं है तैसेही मेरे आधीन सत्तावाला होनेसे सर्व जगत् मेरेसे भिन्न नहीं है इस युक्तिकरके । और समाधिकालमें अनुभवसिद्ध अद्वैत आत्माके अनुभवकरके, अपनी अपरिच्छिन्नताका साक्षात्कारकरके किसी कालमें भी आभासमात्रसे प्राप्त हुवे अध्यासको भी दूर कर। जैसे अग्निका कणका मात्रभी तृणसंयोगसे अधिक होकर दाह करे है तैसे ही कदाचित्कालमें लेशमात्र भी अनात्मभ्रम उदय हुवा विषयरूप तृणके संबन्धसे अधिक हुवा जीवको अनर्थजालमें डालता है ॥ २८१ ॥

अनादानविसर्गाभ्यामीषन्नास्ति क्रिया मुनेः॥
तदेकनिष्ठया नित्यं स्वाध्यासापनयं कुरु ॥ २८२॥

ननु तत्तत्क्रियाःकुर्वतोमेऽध्यासोऽवश्यं भाविष्यत्यन्यथा न क्रियासिद्धिः । निष्क्रियश्च “ नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः" इति स्मृतेर्न कोऽपि स्थातुमर्हतीत्यतआह। अनादानेति।

मुनेर्मननशीलस्यानादानविसर्गाभ्यां ग्रहणाभावत्यागाभावाभ्यामीषत्स्वल्पापि प्रातिभासिकापीत्यर्थः। क्रिया नास्ति न संभवति। अहेयोपादेयब्रह्मात्मत्वनिश्चयेन ग्रहणत्यागबुद्ध्यभावात्। नहि ग्रहणत्यागबुद्धिमन्तरा काचिदपि क्रिया प्राणक्रियावद्भवन्त्यपि क्रियाभावं लभते सकामकर्मण एव क्रियात्वात्। "अकामतः क्रिया काचित् दृश्यते नेह कस्यचित्"इत्युक्तेः।तस्माद् "न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति"इति स्मृत्युक्तरीत्या स्वादृष्टवशतः प्राप्तक्रियामात्रं कुर्वन्नप्यक्रियश्च संस्तदेकनिष्ठयाभिहितमुनिनिष्ठया नित्यं वर्तमानः स्वाध्यासमपनय ॥ २८२ ॥

अनादानविसर्गाभ्याम्। ईषत्। न। अस्ति। क्रिया। मुनेः॥ तदेकनिष्ठया। नित्यम्। स्वाध्यासापनयम्। कुरु॥ २८२ ॥

स्नानभोजनादि क्रिया करनेसे अध्यास अवश्य प्राप्त होवै है और क्रियाको त्याग कर क्षणमात्रभी पुरुषको स्थित होना दुर्लभ है इस शङ्काका समाधान करे हैं। अनादान इति।हेशिष्य! ग्रहणबुद्धिके अभावसे त्यागबुद्धिके अभावसे मननशील विद्वान्को अल्पभी क्रिया नहीं बनती है। स्वाभाविक प्राणचेष्टावत् क्रियामात्रसे अध्यासकी प्राप्ति होवै नहीं। इस कारण एक ब्रह्मनिष्ठाकरके सर्वकालमें अध्यासको दूरकर २८२

तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः॥
ब्रह्मण्यात्मत्वदार्ढ्याय स्वाध्यासापनयं कुरु॥२८३॥

वक्तुक्त्वाऽभिहितस्वाध्यासापनयस्य हेतुफले दर्शयतितत्त्वमस्यादीति। तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः तत्त्वमसीत्यादिभ्यो जीवब्रह्मैक्यार्थकेभ्योगुरुमुखाच्छ्रुतेभ्योमहावाक्येभ्य उत्थोमनननिदिध्यासनद्वारासमुत्पन्नोयोब्रह्मणस्तत्पदार्थस्यात्मनश्च त्वंपदार्थस्यैकत्वबोधोऽभेदसाक्षात्कारस्तस्माद्धेतोर्ब्रह्मणि शोधिततत्पदार्थे आत्मत्वदार्ढ्याय स्वाभेदनिश्चयाय पुनःसंशयाय स्वाध्यासापनयम्॥ २८३ ॥

तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः ॥ ब्रह्मणि । आत्मत्वदार्ढ्याय । स्वाध्यासापनयम् । कुरु ॥ २८३ ॥

बहुत वार कथन की हुई अध्यासनिवृत्तिके कारण फल को निरूपण करे हैं । तत्त्वमसीति । जीव ब्रह्मकी एकता अर्थ के प्रतिपादक गुरुमुखसे श्रुत तत्त्वमसि इत्यादि महावाक्यों से मनन निदिध्यासन द्वारा उत्पन्न हुवा जो तत्पदार्थ ब्रह्मका त्वंपदार्थ जीवके संग एकत्वका साक्षात् ज्ञान तिससे शोधित तत्पदार्थ ब्रह्ममें अपना अभेद निश्चयके अर्थ अध्यासको निवृत्तकर ॥२८३॥

अहंभावस्य देहेऽस्मिन्निःशेषविलयावधि ॥
सावधानेन मुक्तात्मा स्वाध्यासापनयं कुरु ॥२८४॥

अध्यासापनयनसीमानमाह । अहंभावस्येति ।

अस्मिन्देहे देहमुख्ये संघातेऽहंभावस्यात्मभावस्य निःशेषविलयावधि निःशेषविनाशपर्यन्तं युक्तात्मायोगयुक्तचित्तःसन् सावधानेन प्रमादपरित्यागेन स्वाध्यासापनयम् ॥ २८४ ॥

अहंभावस्य । देहे । अस्मिन् । निःशेषविलयावधि ॥ सावधानेन । युक्तात्मा । स्वाध्यासापनयम् । कुरु ॥ २८४ ॥

अध्यासनिवृत्तिकी अवधि कहे हैं । अहंभावस्य इति । इस देहं मुख्यसंघातमें आत्मताके निःशेष लयपर्यन्त योगाभ्यास में प्रमादसे रहित होकर युक्तचित्त हुवा अपने अध्यासको दूर कर ॥ २८४ ॥

प्रतीतिर्जीवजगतोः स्वप्नवद्भाति यावता ॥
तावन्निरन्तरं विद्वन्स्वाध्यासापनयं कुरु ॥ २८५ ॥

तथैव जीवजगतोः स्वप्नवत्प्रतीतिः प्रातिभासिकत्वबुद्धिरपि यावद्भाति साक्षिणा त्वयानुभूयते तावत्कालं निरन्तरं निर्विच्छेदं हे विद्वन् प्रबुद्धतत्त्व स्वाध्यासमपनय ॥ २८५ ॥

प्रतीतिः । जीवजगतोः । स्वप्नवद् । भाति । यावता ॥ तावत् । निरन्तरम् । विद्वन् । स्वाध्यासापनयम् । कुरु ॥ २८५ ॥

तैसे ही जबतक जीव जगत्की स्वप्नवत् प्रातिभासिकत्व प्रतीति होती है तावत्कालपर्यन्त निर्व्यवधान हो विज्ञात आत्मस्वरूप अध्यास दूरकर ॥ २८५ ॥

निद्रायाल्लोकवार्त्तायाः शब्दादेरपि विस्मृतेः ॥
क्वचिन्नावसरं दत्वा चिन्तयात्मानमात्मनि ॥२८६॥

जीवन्मुक्तिसुखहेतुब्रह्मनिष्ठाऽध्यासापनयनफलिकाऽभिहिता तस्या एवात्मचिन्तेति व्यपदेशमपि दर्शयति। निद्रायाइति यद्वा सावधानेनेत्युक्तिं स्फोरयति। निद्रायाइति।

निद्रायास्तामस्याः समाधिविरोधिन्या "लयेसंबोधयेच्चित्तं" इत्युक्तेः लोकवार्त्तायादेशान्तरीयजनान्तरीयकुशलाकुशलप्रश्नलक्षणायावार्त्तायावाक्यवृत्तेर्निष्फलायानानावासनोत्पादेन चित्तविक्षेपहेतुभूतायाश्च शब्दादेः शब्दस्पर्शादिविषयजातस्यानुकूलप्रातिकूललक्षणभेदबुद्ध्युत्पादहेतोर्विस्मृतेः स्वात्मस्मृतिविरोधिवृत्तिमात्रस्य क्वचित्कदाचिन्नावसरं समयं न दत्वाऽऽत्मानं सर्वव्यापकं ब्रह्म प्रत्यगभिन्नमात्मनि स्वमानसे चिन्तय स्मर ध्यायेति वा तेन ब्रह्मनिष्ठस्याध्यासापत्तिरेव न भवतीति भावः ॥ २८६ ॥

निद्रायाः । लोकवार्तायाः । शब्दादेः । अपि । विस्मृतेः ॥ क्वचित् । न । अवसरम् । दत्त्वा । चिन्तय । आत्मानम् । आत्मनि ॥ २८६ ॥

सावधानताका वर्णन करे हैं। निद्रायाइति । समाधिविरोधी तामसीनिद्रावृत्तिका तथा देशान्तर पुरुपान्तरकी कुशलाकुशल प्रश्नरूप लोकवार्ताका इससेभी नाना प्रकारकी वासनाके उदय होनेसे चित्तको विक्षेप होता है तैसे शब्दस्पर्शादि विषयकी भी विस्मृति होनेसे विषयस्मृतिसे भी अनुकूल प्रतिकूलरूप भेदबुद्धिके उदय होनेसे भी अनर्थ होवै है अर्थात् आत्माकी स्मृति

का विरोधी वृत्तिमात्रको किसीकालमें अवसर न देकर सर्व-व्यापक ब्रह्म जीवाभिन्न है ऐसा मनमें चिन्तन कर जिससे अध्यासकी प्राप्ति ही न होवै ॥ २८६ ॥

मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः ॥
त्यक्त्वा चाण्डालवद्दूरं ब्रह्मीभूय कृती भव॥२८७ ॥

देहेऽहंभावस्य हेयत्वमुक्तम् । तदनात्मत्वेन साधयति । मातापित्रोरिति ।

मातापित्रोर्जननीजनकयोर्मलादस्पृश्यादन्त्यरसाच्छुक्रशोणिताभिख्यादुद्भूतमुत्पन्नमेतेन कारणतोमालिन्यमुक्तं स्वयं च मलमांसमयं पुरीषकीलालादिप्रायं तत्पूर्णमिति यावत् एतेन स्वरूपतोऽपिमालिन्यमाख्यातं तदुक्तं "स्थानाद्बीजादुपष्टंभान्निःस्यन्दान्निधनादपि । कायमाधेयशौचत्वात् पण्डिताह्यशुचिं विदुः" इति वपुःशरीरं चण्डालवत् अन्त्यजवदतिघृणास्पदं वस्तुतश्चण्डालस्य मलादिस्पर्शेनाशुचित्वं जन्मना च मालिन्यमेतस्य तु मलाज्जन्म सदा च मलपूर्णतेति ततोऽप्यधिकमशुचीति बोध्यम् । पद्यैकदेशस्य दृष्टान्तत्वमिदमभिहितं बोध्यम् दूरं शुद्धात्मनोऽसंगस्य संगायोग्यं त्यक्त्वाऽनात्मत्वेनात्ममतेर्बहिष्कृत्य ततश्च ब्रह्मीभूय ब्रह्मात्मैक्यनिष्ठया ब्रह्मतादात्म्यमनुभूय कृती भव कुशलोभव कृतार्थोभवेति यावत् ॥ २८७ ॥

मातापित्रोः । मलोद्भूतम् । मलमांसमयम् । वपुः ॥ त्यक्त्वा । चाण्डालवद् । दूरम् । ब्रह्मीभूय । कृती । भव ॥ २८७ ॥

देहमें आत्मबुद्धिके त्यागार्थ देहको अनात्मत्व वर्णन करे हैं । माताइति । माता पिताके शरीरके अन्त्यरस शुक्रशोणितरूप स्पर्शके अयोग्यसे उत्पन्न हुवा है अशौच मांस करके पूर्ण शरीर चाण्डालके समान ग्लानिका विषय है, असंग शुद्ध आत्माके सम्बन्ध अयोग्य जानकर अर्थात् आत्म-

बुद्धिसे बाहरकरके ब्रह्मनिष्ठाकरके अपनेको ब्रह्मरूप हुवा निश्चय जानकर कृतार्थ होवो ॥ २८७ ॥

घटाकाशं महाकाशइवात्मानं परात्मनि ॥
विलाप्याखण्डभावेन तूष्णीं भव सदा मुने ॥ २८८ ॥

ननु जीवब्रह्माभेदे तार्किकशङ्कास्फुरणेन वाचालता पुनःपुनरुद्भवन्ती न मुञ्चति मामिति चेत्तत्राह। घटाकाशमिति।

हेमुने मननिपुणशिष्य घटोपाधित्यागेन घटाकाशं घटावच्छिन्नं नभोमहाकाशेऽपरिच्छिन्नेवियतीवात्मानं निरुपाधिं जीवं शोधिताचिन्मात्रं परात्मनि तत्पदलक्ष्येऽद्वयानन्देऽखण्डभावेन भेदहेतुभूतोपाधिद्वयपरित्यागलब्धसंसर्गासंगिनिर्भेदस्वरूपेण विलाप्य तद्भेदभावनामपोह्य सदा ब्रह्मनिष्ठः संस्तर्कवादितर्कोपस्थितिसमये विषमिव विक्षेपबुद्ध्या विहाय तूष्णीं भव तर्काप्रचारेण सुखी भव। यद्यपि "आकाशमेकं हि यथा घटादिषु पृथग्भवेत्तथात्मैकोप्यनेकः स्याज्जलाधारेष्विवांशुमानि"ति भारताद् "विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते। आत्मनोब्रह्मणोभेदमसन्तं कः करिष्यति" इति विष्णुपुराणात्। जीवेश्वरौ न परस्परं भिद्येते उपाधिपरामर्षमन्तरेणाविभाव्यमानभेदत्वाद् घटामठाकाशवदिति तर्काचाभेदवादःसुदृढस्तार्किकेणापि संभावयितुं शक्यते तथापि भेदवादवासनावासितमानसैः साकं जीवन्मुक्तविवादोवृथा कण्ठशोषणमात्रफलोऽतएव'नानुध्यायाद्बहूञ्छब्दान्वाचोविग्लापनं हि तत्"इति श्रुतिराहेत्याशयः ॥२८८

घटाकाशम्। महाकाशे। इव। आत्मानम्। परात्मनि ॥
विलाप्य। अखण्डभावेन। तूष्णीम्। भव। सदा। मुने॥ २८८

नैयायिकमतके स्मरणसे जीवब्रह्मके अभेदमें प्राप्त शङ्काको दूर करे हैं। घटाकाशम् इति। हे मननिपुण शिष्य! घटोपाधिके त्यागसे घटाकाशको अपरिच्छिन्न महाकाशमें जैसे विलय कर सकता है तैसे ही निरुपाधि जीवस्वरूप साक्षीको तत्पद लक्ष्य अद्वैतानन्दमें भेदका हेतुभूत उपाधिओंका त्यागकर सर्वदाकाल

में विषवत् विक्षेपहेतुभूत भेदको त्यागदे अभेदनिश्चयकर २८८

स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ॥
ब्रह्माण्डमपि पिण्डाण्डं त्यज्यतां मलभाण्डवत् ॥ २८९ ॥

ननु "सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्" इत्यादिश्रुतिभिर्ब्रह्माण्डस्य विराट्शरीरत्वावगमात् ईशतनोश्च निंदितुमशक्यत्वादन्यथा नास्तिक्यापत्तेः ब्रह्माण्डाभ्यन्तरवर्त्तित्वाच्च व्यष्टिदेहानामपि प्राशस्त्येनैव भाव्यमिति चेत्तत्राह स्वप्रकाशमिति ।

सदात्मना सत्यभूतब्रह्मस्वरूपेण स्वप्रकाशमन्यप्रकाशानपेक्षस्वभावमधिष्ठानं कल्पितनामरूपारोपाश्रयं स्वयंभूयात्मनैव भूत्वा ब्रह्माण्डमपि च पिण्डाण्डमल्पाण्डं शरीरं व्यष्टिं समष्टिं च मलभाण्डवत् मलपूर्णभाण्डमिव त्यज्यतां हेयमिदमिति निश्चीयतामात्मत्वमतिश्च तास्मिन्हीयतामित्यर्थः । नास्तिक्यं तु न वेदार्थविज्ञत्वात्तदुक्तम् चरणाद्यान्ययांऽचरतोवेदार्थं परिभवतश्च तथा भवेदपि "नास्तिकोवेदनिन्दक" इत्युक्तेः 'श्रुतिस्मृती ममैवाज्ञे यस्तउल्लंघ्य वर्त्तते । आज्ञाच्छेदी ममद्वेषी नरकं प्रतिपद्यते' इत्युक्तेश्च तथाच जडमात्मत्वेन जानन्निन्द्यमनिन्द्यं चाभिमन्यमानोनास्तिकोभवतिनचेशशरीरं ब्रह्मांडमित्येतावता तस्यानिन्द्यत्वं, यतोभगवतैवाभिहितं "माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद" "अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः" इति प्रभृतिभिः स्ववचोभिर्निषिद्धत्वमन्यथा भगवतोदेहात्मवादित्वेन नास्तिक्यं भवताऽऽपादितं भवेत् इति भावः ॥ २८९ ॥

स्वप्रकाशम् । अधिष्ठानम् । स्वयंभूय । सदा । आत्मना ॥
ब्रह्माण्डम् । अपि । पिण्डाण्डम् । त्यज्यताम् । मलभाण्डवत् ॥

ब्रह्माण्डको विराट्का शरीर होनेसे श्रेष्ठता सिद्ध होवै है उस समष्टि शरीरका एकदेशरूप व्यष्टि शरीरभी श्रेष्ठ है उस की निन्दा करनी अनुचित है इस शङ्काका उत्तर कहे हैं। स्वप्रकाशम् इति । स्वप्रकाशरूप ब्रह्म अधिष्ठान है सो कल्पित नामरूप के आरोपका आश्रय है सो अपने आपका स्वरूप है ऐसा

जानकर ब्रह्माण्ड समष्टि और व्यष्टि शरीर मलपूर्ण भाण्डवत् त्यागयोग्य है अर्थात् आत्मता बुद्धिकी विषयताके योग्य नहीं है, विराट्का समष्टि शरीर ब्रह्माण्ड है तथापि आत्मरूपताकी प्रशंसाको नहीं पासकता है। जड वस्तुको अनात्मरूप जानना यह निन्दा भी नहीं है किन्तु वस्तुका यथावत् स्वरूप प्रतिपादन है ॥ २८९ ॥

चिदात्मनि सदानन्दे देहारूढामहंधियम् ॥
निवेश्य लिङ्गमुत्सृज्य केवलोभव सर्वदा ॥ २९० ॥

देहेऽहंमतित्यागेन फलितमाह चिदात्मनीति ।

देहारूढां देहे स्थूलशरीरमारूढामनेकजन्मार्जितामनादिमित्यर्थः। अहंधियमात्ममतिं चिदात्मनि चिद्रूपे प्रत्यगात्मनि सदानन्दे नित्यानन्दैकरसे निवेश्य संस्थाप्य लिङ्गं वर्णाश्रमादिदेहधर्मचिह्नं लिङ्गदेहं वा उत्सृज्याभिमानं तद्विषयं विहायेत्यर्थः। सर्वदा सर्वावस्थासु केवलोभवाद्वैतात्मस्वभावोभवेत्यर्थः ॥ २९० ॥

चिदात्मनि । सदानन्दे । देहारूढाम् । अहंधियम् ॥ निवेश्य । लिङ्गम् । उत्सृज्य । केवलः । भव । सर्वदा ॥ २९० ॥

देहमें आत्मबुद्धि त्यागका फल कहे हैं। चिदात्मनि इति । स्थूलशरीर गोचर अहंता बुद्धिको चेतनरूप सर्वान्तर सदा आनन्दरूप एकरस ब्रह्ममें स्थापनकरके वर्ण आश्रम आदि देहधर्मके चिह्न वा लिङ्गशरीरका अभिमान त्यागके सर्व अवस्थामें अद्वैत आत्मस्वभाव होवो ॥ २९० ॥

यत्रैषजगदाभासोदर्पणान्तः पुरं यथा ॥
तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्योभविष्यसि॥ २९१ ॥

अद्वैतविज्ञाने कृतकृत्यताफलमाह । यत्रैषइति ।

एषः प्रत्यक्षमुपलभ्यमानोजगदाभासः प्रातिभासिकोजगद्विलासः दर्पणान्तःपुरं यथा दर्पणस्य मध्ये प्रतिबिम्बितनगरमिवाभासमात्रेण

वर्त्तमानः संसारः तज्जगत्कल्पनाधिष्ठानं ब्रह्माहं प्रत्यगात्मास्मीति ज्ञात्वा साक्षात्कृत्य कृतकृत्यःसमाप्तकर्त्तव्योभविष्यसि न कर्तव्यान्तरं मंस्यसे " यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इति "तस्य कार्यं नविद्यते" इति च स्मृतेरिति भावः ॥ २६१ ॥

यत्र । एपः । जगदाभासः।दर्पणान्तः । पुरम् । यथा।।तद्। ब्रह्म । अहम् । इति । ज्ञात्वा । कृतकृत्यः । भविष्यसि ॥ २६१॥

अद्वैत ज्ञानकी कृतार्थता फल कहे हैं । यत्र इति। यह जो प्रत्यक्ष प्रतीत होता प्रातिभासिक जगत्है सो जैसे दर्पणके मध्यमें नगरका प्रतिविम्ब है तैसे ही जिस ब्रह्ममें वर्तमान संसार है सो जगत्कल्पनाका अधिष्ठान ब्रह्म साक्षी आत्मा मैं हूं ऐसा साक्षात्कारकरके कर्तव्यमतिका अभाव होवै है ॥ २६१॥

यत्सत्यभूतं निजरूपमाद्यं,
चिदद्वयानन्दमरूपमक्रियम् ॥
तदेत्य मिथ्यावपुरुत्सृजेत,
शैलूषवद्वेषमुपात्तमात्मनः॥ २६२॥

कथं कृतकृत्योभविष्यामीत्यतआह । यत्सत्यभूतमिति ।

यत् ब्रह्म सत्यभूतं त्रिकालाबाध्यं स्वतःसिद्धमिति यावत् आद्यं सर्वस्यादिभूतं कालानवच्छेद्यत्वाच्चिदद्वयानन्दं ज्ञप्तिस्वरूपं द्वैतवर्जितं सुखरूपमरूपं रूपदं रसादेरप्युपलक्षणं रूपरसादिगुणगणविकलं "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यद्" इत्यादिश्रुतेः अक्रियं क्रियाशून्यं निष्क्रियमित्यर्थः । तत् एतादृशं निजं रूपं स्वकीयं स्वरूपं वास्तवमेत्य प्राप्य मिथ्यावपुः कल्पितं शरीरमुत्सृजेत तत्राभिमानं जह्यादित्यर्थः । मुखं व्यादाय स्वपितीति वदेषनिर्देशः। मिथ्यावपुस्त्यागपूर्वकत्वादुक्तलाभस्येति बोध्यम् । तथैव दृष्टान्तमाह शैलूषवदिति । आत्मनः स्वस्योपात्तं गृहीतं वेशं लीलाकरं शैलूषवन्नटइव । यथा हि नटोनाट्यशालायां नानाविधं लीलोपयोगी

वपुर्धृत्वा तस्मिन्नभिमानमनुपादायैव चेष्टतेऽन्तेतदुपसंहृत्य स्वीयं सत्यमेव वपुः प्रतिपद्यते तथैव विद्वानपि लोकलीलासु देहाभिमानं निरस्यैव चेष्टतान्ते च सत्यरूपमेवैतीति भावः ॥ २६२ ॥

यत् । सत्यभूतम् । निजरूपम् । आद्यम् । चिदद्वयानन्दम् । अरूपम् । अक्रियम् ॥ तद् । एत्य । मिथ्यावपुः । उत्सृजेत । शैलूषवद् । वेषम् । उपात्तम् । आत्मनः ॥ २६२ ॥

कृतकृत्य होनेका प्रकार कहे हैं । यत्इति । जो ब्रह्म तीनों कालोंमें अबाध्य है, सर्वका आदि है, ज्ञानस्वरूप द्वैतरहित सुखरूप रूप रसादिगुण वर्जित है, क्रियासे शून्य है ऐसे अपने स्वरूपको वास्तव जानके कल्पित शरीरमें अभिमानको त्याग देवै अपना ग्रहण किया हुवा लीलाकारी वेषको नट जैसे त्याग देता है ॥ २६२ ॥

सर्वात्मना दृश्यमिदं मृषैव,
नैवाहमर्थः क्षणिकत्वदर्शनात् ॥
जानाम्यहं सर्वमिति प्रतीतिः,
कुतोऽहमादेः क्षणिकस्य सिध्येत् ॥ २६३ ॥

ननु शरीराभिमानत्यागेऽपि अहमभिमानत्यागो न भवति तस्यात्मप्रतिरूपकतया भानादतआह । सर्वात्मनेति ।

इदं दृश्यं जडजातं सर्वात्मना निःशेषं मृषैव मिथ्यैवानात्मैवेत्यर्थः नचानात्मन्यात्माहंकारोयुक्तइति भावः । तत्रानुमानमाह नैवाहमिति । अहमहंकारोऽन्तःकरणमर्थः परमार्थोनैवास्ति कुतः क्षणिकत्वदर्शनात् दर्शनशब्दः क्षणिकत्वे प्रमाणोपन्यासाय क्षणिकत्वादित्येव हेतुः । ननु क्षणिकत्वं स्वरूपासिद्धं तत्र भूतपूर्वस्योदन्तस्य वक्तुमुद्यताय किञ्चिदुक्तवते विरतैतस्याः कथायाः सर्वमहंत्वयोक्तमभिधित्सितं च जानामीति प्रयुज्यतेऽहमः क्षणिकत्वे च भूतपूर्वपदार्थविज्ञानानभिज्ञनाहमा कथमेवमभिधातुं शक्येतान्येन दृष्टस्यान्येन स्मरणायोगादित्यवश्यमहमःस्थिरत्वादात्मत्वमभ्युपेयमिति क्षणिकत्वं स्वरूपासिद्धमित्यर्थः।सिद्धान्ती तु सर्वमहंजानामीतिप्रती-

तिरहमादेः क्षणिकस्य कुतः सिध्येदित्येवोत्तरवाक्यमित्याह । अयं भावः । सुषुप्त्यादावहंकारस्याननुभवेन जागरादावनुभवेन च विनाशोत्पादशालित्वमवश्याभ्युपेयं तत्रजाग्रत्यपि बहूनां पदार्थानां क्षणविस्मृतानामनुभवात् क्षणविस्मृतिरस्य क्षणिकत्वमनुमापतीति क्षणिकत्वं न स्वरूपासिद्धमित्यर्थः ॥ २९३ ॥

सर्वात्मना । दृश्यम् । इदम् । मृषा । एव । न । एव । अहम् । अर्थः । क्षणिकत्वदर्शनात् ॥ जानामि । अहम् । सर्वम् । इति । प्रतीतिः । कुतः । अहमादेः । क्षणिकस्य । सिद्ध्येत् ॥

शरीरके अभिमानके त्यागने पर भी अहंकारको आत्मा के सदृश होनेसे अहंकाराभिमानका त्यागना दुर्लभ है इस शङ्काका उत्तर कहे हैं । सर्वात्मना इति । सर्व जड दृश्य पदार्थ समस्त मिथ्या हैं, अनात्मा है और अन्तःकरणभी परमार्थ नहीं है क्षणिक होनेसे सो क्षणिकता अनुभवसे दीखे है । और जो लोकमें ऐसी प्रतीति होवै है कि मैं जानताहूं सर्व वार्ताको तुम क्यों कहते हो सो ज्ञान क्षणिक अहंकारको कैसे सिद्ध होसकता है किन्तु यह प्रतीति भी साक्षीके बलसे होवै है, अहंकारमें विस्मरणभी होवै है ॥ २९३ ॥

अहंपदार्थस्त्वहमादिसाक्षी,
नित्यं सुषुप्तावपि भावदर्शनात् ॥
ब्रूते ह्यजोनित्यइति श्रुतिः स्वयं,
तत्प्रत्यगात्मा सदसद्विलक्षणः ॥ २९४ ॥

कस्तर्हि सर्वमहंजानामीत्यत्राहंपदार्थस्तत्राह । अहंपदार्थस्त्विति । तत्राहंशब्दार्थस्तु नाहंकारः किन्तु तस्य साक्षी चिदात्मा कुतस्तस्य नित्यं भावदर्शनात् । दर्शनपदं पूर्ववत् नित्यं भावादित्येव हेतुः नन्वहंकारवन्न तत्साक्ष्यपि सुषुप्तावनुभूयते तथाच्चाहंकारेण समानयोगक्षेमश्चिदात्मा तत्राह सुषुप्तावपीति । सुषुप्तावपि साक्षिणोभावदर्शनादित्यर्थः । साक्षिणोनित्यत्वादेव सुषुप्तिसिद्धि-

रन्यथाऽसाक्षिकभावानभ्युपगमेन सा न सिद्धेयत् सुखमहमस्वाप्स-मितिस्मृतिश्च नोपपद्येत ततश्च जाग्रत्स्वप्नसुषुप्तिषु वर्तमानत्वात्साक्षी नित्योनित्यत्वात्सएवाहं सर्वं जानामीति प्रतीतिगोचरइति भावः । हि यतः श्रुतिश्चाजोनित्यइति "अजोनित्यः शाश्वतोऽयं पुराण" इत्यादिलक्षणा स्वयं ब्रूते।आत्मनः साक्षिलक्षणस्य नित्यत्वं न केवलं तर्कसिद्धं किन्तु श्रौतमपीति भावः तत्तस्मात् प्रत्यगात्मा अन्तरात्मा सदसद्विलक्षणः सदसद्भ्यां स्थूलसूक्ष्माभ्यां देहाभ्यां विलक्षणो-विविक्तइत्यर्थः ॥ २६४ ॥

अहंपदार्थः । तु । अहंमादिसाक्षी । नित्यम् । सुषुप्तौ । अपि । भावदर्शनात् ॥ ब्रूते । हि । अजः । नित्यः । इति । श्रुतिः । स्वयम् । तत् । प्रत्यगात्मा । सदसद्विलक्षणः ॥ २६४ ॥

तुमारी कहनेकी आवश्यकता नहीं मैं सर्व जानताहूं इस प्रयोगमें अहं पदका अर्थ अहंकार नहीं है किन्तु तिसका साक्षी चेतन आत्मा है क्योंकि तिसका सर्व अवस्थामें भावदर्शनसे अहंकारका तौ सुषुप्तिमें अभाव होवै है जिस कारणसे आत्मा अज है, नित्य है ऐसे श्रुति साक्षात् कहे हैं साक्षी आत्माको नित्य कहे हैं, तिस कारण अन्तरआत्मा स्थूल सूक्ष्म देहोंसे विल-क्षण है अर्थात् भिन्न है ॥ २६४ ॥

विकारिणां सर्वविकारवेत्ता,
नित्याविकारोभवितुं समर्हति ॥
मनोरथस्वप्नसुषुप्तिषु स्फुटं,
पुनः पुनर्दृष्टमसत्त्वमेतयोः ॥ २६५ ॥

आत्मनः साक्षित्वेन निर्विकारत्वं साधयति विकारिणामिति । अयमात्मा नित्याविकारोनित्यश्चाविकारश्च भवितुं समर्हति भवितुं योग्यः। अत्र हेतुगर्भितं विशेषणमाह विकारिणामिति। यतः सर्वेषां विकारिणां स्थूलसूक्ष्मादीनां सर्वविकारवेत्ता सर्वेषां विका-

राणां स्थूलत्वकृशत्वादीनां वेत्ता साक्षी ततइति शेषः । एतयोः स्थूलसूक्ष्मशरीरयोस्तु न नित्यत्वादिकं यतोमनोरथस्वप्नसुषुप्तिषु मनोराज्ये स्वप्ने सुषुप्तौ च पुनः पुनः प्रतिमनोरथादि स्फुटं साक्षि प्रत्ययसिद्धमसत्त्वमविद्यमानत्वं दृष्टं ततोनानयोर्नित्यत्वादिकमिति फलितोऽर्थः।तस्मादवस्थात्रयानुवृत्तेरात्मैव नित्याविकार इति भावः॥

विकारिणाम् । सर्वविकारवेत्ता । नित्याविकारः । भवितुम् । समर्हति ॥ मनोरथस्वप्नसुषुप्तिषु । स्फुटम् । पुनः । पुनः।दृष्टम्। असत्त्वम् । एतयोः ॥ २९५ ॥

आत्माको साक्षरूप होनेसे निर्विकारताको सिद्ध करे हैं । विकारिणाम् इति । यह आत्मा नित्य है और अविकारी है जिस कारण स्थूल सूक्ष्म पदार्थोंके स्थूलता सूक्ष्मता आदि विकारों का ज्ञाता होनेके योग्य है और इन स्थूल सूक्ष्मशरीरके कृशत्वादिकोंके अभावको मनोराज्य स्वप्न सुषुप्तिमें वारं वार साक्षी प्रकाश करे है इस कारण यह शरीरादि नित्य नहीं है और अवस्था तीनोंमें विद्यमान होनेसे आत्मा नित्य है ॥ २९५ ॥

अतोऽभिमानं त्यज मांसपिण्डे,
पिण्डाभिमानिन्यपि बुद्धिकल्पिते ॥
कालत्रयाबाध्यमखण्डबोधं,
ज्ञात्वा स्वमात्मानमुपैहि शान्तिम् ॥ २९६ ॥

देहाहङ्कारानात्मत्वमुक्त्वा तत्राभिमानं छापयति । अतोऽभिमानमिति ।

यतोदेहाहङ्कारादिकमनात्मा ततोबुद्धिकल्पिते भ्रान्तिमतिगोचरे मांसपिण्डे पललप्रधाने स्थूलदेहे तथापिण्डाभिमानिनि अहंकारेपि अभिमानं त्यज जहीहि स्वं मुख्यमात्मानं कालत्रयाबाध्यं कदापि केनापि बाधयितुमशक्यं बाधितुरेवात्मत्वादिति भावः । अखण्डबोधमलुप्तचित्स्वभावं ज्ञात्वा साक्षात्कृत्य शान्तिं विषया-

शार्दूलभुक्सन्तापनिवृत्तिमुपैहि प्राप्नुहीत्यर्थः ॥ २९६ ॥

अतः । अभिमानम् । त्यज । मांसपिण्डे । पिण्डाभिमानिनि । अपि । बुद्धिकल्पिते ॥ कालत्रयाबाध्यम् । अखण्डबोधम् । ज्ञात्वा । स्वम् । आत्मानम् । उपैहि । शान्तिम् ॥ २९६॥

देहादिको अनात्म कहा है अब उनमें से अभिमानको छुड़ावे हैं । अतः इति । अहंकारको अनात्मा होनेसे भ्रमका विषय मांसप्रधान स्थूल देहमें और उसके अभिमान करने वाले अहंकार में भी अभिमानको त्याग और कालत्रयमें अबाध्य अविनाशी चेतनस्वरूप अपने आत्माका साक्षात्कारकरके विषयोंकी आशारूप अग्निसंतापकी निवृत्तिको प्राप्त हो ॥ २९६ ॥

त्यजाभिमानं कुलगोत्रनाम-
रूपाश्रयेष्वार्द्रशवाश्रितेषु ॥
लिङ्गस्य धर्मानपि कर्तृतादीं-
स्त्यक्त्वा भवाखण्डसुखस्वरूपः ॥ २९७ ॥

देहाभिमानमूलकत्वाद्वर्णाश्रमाभिमानस्य तत्त्यागे तत्त्यागमर्थतः प्राप्तमनुवदति । त्यजाभिमानमिति ।

देहाभिमाने हि जीवनाभिमानस्तदभावे तु शवप्रायमिदं शरीरं भवति तथाचाभिहितरीत्या देहाभिमानस्य भवता त्यक्तत्वादार्द्रशवाश्रितेषु कुलगोत्रनामरूपाश्रयेषु पूर्वोक्तलक्षणेषु अभिमानं त्यज तथा लिङ्गस्य लिङ्गदेहस्य कर्तृतादीन्धर्मांस्त्यक्त्वाऽखण्डसुखस्वरूपो-नित्यानन्दात्मा भव, तथैवासि तद्विज्ञाने सावधानोभवेत्यर्थः॥२९७॥

त्यज । अभिमानम् । कुलगोत्रनामरूपाश्रयेषु । आर्द्रशवाश्रितेषु ॥ लिङ्गस्य । धर्मान् । अपि । कर्तृतादीन् । त्यक्त्वा । भव । अखण्डसुखस्वरूपः ॥ २९७ ॥

देहाभिमानके त्यागसे वर्णाश्रमके अभिमानका अर्थात् त्याग

प्राप्त होवै है उसका अनुवाद करे हैं। त्यजइति। देहके अभिमानसे ही जीवनका अभिमान होवै है उसके अभाव होनेसे मृत शरीरके तुल्य देहमें आश्रित कुल गोत्र नाम रूप आश्रम जो पूर्व कहे हैं तिनका अभिमान त्याग तथा लिङ्गदेहके कर्तृत्व आदि धर्मोंका त्यागकर नित्य आनन्दरूप आत्मा हो ऐसे आत्माके ज्ञानमें सावधान हो यह अभिप्राय है ॥ २९७॥

सन्त्यन्ये प्रतिबन्धाः पुन्सः संसारहेतवोदृष्टाः ॥
तेषामेवं मूलं प्रथमविकारोभवत्यहङ्कारः ॥२९८॥

अहंकाराध्यासस्य सर्वाध्यासनिदानत्वात्तन्निवृत्तौ सर्वनिवृत्तेराव-श्यकत्वादहंकाराध्यासत्यागे यत्नादरार्थमहंकारस्य सर्वप्रतिबन्ध-मूलत्वमाह। सन्त्यन्यइति।

पुंसोमोक्षमाकांक्षतः पुरुषस्य संसारहेतवः संसारस्य जन्मादि-बन्धस्य हेतवः कारणानि मोक्षस्य प्रतिबन्धाविवेकादि कारणसामग्री सद्भावेपि जीवन्मुक्तिसुखप्रतिकूलाः संकल्पादयस्तेषां सर्वेषां मनो-विकाराणामेवमभिहितरीत्या मूलं निदानं प्रथमविकारोमुख्योऽज्ञा-नप्रभयोविकारोऽहंकारोभवति नाज्ञानमप्यहंकारमनुत्पाद्यात्मानं बध्नातीति भावः ॥ २९८॥

सन्ति। अन्ये। प्रतिबन्धाः। पुंसः। संसारहेतवः। दृष्टाः॥ तेषाम्।·एवम्। मूलम्। प्रथमविकारः। भवति। अहंकारः॥

अहंकाराध्यासको सर्व अध्यासोंका मूल होनेसे उसकी निवृत्तिसे सर्वअध्यासकी निवृत्ति कहे हैं। सन्ति इति। मोक्षकी इच्छावाले पुरुषको जन्मादि बन्धका हेतु जीवन्मक्ति सुखके प्रतिकूल संकल्प आदि प्रतिबन्धक हैं तिन सर्वप्रतिबन्धकोंका कारण मुख्य विकार अज्ञानका कार्य अहंकार ही है क्योंकि अहंकारकी उत्पत्ति बिना अज्ञान भी अध्यासविक्षेपको उत्पन्न नहीं करसके है ॥ २९८॥

यावत्स्यात्स्वस्य सम्बन्धोऽहंकारेण दुरात्मना॥
तावन्न लेशमात्रापि मुक्तिवार्त्ता विलक्षणा॥२९९॥

अहंकारस्य प्रतिबन्धमूलत्वे फलितमाह। यावदिति।

अहंकारेण दुरात्मना दुष्टजनवत्सन्मार्गप्रतिबन्धकेन यावत्स्वस्य जीवस्य सम्बन्धःस्यात्तावद्विलक्षणाऽलौकिकी लेशमात्रापि स्वल्पमात्रमपि स्वस्यापि मुक्तिवार्त्ता मुक्तिर्मे भविष्यतीति वार्त्तापि न प्रवर्त्तनीया कुतोमुक्तिरित्यर्थः॥ २९९॥

यावत्। स्यात्। स्वस्य। सम्बन्धः। अहंकारेण। दुरात्मना॥ तावत्। न। लेशमात्रा। अपि। मुक्तिवार्त्ता। विलक्षणा। २९९

अहंकारको सर्व प्रतिबन्धका मूल कहनेसे क्या सिद्ध हुवा सो कहते हैं। यावत् इति। दुष्ट पुरुषवत् सत्यमार्गका प्रतिबंधक अहंकारके संग जबतक जीवको सम्बन्ध है तब तक अलौकिक थोडीसी मुक्ति मेरेको होगी ऐसी वात भी न करनी चाहिये अर्थात् अहंकारसंगीको मुक्ति कहांसे होसकती है २९९

अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते॥
चन्द्रवद्विमलः पूर्णः सदानन्दः स्वयंप्रभः॥३००॥

अहंकारस्य सद्भावे मुक्त्यलाभमभिधाय तन्निवृत्तौ तु सा निर्विघ्नेत्याह। अहंकारग्रहदिति।

अहंकारग्रहान्मुक्तः।यः पुरुषोऽहंकाररूपाद् ग्रहाद्राहुवत्स्वरूपस्य ग्रहणे समावरणे कुशलान्मुक्तोरहितः सचन्द्रवद्राहुमुखमुक्तशशाङ्कइव "राहोर्मुखात्प्रमुच्य" इति श्रुतेरिति भावः। विमलोविगताभिमानमलः पूर्णोविनष्टपरिच्छिन्नबुद्धिः सदानन्दोदुःखाध्यासशून्यः स्वयंप्रभः स्वप्रकाशः सत्स्वरूपं स्वात्ममुक्तिधाम प्रतिपद्यते प्राप्नोति यथा हि विमलत्वपूर्णत्वादयश्चन्द्रस्य स्वरूपान्तर्गता एव विधुन्तुदेन स्वरूपं तिरोधायान्यथा भास्यन्ते तथात्मापि प्रकृताहंकारतमसावृतोविमलत्वपूर्णत्वादिभिर्विधुरइव तिष्ठति तदपाये च स्वकीया एव निर्मलत्वादयोऽस्याभिव्यज्यन्ते धर्मा इतिभावः॥ ३००॥

अहंकारग्रहात् । मुक्तः । स्वरूपम् । उपपद्यते ॥ चन्द्रवद् । विमलः । पूर्णः । सदानन्दः । स्वयंप्रभः ॥ ३०० ॥

पूर्वोक्त अर्थको दृष्टान्तपूर्वक वर्णन करे हैं । अहंकारग्रहात् इति । जो पुरुष राहुवत् स्वरूपके आवरणमें कुशल अहंकार-रूप ग्रहसे रहित है सो पुरुष राहुसे त्यागेहुए चन्द्रमावत् अभि-मानरूप मलके त्याग होनेसे परिच्छेदबुद्धिसे रहित, दुःख के भ्रमसे रहित, स्वप्रकाश हुवा अपना स्वरूपभूत मुक्तिधाम को प्राप्त होवे है ॥ ३०० ॥

> योवा पुरे सोऽहमिति प्रतीतो-
> बुद्ध्या प्रक्लृप्तस्तमसाऽतिमूढया ॥
> तस्यैव निःशेषतया विनाशे,
> ब्रह्मात्मभावः प्रतिबन्धशून्यः ॥ ३०१ ॥

अहङ्कारवशादनु नात्मप्रकाशाय किञ्चिदन्वेषणीयं भवतीत्याह। योवा पुरइति ।

योऽहङ्कारस्तमसाऽतिमूढया तमोगुणेनावृतयाऽहंबुद्ध्याऽहंमत्या प्रक्लृप्तः समर्थितउत्पादितइति यावत् । पुरे देहादिसङ्घाते "पुर-मेकादशद्वारमजस्यावक्रचेतसः" इतिश्रुतेः सोऽहमितिप्रतीतः स्थूलो-हं पण्डितोहमिति प्रभृतिप्रतीत्या प्रथितोहंकारस्तस्यैवाभिमानल-क्षणाहङ्कारस्यैव निःशेषतया विनाशेसमूलोन्मूलने जाते सति मुमु-क्षोर्ब्रह्मात्मभावः शुद्धाद्वैतचित्तादात्म्यं प्रतिबन्धशून्योनिष्प्रत्यूहः अहंकारस्य विनाशे सति ब्रह्मात्मभावाविर्भावे प्रतिबन्धकं नास्ति येनात्मनोब्रह्मभावः प्रतिबध्येत । तस्मादेकस्यास्यैवप्रतिबन्धशतमू-लस्य विनाशे प्रयतितव्यमितिभावः ॥ ३०१ ॥

यः । वा । पुरे । सः । अहम् । इति । प्रतीतः ॥ बुद्ध्या । प्रक्लृप्तः । तमसा । अतिमूढया ॥ तस्य । एव । निःशेषतया । विनाशे । ब्रह्मात्मभावः । प्रतिबन्धशून्यः ॥ ३०१ ॥

अहंकारनाशसे अनन्तर आत्माके बोधके वास्ते कुछ उपाय की अपेक्षा नहीं है ऐसा वर्णन करे हैं। यः इति। जो अहंकार तमोगुणकरके आवृत बुद्धिसे उत्पन्न हुआ है सो स्थूलोऽहं परिडतोऽहं इत्यादि प्रतीतिकरके प्रसिद्ध हुवा है तिसै आभिमान-रूप अहंकारका ही मूलसहित विनाश होनेपर मुमुक्षुको ब्रह्मात्माके प्रकट होनेमें कोई प्रतिबन्धक नहीं रहता है इस कारण सर्व प्रतिबन्धकके मूलभूत अहंकारके विनाशमें यत्न करना उचित है ॥ ३०१ ॥

ब्रह्मानन्दनिधिर्महाबलवताऽहङ्कारघोराहिना,
संवेष्ट्यात्मनि रक्ष्यते गुणमयैश्चण्डैस्त्रिभिर्मस्तकैः ॥
विज्ञानाख्यमहासिना श्रुतिमता विच्छिद्य शीर्षत्रयं,
निर्मूल्याहिमिमं निधिं सुखकरं धीरोनुभोक्तुं क्षमः ॥

अहङ्कारस्यैवानन्दनिधितिरोधाने दुःखशतोत्पादने च कारणत्व-मित्येतन्नागरूपकेण निरूपयति। ब्रह्मानन्दनिधिरिति।

महाबलवता प्रबलविवेकमन्तरा दुरुच्छेद्येन बलिष्ठनाहङ्कारघोराहिनाऽहङ्कारोनात्मन्यात्मत्वाभिमानलक्षणस्तेन घोरेण भयंकरेणाहिना नागेन ब्रह्मानन्दनिधिर्ब्रह्मणःस्वरूपभूतोयआनन्दः सएवनिधिःशेवधिरविद्याच्छन्नं हिरण्मयादिवित्तं त्रिभिर्गुणमयैः सत्त्वरजस्तमोरूपैःसात्त्विकराजसतामसैःपरिणामैरितियावत्।चण्डैर्विक्षेपक्ष्वेडमुद्गिरद्भिरातिकोपेन फूत्कारतत्परैः चडिकोपे इति धातुपाठात् मस्तकैःसमुखफणाभिःसंवेष्ट्य निष्कासनद्वारं निरोध्य रक्ष्यते कोप्येनं माद्राक्षीदन्यथामम विनाशः स्यादिति संकल्प्य पाल्यते ततश्च ब्रह्मानन्दावासिर्विनाऽहङ्कार-नागोच्छेदं दुर्लभेति भावः। कथं तर्हि तदुच्छेदस्तत्राह विज्ञानेति। धीरोधीमान् धैर्यधुरन्धरोवा श्रुतिमता वैदिकेन विज्ञानाख्यमहासिना पुरस्तान्निरूपितोयोविवेकविज्ञानलक्षणोमहासिर्महाखड्गोमहत्वं चास्यान्तरनागनाशकत्वेन तथाभूतेन शस्त्रेण

निर्गुणात्मविवेचनेन गुणत्रयलक्षणं शीर्षत्रयं विच्छिद्य विनाश्य निर्गुणात्मस्वरूपतोऽपसार्य तेनैवाहिमिममहङ्कारनागं निर्मूल्य स मूलमुन्मूल्यानु तदनन्तरं सुखकरं सुखानुभवनिदानं निधिं ब्रह्मानन्दं भोक्तुमनुभवितुं क्षमः समर्थो भवति विवेकविज्ञानस्वङ्गकृततद्विनाशमन्तरा तु ब्रह्मानन्दानुभवे ब्रह्मणोपि सामर्थ्यं कुण्ठ्यते कुतस्तद्भोगसम्भावना भवदादीनामितिभावः ॥ ३०२ ॥

ब्रह्मानन्दनिधिः । महाबलवता । अहङ्कारघोराहिना । संवेष्ट्य । आत्मनि । रक्ष्यते । गुणमयैः । चण्डैः । त्रिभिः । मस्तकैः ॥ विज्ञानाख्यमहासिना । श्रुतिमता । विच्छिद्य । शीर्षत्रयम् । निर्मूल्य । अहिम् । इमम् । निधिम् । सुखकरम् । धीरः । अनुभोक्तुम् । क्षमः ॥ ३०२ ॥

अहंकारको ही सुखके आवरणमें और दुःखके उत्पन्न करनेमें कारणताको नागरूपकसे वर्णन करे हैं । ब्रह्मानन्दनिधिःइति। प्रबल विवेकसे ही छेदनयोग्य अनात्मामें आत्माका अभिमानरूप भयंकर सर्पने ब्रह्मस्वरूप आनन्दनिधि सुवर्णखान सत्त्वगुण रजोगुण तमोगुणके परिणाम प्रचण्ड मुखसहित तीन फणाकरके निकासनेके द्वारको रोककरके अपने वास्ते पालन की जाती है इस कारण बुद्धिमान् पुरुष वैदिक विवेक ज्ञानरूप तीक्ष्ण तलवारसे गुणों तीनोंका विनाशकरके उसीसे इस अहंकाररूप नागको मूलसहित विनाशकरके उससे अनन्तर सर्व सुखोंका कारण ब्रह्मानन्दनिधिके भोगनेमें समर्थ होता है अर्थात् निर्गुण आत्माके स्वरूपनिश्चयसे ही अहंकाररूप नागका नाश होता है तबही ब्रह्मानन्द धनकी प्राप्ति होवै है। अहंकारनाश विना ब्रह्माको भी आनन्द नहीं होता है॥३०२॥

यावद्वा यत्किञ्चिद्विषदोषस्फूर्तिरस्ति चेद्देहे ॥
कथमारोग्याय भवेत्तद्वदहन्तापि योगिनोमुक्त्यै३०३

नागस्य विषद्वारैवानर्थकरत्वाद्विषरूपकेणाहङ्कारं निरूपयति। यावद्वेति।

वा अथवा यावत् यत्किञ्चिद्विषदोपस्फूर्तिः लेशमात्रविषदोषस्य सद्भावोदेहे चेदस्ति तावत्पुरुषआरोग्याय रोगनिवृत्तिपूर्वकस्वास्थ्याय कथं भवेत् न कथमपीत्यर्थः। तद्वत् तथा योगिनः आत्मनियुञ्जतोमुमुक्षोरहन्तापि यावदन्तःस्फुरति तावन्मुमुक्षुर्मुक्त्यै कथं प्रभवेत्। अहङ्कारनिवृत्त्यैव जीवन्मुक्त्यभिव्यक्तिरितिभावः॥ ३०३॥

नागको विषद्वारा अनर्थका हेतु होनेसे विषरूपकसे अहंकारको निरूपण करे हैं। यावत्इति। अथवा जबतक लेशमात्र भी विषदोषका सद्भाव देहके अन्तर अगर है तब तक पुरुष रोगनिवृत्तिपूर्वक स्वस्थताके वास्ते कैसे समर्थ होसकता है तैसेही आत्मामें जुडनेवाले मुमुक्षुको भी जब तक अहन्ता अन्तर वर्तमान है तबतक मुमुक्षु मुक्तिके लिये कैसे समर्थ हो सकता है अर्थात् अहंकारनिवृत्ति विना जीवन्मुक्तिकी प्रकटता नहीं होती है॥ ३०३॥

अहमोऽत्यन्तनिवृत्त्या तत्कृतनानाविकल्पसंहृत्या॥
प्रत्यक्तत्त्वविवेकादिदमहमस्मीति विन्दते तत्त्वम्॥ ३०४

अहङ्कारविषसत्त्वे मुक्त्यलाभमभिधाय तन्निवृत्तौ तु तल्लाभमाह। अहमइति।

प्रत्यक्तत्त्वविवेकात्। प्रतीचस्तत्त्वस्य स्वरूपस्य देहादिभ्योविवेचनादहमोऽहङ्कारस्यात्यन्तनिवृत्त्या समूलोन्मूलनेन तत्कृतनानाविकल्पसंहृत्या अहंकारजन्यानामात्मनिसंशयविपर्ययादीनां संहृत्या निवृत्त्या अनुत्पत्त्येति यावत्। इदमखण्डानन्दतत्त्वं ब्रह्मास्मीति रूपेणासन्दिग्धमविपर्यस्तं तत्त्वं विन्दते लभते अनुभवतीत्यर्थः॥ ३०४

अहमः। अत्यन्तनिवृत्त्या। तत्कृतनानाविकल्पसंहृत्या॥
प्रत्यक्तत्त्वविवेकात्। अहम्। अस्मि। इति। विन्दते। तत्त्वम्॥

अब अहंकारकी निवृत्तिसे मुक्तिके लाभको कहे हैं। अहमः

इति साक्षी आत्माका देहादिसे विवेक करनेसे अहंकारकी संमूल निवृत्ति होनेसे अनात्मामें तथा आत्मामें अहंकारजन्य संशय विपर्यय आदिकी निवृत्ति होनेसे ब्रह्म मैं हूं ऐसा संशय विपर्यय से रहित परमार्थस्वरूपको प्राप्त होवै है ॥ ३०४ ॥

अहंकारे कर्त्तर्यहमिति मतिं मुञ्च सहसा,
विकारात्मन्यात्मप्रतिफलजुषि स्वस्थितिमुषि।
यदध्यासात्प्राप्ता जनिमृतिजरादुःखबहुला,
प्रतीचश्चिन्मूर्त्तेस्तव सुखतनोः संसृतिरियम्॥३०५॥

अहङ्काराध्यासेऽनर्थप्राप्तिमाविष्कुर्वन्नुपदिशति। अहङ्कारइति। भोःप्रियशिष्याहङ्कारे कर्तरि कर्तृत्वधर्मेण सविकारेऽहमितिमतिं तादात्म्याध्यासं सहसा मुञ्च त्यज। कर्तृत्वस्य हेतुं फलं चाह विकारात्मनीति। आत्मप्रतिफलजुषि आत्मनः शुद्धचिद्धातोः प्रतिफलं प्रतिविम्बस्तज्जुषि तत्सेवमाने आत्मप्रतिविम्बग्रहेण कर्तृत्वसमर्थे इति यावत्। कर्तृत्वस्य स्वस्मिन् परस्मिंश्च साङ्गिनि फलमाह विकारात्मनीति। यद्यहङ्कारे कर्तृत्वं नाभविष्यत् तर्हि सविकारभावं नान्वभविष्यदित्यर्थः। स्वसम्बन्धिनित्यात्मनि फलमाह स्वस्थितिमुषि स्वस्यात्मनः स्थितिः स्वरूपप्रतिष्ठा तन्मुषि तत्तिरोभावके इत्यर्थः। यद्यहङ्कारेकर्तृत्वंनस्याच्चस्यात्तदा स्वसम्बन्धिन्यात्मनि स्वरूपप्रतिष्ठातिरोधानमितिस्वपरानर्थकुशलोऽहङ्कारः सत्वरं हेयइति भावः। न केवलं स्वस्थितेः प्रमोषएवाहङ्काराध्यासकृत्यं किन्तु यदध्यासाद्यास्मिन्नहङ्कारे स्वात्मतादात्म्याभिमानाच्चिन्मूर्तेः सुखतनोरानन्दस्वरूपस्य तव प्रतीचइयं जनिमृतिजरादुःखबहुला जन्मादिदुःखपरम्परा संवलिता संसृतिः प्राप्ता तस्मिन्सर्वानर्थकारिण्यहङ्कारे इत्यर्थः॥३०५॥

अहंकारके अध्याससे अनर्थकी प्राप्तिको दिखाते हुवे उपदेश करते हैं। अहंकारे इति। हेशिष्य! कर्तृत्व धर्मसे सविकार हुवे अहंकारमें तादात्म्याध्यासको शीघ्र त्याग। जो अहंकार

शुद्धचेतनके प्रतिविम्बको धारण करे है इसीसे कर्तृत्वके समर्थ है, कर्तृत्वसे ही विकारको प्राप्त हुवा है और आत्माकी स्वरूप-स्थितिके तिरोधान करने वाला है इसमें अध्यासको त्याग। अहंकार स्वपरको अनर्थ देनेमें समर्थ है जिस अहंकारके अध्यास से चैतंन्यस्वरूप आनन्दस्वरूप तुम साक्षी अन्तर आत्माको जन्म-मरण-जरा-आदिजन्य दुःखवेष्टित संसारकी प्राप्ति हुई है तिस अहंकारमें आत्मता बुद्धिका त्याग कर ॥ ३०५ ॥

सदैकरूपस्य चिदात्मनोविभो-
रानन्दमूर्त्तेरनवद्यकीर्त्तेः ॥
नैवान्यथा क्वाप्यविकारिणस्ते,
विनाहमध्यासममुष्य संसृतिः ॥ ३०६ ॥

संक्षिप्योपाक्षिप्तमर्थं विवृणोति। सदैकरूपस्येति।
भोःशिष्य सदैकरूपस्य सर्वदैकरसस्य चिदात्मनश्चित्स्वरूपस्य विभोर्व्यापकस्यानन्दमूर्त्तेः सुखस्वरूपस्यातएवानवद्यकीर्त्तेः निष्कलङ्ककीर्त्तेः निर्दोषस्येति यावत्। "निरवद्यं निरञ्जन" मिति श्रुतेः तथा अविकारिणोविकारविकलस्य ते तवामुष्याहंकारस्याहमध्यासं तादात्म्याध्यासं विना अन्यथा प्रकारान्तरेण संसृतिः संसारोनैव संभवति यद्यहंकारोन स्यात्तर्हि ते संसारोपि न स्यादिति तन्मूलकमेव स्वसंसारानर्थं विद्धीति भावः ॥ ३०६ ॥

सदा। एकरूपस्य। चिदात्मनः। विभोः। आनन्दमूर्तेः। अनवद्यकीर्तेः॥ न। एव। अन्यथा। क्व। अपि। अविकारिणः। ते। विना। अहमध्यासम्। अमुष्य। संसृतिः ॥ ३०६ ॥

संक्षेपसे कथन किये अर्थको विस्तारसे वर्णन करे हैं। सदाइति। हेशिष्य! सर्वकाल एकरस चैतनस्वरूप व्यापक सुखस्वरूप निर्दोष विकारसे रहित तुम्हारा अहंकारके संग

तादात्म्याध्यास विनां अन्यप्रकारसे संसारका संभव नहीं है इस कारण तेरे अध्यासका मूल अहंकार है ॥ ३०६ ॥

तस्मादहङ्कारमिमं स्वशत्रुं,
भोक्तुर्गले कण्टकवत्प्रतीतम् ॥
विच्छिद्य विज्ञानमहासिना स्फुटं,
भुङ्क्ष्वात्मसाम्राज्यसुखं यथेष्टम् ॥३०७॥

नन्वहंकारमपि शनैः शनैर्हास्याम्येव शनैः शनैरुपरमेदिति स्मृतेस्ततश्च सहसा मुञ्चेत्युक्तमयुक्तं "सहसा विदधीत न क्रियामविवेकः परमापदाम्पदम्" इत्युक्तेरितिचेत्तत्राह । तस्मादिति ।

यस्मादहंकारोमहादुःखदोगृहशत्रुस्तस्मादिमं स्वाभ्यन्तरे सदा वर्तमानं स्वशत्रुं स्वस्यात्मनः सदा सपत्नं भोक्तुः सर्वथा स्वादु भोज्यादिकं भुञ्जानस्य गले कण्ठविवरमध्ये कण्टकवदनर्थप्रदं क्षणविलम्बे मृतिसम्पादनोन्मुखं प्रतीतं प्रसिद्धमेव सर्वेषां, कण्ठकण्टकवदस्य विनाशे विलम्बोविधेयोऽन्यथा मृत्युरेव स्यात् न हि कण्ठकण्टकोद्धारे केपिविलम्बन्ते विलम्बमानावा जीवन्तीतिभावः । एतं रिपुंच विज्ञानमहासिनोक्तेन विच्छिद्यात्मसाम्राज्यसुखं निरङ्कुशं निरतिशयमोक्षानन्दं यथेष्टं निष्प्रत्यूहं स्फुटं भुङ्क्ष्व नहि सर्वत्र साहसं न साधु युधि साहसस्यैवेष्टसाधकत्वादन्यथानर्थः प्राप्नुयादिति भावः ॥ ३०७ ॥

तस्मात् । अहंकारम् । इमम् । स्वशत्रुम् । भोक्तुः । गले । कण्टकवत् । प्रतीतम् ॥ विच्छिद्य । विज्ञानमहासिना । स्फुटम् । भुङ्क्ष्व । आत्मसाम्राज्यसुखम् । यथेष्टम् ॥ ३०७ ॥

अहंकारको धीरे २ त्यागेंगे, धीरे २ उपराम होना उचित गीता में लिखा है, शीघ्र किसी कामको न करना चाहिये ऐसा शास्त्र का वचन है, इस कारण शीघ्र त्याग ऐसा आपने क्यों कहा है, इस शङ्काका समाधान करते हैं । तस्मात् इति । हेशिष्य! जिस कारण अहंकार महादुःखका हेतु है तिस कारण अहंकार

अपने अन्तरमें वर्तमान आत्माका शत्रुरूप है जैसे स्वादु भोजन करनेमें प्रवृत्तहुवे पुरुषको कंठके अन्तर कंटकवत् महाअनर्थ देने वाला प्रतीत होवै है इसके नाशमें देर न कर, नहीं तो शीघ्र मृत्यु प्राप्त होगा। जैसे भोजनभोक्ता कंठके अन्तर फँसे हुवे कंटकको शीघ्र त्याग देतेहैं तैसे ही इस अहंकार कंटकको ज्ञानरूप खड्गसे विनाश करके निरंतिशय मोक्षआनन्दको इच्छानुसार स्पष्ट भोगे। सर्वकार्योंमें शीघ्रता दोषरूप नहीं है युद्धक्रियामें शीघ्रतासे ही कार्यसिद्धि है। बोधसंपादनमें मन आदिके वश करनेमें धीरे २ क्रिया करनी फलदायक होती है॥

ततोऽहमादेर्विनिवर्त्य वृत्तिं,
संत्यक्तरागः परमार्थलाभात् ॥
तूष्णीं समास्स्वात्मसुखानुभूत्या,
पूर्णात्मना ब्रह्मणि निर्विकल्पः ॥ ३०८ ॥

अहंकारनिवृत्तेरात्मसाम्राज्यप्राप्तेश्चानन्तरं न किञ्चित्कर्तव्यमवशिष्यतइत्याह। ततोऽहमादेरिति।

यतोऽहंकारस्य कण्टकवन्महानर्थप्रदत्वं तस्माद्धेतोरहमादेरहङ्कारादेरादिना ममकारपरिग्रहः। वृत्तिं प्रवृत्तिं प्रवाहमित्यर्थः। विनिवर्त्य विनाश्य परमार्थलाभात् प्रतिबन्धकाहंकारापाये परमार्थस्याबाध्यचिदात्मनोलाभादभिव्यक्तेस्तदन्यस्य लाभपदार्थस्यात्रासम्भवात् संत्यक्तरागः सर्वत्रानभिस्नेहः 'यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभमि'ति स्मृतेः। आत्मसुखानुभूत्या आत्मसुखानुभवेन निर्विकल्पः सर्वदा सर्वथा विध्वस्तमायामयसंकल्पविकल्पोब्रह्मणि परमात्मनि पूर्णात्मना तृप्तात्मना समास्स्व निश्चलनिष्ठां लभस्वेत्यर्थः ॥३०८॥

ततः। अहमादेः। विनिर्वर्त्य। वृत्तिम्। संत्यक्तरागः। परमार्थलाभात् ॥ तूष्णीम्। समास्स्व। आत्मसुखानुभूत्या। पूर्णात्मना। ब्रह्मणि। निर्विकल्पः ॥ ३०८ ॥

अहंकारानिवृत्ति अरु आत्मसाम्राज्यकी प्राप्तिसे पश्चात्

कुछ कर्तव्य नहीं रहता है ऐसा कहे हैं । ततोऽहमादेरिति । अहंकारको कण्ठके अन्तर फंसे हुवे कंटकवत् महाअनर्थदायक होनेसे, अहंममताके प्रवाहको विनाशकरके अबाध्य चेतन आत्माके लाभसे सर्व पदार्थोंमें इच्छारहित आत्मानन्दके अनुभवसे सर्व संकल्पसे शून्य परमात्मामें तृप्तरूप होकर दृढनिष्ठाको प्राप्त होवो ॥ ३०८ ॥

समूलकृत्तोपि महानहं पुन-
र्व्युल्लेखितःस्याद्यदि चेतसा क्षणम् ॥
संजीव्य विक्षेपशतं करोति,
नभस्वता प्रावृषि वारिदोयथा ॥३०९॥

ननु विवेकविज्ञानेन छिन्नोप्यहंकारः पुनर्लेशतश्चेतसा व्युल्लिख्यतएवेति चेन्माभूल्लेशमात्रोल्लेखनमपि तस्यानर्थपरम्परायास्तथैवावाप्तेरित्याह । समूलकृत्तोपीति ।

महान् बलिष्ठोऽहमहङ्कारः समूलकृत्तोपि समूलमुन्मूलितोपि चेतसाऽनात्मप्रवाहाभिमुखेनातीतानागतपदार्थचिन्तनप्रकृतिना क्षणमपि यदि पुनर्व्युल्लेखितः पुनः स्मृतः स्याद्भवेदासमहम्महाकुलीनो भूपतिः समस्तवसुधाधुरन्धरःसम्प्रति चास्मि त्यक्तसर्वैषणोविरक्तशिरोमणिर्भिक्षुकइत्यादिरूपेण तर्हि तस्मिन्नेव समये संजीव्य प्रतिभासमात्रेणाप्युत्पद्य नभस्वता मातरिश्वना व्युल्लेखितउत्थापितो वारिदोजलदोयथा प्रावृषि वर्षर्तौ विक्षेपशतं प्रासादाग्रादिभञ्जनादिरूपं करोति तथा यमपि विक्षेपशतं समाधिव्युत्थितिवैराग्यशैथिल्यामानित्वादिभङ्गं करोति सन्तनोति तस्मादस्य मृतस्य स्मरणमपि माभूदित्यर्थः ॥ ३०९ ॥

समूलकृत्तः । अपि । महान् । अहम् । पुनः । व्युल्लेखितः । स्यात् । यदि । चेतसा । क्षणम् ॥ संजीव्य । विक्षेपशतम् । करोति । नभस्वता । प्रावृषि । वारिदः । यथा ॥ ३०९ ॥

विवेकज्ञानसे छेदन हुवा भी अहंकार लेशमात्र प्रतीत होवै है तिसको भी अनर्थकी कारणता निरूपण करे हैं । समूलकृत्त- इति । अतिबली अहंकार छेदन किया हुवा भी अनात्म पदार्थों के प्रवाहके सन्मुख हुवा भूतभावी पदार्थोंके चिन्तनका प्रकृतिरूप चित्तकरके पुनः स्मृत होवे है जैसे कि मैं बड़ा कुलीन था, राजा था, धनवान् था सो मैं अब सर्वइच्छाको त्यागके विरक्त हुवा हूं मेरे समान कोई पुरुष त्यागी नहीं है इत्यादि रूप अहंकारलेश जिस समय उदय होवै उसी समय प्रतीति- मात्रकरके उत्पन्न होके जैसे वायुकरके उत्थान किया मेघ वर्षा ऋतुमें मकानोंको गेरना आदि अनेक विक्षेप करता है तैसे ही यह स्वल्प अहंकारभी समाधिसे उत्थान वैराग्यकी शिथिलता अमानिता आदि साधनोंके भंगको करता है तिस कारण इस मूए हुवे अहंकारका स्मरणमात्र भी न करना चाहिये ॥ ३०९ ॥

निगृह्य शत्रोरहमोऽवकाशः,
क्वचिन्न देयोविषयानुचिन्तया ॥
सएव संजीवनहेतुरस्य,
प्रक्षीणजम्बीरतरोरिवाम्बु ॥३१०॥

ननु मृतस्य जीवनं दुर्घटमदृष्टचरं चेत्तत्राह । निगृह्येति । अर्थादहंकारमिति सम्बन्धः । अहंकारं निगृह्य विषयानुचिन्तया विषयानुसन्धानेनाहमोऽहंकारस्यावकाशोजीवनावसरोन देयोन सं- पाद्यः कुतः यतोस्याहंकारस्य सएव विषयानुसन्धानावसरएव संजी- वनहेतुः प्रक्षीणजम्बीरतरोरतिशुष्कस्य जम्बीरनाम्नोवृक्षस्य संजी- वनहेतुरम्बिवयथ मृतस्यापि पुरुषस्य वासनावशात्पुनर्जननमिव विनष्ट- स्याहंकारस्यापि विषयवासनया पुनः संजीवनमविरुद्धं जम्बीरतरोश्च दृष्टान्तत्वं स्फुटं मूर्छितोवा दृष्टान्तोयमिति भावः ॥ ३१० ॥

निगृह्य । शत्रोः । अहमः । अवकाशः । क्वचित् । न । देयः । विषयानुचिन्तया ॥ सः । एव । संजीवनहेतुः । अस्य । प्रक्षीणजम्बीरतरोः । इव । अम्बु ॥ ३१० ॥

मृतकके जीवनमें दृष्टान्त कहे हैं । निगृह्य इति । अहंकारको विनाशकरके विषयोंके चिन्तन द्वारा अहंकार शत्रुको जीवन का समय न देनाँ चाहिये सो ही अहंकारके जीवनका कारण है जैसे अतिसूखे हुवे जंबीरवृक्षके जीवनका हेतु जल है और जैसे मरे पुरुषका भी वासनावशसे जन्मान्तर होता है तैसेही नष्टहुवे अहंकारका भी वासनाद्वारा पुनर्जीवन बन सके है ॥ ३१० ॥

देहात्मना संस्थितएव कामी,
विलक्षणः कामयिता कथं स्यात् ॥
अतोऽर्थसन्धानपरत्वमेव,
भेदप्रसक्त्या भवबन्धहेतुः ॥ ३११ ॥

ननु वेदे "इति नु कामयमानइति" वचनेन सकामस्यैव संसारावाप्तिरभिहिता तत्र किमपराद्धमहंकारेण तत्राह । देहात्मनेति ।

देहात्मना संस्थितएव देहेऽहंमत्या देहतादात्म्याभिमान्येव कामी विषयजातं कामयते विलक्षणो देहाभिमानशून्यः कामयिता कामी कथं स्यात् कारणाभावात् कामानुदयेन कथमपि कामी न स्यादित्यर्थः । अतो देहाभिमानतो हेतोरर्थसन्धानपरत्वमेव अर्थानामनर्थानामपि शुद्धदृशाऽर्थप्रथामापन्नानां सन्धानं चिन्तनं तत्परत्वं सदाभ्यासशीलता पदार्थमार्थनीयत्वमिति यावत् भेदप्रसक्त्या भेदबुद्धिप्राप्त्या भेदोदयद्वारेत्यर्थः । भवबन्धहेतुर्जन्मपरम्पराप्राप्तिहेतुरित्यर्थः ॥ ३११ ॥

देहात्मना । संस्थितः । एव । कामी । विलक्षणः । कामयिता । कथम् । स्यात् ॥ अतः । अर्थसन्धानपरत्वम् । एव । भेदप्रसक्त्या । भवबन्धहेतुः ॥ ३११ ॥

कामना संसारका कारण है वेदमें कही है उसके त्याग होनेपर अहंकार क्या कर सक्ता है इस आशङ्काका उत्तर कहे हैं । देहात्मनाइति । देहमें तादात्म्यके अभिमान करने वाला ही सर्व विषयोंकी कामना करे है और देहें अभिमानसे रहित को कामना कभी नहीं होसके है इस कारण अनेक अनर्थोंको देनेवाले पदार्थोंके चिन्तनमें तत्परहोना ही भेदकी उत्पत्तिद्वारा होकर जन्म मरण परंपराका हेतु है इस कारण कामनाका भी मूल होनेसे अहंकारका त्याग अवश्य कर्तव्य है । ३११ ॥

कार्यप्रवर्द्धनाद्बीजप्रवृद्धिः परिदृश्यते ॥
कार्यनाशाद्बीजनाशस्तस्मात्कार्यं निरोधयेत् ३१२

ननु कामनामूलाहंकारनाशेऽर्थानुसन्धानं स्वयमेव नंक्ष्यति किमिति स्वातन्त्र्येण तत्त्यागेयत्नउपदिश्यते तत्राह।कार्यप्रवर्द्धनादिति।

कार्यप्रवर्द्धनात्कार्यस्य कामकर्मादेः प्रवर्द्धनात्पुनः पुनरुपचयहेतुसंचयात् बीजप्रवृद्धिर्बीजस्य विषयवासनादेः प्रवृद्धिरुपचयः परिदृश्यतेऽज्ञजनेषु स्फुटमुपलभ्यते सस्यादिषु च काण्डवृद्ध्या बीजवृद्धिर्लोके दृश्यते कार्यनाशात्कामकर्मपरित्यागात् बीजनाशोविषयवासनानुदयस्तस्मात्कामकर्मादे र्विषयवासनावर्द्धकत्वात् कार्यं कामकर्मादि निरोधयेत् सर्वथा त्यजेदित्यर्थः । कामनाभ्यासेन वासनावृद्ध्याऽहंकारवृद्धिः स्यात्स्याच्च ततोऽनर्थस्तस्मादर्थानुसन्धानमवश्यहेयमिति भावः ॥ ३१२ ॥

कार्य्यप्रवर्द्धनात् । बीजप्रवृद्धिः । परिदृश्यते॥ कार्य्यनाशात् । बीजनाशः । तस्मात् । कार्य्यम् । निरोधयेत् ॥ ३१२ ॥

अहंकारके त्यागसे पुरुषार्थ सिद्ध होसके है, पदार्थचिन्तन के अभ्यासके निषेधका क्या प्रयोजन इस शङ्काका उत्तर कहे हैं। कार्यप्रवर्द्धनात् इति । काम कर्मादिरूप कार्यकी वृद्धि होने

१ लुम्पेदवश्यमः कृत्ये तुं काममनसोरपीति वार्त्तिके नावश्यमोन्त्यलोपे साधु ।

से विषयवासनारूप कारणकी वृद्धि होवै है यह अज्ञानियों में दीखे है और वनस्पतिमें भी काने (सरकंडे) की वृद्धिसे बीज-वृद्धि लोकमें दीखे है और काम कर्मरूप कार्यके नाशसे वासनारूप कारणका उदयभाव नहीं होता है अर्थात् कामना-के अभ्याससे वासनावृद्धि होगी उससे अहंकारकी वृद्धि होकर अनर्थपरंपराकी प्राप्ति होगी इसे कारण कामकर्मका स्वतन्त्र निरोध आवश्यक है॥ ३१२ ॥

वासनावृद्धितः कार्यं कार्यवृद्ध्या च वासना।
वर्द्धते सर्वथा पुंसः संसारोन निवर्तते ॥३१३॥

ततः सिद्धमाह। वासनावृद्धितइति। वासनावृद्धितोबाह्यवासनोपचयेन कार्यं कामकर्मादि वर्द्धते उपची-यते कार्यवृद्ध्या कामकर्मादिवृद्ध्या च वासना बाह्यविषयवासना वर्द्धते उभयवृद्धौ महानर्थमाह। सर्वथेति। पुंसः पुरुषस्य संसारोज-न्मादिप्रवाहस्तथा सति सर्वथा न निवर्तते न कदापि निवर्तते किन्तु प्रतियोनिप्रवर्ततएवेत्यर्थः ॥ ३१३ ॥

वासनावृद्धितः। कार्य्यम्। कार्य्यवृद्ध्या। च। वासना॥ वर्द्धते। सर्वथा। पुंसः। संसारः। न। निवर्तते ॥ ३१३ ॥

पूर्व प्रकरणमें कामकर्म–वासनाको बन्धका हेतु कहा है अब मोक्षके लिये उनका विनाश अवश्य कर्तव्य है ऐसा कहे हैं। संसारइति। मोक्षके साधनोंमें जो यत्न करता है सो संसार-बन्धकी निवृत्तिरूप मोक्षके लिये कामकर्म और विषयोंका चिन्तन इन दोनोंको विनष्ट करे अर्थात् इनकी निवृत्तिमें यत्न करे जिस कारण बाह्य पदार्थोंके चिन्तनवृद्धिसे सेकाम कर्मरूप बाह्यक्रिया वृद्धिको प्राप्त होवै है और कार्यवृद्धिसे वासना वृद्ध होवै है और परस्परमिलित इन दोनोंसे वासना

की वृद्धि पुरुषको अनर्थका कारण उदय होवै है ॥ ३१३ ॥

संसारबन्धविच्छित्त्यै तद् द्वयं प्रदहेद्यतिः॥
वासनावृद्धिरेताभ्यां चिन्तया क्रियया बहिः॥३१४॥

कामकर्मवासनयोर्बन्धकत्वमुक्तं सम्प्रति तयोर्विनाशो मोक्षाय विधेयइत्याह । संसारेति ।

यतिर्मोक्षसाधनयत्नशीलः संसारबन्धविच्छित्त्यै संसारलक्षणबन्धविध्वंसाय मोक्षावाप्तयइति यावत् । तद् द्वयं कामकर्मादि विषयानुसन्धानं चेत्यर्थः । प्रदहेद्भस्मसाद्भावयेत् । तन्निवृत्तौ प्रयतेतेत्यर्थः । यतोबहिश्चिन्तया बाह्यपदार्थचिन्तनेन बाहिक्रियया सकामकर्मलक्षणया चैताभ्यां मिलिताभ्यां वासनावृद्धिर्वासनोपचयोऽनर्थमूलमुत्पद्यते इत्यर्थः ॥३१४॥

संसारबन्धविच्छित्त्यै । तद् । द्वयम् । प्रदहेद् । यतिः ॥ वासनावृद्धिः । एताभ्याम् । चिन्तया । क्रियया । बहिः ॥३१४॥

सकाम कर्म और वासनाको बन्धकता पूर्व कही है अब मोक्षके लिये उनका विनाश अवश्य कर्तव्य है ऐसा निरूपण करे हैं । संसारबन्ध इति । मोक्षके लिये जो यत्न करता है संसाररूप बन्धनके विनाशार्थ अर्थात् मोक्षकी प्राप्ति वास्ते सो सकाम कर्म और विषयाचिन्तन इन दोनोंको अत्यन्त भस्म करे अर्थात् इनकी निवृत्तिमें दृढ प्रयत्न करे जिस कारण बाह्य पदार्थके चिन्तनकरके और सकाम कर्मकरके इनके मिलनेसे वासनाकी वृद्धि अनर्थका मूलरूप प्राप्त होवै है ॥

ताभ्यां प्रवर्द्धमाना सा सूते संसृतिमात्मनः ॥
त्रयाणां च क्षयोपायः सर्वावस्थासु सर्वदा ॥३१५॥

भवतु वासनावृद्धिस्तया किन्नश्छिन्नमतआह । ताभ्यामिति ।

सा वासना ताभ्यां सकामकर्मविषयानुसन्धानाभ्यां प्रवर्द्धमाना वृद्धिं प्राप्ता सती आत्मनः स्वस्य संसृतिं जन्मजरादिदुःखसन्ततिं

सूते प्रसूते उत्पादयतीति यावत्। एषां त्रयाणां सकामकर्मविषयानुसन्धानवासनानां क्षयोपायोविध्वंससाधनं उच्यते इति शेषः किन्तदिति चेत्तत्राह सर्वावस्थासु सम्पद्विपदादिषु दशासु सर्वदा सर्वस्मिन्समये ॥ ३१५ ॥

ताभ्याम् । प्रवर्द्धमाना । सा । सूते । संसृतिम् । आत्मनः ॥ त्रयाणाम् । च । क्षयोपायः । सर्वावस्थासु । सर्वदा ॥ ३१५॥

वासनावृद्धिसे अनर्थप्राप्तिको दिखावै हैं । सकाम कर्म विषयोंका चिन्तन इनसे वृद्ध हुई वासना आत्माको जन्म-जरा आदि दुःखसमूहको उत्पन्न करे है, सकामकर्म विषय-चिन्तन और विषयवासना इन तीनोंके विनाशके साधनको कहे हैं संपत् विपत् आदि सर्वदशामें और सर्वकालमें ३१५

सर्वत्र सर्वतः सर्वब्रह्ममात्रावलोकनैः ॥
सद्भाववासनादार्ढ्यात्तत्त्रयं लयमश्नुते॥ ३१६ ॥

सर्वत्र सर्वेषु देशेषु सर्वतः सर्वस्माच्चोपायात्सर्वथेत्यपिपाठः सर्वब्रह्ममात्रावलोकनैः सर्वस्य ब्रह्मात्मदर्शनैः प्रथमान्तपाठोऽपि सरलः। सर्वमित्यनुस्वारलेखस्तु लेखकदोषात्। सद्भाववासनादार्ढ्यात्सन्नविनाशीभावोभवनंहेतुःसर्वेषां ब्रह्म तस्य वासनादार्ढ्यात्त्रयं कामकर्मविषयानुसन्धानं वासनाचेत्येतेषां त्रयं लयं विनाशमश्नुते प्राप्नोतीत्यर्थः ॥ ३१६ ॥

सर्वत्र । सर्वतः । सर्वब्रह्ममात्रावलोकनैः ॥ सद्भाववासनादार्ढ्यात् । तत् । त्रयम् । लयम् । अश्नुते ॥ ३१६ ॥

सर्वदेशोंमें सर्व उपायसे सर्वको ब्रह्मरूपताका दर्शन ही उपाय है, ब्रह्म अविनाशीकी भावनाके दृढ होनेसे काम कर्म-वासना विषयचिन्तन तीनों विनाशको प्राप्त होवै हैं ३१६

क्रियानाशे भवेच्चिन्तानाशोऽस्माद्वासनाक्षयः॥
वासनाप्रक्षयोमोक्षः सा जीवन्मुक्तिरिष्यते ॥३१७॥

निरुक्तत्रयलयमेव मुनयोजीवन्मुक्तिमाहुरित्याह। क्रियानाशइति। क्रियानाशे सकामकर्माभावे सामान्येन विशेषलक्षणायाअभ्युपगमात्। भवेदेव चिन्तानाशश्चिन्तायाविषयानुसन्धानलक्षणायाअभावः लक्षणापूर्ववत्। सकामकर्मानुष्ठाने हि फलचिन्तोदेति तदभावे वासनाप्रक्षयोवासनानुदयंमोक्षः सैव च जीवन्मुक्तिरेति मुनिभिरिष्यते मन्यते ॥ ३१७ ॥

क्रियानाशे। भवेत्। चिन्तानाशः। अस्माद्। वासनाक्षयः॥ वासनाप्रक्षयः। मोक्षः। सा। जीवन्मुक्तिः। इष्यते॥ ३१७॥

इसीको जीवन्मुक्तिपदसे व्यवहार करे हैं। क्रियानाशे इति। सकाम कर्मके अभाव होनेसे विषयोंका चिन्तन नष्ट होवै है, सकाम कर्म करनेसे फलका चिन्तन होवै है तिसके अभाव होनेसे वासनाका उदय नहीं होता सो ही मोक्ष है सो ही जीवन्मुक्ति है ऐसा मुनिलोक मान्ते हैं ॥ ३१७ ॥

सद्वासनास्फूर्तिविजृम्भणे स-
त्यसौ विलीनाप्यहमादिवासना ॥
अतिप्रकृष्टाप्यरुणप्रभायां,
विलीयते साधु यथा तमिस्रा ॥३१८॥

अहंकारवासनालयं सनिदानमाह। सद्वासनेति। सद्वासनास्फूर्तिविजृम्भणे सति सतोविनाशविकलस्य ब्रह्मणोवासनायाभावनायाः स्फूर्तेश्चमत्कारस्य विजृम्भणे उदये सति असावहमादिवासनापि देहाद्यहंकारादिवासनापि विलीना भवति। अत्र दृष्टान्तमाह अतिप्रकृष्टापि इति। यथा तमिस्रा तमः सहतिरतिप्रकृष्टापि गाढापि भास्करस्यप्रभायामरुणोदये साधु विना यत्नं विलीयते तथा ब्रह्मभावनया विना यत्नेनाहंकारवासना विलीयतइति समन्वयः ॥ ३१८ ॥

सद्वासनास्फूर्तिविजृम्भणे। सति। असौ। विलीना। अपि।

अहमादिवासना ॥ अतिप्रकृष्टा । अपि । अरुणप्रभायाम् । विलीयन्ते । साधु । यथा । तमिस्रा ॥ ३१८ ॥

अहंकारवासनाका निरूपण करे हैं । सद्वासना इति । विनाशरहित ब्रह्मकी भावना और चमत्कारके उदय होने पर देहादिमें अहंकारादि वासना भी लीन होवै है जैसे अन्धकार का समूह अतिगाढ भी होवै प्रातःकाल अरुणकी प्रभा होने पर विना यत्न नष्ट होवै है तैसे ही ब्रह्मभावनाकरके विना यत्नसे अहंकार नष्ट होवै है ॥ ३१८ ॥

तमस्तमःकार्यमनर्थजालं,
न दृश्यते सत्युदिते दिनेशे ॥
तथाऽद्वयानन्दरसानुभूतौ,
न वास्ति बन्धोन च दुःखगन्धः॥ ३१९ ॥

यदा ब्रह्मभावनालक्षणभानुप्रभयैवाहमादितमःसन्ततिर्विनष्टा भवति तर्हि किमु वक्तव्यं ब्रह्मबोधभानावुदिते सति सा नश्यतीत्य-त्रेत्याह । तमस्तम.कार्यमिति ।

दिनेशे दिननाथे भास्करे उदिते सति तमोऽन्धकारस्तमःकार्यं गर्त-पतनादिरूपमनर्थजालं दुःखदुर्दशाप्रदं न दृश्यते न भवति तत्कार-णस्य तमसोविनाशादिति भावः । तथाऽद्वयानन्दरसानुभूतौ ब्रह्मा-द्वैतैकरसानन्दानुभवे सति बन्धोऽहंकारादिर्बन्धकोनैवास्ति न तिष्ठति नच नापि दुःखगन्धः दुःखलेशोभवतीत्यर्थः ॥ ३१९ ॥

तमः । तमःकार्यम् । अनर्थजालम् । न । दृश्यते । सति । उदिते । दिनेशे ॥ तथा । अद्वयानन्दरसानुभूतौ । न । वा । अस्ति । बन्धः । न । च । दुःखगन्धः ॥ ३१९ ॥

जब ब्रह्मभावनासे ही अहंकारप्रवाहका नाश होता है तौ ब्रह्मसाक्षात्कारसे नाश होनेमें आशङ्का ही कहां है ऐसा निरूपण करे हैं । तमःइति । जैसे दिनके स्वामी सूर्यके उदय

होनेपर अंधकार और उसका कार्य गड्ढेमें गिरना आदि दुःख दुर्दशा दीखनेमें नहीं आवै है तैसेंही ब्रह्म आनन्द एकरस आत्माके अनुभव होनेपर अहंकारादि बन्धनहेतु नहीं स्थिर रहता है और दुःखका लेशभी नहीं रहता है ॥ ३१६ ॥

दृश्यं प्रतीतं प्रविलापयन्सन्,
सन्मात्रमानन्दघनं विभावयन् ॥
समाहितः सन्बहिरन्तरं वा,
कालं नयेथाः सति कर्मबन्धे ॥ ३२० ॥

जीवन्मुक्तस्यायुर्यापनप्रकारमाह । दृश्यमिति ।

बहिरन्तरं बाह्यमान्तरं वा दृश्यं विश्वमीशकल्पितं जीवकल्पितं चेत्यर्थः । प्रतीतं भातं प्रविलाप्य "नेति नेति" त्यादिवचनैस्तस्याभावं चिन्तयन्नानन्दघनमात्मानं च सन्मात्रमविनाशिस्वभावं विभावयंश्चिन्तयन्कुसङ्गप्रसङ्गे च सति समाहितः सावधानः सन् कर्मबन्धे प्रारब्धकर्मण्यवशिष्टे सति कालं समयं नयेथा यापय कतिचिद्दिवसानेवं जीवन्मुक्ताचरणेनेत्यर्थः ॥ ३२० ॥

दृश्यम् । प्रतीतम् । प्रविलापयन् । सन् । सन्मात्रम् । आनन्दघनम् । विभावयन् ॥ समाहितः । सन् । बहिः । अन्तरम् । वा । कालम् । नयेथाः । सति । कर्मबन्धे ॥ ३२० ॥

जीवन्मुक्तको आयुव्यतीत करनेका प्रकार कहे हैं । दृश्यम् इति । बाह्य और आन्तर संसार ईश्वर जीवकरके कल्पित जो जो प्रतीत होवै है तिसके अभावको चिन्तन करता हुवा आनन्दस्वरूप अविनाशीस्वरूपको चिन्तन करता हुवा कुसंगी के संग प्राप्त होनेपर भी सावधान हुवा हुवा प्रारब्ध कर्म के शेष रहनेपर कुछ दिन इस प्रकार जीवन्मुक्तके आचरण को करता हुवा व्यतीत करे ॥ ३२० ॥

प्रमादोब्रह्मनिष्ठायां न कर्तव्यः कदाचन ॥
प्रमादोमृत्युरित्याह भगवान्ब्रह्मणः सुतः ॥ ३२१ ॥

ननु जीवन्मुक्तस्य सन्मात्रभावनायां यथाकथंचिदाजगरीवृत्तिरपि किं सुखायते इत्यतआह । प्रमादइति ।

ब्रह्मनिष्ठायां सन्मात्रमिदं दृश्यमिति चिन्तने कदाचनापि प्रमादोऽनवधानता न कर्तव्यः। कुतस्तत्राह प्रमादोमृत्युरिति। ब्रह्मणःसुतोभगवान्सनत्सुजातोमृत्युः प्रमादइत्याह "प्रमादं वै मृत्युमहं ब्रवीमी" त्यादिवचनैर्धृतराष्ट्रं प्रत्युपदिदेशेत्यर्थः । आजगरीवृत्तिस्तु शरीरयात्रायायथारब्धं भवतु वा माभूदात्मनिष्ठायां तु सावधानेनैव विदुषा भाव्यमितिभावः ॥ ३२१ ॥

प्रमादः। ब्रह्मनिष्ठायाम्। न। कर्तव्यः। कदाचन ॥ प्रमादः मृत्युः। इति। आह। भगवान्। ब्रह्मणः। सुतः ॥ ३२१ ॥

जीवन्मुक्तको अजगरादि वृत्ति धारणमें नियमाभावको सूचन करे हैं। प्रमादःइति। येह दृश्य ब्रह्ममात्र है ऐसे चिन्तन में किसी कालमें भी आलस्य न करना चाहिये जिस कारण महाभारतमें धृतराष्ट्रके प्रति ब्रह्माके पुत्र सनत् सुजातजीने ब्रह्मचिन्तनमें आलस्यको मृत्युरूपसे उपदेश किया है, अजगरवृत्ति वा मधुकरवृत्ति जैसे प्रारब्ध हो वैसे होवै परंच प्रमाद न करना चाहिये यह तात्पर्य है ॥ ३२१ ॥

न प्रमादादनर्थोऽन्योज्ञानिनः स्वस्वरूपतः ॥
ततोमोहस्ततोऽहंधीस्ततोबन्धस्ततोव्यथा ॥ ३२२ ॥

ननु निर्ज्ञाते वस्तुनि किं सावधानतया वस्तुनोज्ञातत्वादेव तथा च प्रमादोन दोषावहस्तत्राह। न प्रमादादिति।

ज्ञानिनोब्रह्मनिष्ठस्य स्वस्वरूपतः स्वात्मचिन्तनात् प्रमादादालस्यादनर्थोदुर्दशाअन्योभिन्नोनास्ति अयमेव महाऽनर्थोब्रह्मविद। यथा चैतत्तदुपपादयति ततइति। ततः स्वात्मप्रमादान्मोहोऽविवेकोभवति

ततस्तस्मादविवेकादनात्मन्यहंधीस्ततोबन्धोजन्मादिसंसारस्ततोपि व्यथा द्वैतभयं दुःखं चेत्यर्थः ॥ ३२२ ॥

न । प्रमादाद् । अनर्थः । अन्यः । ज्ञानिनः । स्वस्वरूपतः ॥ ततः । मोहः । ततः । अहंधीः । ततः । बन्धः । ततः । व्यथा ॥

ज्ञात वस्तुका पुनः २ चिन्तन करना व्यर्थ होनेसे प्रमाद में कुछ दोष नहीं इस शङ्काको वारण करे हैं। न इति। ब्रह्मनिष्ठको आत्मचिन्तन में आलस्य होनेसे दुर्दशा होवै है इससे अन्य अनर्थ क्या होवै क्योंकि आत्माके न चिन्तनरूप प्रमाद से अविवेक होवै है, अविवेकसे देहादिमें अहंबुद्धि होती है तिससे जन्मादि संसार होता है तिससे भय दुःख प्राप्त होवैहैं ॥

विषयाभिमुखं दृष्ट्वा विद्वांसमपि विस्मृतिः ॥
विक्षेपयति धीदोषैर्योषा जारमिव प्रियम् ॥३२३॥

ननु ज्ञानिनः प्रमादेन मोहावाप्तिरिति न घटते तेजस्तिमिरयोरिव विवेकाविवेकयोरेकत्रावस्थितेर्विरुद्धत्वादतआह विषयाभिमुखमिति। विद्वांसं ब्रह्मविदमपि विषयाभिमुखं स्वरूपचिन्तनप्रमादेनेन्द्रियचापल्येनच विषयाकारवृत्तिसंसर्गिणं दृष्ट्वा उपलभ्य विस्मृतेरचेतनत्वेप्यौपचारिकं कर्तृत्वं मत्वाह विस्मृतिरिति स्वान्तः स्थास्वस्वरूपास्मृतिः प्रमादाभिधा धीदोषैरहंकारकामादिभिर्बुद्धिविकारैः। योषा स्मृतिगोचरतामापन्ना विषयाभिमुखं विषयलम्पटमानसं प्रियमिष्टं योषायाजारमुपपतिं दोषैः कामचिन्तादिभिरिव विक्षेपयति क्लेशयतीत्यर्थः। जारमन्यस्त्रीलम्पटं प्रियं पतिं योषेवेति कश्चित्प्रत्येति तन्न चमत्कारिधीदोषपदविरोधात् ॥ ३२३ ॥

विषयाभिमुखम् । दृष्ट्वा । विद्वांसम् । अपि । विस्मृतिः । विक्षेपयति । धीदोषैः । योषा । जारम् । इव । प्रियम् ॥ ३२३ ॥

प्रकाश अन्धकारके परस्पर विरोधवत् विवेक अविवेकका परस्पर विरोध होनेसे ज्ञानीको प्रमादसे मोहकी प्राप्तिकथन मिथ्या है इस शङ्काको वारण करे हैं। विषयाभिमुखम् इति।

विषयोंके सन्मुख हुवे ब्रह्मज्ञानीको देखकर ब्रह्मकी विस्मृति अर्थात् स्मरणाभाव प्रमादनाम वाली बुद्धिके अहंकार कामादि दोषोंकरके विक्षेप करे है जैसें स्मृतिका विषय हुई परनारी-विषयलंपट नारीके प्रिय जारको कामचिन्तनादि दोषोंकरके क्लेश देती है तैसे यह ब्रह्मकी अस्मृतिभी क्लेश देती है॥ ३२३ ॥

यथाऽपकृष्टं शैवालं क्षणमात्रं न तिष्ठति ॥
आवृणोति तथा माया प्राज्ञं वापि पराङ्मुखम्॥३२४॥

क्षणमपि न प्रमदितव्यमित्याह। यथेति।

यथा शैवालमपकृष्टं करादिनापसारितं प्रमादे सत्यन्यत्र क्षणमात्रमपि न तिष्ठति यतः सलिलप्रदेशादपकृष्टं तत्रैवागत्य सलिलमावृणोति यथाऽयं दृष्टान्तस्तथा मायाऽविद्याप्राज्ञं ब्रह्मविदमपि पराङ्मुखमात्मविमुखं प्रमादिनमावृणोत्येवेत्यर्थः। वाशब्दस्यैवकारसमानार्थकत्वात्। तथाचाविद्या मे विनष्टेत्येव सन्तुष्य न प्रमदितव्यं किन्त्वात्मा प्रतिलवमनुसन्धातव्यइति भावः॥ ३१४ ॥

यथा। अपकृष्टम्। शैवालम्। क्षणमात्रम्। न। तिष्ठति ॥
आवृणोति। तथा। माया। प्राज्ञम्। वा। अपि। पराङ्मुखम्॥

क्षणमात्रभी प्रमाद न करो ऐसा कहे हैं। यथा इति। जैसे शैवाल हाथसे हटाईहुई आलस्य होनेसे अन्य स्थानमें क्षणमात्र भी नहीं स्थित होवे है जिस जलदेशसे खीची थी वहांही आयकर जलको आच्छादान करे है तैसेही अविद्या ब्रह्मज्ञानी आत्मासे विमुख हुवेको अवश्य आच्छादन करेहै, इसकारण मेरी अविद्या नष्ट होगई है इतने मात्रसे सन्तोषकरके प्रमाद मत करो किन्तु प्रतिक्षण आत्माके चिन्तनमें अभ्यास करो॥ ३२४॥

लक्ष्यच्युतं चेद् यदि चित्तमीष-
द्बहिर्मुखं सन्निपतेत्ततस्ततः ॥

प्रमादतः प्रच्युतकेलिकन्दुकः,
सोपानपङ्क्तौ पतितोयथा तथा॥ ३२५ ॥

एतदेव दृष्टान्तान्तरेण विवृणोति। लक्ष्यच्युतमिति। यथा प्रमादतः करनिरोधानवधानतः प्रच्युतकेलिकन्दुकः उपरिदेशमनागत्याधोदेशगामी केल्यर्थं गृहीतोबालैः कन्दुकः सोपानपङ्क्तौ सोपानपरम्परायां पतितस्ततस्ततोदेशान्तरं प्राप्य ततोपि देशान्तरं संनिपतेदधोऽधोगच्छेन्नोर्ध्वमागच्छति तथा चित्तमन्तःकरणमीषदपि मनागपि लक्ष्यच्युतं लक्ष्याद्ब्रह्मणः "ब्रह्म तल्लक्ष्यमुच्यते" इतिश्रुतेः च्युतं बहिर्मुखंचेद्यदि स्यात्तर्हि ततस्ततोरूपाद्रसं रसाच्चस्पर्शमेवमन्यदपि सन्निपतेदधोऽधोधावेन्नोर्ध्वमागच्छेत्ततश्च बहिर्मुखत्वानिवृत्त्यामहानर्थावाप्तिः स्यादारूढपातदोषेण हासास्पदता ते लोके प्राप्नुयादिति भावः॥ ३२५ ॥

लक्ष्यच्युतम्। चेद्। यदि। चित्तम्। ईषद्। बहिर्मुखम्। सन्निपतेत्। ततः। ततः॥ प्रमादतः। प्रच्युतकेलिकन्दुकः। सोपानपङ्क्तौ। पतितः। यथा। तथा॥ ३२५॥

इसी वार्ताको अन्य दृष्टान्तसे वर्णन करे हैं। लक्ष्यच्युतम् इति। जैसे हाथके न रोकनेसे क्रीडार्थ ग्रहण की हुई गेंद ऊपरको न आकर नीचेको गई हुई पैहुडी(सीढी)में गिरीहुई उससेभी नँचिके स्थानको प्राप्त होकर वैसे आगे भी नचिको गिरती २ हुई अधोगतिको प्राप्त होवे है ऊपरको नहीं आती तैसे अन्तःकरण थोडासा भी बाह्यमुख होके गमन करे, ब्रह्मचिन्तनसे गिर पडे तो रूपसे रस रससे स्पर्शादि नीचे विषयोंमें अधोगतिको प्राप्त होवे है, ऊपरको आनेको समर्थ नहीं रहता है और बहिर्मुखताकी वृद्धिसे अनर्थपरम्पराको प्राप्त होता हैं और लोकमें आरूढ पतित नामको धराके लोकोंके हासका गोचर होता है॥

विषयेष्वाविशच्चेतः सङ्कल्पयति तद्गुणान् ॥
सम्यक्सङ्कल्पनात्कामः कामात्पुंसः प्रवर्तनम् ॥३२६॥

कथमधोऽधश्चित्तगतिः स्यादिति चेत्तत्राह। विषयेष्विति।

चेतोऽन्तःकरणं विषयेषु शब्दादिषु श्रोत्रादिद्वाराऽऽविशत्सम्बद्धमन्तरे वोपनीतं सत्तद्गुणान् सौष्ठवादीन्संकल्पयति सम्यक्संकल्पनाद्भृशं सम्पादितात्संकल्पात्कामोऽभिलाषोभवेदेवं मे भवेत् पुनरपिप्रसंगइति लक्षणोभवति। कामादभिलाषाच्च पुंसः प्रवर्तनं तत्सम्पादने मुहुः प्रयत्नस्तस्माच्च न निवृत्तिरिति भवत्यवश्यं भवबन्धइति भावः। "ध्यायतोविषयान्पुंसः सङ्गस्तेषूपजायते" इत्यादिस्मृत्यर्थोत्र वर्णितइति बोध्यम् ॥ ३२६ ॥

विषयेषु । आविशत् । चेतः । संकल्पयति । तद्गुणान् ॥ सम्यक् । सङ्कल्पनात् । कामः । कामात् । पुंसः । प्रवर्तनम्॥

अधोगतिको दिखावे हैं। विषयेषु इति।अन्तःकरण शब्दादि विषयोंमें श्रोत्रादि इन्द्रिय द्वारा संबद्ध हुवा अन्तरही विषयोंके सुन्दरतादि गुणोंका चिन्तन करता है पुनः २ संपादन किये संकल्पसे पदार्थोंकी इच्छा होवे है,इच्छासे पुरुषकी प्रवृत्ति होवै है ऐसीही चक्राकार प्रवृत्ति होती रहती है,उससे निवृत्ति कभी नहीं होती-इस कारण आत्माचिन्तनमें प्रमाद न करो॥

अतः प्रमादान्न परोस्ति मृत्यु-
र्विवेकिनोब्रह्मविदः समाधौ ॥
समाहितः सिद्धिमुपैति सम्यक्,
समाहितात्मा भव सावधानः ॥ ३२७॥

प्रमादे दोषमभिधाय तत्त्यागेन समाधाने गुणमाह। अतइति।

यतः प्रमादोऽभिहितरीत्या संसारानर्थप्रदस्तस्मात्प्रमादादात्मवैमुख्याद् विवेकिनोविवेकनिपुणमतेर्ब्रह्मविदोब्रह्मज्ञस्य परोऽन्योमृत्युर्मारकोनास्ति यश्च ब्रह्मवित्समाधौ ब्रह्मनिष्ठायां समाहितएकाग्र-

चित्तः ससम्यक्सिद्धिं जीवन्मुक्तिसुखानुभूतिमुपैतिप्राप्नोति तथाच भोः शिष्य प्रमादमवधूय सावधानोजितालस्यः समाहितात्मा समाहितचेता भव प्रमादेन जीवन्मुक्तिसुखं मा हासिरित्यर्थः ॥ ३२७ ॥

अतः। प्रमादात्। न। परः। अस्ति। मृत्युः। विवेकिनः। ब्रह्मविदः। समाधौ ॥ समाहितः। सिद्धिम्। उपैति। सम्यक्। समाहितात्मा। भव। सावधानः ॥ ३२७ ॥

प्रमादके त्यागसे समाधानमें गुण कहे हैं। अतः इति। जिस कारण प्रमाद संसार अनर्थका हेतु है इसकारण आत्मविमुखतासे विवेकै निपुणमति वाले ब्रह्मज्ञानीको नाशका हेतु अन्य कोई नहीं है और जो ब्रह्मज्ञानी समाधि ब्रह्मनिष्ठता में समाहित है अर्थात् एकाग्रचित्त है सो जीवन्मुक्तिसुखको प्राप्त होवै है इसकारण हे शिष्य! प्रमादको त्याग, आलस्यको जीतकर एकाग्रचित्त होवो प्रमादसे जीवन्मुक्तिसुखको मत त्याग ॥ ३२७ ॥

ततः स्वरूपविभ्रंशोविभ्रष्टस्तु पतत्यधः ॥
पतितस्य विना नाशं पुनर्नारोह ईक्ष्यते ॥३२८॥

ननु भवतु विषयप्रवृत्तिरात्मनोनिर्लेपत्वादहानेरतआह। ततइति। ततोविषयप्रवाहेप्रवृत्तेः स्वरूपविभ्रंशोगुरुशास्त्रोपदेशजन्यात्मबुद्धेर्विलोपोविभ्रष्टस्तु स्वरूपप्रच्युतस्त्वधोनरकादौ नीचयोनौ पतति ननु पतितोपि पुनः पुण्योदये स्वरूपं लप्स्यते नेत्याह पतितस्येति। पतितस्य कुसङ्गेन निरन्तरं विषयाशाकर्मनाशाप्रवाहेऽधोऽधोदुःखदुर्दशामनुभवतोनाशं विना क्रियासमभिहारेण मृत्युमन्तरा पुनरारोहः ब्रह्मनिष्ठाप्राप्तिर्नेक्ष्यते समीक्षकैर्नसमीक्ष्यते कुसङ्गिसङ्गे पुण्यचर्चाया अप्यभावान्न पुण्योदयसमयः प्रतीक्षणीयइति भावः। तदुक्तं "निःसङ्गता मुक्तिपदं यतीनां सङ्गादशेषाः प्रभवन्ति दोषाः॥ आरूढयोगोपि निपात्यतेऽधः सङ्गेन योगी किमुताल्पसिद्धिः"॥इति॥

ततः। स्वरूपविभ्रंशः। विभ्रष्टः। तु। पतति। अधः॥ पतितस्य। विना। नाशम्। पुनः। न। आरोहः। ईक्ष्यते॥३२८॥

विषयमें प्रवृत्ति होनेसे भी कुछ हानि नहीं, आत्माको निर्लेप होनेसे इस शङ्काका उत्तर कहे हैं। ततः इति। विषयप्रवाहमें प्रवृत्त होनेसे गुरु शास्त्रके उपदेशजन्य आत्मज्ञानका अभाव होवै है और स्वरूपसे प्रच्युत हुवा नीचे नरकादि योनियोंमें गिरता है और पतितका मृत्युसे विना फिर ब्रह्मनिष्ठाकी प्राप्ति दीखनेमें नहीं आती, विषयसंगसे मतिभंग होती है महाहानि होवै है॥ ३२८॥

सङ्कल्पं वर्जयेत्तस्मात्सर्वानर्थस्य कारणम्॥
जीवतोयस्य कैवल्यं विदेहे सच केवलः॥
यत्किञ्चित्पश्यतोभेदं भयं ब्रूते यजुःश्रुतिः॥३२९॥

नन्ववगतमिदं प्रमादोमहानर्थप्रदइति तथापि मुक्तिं समीहमानेन किं विधेयमतआह। संकल्पं वर्जयेदिति।

यस्मान्नान्यत्साधनमात्मसुखाभिव्यक्तेस्तस्मात्सर्वानर्थस्य निखिलदुःखस्य कारणं संकल्पं वर्जयेन्निवर्तयेत। "सर्वसंकल्पसन्न्यासी योगारूढस्तदोच्यते" इति स्मृतेः। ननु संकल्पवर्जनं जीवन्मुक्तावेवोपयुज्यते विदेहमुक्तिस्तु संकल्पं वितन्वानस्यापि सुलभैव ब्रह्मविदस्तत्राह जीवतइति। यस्य जीवतएव कैवल्यं मुक्तत्वं सच सएव विदेहे देहत्यागेपि केवलः कैवल्यभागी। कुतइति चेच्छृणु यत्किञ्चिदिति। यतोयत्किञ्चित् भेदमभेदसमानाधिकरणमपि स्वान्यत्वं भेदाभेदवादिमतसिद्धं पश्यतः समीक्षमाणस्य यजुःश्रुतिः। 'यदाह्येवैषएतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽथसोऽभयं गतोभवति यदा ह्येवैषएतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवति" इति तैत्तरीयश्रुतिः। भयं जन्मादिभीतिं ब्रूते वदति। ततोद्वैतं संकल्पमानस्य जीवन्मुक्तस्य लोकप्रसिद्ध्या ब्रह्मविदोविदेहे कैवल्यमसम्भवीत्यर्थः। अत्रश्रुतावरमल्पमन्तरं भेदमि-

स्यर्थः शेषं स्पष्टम्। द्वैतदृष्टिर्दृष्टेष्टानिष्टहेयोपादेयमतिमन्तरा संकल्पानुदयेन सङ्कल्पमानस्य द्वैतदृष्ट्यादेर्विद्यमानत्वेन ब्रह्मवित्त्वमेव नेष्टमिति का वार्ता जीवन्मुक्तेर्विदेहमुक्तेर्वेति भावः ॥ ३२८ ॥

संकल्पम्। वर्जयेत्। तस्मात्। सर्वानर्थस्य। कारणम्॥
जीवतः। यस्य। कैवल्यम्। विदेहे। सः। च। केवलः॥
यत्किञ्चित्। पश्यतः। भेदम्। भयम्। ब्रूते। यजुःश्रुतिः॥

प्रमाद अनर्थका कारण है ऐसा ज्ञात हुवा तथापि मुक्तिकी इच्छा करने वालेने क्या करना चाहिये इस प्रश्नका उत्तर कहे हैं।संकल्पम् इति। जिस कारण आत्मसुखकी अभिव्यक्तिका संकल्प त्यागसे अन्य साधन नहीं है तिस कारण सर्व दुःखोंके कारण संकल्पको न करे। जिस संकल्पत्यागी जीवतेको ही मुक्ति होती है सो ही देहके त्याग होनेपर भी कैवल्य मोक्ष का भागी होता है।जीव ब्रह्ममें थोड़ासा भी भेदको देखने वाले को यजुर्वेदकी श्रुति जन्ममरणादि भयकी प्राप्ति कहे हैं तिस कारण द्वैतके संकल्प करने वाले जीवन्मुक्ताभास लोकप्रसिद्ध ब्रह्मज्ञानीको विदेहमुक्तिका असम्भव है॥ ३२९ ॥

यदा कदा वापि विपश्चिदेष-
ब्रह्मण्यनन्तेप्यणुमात्रभेदम्॥
पश्यत्यथामुष्य भयं तदैव,
यद्वीक्षितं भिन्नतया प्रमादात्॥ ३३० ॥

यजुःश्रुतेरभिमतमर्थं विवृणोति। यदा कदेति।
एषविपश्चिद्विद्वान्। यदा यदि कदापि वा कस्मिन्नप्यवसरेऽनन्ते निर्भेदे ब्रह्मणि परमात्मनि अणुमात्रभेदं स्वल्पमपि पृथक्त्वं पश्यति समीक्षतेऽथतदैवामुष्य भेददर्शिनोयद्वस्तुप्रमादादात्मरूपानुसन्धानाऽनवधानात् भिन्नतया स्वान्यत्वेन वीक्षितं समीक्षितं भयं भयकरं भवति तस्माद्द्वैतदर्शनस्य भयहेतुत्वाद् द्वैतमन्तरा च संकल्पानुदयात्संकल्पोदये च द्वैतदृष्टेरवश्यंभावात्संकल्पः सर्वथा हेयएवेति

भावः।'ब्रह्म तं परादाद्योऽन्यत्रात्मनोब्रह्मवेद'इत्यारभ्य'सर्वन्तंपरादाद्योऽन्यत्रात्मनःसर्ववेद' इत्यन्तबृहदारण्यकश्रुत्यर्थोप्यत्रसंगृहीतइतिबोध्यम् ॥ ३३० ॥

यदा । कदा । वा । अपि । विपश्चित् । एषः । ब्रह्मणि । अनन्ते । अपि । अणुमात्रभेदम् ॥ पश्यति । अथ । अमुष्य । भयम् । तद् । एव । यत् । वीक्षितम् । भिन्नतया । प्रमादात् ॥ ३३० ॥

यजुर्वेदकी श्रुतिका अर्थ स्पष्ट कहे हैं । यदा इति । यह विद्वान् जो कभी किसीकालमें भी भेदरहित परमात्मामें थोड़ासाभी भेद देखता है तबही भेदद्रष्टाको जो वस्तु आत्माके स्वरूपके चिन्तन न करनेसे अपनेसे भिन्नरूपकरके देखी होती है सो ही भयका हेतु होवै है तिस कारण द्वैतदर्शनको भयका हेतु होनेसे और द्वैत विना संकल्पके न उदय होनेसे, संकल्पके उदय होनेसे द्वैतदृष्टिकी अवश्य प्राप्ति होनेसे संकल्प सर्व प्रकारसे त्यागने योग्य हैं ॥ ३३० ॥

श्रुतिस्मृतिन्यायशतैर्निषिद्धे-
दृश्येऽत्र यः स्वात्ममतिं करोति ॥
उपैति दुःखोपरि दुःखजातं,
निषिद्धकर्ता समालिम्लुचोयथा ॥ ३३१ ॥

द्वैतदृष्टेर्भयकरत्वं प्रदर्श्य दुःखपरम्परानिदानत्वमप्याह । श्रुतिस्मृतीति ।

यः पुमान् श्रुतिस्मृतिन्यायशतैः 'अस्थूलमनणु' नेह नानास्ति किंचन'इत्यादिश्रुतिभिः । 'नच मत्स्थानि भूतानि' इत्यादिस्मृतिभिः । प्रपञ्चोमिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्च शुक्तिरूप्यवदित्यादि शुक्तिरूपानुमानैश्च शतशब्दोऽनन्तपरः निषिद्धे मिथ्यात्वेन बाधितेऽत्र प्रपञ्चे जडवर्गे दृश्ये चिदाभासविषयताविशिष्टे स्वात्ममतिं मुख्यात्मबुद्धिं स्वशब्दस्यात्मीयार्थकतयाऽऽत्मीयेत्यर्थोवा करोति।सनिषिद्धकर्ता" न कलंजं भक्षयेत्" इति निषिद्धकलञ्जस्य भक्षणकर्तेव नेति

नेति इत्यादिभिर्निषिद्धदृश्यस्य द्रष्टा यथा मलिम्लुचः पाटच्चरः । दुःखोपरि दुःखजातं दुःखमेकमनुभूयान्यदप्यनुभवति ततोपि दुःखान्तरमेवं दुःखपरम्परामेवावाप्नोति नतु सुखलेशमपि लभते इत्यर्थः ॥

श्रुतिस्मृतिन्यायशतैः । निषिद्धे । दृश्ये । अत्र । यः । स्वात्ममतिम् । करोति ॥ उपैति । दुःखोपरि । दुःखजातम् । निषिद्धकर्ता । सः । मलिम्लुचः । यथा ॥ ३३१ ॥

द्वैतदृष्टिको भयहेतुता दिखाई है, अब दुःखपरंपराकी कारणताको कहे हैं । श्रुतिस्मृति इति । जो पुरुष श्रुति स्मृति अनुमानादि अनेक प्रमाणोंसे मिथ्यारूपकरके बोधन किये दृश्य जडप्रपंचमें इसमें मैं आतमा हूं ऐसे आत्मबुद्धि करता है सो पुरुष वेदसे निषिद्ध किये मांसभक्षणादि कर्मकर्तावत् नेति नेति वचनोंसे वेदकरके निषिद्ध जगत्का द्रष्टा चौरवत् एक दुःखके भोग पीछे दूसरे दुःखके भोगको प्राप्त होवै है सुखके लेश को भी नहीं प्राप्त होवै है ॥ ३३१ ॥

सत्याभिसन्धानरतोविमुक्तो-
महत्त्वमात्मीयमुपैति नित्यम् ॥
मिथ्याभिसन्धानरतस्तु नश्येद्,
दृष्टं तदेतद्यद्चौरचौरयोः ॥ ३३२॥

मलिम्लुचदृष्टान्तं स्पष्टयितुं श्रौतीं कथां श्रावयति । सत्याभिसन्धानरतइत्यादिना ।

सत्ये सर्वबाधाधिष्ठाने निर्द्वैते ब्रह्मणि अभिसन्धानरतोऽध्यात्मयोगनिष्ठोब्रह्मनिष्ठोविमुक्त आरोपितबन्धभ्रान्तेर्वियुक्तः नित्यं विद्यमानमेवारोपतिरोहितं महत्त्वं निःसंकल्पस्थितिमात्मीयमात्मसम्बन्धि ब्रह्मनिष्ठत्वमिति यावत् । उपैति प्राप्नोति । यस्तु मूढोमिथ्याभिसन्धान-

१ चौरः ।

रतोमिथ्याभूतेसङ्घातेऽभिसन्धानेनात्मग्रहेण रतस्तत्परः सतु नश्ये-त्पुरुषार्थाद्भ्रश्येदनर्थं चच्छेत् उभयत्र दृष्टान्तद्वयमुपादत्ते दृष्टमिति। यथैतदभिहितं पदार्थजातं तदचौरचौरयोर्दृष्टमतोनाहि दृष्टेऽनुपपन्न-मिति न्यायेन विश्वसनीयमित्यर्थः। यथाऽऽरोपितचौरत्वोऽचौरोरा-ज्ञा परीक्षितोमहत्त्वमेव स्वकीयमाप्नोति न तिरस्कारं बन्धनदुःखं वा तथा सत्यात्मनिष्ठोऽपि जीवन्मुक्तिमहत्त्वमालम्बते। यथा च चौरोऽचौरवादी राज्ञा परीक्षितोऽनर्थपरम्परामाप्नोति कारागारे बन्ध-नमनुभूय नश्यति तथा मिथ्यादेहादावमिथ्यात्ममतिरिति भावः "पुरुषꣳ सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत् स्तेयमकार्षीत् पर-शुमस्मै तपतेति सयदि तस्य कर्ता भवति ततएव अनृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति सदह्यते अथ हन्यतेऽथ यदि तस्याकर्ता भवति ततएव सत्यमात्मानं कुरुते ससत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति सन दह्यतेऽथ मुच्यते" इति श्रुतिसंवादोऽत्र प्रदर्शितइति बोध्यम् ३३२॥

सत्याभिसन्धानरतः। विमुक्तः । महत्त्वम् । आत्मीयम् । उपैति । नित्यम्॥ मिथ्याभिसन्धानरतः। तु। नश्येत्। दृष्टम्। तत। एतत्। यद्। अचौरचौरयोः ॥ ३३२ ॥

चोरदृष्टान्तको स्पष्ट करनेके लिये श्रुतिके कथनको सुनाते हैं। सत्याभिसन्धानरतः इति। सर्वजगत्के बाधके अधिष्ठान अद्वैत ब्रह्ममें निष्ठा करनेवाला आरोपित बन्धभ्रमसे रहित होता है, आरोपसे तिरोभूत अपनेमें ब्रह्मनिष्ठत्वरूप महत्त्वको प्राप्त होवे है और जो मूर्ख मिथ्यारूप देहादि संघात में आत्मज्ञान करनेमें प्रीति करे है सो तौ पुरुषार्थ मोक्षसे पतित होवे है और दुःखको प्राप्त होवे है दोनोंमें दृष्टान्त दो हैं यह दोनों चोर अचोरमें देखा है, लोकोंने जिसमें मिथ्या चोरी लगाई होती है सो राजाकी परीक्षासे सच्चा होकर अपने महत्त्वको प्राप्त होवे है, बन्धदुःखसे छूटजाता है तैसेही सत्या-

त्मद्रष्टा ब्रह्मनिष्ठभी जीवन्मुक्तिके महत्त्वको प्राप्त होता है और जैसेही जो चोर है और अपनेको अचोर कहता है सो राजा करके परीक्षित हुवा दुःखको बन्धको और तिरस्कारको प्राप्त होवै है तैसेही देहात्मवादी दुःखजन्मादि बन्धको प्राप्त होता है॥

यतिरसदनुसान्धिं बन्धहेतुं विहाय,
स्वयमयमहमस्मीत्यात्मदृष्ट्यैव तिष्ठेत्॥
सुखयति ननु निष्ठा ब्रह्मणि स्वानुभूत्या,
हरति परमविद्याकार्यदुःखं प्रतीतम्॥ ३३३॥

दृष्टान्तसिद्धमर्थं ग्राहयति। यतिरिति।

यतिश्चेतोयमनशीलः संन्यासिजनोऽसदनुसन्धिमसति देहादौ मिथ्याभूतेऽनुसन्धिमनुसन्धानमात्मीयतयापि स्मरणं बन्धहेतुं जन्मादिबन्धकरं विहाय स्वयमात्मनाऽयमविनाशी प्रत्यगात्माहमस्मीति रूपयाऽऽत्मदृष्ट्यैव न क्षणमप्यनात्ममत्येति भावः। तिष्ठेत्स्वरूपप्रतिष्ठां लभेत किं ततः सिद्ध्येदिति चेत्तत्राह सुखयतीति। ब्रह्मणि परमात्मनि स्वानुभूत्या स्वाभेदबुद्ध्योत्पादिता निष्ठा ब्रह्मनिष्ठा स्वात्मनि सदा तत्परतया स्थितिः सुखयति ननु सुखयत्येव परं निःशेषं प्रतीतं प्रतिकूलमत्या गोचरीकृतमविद्याकार्यदुःखमविद्यासहितं तत्कार्यभूतं त्रिविधं दुःखं च हरति समूलमुन्मूलयतीत्यर्थः॥ ३३३॥

यतिः। असदनुसन्धिम्। बन्धहेतुम्। विहाय। स्वयम्। अयम्। अहम्। अस्मि। इति। आत्मदृष्ट्या। एव। तिष्ठेत्॥ सुखयति। ननु। निष्ठा। ब्रह्मणि। स्वानुभूत्या। हरति। परम्। अविद्याकार्यदुःखम्। प्रतीतम्॥ ३३३॥

दृष्टान्तसिद्ध अर्थको ग्रहण करावै हैं। यतिःइति। चित्तके यमन करने वाला संन्यासी पुरुष असत् देहादि मिथ्याभूत पदार्थोंमें यह मेरे हैं ऐसे ज्ञानको कि जो बन्धका हेतु है,

त्याग कर अविनाशी साक्षी आत्मा "मैं हूं इस आत्मदृष्टिकरके ही स्थित होवै, क्षणमात्र भी अनात्मबुद्धि न करे क्योंकि परमात्मामें आत्माके अभेदबुद्धिसे उत्पन्न हुई जो ब्रह्मनिष्ठा है, जो आत्मामें सर्वकाल तत्पर होकर स्थित होना रूप है सो केवल सुख ही देती है और सर्व जो प्रतिकूल बुद्धिका विषय अविद्याकार्यसहित तीन प्रकारके प्रतीत हुवे दुःख तिनको नाश करती है ॥ ३३३ ॥

बाह्यानुसन्धिः परिवर्द्धयेत् फलं,
दुर्वासनामेव ततस्ततोऽधिकाम् ॥
ज्ञात्वा विवेकैः परिहृत्य बाह्यं,
स्वात्मानुसन्धिं विदधीत नित्यम् ॥ ३३४ ॥

ननु ब्रह्मनिष्ठयाऽऽन्तरं बाह्यानुसन्धानेन च जागतं सुखमनुभवतो-जीवन्मुक्तिः समीची सिद्ध्यतीति मे भातीति चेन्नेत्याह । बाह्यानुसन्धिरिति ।

बाह्यानुसन्धिर्बाह्यत्वेन कल्पितानां विषयाणामनुसन्धिः संकल्पो-बाह्यविषयांततस्ततोधिकां संकल्पाधिक्यादाधिक्यशालिनीं दुर्वासनामेव दुःखफलामेव वासनां परिवर्द्धयेत्ततश्च दुःखाधिक्यमेवोपलभ्येताथच विवेकैरात्मानात्मादिविवेकदर्शनैः पुनरावृत्तिभेदेन विवेकदर्शनभेदाद्बहुवचनं साधुज्ञात्वात्मानं सन्तमसन्तमनात्मानं च ज्ञात्वेत्यर्थः । बाह्यं विषयानुसन्धानं परिहृत्य स्वात्मानुसन्धिं नित्यं विदधीत कुर्यादित्यर्थः ॥ ३३४ ॥

बाह्यानुसन्धिः । परिवर्द्धयेत् । फलम् । दुर्वासनाम् । एव । ततः । ततः । अधिकाम् ॥ ज्ञात्वा । विवेकैः । परिहृत्य । बाह्यम् । स्वात्मानुसन्धिम् । विदधीत । नित्यम् ॥ ३३४ ॥

१ असकृदावृत्ति ।

ब्रह्मनिष्ठासे आन्तरसुख और बाह्यदृष्टिसे जगत्का सुख प्राप्त होनेसे जीवन्मुक्ति समीचीन सिद्ध होवै है इस प्रश्नका उत्तर कहे हैं । बाह्यानुसन्धिः इति । बाह्यविषयोंका संकल्प बाह्यविषयोंकी उससे अधिक अधिक दुर्वासना दुःखदात्री को वृद्ध करेगा उससे दुःख अधिकाधिक प्राप्त होवेंगे इस कारण विवेक ज्ञानकरके आत्माको सत् और अनात्माको असत् जानकरके बाह्यविषयोंके संकल्पको त्यागकर आत्मा के चिन्तनरूप संकल्पको नित्य करो ॥ ३३४ ॥

बाह्ये निरुद्धे मनसः प्रसन्नता,
मनःप्रसादे परमात्मदर्शनम् ॥
तस्मिन्सुदृष्टे भवबन्धनाशो-
वहिर्निरोधः पदवी विमुक्तेः ॥ ३३५ ॥

बाह्यनिरोधस्य मुक्तिनिदानत्वमाह । बाह्ये निरुद्धइति ।

विषयेण विषयिमनोलक्ष्यते तथाच बाह्यविषयगोचरे मनसि निरुद्धइत्यर्थः । यद्वा बाह्ये विषये निरुद्धे मनसाऽसंकल्पिते सति मनसः प्रसन्नता विक्षेपनिवृत्त्या स्वस्थता भवति । मनःप्रसादे च सति परमात्मदर्शनं ब्रह्मात्मैक्यसाक्षात्कारः । तस्मिन्परमात्मनि । उपसर्जनस्यापि तदा परामर्शो "दर्शिते राजमातङ्गास्तस्यैवामी तुरङ्गमाः" । इत्यादिवत्सु दृष्टेऽभेदेन निर्गुणत्वेन च साक्षात्कृते भवबन्धनाशोमुक्तिर्भवति तदेवमुक्तप्रकारेण विमुक्तेर्मोक्षस्य पदवीमार्ग-उपायइति यावत् । वहिर्निरोधोवाह्यसंकल्पत्यागएवेत्यर्थः ॥ ३३५ ॥

बाह्ये । निरुद्धे । मनसः । प्रसन्नता । मनःप्रसादे । परमात्मदर्शनम् ॥ तस्मिन् । सुदृष्टे । भवबन्धनाशः । वहिर्निरोधः । पदवी । विमुक्तेः ॥ ३३५ ॥

बाह्यनिरोधको मुक्तिका साधन कहे हैं । बाह्ये इति । बाह्य

वस्तुगोचर मनके संकल्पके निरोध होनेसे मनको विक्षेप निवृत्ति होनेसे स्वस्थता होवै है, मनकी स्वस्थता होनेसे ब्रह्मात्माकी एकताका साक्षात्कार होवै है तिस परमात्माके अभेद निर्गुणरूपसे साक्षात्कार होने पर मुक्ति प्राप्त होवै है इस प्रकार मोक्षका उपाय बाह्यसंकल्पका निरोध ही है॥ ३३५॥

कः पण्डितः सन्सदसद्विवेकी,
श्रुतिप्रमाणः परमार्थदर्शी ॥
जानन्हि कुर्यादसतोऽवलम्बं,
स्वपातहेतोः शिशुवन्मुमुक्षुः॥ ३३६ ॥

ननु पण्डितजनोऽपि बाह्ये शब्दादौ विषये रममाणोदृश्यते तेन न बाह्यनिरोधः साधीयान् "महाजनोयेन गतःसपन्था" इति न्यायादिति चेन्न, तादृशः परमार्थपण्डितः किन्तु लौकिकपण्डितः सशिशुवदेव परोक्षात्मवित् परमार्थपण्डितस्तु नैवमाचरतीत्याह।कः पण्डितइति। सदसद्विवेकी तथ्यमिथ्याविवेचननिपुणः श्रुतिप्रमाणोऽधीतवेदान्तस्ततश्च परमार्थदर्शी ब्रह्मवित्पण्डितोऽतिसूक्ष्मार्थनिरीक्षणक्षमधीकः । मुमुक्षुर्बन्धमोक्षणाकाङ्क्षी शिशुवदविवेकीवेत्यर्थः । स्वपातहेतोरात्माधोगतिनिदानस्यासतोबाह्यविषयजातस्यावलम्बं जानन् बाह्यजगतोऽनर्थकरत्वं विद्वान् कः कुर्यान्न कोपीत्यर्थः ॥ ३३६ ॥

कः । पण्डितः । सन् । सदसद्विवेकी । श्रुतिप्रमाणः । परमार्थदर्शी ॥ जानन् । हि । कुर्यात् । असतः । अवलम्बम् । स्वपातहेतोः । शिशुवत् । मुमुक्षुः ॥ ३३६ ॥

पण्डितोंकी बाह्यप्रवृत्ति देखनेसे श्रेष्ठाचार होनेपर हमको भी बाह्यप्रवृत्तिमें कुछ दोष नहीं इस शङ्काका उत्तर कहे हैं। कः इति । सत्य असत्यके विवेकमें निपुण वेदान्तका ज्ञाता, ब्रह्मनिष्ठ, अतिसूक्ष्मार्थके निरूपणमें कुशल, बन्धनिवृत्तिकी इच्छा

वाला, अपनी अधोगतिका कारण, मिथ्याविषयोंको अनर्थहेतुत्व जानता हुवा कौन विद्वान् जानकर अविवेकी पुरुषोंवत् बाह्यप्रवृत्ति करता है किन्तु कोई नहीं करता और जो तुमने बाह्यप्रवृत्ति करते देखे हैं सो लौकिक पण्डित परोक्षज्ञानी हैं सो परमार्थी पाण्डित नहीं हैं ॥ ३३६ ॥

देहादिसंसक्तिमतो न मुक्ति-
र्मुक्तस्य देहाद्यभिमत्यभावः ॥
सुप्तस्य नो जागरणं न जाग्रतः,
स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ॥ ३३७ ॥

प्रकृतार्थसिद्धये बाह्यासक्तिविमुक्त्योर्विरुद्धत्वमावेदयन्नासक्तिमुक्त्योर्विरोधं प्रदर्शयति । देहादीति ।

देहादिसंसक्तिमतः संघातासक्तचेतसो न मुक्तिर्मुक्तस्य च देहाभिमत्यभावो देहाभिमाननिवृत्तिस्तया चासक्तिमुक्ती परस्परविरुद्धे आसक्तेर्द्वैतगोचरत्वान्मुक्तेश्चाद्वैतात्मकत्वादितिभावः । तत्र दृष्टान्तः सुप्तस्येत्यादिः । सुप्तस्य निद्रितस्य जागरणं प्रबोधो नो जाग्रतश्च स्वप्नो न कुतस्तयोः स्वप्नजागरयोर्भिन्नगुणाश्रयत्वात् परस्परविरुद्धधर्मवत्त्वादित्यर्थः ॥ ३३७ ॥

देहादिसंसक्तिमतः । न । मुक्तिः । मुक्तस्य । देहाद्यभिमत्यभावः ॥ सुप्तस्य । नो । जागरणम् । न । जाग्रतः । स्वप्नः । तयोः । भिन्नगुणाश्रयत्वात् ॥ ३३७ ॥

बाह्यासक्ति और मुक्तिका विरोध दिखाते हैं। देहादि इति । देहादि संघातमें जिसको आसक्ति (अभिमान) है उसकी मुक्ति नहीं होती और मुक्त पुरुषको देहाभिमान नहीं होता है जैसे निद्राप्राप्तको जाग्रत् नहीं और जाग्रत्प्राप्तको निद्रा

नहीं तिनको परस्पर विरुद्ध धर्मवाला होनेसे तैसे मुक्तिको अद्वैतगोचर होनेसे और आसक्तिको द्वैतगोचर होनेसे परस्पर विरोध स्पष्ट है ॥ ३३७ ॥

अन्तर्बहिः स्वं स्थिरजङ्गमेषु,
ज्ञात्वात्मनाधारतया विलोक्य ॥
त्यक्ताखिलोपाधिरखण्डरूपः,
पूर्णात्मना यः स्थितएषमुक्तः ॥ ३३८ ॥

कस्तर्हि मुक्तइत्याकाङ्क्षायामाह । अन्तर्बहिरिति ।

यः स्थिरजङ्गमेषु स्थावरेषु वृक्षादिषु जङ्गमेषु जनेषु चान्तर्बहिराधारतया तदाश्रयतया विद्यमानं स्वमात्मानमात्मना स्वेनैव मनसा वा ज्ञात्वा सामान्यतोविलोक्य विशेषतः " तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः " इति श्रुतेः । त्यक्ताखिलोपाधिस्त्यक्तानिरस्ताविवेकदृष्टयोपाधयोयेन सतथा विनष्टबाह्यदृष्टिरित्यर्थः । किंचाखण्डरूपोऽविनाशिरूपः पूर्णात्मनाऽपरिच्छिन्नाचिदात्मना स्थितोनिश्चलचित्तएषमुक्तोजीवन्मुक्तइत्यर्थः ॥ ३३८ ॥

अन्तर्बहिः । स्वम् । स्थिरजङ्गमेषु । ज्ञात्वा । आत्मना । आधारतया । विलोक्य ॥ त्यक्ताखिलोपाधिः । अखण्डरूपः । पूर्णात्मना । यः । स्थितः । एषः । मुक्तः ॥ ३३८ ॥

तब मुक्त कौन हुवा इस शङ्काका समाधान करे हैं। जो पुरुष स्थावर जंगममें बाह्य अन्तरका आश्रयरूप आत्माको अपने शुद्ध मनसे देखकर और विवेकदृष्टिकरके सर्व उपाधियोंका जिसने त्याग करादिया है अर्थात् बाह्यदृष्टिको विनष्ट करके बैठा है और विनाशरहित स्वरूप है, अपरिच्छिन्न चेतनरूपकरके स्थित है, गंभीर चित्त है सोही जीवन्मुक्त है ३३८

सर्वात्मता बन्धविमुक्तिहेतुः,
सर्वात्मभावान्न परोऽस्ति कश्चित् ॥
दृश्याग्रहे सत्युपपद्यतेऽसौ,
सर्वात्मभावोऽस्य सदात्मनिष्ठया ॥ ३३९ ॥

परिच्छेददृष्ट्या हि संकल्पाउद्भवन्ति तद्धानौ च संकल्पहानिरित्याशयेन परिच्छेदबुद्धिं हापयितुं सर्वात्मतामाह। सर्वात्मतेति ।
सर्वात्मता परिच्छिन्नदृष्टिविनष्टिः बन्धविमुक्तिहेतुर्मोक्षहेतुः सर्वात्मभावात्सर्वस्यात्मनि भावादन्तर्भावादात्ममात्रत्वनिश्चयान्न परोऽस्ति कश्चिदुपायोमोक्षस्यासौ सर्वात्मभावोऽस्य मुमुक्षोः सदात्मनिष्ठया सदात्मनि ब्रह्मणि निष्ठया निश्चलास्थित्या दृश्याग्रहे बाह्यसंकल्पानुदये सति उपपद्यते युज्यते नान्यथेति भावः ॥ ३३९ ॥

सर्वात्मता । बन्धविमुक्तिहेतुः । सर्वात्मभावात् । न । परः । अस्ति । कश्चित् ॥ दृश्याग्रहे । सति । उपपद्यते । असौ । सर्वात्मभावः । अस्य । सदा । आत्मनिष्ठया ॥ ३३९ ॥

परिच्छेद मतिसे संकल्प उदय होते हैं और सर्वात्मबुद्धिसे संकल्प उदय ही नहीं होते ऐसा कहे हैं। सर्वात्मता इति। सर्वको अपना आत्मारूप निश्चय करना ही मोक्षका कारण है, सर्व को आत्मरूप जानना इससे अन्य कोई उपाय मोक्षका नहीं है, इस मुमुक्षुको सर्वात्मताका निश्चय तौ ब्रह्मात्माकी निष्ठाकरके बाह्यसंकल्पके न उदय होने पर बनसके हैं, अन्य प्रकारसे नहीं ॥ ३३९ ॥

दृश्यस्याग्रहणं कथं नु घटते देहात्मना तिष्ठतो-
बाह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियाः कुर्वतः ॥
संन्यस्ताखिलधर्मकर्मविषयैर्नित्यात्मनिष्ठापरैः,
तत्त्वज्ञैः करणीयमात्मनि सदानन्देच्छुभिर्यत्नतः ३४०

दृश्याग्रहणसिद्ध्यर्थं सर्वकर्मसंन्यासं ग्राहयति। दृश्यस्येति ।

देहात्मना अध्यस्तस्वतादात्म्येन देहेन तिष्ठतोवर्तमानस्य बाह्यार्थानुभवप्रसक्तमनसोबाह्यार्थानां वनिताविनोदादीनां योऽनुभवोरसास्वादस्तत्र प्रसक्तमनसोलम्पटचित्तस्य तत्तात्क्रियाः बाह्यार्थानां सम्पादनार्थं व्यापारान् कायिकवाचिकमानसान् कुर्वतोगृहस्थादेर्विक्षिप्तचित्तस्य दृश्यस्याग्रहणं कथं नु घटते न कथमपि संभवतीत्यर्थः। अथच संन्यस्ताखिलधर्मकर्मविषयैः संन्यस्तादूरतोव्युदस्ता अखिलाः समस्ताधर्माब्राह्मणत्वादयोऽभिमानमात्रजीवनाः कर्माणि विहितनिषिद्धादीनि विषयाः शब्दादयःस्रक्चन्दनवनितादयश्च यैस्ते तथा तैर्नित्यात्मनिष्ठापरैर्नित्योयआत्मा तन्निष्ठापरैस्तत्त्वज्ञैः सदसद्विवेचकैः सदानन्देच्छुभिर्नित्यानन्दमभीप्सुभिरात्मनि स्वस्मिन्मनसि वा दृश्यस्याग्रहणमसंकल्पनं करणीयं सम्पादनीयमित्यर्थः । तथाच दृश्यस्याग्रहणार्थं सर्वकर्मसंन्यासोऽवश्यमपेक्षणीयइति भावः॥ ३४०॥

दृश्यस्य। अग्रहणम् । कथं । नु । घटते । देहात्मना । तिष्ठतः। बाह्यार्थानुभवप्रसक्तमनसः। तत्तत्क्रियाः। कुर्वतः॥संन्यस्ताखिलधर्मकर्मविषयैः। नित्यात्मनिष्ठापरैः। तत्त्वज्ञैः। करणीयम् । आत्मनि । सदानन्देच्छुभिः । यत्नतः ॥ ३४० ॥

देहाध्यासकरके स्थित हुवेको बाह्य पदार्थ वनिताविनोदादिके रसस्वादमें जिसका मन लंपट है, बाह्यार्थोंके संपादनार्थ अनेक उद्यम करता है तिस विक्षिप्तचित्त पुरुषको दृश्य का अग्रहण कैसे बनसके कभी नहीं और जिन्होंने ब्राह्मणत्वादि धर्मविहित निषिद्ध कर्म शब्दादि विषयोंका त्याग कर दिया है और नित्य आत्माकी निष्ठाके तत्पर तत्त्वज्ञाता हैं, सत् असत् के विवेकमें चतुर हैं, नित्य आनन्दकी इच्छा वाले हैं उन्होंने दृश्यका अग्रहण संकल्पका त्याग, यत्नसे करना चाहिये ३४०

सर्वात्मसिद्धये भिक्षोः कृतश्रवणकर्मणः॥
समाधिं विदधात्येषा शान्तोदान्तइतिश्रुतिः ३४१

न केवलं सर्वकर्मसंन्यासादेव मुक्तिसिद्धिः किन्तु समाधेरपीति निरूपयति । सर्वात्मसिद्धयइति ।

भिक्षोस्त्यक्तसर्वकर्मणः भिक्षुणा किं समस्तानि कर्माणि संन्यस्तानि नेत्याह कृतश्रवणकर्मणः " श्रोतव्यः " इति श्रुतिविहितात्मश्रवणाख्यकर्मसम्पादकस्य ' शान्तोदान्तः ' इतिश्रुतिः 'शान्तोदान्तउपरतस्तितिक्षुः श्रद्धावित्तः समाहितोभूत्वाऽऽत्मन्येवात्मानं पश्येत् ' इति श्रुतिः । एकदेशेनोपलक्षणात् समाधिं समाहितोभूत्वेति पदेन विदधाति विचारासमर्थमतिदुर्दममानसं प्रतिकर्त्तव्यत्वेनोपदिशतीत्यर्थः । तथाच सर्वकर्मसंन्यासवद्बाह्यार्थपरित्यागाय समाधिरप्यवश्यमनुष्ठेयइति भावः ॥ ३४१ ॥

सर्वात्मसिद्धये । भिक्षोः । कृतश्रवणकर्मणः ॥ समाधिम् । विदधाति । एषा । शान्तः । दान्तः । इति । श्रुतिः ॥ ३४१ ॥

केवल सर्व कर्मके त्यागमात्रसे मुक्ति नहीं मिलती किन्तु समाधिकी भी अपेक्षा है ऐसा निरूपण करे हैं । सर्वात्मसिद्धये इति । सर्वकर्मका जिसने त्याग करदिया है और वेदान्तश्रवणादिको करता है तिस भिक्षुको शमकरके दम करे ऐसें वेदकी वाणी और समाहित होकर आत्माको देखता है ऐसे वाक्यसे विचारमें असमर्थ दुष्टचित्त वालेको सर्वात्मताकी सिद्धिवास्ते समाधिकर्तव्य कहे हैं ॥ ३४१ ॥

आरूढशक्तेरहमोविनाशः,
कर्तुन्न शक्यः सहसापि पण्डितैः ॥
ये निर्विकल्पाख्यसमाधिनिश्चला-
स्तानन्तराऽनन्तभवाहि वासनाः ॥ ३४२ ॥

नन्वसमाहिताअपि पण्डितामहात्मानोलोके लौकिकैः प्रथ्यन्ते तत्राह । आरूढशक्तेरिति ।

पण्डितैर्लोकरञ्जननिपुणैरात्मदर्शिभिरपि आरूढशक्तेर्दृढमूलस्य बलिष्ठस्य लब्धपदस्येति यावत् । अहमोऽहंकारस्य विनाशः कर्तुं न

शक्यते । लौकिकी प्रथा तु वृथैवेति भावः । परन्तु येनिर्विकल्प समाधिनिश्चलानिर्विकल्पसमाधिना विध्वस्तसर्वसंकल्पास्तानन्तरा तान् विहायेत्यर्थः । समाधिनिष्ठास्त्वहमोविनाशने समर्थाअसमर्थाश्च समाधिबहिर्मुखाः हि यतोवासनाः अनन्तभवाअनेकजन्मपरम्परासम्पादितास्ताभिर्दृढमूलस्याहंकारस्य विना समाधिकुठारेणोच्छेदोदुर्घटइति भावः ॥ ३४२ ॥

आरूढशक्तेः । अहमः । विनाशः । कर्तुम् । न । शक्यः । सहसा । अपि । पण्डितैः ॥ ये । निर्विकल्पाख्यसमाधिनिश्चलाः । तान् । अन्तरा । अनन्तभवाः । हि । वासनाः ॥ ३४२ ॥

जो समाधि नहीं करते उनको भी तो महात्मा कहते हैं। इस प्रश्नका उत्तर कहे हैं । आरूढशक्तेः इति । लोकोंको दृष्टान्त तथा प्रमाण सुनाकर प्रसन्न करनेवाले आप विक्षिप्तचित्त लौकिक पण्डितोंने दृढमूल महाबली अहंकारका विनाश नहीं कर सकीता है, लोकोंका उनको महात्मा कहना व्यर्थ है परन्तु जो सन्त निर्विकल्प समाधिनिष्ठ होकर मनकी चंचलताका जिन्होंने विनाश करदिया है उनसे विनो अर्थात् सो पुरुष अहंकारका नाश करसकते हैं जिसै कारण अनेक जन्मोंके विषयाभ्याससे उत्पन्न हुई वासना दृढ होरही है इस कारण इनका विनाश समाधिसे ही होसकता है ॥ ३४२ ॥

अहंबुद्ध्यैव मोहिन्यायोजयित्वाऽऽवृतेर्बलात् ॥
विक्षेपशक्तिः पुरुषं विक्षेपयति तद्गुणैः ॥३४३॥

ननु माभूदहमोविनाशस्तत्राह । अहंबुद्ध्यैवेति । विक्षेपशक्तिर्निरुक्तलक्षणा राजसीशक्तिरावृतेर्बलादावरणशक्तिप्राबल्यात् पुरुषमसमाहितमहंबुद्ध्यानात्माभिमानलक्षणया योजयित्वैव संसृज्यैव तद्गुणैर्बुद्धिगुणैः कर्तृत्वाभिमानादिभिरात्मनि

समारोपितैर्विक्षेपयति कदाप्येकाग्रतां सम्पादयितुं नावकाशयति व्यग्रचेतस्तासम्पादनेन क्लेशसन्ततिमेव तनोतीत्यर्थः ॥ ३४३ ॥

अहंबुद्ध्या। एव। मोहिन्या । योजयित्वा । आवृतेः। बलात् ॥ विक्षेपशक्तिः। पुरुषम्। विक्षेपयति। तद्गुणैः॥ ३४३॥

अब अहंकारके अनाशमें दोषनिरूपण करे हैं। अहंबुद्ध्या इति। विक्षेपशक्तिः (पूर्वोक्त राजसशक्ति) आवरणशक्तिकी प्रबलतासे असमाहित पुरुषको अनात्माभिमानरूप अहंबुद्धि के संग सँबन्धकरके बुद्धिके कर्तृत्वादि धर्म आत्मामें आरोपित करके कदापि एकाग्रताका अवकाश नहीं देती, चित्तकी व्यग्रता को सम्पादनकरके क्लेशसमूहको ही विस्तारे है ॥ ३४३॥

विक्षेपशक्तिविजयोविषमोविधातुं,
निःशेषमावरणशक्तिनिवृत्त्यभावे ॥
दृग्दृश्ययोः स्फुटपयोजलवद्विभागे,
नश्येत्तदावरणमात्मनि च स्वभावात् ॥
निःसंशयेन भवति प्रतिबन्धशून्यो-
विक्षेपणं नहि तदा यदिचेन्मृषार्थे ॥ ३४४ ॥

आवृत्तेर्बलादित्युक्तमावरणशक्तेः प्राबल्यं प्रकाशयितुमाह। विक्षेपशक्तिविजयइति।

निःशेषं समूलमावरणशक्तिनिवृत्त्यभावे विक्षेपशक्तिविध्वंसोविधातुं कर्तुं विषमोदुर्लभइत्यर्थः। अवगतोविक्षेपशक्तिविनाशे हेतुरावरणशक्तिविनाशइति तथापि तस्याविनाशः कथमतआह दृग्दृश्ययोरिति। दृग्दृश्ययोरात्मानात्मनोः स्फुटपयोजलवद्विभागे हंसश्चञ्चुपुरोभागेन क्षीरनीरयोरिव विवेकतीक्ष्णकुशाग्रबुद्ध्या स्फुटं विवेके सति तदावरणमात्मनि विद्यमानं स्वभावाद्विवेकसामर्थ्यादात्मनः स्वभावाद्विवित्तभानलक्षणस्वप्रकाशस्वभावादेव वा नश्येत्

तथाचावरणविनाशने विवेकसामर्थ्यमिति भावः । विक्षेपशक्तिविजयः कथं ज्ञेयस्तत्राह निःसंशयेनेति । यदि यदा यस्मिन्समये चेद्यदि मृषार्थे मिथ्यापदार्थनिमित्तं विक्षेपणं नाहि पुत्रवित्तादिहानिलाभयोश्चित्तस्य हर्षविक्षेपाद्यभावस्तदा निःसंशयेन निःसन्देहं प्रकृत्यादित्वात्तृतीया संशयाभावेन वा पदार्थाभावेऽव्ययीभाव 'स्तृतीयासप्तम्योर्बहुल' मित्यम्भावविकल्पः प्रतिबन्धशून्योनिर्विक्षेपः समाध्युन्मुखोभवतीत्यर्थः । तथाच विक्षेपाभावेन विक्षेपशक्तिविनाशोज्ञेयोज्ञेयश्च निष्प्रत्यूहं समाध्यधिकारीति भावः ॥ ३४४ ॥

विक्षेपशक्तिविजयः । विषमः । विधातुम् । निःशेषम् । आवरणशक्तिनिवृत्त्यभावे ॥ दृग्दृश्ययोः । स्फुटपयोजलवत् । विभागे । नश्येत् । तदा । आवरणम् । आत्मनि । च । स्वभावात् ॥ निःसंशयेन । भवति । प्रतिबन्धशून्यः । विक्षेपणम् । नहि । तदा । यदि । चेत् । मृषार्थे ॥ ३४४ ॥

आवरणशक्तिकी प्रबलताको प्रकाश करे हैं । विक्षेपशक्तिः इति । मूलसहित आवरणशक्तिकी निवृत्ति न होवै तौ विक्षेपशक्ति का नाश करना दुर्लभ है इस कारण आत्मानात्माका स्पष्ट दुग्ध जलवत् हंसकेवत् विभाग करनेसे सो आवरण विवेकके बलसे आत्माका पृथक् स्वप्रकाशमान् स्वभावसे नष्ट होवै है अर्थात् आवरणके नाशमें विवेकको सामर्थ्य है और जिसे समय जो कभी मिथ्या पदार्थ निमित्तक पुत्र धनादिकी हानि लाभ प्रयुक्त हर्ष शोकका अभाव होवै चित्तको तब विक्षेपका अभाव हुवा निश्चय करना इसमें संशयका लेशभी न करना सो जब विक्षेपाभावसे समाधिके सन्मुख होता है तब पुरुष समाधि का अधिकारी होता है ॥ ३४४ ॥

सम्यग्विवेकः स्फुटबोधजन्यो-
विभज्य दृग्दृश्यपदार्थतत्त्वम् ॥

छिनत्ति मायाकृतमोहबन्धं,
यस्माद्विमुक्तस्य पुनर्न संसृतिः॥ ३४५ ॥

स्फुटपयोजलवद्विभागइत्युक्तं विवृणोति। सम्यग्विवेकइति। दृग्दृश्यपदार्थतत्त्वमात्मानात्मस्वरूपं विभज्य परस्परतादात्म्यमपाकृत्येत्यर्थोऽन्यथा विभागस्यैव विवेकपदार्थत्वाद्विभज्य विवेकइत्यनुपपन्नं स्यादिति ध्येयम्। स्फुटबोधजन्यः स्फुटोऽसंदिग्धोयोबोधोधर्मिज्ञानं तज्जन्यःविवेकज्ञानस्य धर्मिप्रतियोगिज्ञानसापेक्षत्वादिति भावः। सम्यग्विवेकः शोधितपदार्थविवेकज्ञानं मायाकृतमोहबन्धं छिनत्ति। ननु विवेकेनाविवेकोच्छेदेऽपि कारणान्तरात्संसृतिर्दुर्निवार्या नहि भ्रमहेतवोनियम्यन्ते इति न्यायादिति चेन्नेत्याह यस्मादिति। यस्मान्मायाकृतमोहबन्धाद्विमुक्तस्य रहितस्य विवेकिनः पुनर्हेत्वन्तरात्संसृतिर्न भवति नह्यविवेकादृते संसृतिहेतुरिति भावः॥

सम्यक्। विवेकः। स्फुटबोधजन्यः। विभज्य। दृग्दृश्यपदार्थतत्त्वम्॥ छिनत्ति। मायाकृतमोहबन्धम्। यस्मात्। विमुक्तस्य। पुनः। न। संसृतिः॥ ३४५॥

विभागको ही स्पष्ट करे हैं। सम्यक्इति। आत्मा अनात्मा के स्वरूपके परस्पर तादात्म्याध्यासको त्यागकर असंदिग्ध जो धर्मिका ज्ञान उससे जन्य शोधित पदार्थोंका विवेक ज्ञान है सो मायाकरके उत्पन्न हुवे अविवेकरूप बन्धनहेतुका छेदन करे है, अविवेकनाशसे पश्चात् फिर दूसरा मुक्त पुरुषको संसारका कारण कोई नहीं रहता है॥ ३४५॥

परावरैकत्वविवेकवह्नि-
र्दहत्यविद्यागहनं ह्यशेषम्॥
किं स्यात्पुनः संसरणस्य बीज-
मद्वैतभावं समुपेयुषोऽस्य॥ ३४६॥

ननूक्तं 'नहि भ्रमहेतवोनियम्यन्ते' इति कथं हेत्वन्तरनिराकृतिरिति चेन्नेत्याह । परावरैकत्वेत्यादिना ।

परावरैकत्वविवेकवह्निः परस्य परमात्मनोऽवरस्य जीवस्य चैकत्वमभेदोभागत्यागलक्षणया लक्षितोमहावाक्येन तस्य विवेकोबोधोविवेकजन्यत्वात्तस्य कार्ये कारणत्वोपचारात्सएव वह्निर्धूमध्वजः हि यस्मादशेषमविद्यागहनमविद्यालक्षणां दुर्विदाह्यमपि वनं शुष्कतृणवत्तूलवद्वा दहति ततश्चास्य विवेकिनोऽद्वैतभावं कैवल्यं समुपेयुषः प्राप्तस्य पुनः संसरणस्य बीजं किं स्यात्किमपिन स्यादित्यर्थः । मूलाविद्यादाहान्न निमित्तान्तरसम्भावनेति भावः ॥ ३४६ ॥

परावरैकत्वविवेकवह्निः । दहति । अविद्यागहनम् । हि । अशेषम् ॥ किम् । स्यात् । पुनः । संसरणस्य । बीजम् । अद्वैतभावम् । समुपेयुषः । अस्य ॥ ३४६ ॥

परमात्मा जीवका अभेद ज्ञानरूप, विवेकजन्य बोधरूप, अग्नि जिस कारण अविद्यारूप गहनवनको भस्म करती है। तब इस विवेकिकैवल्यको प्राप्त हुवे पुरुषको संसारका बीज कौन होगा अर्थात् कुछ नहीं होगा ॥ ३४६ ॥

आवरणस्य निवृत्तिर्भवति हि सम्यक्पदार्थदर्शनतः ॥
मिथ्याज्ञानविनाशस्तद्विक्षेपजनितदुःखनिवृत्तिः ३४७

विवेकादावरणनिवृत्तिप्रकारमेव स्पष्टयति । आवरणस्येति । सम्यक्पदार्थदर्शनतः समीचीयथार्थतः पदार्थस्य दर्शनतः यथार्थज्ञानादित्यर्थः । आवरणस्य निवृत्तिर्भवति ततश्च मिथ्याज्ञानविनाशोभ्रमहेत्वज्ञानविनाशस्ततश्च तद्विक्षेपजनितदुःखनिवृत्तिस्तेन मिथ्याज्ञानेन जन्योविक्षेपस्तद्विक्षेपस्तेन जनितानां दुःखानां निवृत्तिर्विनाशोभवति भयनाशस्यापीदमुपलक्षणम् ॥ ३४७ ॥

आवरणस्य । निवृत्तिः । भवति । हि । सम्यक्पदार्थदर्शनतः ॥ मिथ्याज्ञानविनाशः । तद्विक्षेपजनितदुःखनिवृत्तिः ॥

विवेकसे आवरणकी निवृत्तिके प्रकारको दिखावे हैं। आव-

रणस्य इति। यथार्थ पदार्थके ज्ञानसे आवरणकी निवृत्ति होवै है तिससे भ्रमके हेतु अज्ञानका विनाश होवै है तिससे विक्षेपजन्य दुःखकी निवृत्ति और भय कम्पादिका भी विनाश होवै है ॥ ३४७ ॥

एतत्त्रितयं दृष्टं सम्यग्रज्जुस्वरूपविज्ञानात् ॥
तस्माद्वस्तुसतत्त्वं ज्ञातव्यं बन्धमुक्तये विदुषा ॥३४८॥

आत्मनीवानात्मन्यपीमां व्यवस्थां दर्शयति। एतत्त्रितयमिति। सम्यक्रज्जुस्वरूपविज्ञानादपि एतत् त्रितयमावरणनिवृत्तिर्मिथ्याऽज्ञाननिवृत्तिस्तद्विक्षेपजन्यदुःखभयनिवृत्तिश्चेति त्रितयमित्यर्थः। तस्मादुक्तत्रितयनिवृत्तिसाधनत्वाद्विदुषा बन्धमुक्तये वस्तु सतत्त्वं वस्तुयाथात्म्यं ज्ञातव्यं न प्रमदितव्यमित्यर्थः ॥ ३४८ ॥

एतत्। त्रितयम्। दृष्टम्। सम्यग्रज्जुस्वरूपविज्ञानात् ॥ तस्माद्। वस्तुसतत्त्वम्। ज्ञातव्यम्। बन्धमुक्तये। विदुषा ३४८

अनात्मपदार्थोंमें भी इस व्यवस्थाको दिखावै हैं। एतत् इति। रज्जुके यथार्थ स्वरूपके ज्ञानसे आवरण मिथ्या ज्ञान और उससे जन्य विक्षेप भय दुःख इन तीनोंकी निवृत्ति तीन देखनेमें आवै हैं इस कारण पूर्वोक्त तीन निवृत्तिका साधन होनेसे विद्वान्ने बन्धकी निवृत्तिके लिये वस्तुका यथार्थ स्वरूप जानना चाहिये, आलस्य न करना चाहिये ॥ ३४८॥

अयोऽग्नियोगादिव सत्समन्वया-
न्मात्रादिरूपेण विजृम्भते धीः ॥
तत्कार्यमेतद्द्वितयं यतोमृषा,
दृष्टं भ्रमस्वप्नमनोरथेषु ॥ ३४९ ॥

सम्यक्पदार्थदर्शनतइत्युक्तं तत्र कथं सम्यक्पदार्थदर्शनं भवेदित्याकाङ्क्षायामाह। अयोऽग्नियोगादिति।

धीर्बुद्धिः सत्समन्वयात्सद्रूपस्यात्मनोऽनुवृत्तेः । अग्नियोगाद्वह्निसंसर्गाद्योलोहपिण्डमिव मात्रादिरूपेण विस्फुलिङ्गरूपेण मातृमानमेयरूपेण च विजृम्भते विलसति तत्कार्यं च मातृमानादिरूपं यतो-भ्रमस्वप्नमनोरथेष्वपि दृष्टं नच तत्तत्र केनापि तथ्यमिष्यते तद्वदेवैतत् जाग्रद्भवं त्रितयं मातृमानमेयलक्षणं मृषा मिथ्यैवास्थेयं धीकार्यत्वाविशेषादिति भावः ॥ ३४९ ॥

अयः । अग्नियोगाद् । इव । सत्समन्वयात् । मात्रादिरूपेण। विजृम्भते । धीः ॥ तत्कार्य्यम् । एतद् । त्रितयम् । यतः। मृषा। दृष्टम् । भ्रमस्वप्नमनोरथेषु ॥ ३४९ ॥

यथार्थ ज्ञानका प्रकार दिखावै हैं । अयः इति । जैसें अग्निके संबन्धसे लोहेका पिण्ड चनगारेरूपकरके प्रतीत होवै है तैसे ही सत्रूप आत्माके सम्बन्धसे बुद्धि प्रमाता प्रमाण और प्रमेयरूपकरके प्रतीत होवै है और जैसें भ्रम स्वप्न मनोराज्यादिमें बुद्धिका कार्य प्रमाता प्रमाण प्रमेय मिथ्या द्वैत प्रपंच दीखै है, सत्य कोई नहीं माने है तैसेही जाग्रत्में कल्पनामात्र ही प्रमाण प्रमेयादि मिथ्यारूप द्वैत प्रपंच है, बुद्धिका कार्य होनेसे ॥ ३४९ ॥

ततोविकाराः प्रकृतेरहंमुखा-
देहावसानाविषयाश्च सर्वे ॥
क्षणेऽन्यथाभावितया ह्यमीषा-
मसत्त्वमात्मा तु कदापि नान्यथा ॥३५०॥

मिथ्यात्वमेव त्रयस्य प्रकारान्तरेण वर्णयति । ततइति । ततोबुद्धिकार्यत्वात् मिथ्यात्वादहंमुखा अहंकारादयोदेहावसाना-देहान्ताविषयाश्च शब्दादयः प्रकृतेर्विकाराः साक्षात्परम्परया वा प्रकृतिजन्यास्ते सर्वे सन्ति अमीषामसत्त्वमत्र हेतुमाह क्षणेति । क्षणेऽन्यथाभावितया क्षणपरिणामित्वात् प्रतिक्षणमन्यथास्वरूपत्वाद्रज्जुभुजङ्गादिवदिति भावः ।

नन्वेवं तर्हि प्रकृतिविकारेषु सर्वत्र सतः स्फुरणात्तस्यापि मिथ्यात्वम्प्राप्तमतआह आत्मा त्विति। आत्मा तु कदापि नान्यथा भवति अतएकरसत्वात्सत्यएव भुजङ्गमालाभूच्छिद्रादिषु व्यभिचारिषु सर्वत्रानुस्यूतरज्जुवत्सर्वविकारानुस्यूतसन्मात्रस्यैकरसस्य न मिथ्यात्वाशङ्कापीति भावः॥ ३५०॥

ततः। विकाराः। प्रकृतेः। अहंमुखाः। देहावसानाः। विषयाः। च। सर्वे॥ क्षणे। अन्यथाभावितया। हि। अमीषाम्। असत्त्वम्। आत्मा। तु। कदापि। न। अन्यथा ३५०

अब अन्यप्रकारसे द्वैतको मिथ्यात्व वर्णन करे हैं। तत इति। बुद्धिका कार्य होनेसे मिथ्यारूप अहंकारादि देहपर्यन्त जो है और शब्दादि जो विषय हैं सो साक्षात् वा परंपरासे प्रकृतिसे जन्य हैं, जो जो सो सर्व मिथ्या है, असत्त्व है क्योंकि क्षणमें परिणामी होनेसे रज्जु-सर्पवत् क्षण२ में अन्यथारूप होनेसे और आत्मा कभी भी अन्यथा नहीं होता है, एकरस होनेसे सत्य ही है कदापि मिथ्या नहीं मानसकते ३५०

नित्याद्वयाखण्डचिदेकरूपो
बुद्ध्यादिसाक्षी सदसद्विलक्षणः॥
अहंपदप्रत्ययलक्षितार्थः,
प्रत्यक्सदानन्दघनः परात्मा॥ ३५१॥

विभज्य दृग्दृश्यपदार्थतत्त्वमित्युक्तं तत्र दृश्यपदार्थोमिथ्यालक्षणः संक्षेपेण निरूपितः सम्प्रति दृक्पदार्थं निरूपयितुमुपक्रमते। नित्येत्यादिना।

नित्याद्वयाखण्डचिदेकरूपोनित्योत्पादाविध्वंसवर्जिताऽद्वया निर्गताऽखण्डा केवला चिदेवैकं रूपं यस्यासौ तथा बुद्ध्यादिसाक्षी बुद्धिप्राणमनोधियां भावाभावप्रकाशकः सदसद्विलक्षणोऽहंपदेनाहंप्रत्ययेन च लक्षितोलक्षणया बोधितोगोचरीकृतश्चासावर्थश्च सतादृश-

इत्यर्थः । प्रत्यक्सदानन्दघनः अबाधितानन्दैकरसः सः परमात्मा दृक्पदार्थः ॥ ३५१ ॥

नित्याद्वयाखण्डचिदेकरूपः । बुद्ध्यादिसाक्षी । सदसद्विलक्षणः ॥ अहंपदप्रत्ययलक्षितार्थः । प्रत्यक्सदानन्दघनः । परात्मा ॥ ३५१ ॥

दृश्यपदार्थका पूर्व निरूपण किया है अब दृक्पदार्थको निरूपण करेहैं । नित्याद्वयाखण्ड इति । उत्पत्ति नाशरहित, अद्वैत केवल चेतनरूप बुद्धि प्राण मन बुद्धिके भाव अभावका प्रकाशक स्थूल सूक्ष्मसे भिन्न, अहंशब्द प्रतीतिकरके ज्ञात परमार्थरूप सर्वके अन्तर अबाधित आनन्द एकरस परमात्मा दृक् पदार्थ है॥

इत्थं विपश्चित्सदसद्विभज्य,
निश्चित्य तत्त्वं निजबोधदृष्ट्या ॥
ज्ञात्वा स्वमात्मानमखण्डबोधं,
तेभ्योविमुक्तः स्वयमेव शाम्यति॥३५२॥

विभागस्य प्रकृतोपयोगमाह । इत्थमिति ।

इत्थमभिहितरीत्या विपश्चिन्निपुणमतिः सदसद्विभज्यात्मानात्मविवेकं संपाद्य निजबोधदृष्ट्या निजेस्वरूपे प्रतीचि बोधलक्षणे या दृष्टिरन्तर्मुखा त्वम्पदार्थविषया धीवृत्तिस्तया तत्त्वं परमार्थभूतं तत्पदार्थं ब्रह्म निश्चित्य साक्षात्कृत्य तत्त्वं पदार्थाभेदनिश्चयस्वरूपं स्पष्टयति ज्ञात्वेति । अखण्डबोधं ब्रह्म स्वमात्मानं स्वाभिन्नं ज्ञात्वा तेभ्योनिरुक्तेभ्योमातृमानमेयेभ्यआवरणमिथ्याज्ञानविक्षेपेभ्योवा विमुक्तोरहितः स्वयमेव साधनान्तरनिरपेक्षः सन् शाम्यति शान्तिसुखमनुभवतीत्यर्थः ॥ ३५२ ॥

इत्थम् । विपश्चित् । सदसद् । विभज्य । निश्चित्य । तत्त्वम् । निजबोधदृष्ट्या ॥ ज्ञात्वा । स्वम् । आत्मानम् । अखण्डबोधम् । तेभ्यः । विमुक्तः । स्वयम् । एव । शाम्यति॥

विभागका उपयोग दिखावै हैं, इत्थम् इति । पूर्वोक्त-रीतिकरके चतुर बुद्धिवाला , आत्मा अनात्माके विवेकको करके अपना स्वरूप जो ज्ञानरूप है तिसमें जो अन्तर मुख दृष्टि तिसकरके परमार्थरूप ब्रह्मका निश्चयकरके तत्त्वं पदार्थका अभेद साक्षात्काररूप जो अखण्ड ज्ञानरूप ब्रह्मको आत्माका स्वरूप है तिसको प्राप्त होकर प्रमाता प्रमाण प्रमेय और आवरण मिथ्याज्ञान विक्षेपोंसे रहित हुवा अपने आपही शान्तिसुखको अनुभव करे है ॥ ३५२ ॥

अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा ॥
समाधिनाऽविकल्पेन यदाऽद्वैतात्मदर्शनम् ॥ ३५३ ॥

प्रदर्शिततत्त्वनिश्चये ग्रन्थिभेदनमाह । अज्ञानेत्यादिना ।
यदा अविकल्पेन विकल्पः संकल्पस्तच्छून्येन निर्विकल्पाख्येन समाधिनाऽनुष्ठितेनाद्वैतात्मदर्शनमद्वयात्मसाक्षात्कारः करामलकवदुपजायते तदा अज्ञानहृदयग्रन्थेरज्ञानजनितायाहृदयग्रन्थेर्हृदयस्य चेतसआत्मनासहग्रन्थेरभेदाध्यासस्य चिज्जडग्रन्थेरित्यर्थः । निःशेषविलयः समूलोन्मूलनं भवति " भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः " इत्यादिश्रुतिप्रदर्शितमेवेदं बोधफलं प्रदर्शितमिति बोध्यम् ॥ ३५३ ॥

अज्ञानहृदयग्रन्थेः । निःशेषविलयः । तदा ॥ समाधिना । अविकल्पेन । यदा । अद्वैतात्मदर्शनम् ॥ ३५३ ॥

जब निर्विकल्प समाधिके करनेसे अद्वैत आत्माका साक्षात्कार कर स्थित आमलकवत् उदय होवै है तब अज्ञान-जन्य चित्त चेतनके अभेदाध्यासरूप ग्रन्थिका मूलसहित विनाश होता है ॥ ३५३ ॥

त्वमहमिदमितीयं कल्पना बुद्धिदोषा-
त्प्रभवति परमात्मन्यद्वये निर्विशेषे ॥

प्रविलसति समाधावस्य सर्वोविकल्पो-
विलयनमुपगच्छेद्वस्तुतत्त्वावधृत्या ॥ ३५४ ॥

अविकल्पेनेति समाधेर्विशेषणमभिहितं तदुपपादयति । त्वमहमिदमिति ।

त्वं सम्बोध्यचेतनोऽहं प्रत्यगात्मा इदं जडजातमित्येतदात्मिका कल्पना भ्रान्तिर्बुद्धिदोषान्मतेरविवेकविक्षेपलक्षणादुद्भवति समाधौ समाध्यवस्थायां तु निर्विशेषेऽद्वये परमात्मनि प्रविलसति स्फुरति सति वस्तुतत्त्वावधृत्या वास्तवब्रह्मस्वरूपावधारणेनास्य समाहितस्य सर्वोविकल्पस्त्वमहमादिलक्षणोविलयनं विनाशमुपगच्छेत् प्राप्नुयात्तथा निर्विकल्पस्वरूपसाक्षात्कारोदयेन त्वहमहमादिविकल्पनानुदयेनाविवेकविक्षेपाभावेन च निर्विकल्पनामासमाधिः सिध्यतीति भावः ॥ ३५४ ॥

त्वम् । अहम् । इदम् । इति । इयम् । कल्पना । बुद्धिदोषात् । प्रभवति । परमात्मनि । अद्वये । निर्विशेषे ॥ प्रविलसति । समाधौ । अस्य । सर्वः । विकल्पः । विलयनम् । उपगच्छेद् । वस्तुतत्त्वावधृत्या ॥ ३५४ ॥

समाधिके निर्विकल्प विशेषणका उपपादन करे हैं । त्वम् इति । तू जिसको मैं बोधन करता हूं "मैं जो अन्तर आत्मा हूं और यह जड़ प्रपंच यह कल्पना भ्रान्तिरूप बुद्धिके अविवेक विक्षेपसे उदय होवै है और समाधिकालमें तो निर्विशेष अद्वैत परमात्माके स्फुरण होनेपर वास्तव स्वरूप ब्रह्मके निश्चय होनेकरके समाधि करने वालेके तू" मैं आदि सर्व कल्पना विनाशको प्राप्त होवै हैं इसकारण समाधिको निर्विकल्प कहे हैं जिसमें कल्पना नहीं उदय होवै है ॥ ३५४ ॥

शान्तोदान्तः परमुपरतः क्षान्तियुक्तः समाधिं,
कुर्वन्नित्यं कलयति यतिः स्वस्य सर्वात्मभावम् ॥

तेनाविद्यातिमिरजनितान्साधु दग्ध्वा विकल्पान्,
ब्रह्माकृत्या निवसति सुखं निष्क्रियोनिर्विकल्पः ३५५

सम्प्रति प्रसंगतोनिर्विकल्पसमाधिनिष्ठस्य विकल्पकल्पनाविकलत्वं बोधयितुं शमादिसाधनविधिमाह। शान्तइति।

शान्तः शमी दान्तोदमी परमत्यन्तमुपरतोबाह्यव्यावृत्तचेताः क्षान्तियुक्तः सहिष्णुर्यतिः सन्न्यस्तसर्वकर्मा मुमुक्षुः समाधिं कुर्वन् स्वस्य सर्वात्मभावं परिच्छेदविधुरं स्वरूपं नित्यं सर्वदा निरन्तरमिति यावत्। कलयति चिन्तयति। एवं चिन्तयन्नेव समाधिं कुर्यादिति फलितम्। तेन सर्वस्य सर्वात्मताचिन्तनेनाविद्यातिमिरजनितानविद्याऽन्धकारोत्पादितान् विकल्पांस्त्वमहमादीन् साधु निरायासतोदग्ध्वा विचारेण दाहस्तु, मनसोऽतिचपलत्वाद् दुष्करइति विचारासमर्थेदुर्दमचित्तदमनायावश्यं समाधिरनुष्ठेयइति भावः। ब्रह्माकृत्या ब्रह्माकारेण निष्क्रियोनिर्विकल्पश्च सन्सुखं यथा भवति तथा निवसति निश्चलोभवति॥ ३५५॥

शान्तः। दान्तः। परम्। उपरतः। क्षान्तियुक्तः। समाधिम्। कुर्वन्। नित्यम्। कलयति। यतिः। स्वस्य। सर्वात्मभावम्॥ तेन। अविद्यातिमिरजनितान्। साधु। दग्ध्वा। विकल्पान्। ब्रह्माकृत्या। निवसति। सुखम्। निष्क्रियः। निर्विकल्पः॥ ३५५॥

अब प्रसंगप्राप्त निर्विकल्प समाधिनिष्ठको कल्पनारूप विकल्पका अभाव बोधन करनेके लिये शम दम आदि साधनों को विधान करेहैं। शान्तइति। चित्तकी एकाग्रता वाला,बाह्य इन्द्रियोंके निरोधवाला,बाह्य विषयोंसे जिसका चित्त अत्यन्त उपराम हुवा है, शीत उष्णादि द्वन्द्वोंके सहन करनेमें समर्थ, सर्व सकामकर्मोंका जिसने त्याग करदिया है ऐसा समाधि करता हुवा मुमुक्षुजन अपनेको सर्वकी आत्मताका निरन्तर चिन्तन करता है तिसे सर्वात्मताचिन्तनकरके अविद्यारूप

अन्धकारसे उत्पन्न हुवे त्वं (तू है) अहं (मैं हूं) आदि विकल्पोंको विनां यत्नसे दाहकरके ब्रह्माकार सर्वक्रियारहित सर्व कल्पनासे रहित हुवा सुखपूर्वक निश्चल होकर ब्रह्मनिष्ठाको प्राप्त होवै है॥ ३५५॥

समाहिताये प्रविलाप्य बाह्यं,
श्रोत्रादि चेतः स्वमहं चिदात्मनि॥
तएवमुक्ताभवपाशवन्धै-
र्नान्ये तु पारोक्ष्यकथाभिधायिनः॥ ३५६॥

समाधेरन्तरेण न जीवन्मुक्तिरित्याह। समाहिताइति। ये मुमुक्षवः स्वं स्वकीयं ममतास्पदमतएव बाह्यं श्रोत्रादि चेतश्चाहमहन्तास्पदं चिदात्मनि प्रविलाप्य चिदात्मनि कल्पितत्वेन निषिध्य समाहिताःसमाधिनिष्ठास्तएव भवपाशबन्धैर्जगद्विकल्पैर्मुक्ताअसंस्पृष्टाः। इतोऽन्ये विचारासमर्थाविक्षिप्तचित्तागृहपुत्रादिकार्येषु निमग्नमानसालौकिकपण्डिताः पारोक्ष्यकथाभिधायिनः शास्त्रतएव ब्रह्मपारोक्ष्यस्यास्ति ब्रह्म सर्वात्मेति प्रकारेण कथाभिधायिनः कथाकरास्तु न मुक्ताइत्यर्थः। यद्वा पारोक्ष्यपदं ज्ञानं लक्षयति तेन शास्त्रोपदेशतः परोक्षज्ञानं सम्पाद्याहंब्रह्मनिर्विकल्पोन मे गुणदोषाविस्यादिरूपेण कथाभिधायिनः कथनतत्पराइत्यर्थः॥ ३५६॥

समाहिताः। ये। प्रविलाप्य। बाह्यम्। श्रोत्रादि। चेतः। स्वम्। अहम्। चिदात्मनि॥ ते। एव। मुक्ताः। भवपाशबन्धैः। न। अन्ये। तु। पारोक्ष्यकथाभिधायिनः॥३५६॥

समाधि विना जीवन्मुक्तिकी प्राप्ति होनी दुर्लभ है ऐसा निरूपण करे हैं। समाहिताइति। जो मुमुक्षु अपने श्रोत्रादि बाह्य इन्द्रियोंको और चित्तको अहंकारको चेतन आत्मामें कल्पितरूप जानके निषेध करते हैं और समाधिनिष्ठ होकर स्थित होते हैं सो पुरुष ही जगत् कल्पनारूप बन्धसे

रहित होते हैं इनसे जो अन्य हैं जिनका विचारमें समर्थ चित्त नहीं है, विक्षिप्तचित्त हैं और गृह पुत्र धनादिमें जिनका मन निमग्न है, लौकिक पण्डित हैं और शास्त्रप्रमाणसे है ब्रह्म सर्व का आत्मारूप इस प्रकारकी परोक्षकथा कहते हैं सो मुक्त नहीं हैं अथवा शास्त्रके उपदेशमात्रको सुन कर कहते हैं मैं ब्रह्म हूं मेरेको कुछ दोष नहीं ऐसी वार्ता करने वाले वाचिक ज्ञानीपुरुष मुक्त नहीं हैं ॥ ३५६ ॥

उपाधिभेदात्स्वयमेव भिद्यते,
चोपाध्यपोहे स्वयमेव केवलः ॥
तस्मादुपाधेर्विलयाय विद्वान्,
वसेत्सदाऽकल्पसमाधिनिष्ठया ॥ ३५७ ॥

ज्ञानफलं कैवल्यं समाधावेवानुभूयतइत्याह। उपाधिभेदादिति। विद्वान् आत्मज्ञ उपाधिभेदाद्बुद्ध्याद्युपाधिभेदभानात् स्वयमेव भिद्यते स्वात्मानमन्यतोभिन्नं मन्यते उपाध्यपोहे चोपाध्यपवादे तूपाध्यभानइति यावत्। केवलोनिर्भेदः स्वयमेव भवति। जपाकुसुमाद्यपायेस्फटिकवदिति निदर्शनं द्रष्टव्यम्।तस्मादुपाधेर्भेददृष्टिनिदानत्वादुपाधेर्विलयायाकल्पसमाधिनिष्ठया निर्विकल्पसमाधिस्थित्या सदा वसेदनवरतं समाहितास्तिष्ठेदित्यर्थः॥ ३५७॥

उपाधिभेदात्। स्वयम्। एव। भिद्यते। च। उपाध्यपोहे। स्वयम्। एव। केवलः॥ तस्माद्। उपाधेः। विलयाय। विद्वान्। वसेत्। सदा। अकल्पसमाधिनिष्ठया॥ ३५७॥

ज्ञानफल मोक्षका समाधिमें ही अनुभव होता है ऐसा कहे हैं। उपाधिभेदात् इति । बुद्धि आदि उपाधिके भेदके भानसे अपनेको अन्यसे भिन्न मानता है और उपाधिके अपवाद होनेसे भेदरहित आप ही सर्वरूप होता है जैसे पुष्पादि

उपाधिके अभावसे स्फटिक मणि अपने स्वरूपसे भान होवै है इस कारण उपाधिको भेददृष्टिका हेतु होनेसे उपाधिदृष्टि के विनाशार्थ विज्ञानी निर्विकल्पसमाधिमें सर्वकाल निष्ठा करे॥

सति सक्तोनरोयाति सद्भावं ह्येकनिष्ठया ॥
कीटकोभ्रमरं ध्यायन् भ्रमरत्वाय कल्पते ॥३५८॥

ननु समाधिना कैवल्यं कथमत आह । सतीति ।

नरोजनः सति ब्रह्मणि केवले एकनिष्ठया अनन्यनिष्ठया सक्तः समाहितः सद्भावं ब्रह्मभावं कैवल्यं याति प्राप्नोति केवलोभवतीत्यर्थः । यथा कीटकोभ्रमरमालिं ध्यायन् तदेकनिष्ठया चिन्तयन् । भ्रमरत्वाय भ्रमरभावाय कल्पते समर्थोभवतीति । यदा भ्रमरभिन्नोपि कीटविशेषोभीत्यापि भ्रमरसमाधानेन भ्रमरात्मतां लभते तदा किमु वक्तव्यं ब्रह्मरूपएव जीवोनिर्भयं ब्रह्म समाधौ भावयन् ब्रह्मभावाय कल्पते इत्यत्रेति भावः ॥ ३५८ ॥

सति । सक्तः । नरः । याति । सद्भावम् । हि । एकनिष्ठया ॥ कीटकः । भ्रमरम् । ध्यायन् । भ्रमरत्वाय । कल्पते ॥३५८॥

समाधिसे मोक्ष कैसे प्राप्त होवै है इस शङ्काका उत्तर कहै है । ब्रह्ममें अनन्य निष्ठा करनेसे समाहित हुवा पुरुष ब्रह्मभावरूप कैवल्य मोक्षको प्राप्त होता है जैसे कीट · भ्रमरका एकचित्त होकर ध्यान करता हुवा भ्रमरताको प्राप्त होवै है । जब कि भ्रमरसे भिन्नभी कीट विशेष भयसे भी भ्रमरचिन्तन से भ्रमर होता है तब ब्रह्मरूप ही हुवा जीव ब्रह्मध्यानसे निर्भय ब्रह्म होता है इसमें कहना ही क्या है ॥ ३५८ ॥

क्रियान्तरासक्तिमपास्य कीटको-
ध्यायन्नलित्वं ह्यलिभावमृच्छति ॥

तथैव योगी परमात्मतत्त्वं,
ध्यात्वा समायाति तदेकनिष्ठया ॥ ३५९ ॥

सदृष्टान्तमुक्तं विवृणोति । क्रियान्तरासक्तिमिति ।

यथा कीटकः क्रियान्तरासक्तिं गमनागमनचेष्टातत्परतामपास्याक्त्वैवालित्वं भ्रमरत्वं ध्यायन् पश्यन्नलिभावमृच्छति भ्रमरत्वमाप्नोति तथैव योगी ब्रह्माभ्यासी परमात्मतत्त्वं स्वस्य शुद्धब्रह्मरूपत्वं तदेकनिष्ठया, ब्रह्मात्मचिन्तनमात्रस्थित्या तदेव तत्त्वं समायाति प्राप्नोति स्वात्मन्येवाभिव्यक्तमनुभवतीत्यर्थः ॥ ३५९ ॥

क्रियान्तरासक्तिम् । अपास्य । कीटकः । ध्यायन् । अलित्वम् । हि । अलिभावम् । ऋच्छति ॥ तथा । एव । योगी । परमात्मतत्त्वम् । ध्यात्वा । समायाति । तदेकनिष्ठया ॥ ३५९ ॥

पूर्वोक्तका विवरण करे हैं । क्रियान्तरासक्तिम् इति । जैसे कीट गमन आगमन चेष्टाकी तत्परताको त्यागकर भ्रमरका ध्यान करता हुवा भ्रमरताको प्राप्त होवै है तैसें ही ब्रह्माभ्यासी आत्माको शुद्ध ब्रह्मरूपताका अर्थात् ब्रह्मात्माकी चिन्तनमात्र स्थितिकरके ब्रह्मरूपताको अपनेमें ही स्पष्ट अनुभव करता है ॥ ३५९ ॥

अतीव सूक्ष्मं परमात्मतत्त्वं,
न स्थूलदृष्ट्या प्रतिपत्तुमर्हति ॥
समाधिनात्यन्तसुसूक्ष्मवृत्त्या,
ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः ॥ ३६० ॥

समाधिमन्तरापि ब्रह्मज्ञानेन ब्रह्मभावापत्तिर्भविष्यत्येवेति निष्फलः समाधिस्तत्राह । अतीवेति ।

परमात्मतत्त्वं परमात्मनस्तत्त्वं निर्विशेषं स्वरूपमतीवसूक्ष्मं देहादेर्बुद्ध्यादिसूक्ष्मं तस्मादपि तत्सूक्ष्मतरमित्यर्थः । "सूक्ष्मात्सूक्ष्मतरं

नित्यम् ” इति श्रुतेः । तत्स्थूलदृष्ट्या बाह्यानिवृत्तमत्या पुरुषो न प्रतिपत्तुं साक्षात्कर्तुमर्हति समर्थो भवति । समाधिना चेतःसमाधानेनात्यन्तसुसूक्ष्मवृत्त्या सर्वथा बाह्यान्तरविषयस्मृतिविधुरया बुद्धिवृत्त्याऽतिशुद्धबुद्धिभिरत्यन्तनिर्मलमतिभिरार्यैर्महानुभावैर्ज्ञातव्यं साक्षात्कर्तव्यमन्यथा विचारासमर्थानां स्थूलमतीनामात्मसाक्षात्कारो दुर्लभतां लभेतेति भावः ॥ ३६० ॥

अतीव । सूक्ष्मम् । परमात्मतत्त्वम् । न । स्थूलदृष्ट्या । प्रतिपत्तुम् । अर्हति ॥ समाधिना । अत्यन्तसुसूक्ष्मवृत्त्या । ज्ञातव्यम् । आर्यैः । अतिशुद्धबुद्धिभिः ॥ ३६० ॥

समाधिविना भी ब्रह्मज्ञानकरके ब्रह्मभावरूप मोक्ष होवै है इस शङ्काका समाधान करे हैं । अतीवइति । परमात्माका निर्विशेष स्वरूप है सो देहादिसे सूक्ष्म जो बुद्धि है उससे भी सूक्ष्म है तिसका बाह्य स्थूलदृष्टिके त्यागनेसे बिना पुरुष साक्षात्कार करनेमें समर्थ नहीं है और चित्तकी समाधि होनेसे अत्यन्त सूक्ष्म बाह्य पदार्थोंकी स्मृतिरहित बुद्धिवृत्तिकरके अत्यन्त निर्मलबुद्धिवाले महानुभावोंने साक्षात्कार करना चाहिये नहीं तो विचारमें असमर्थ स्थूलबुद्धिवाले पुरुषोंको आत्माका साक्षात्कार दुर्लभताको प्राप्त होजावैगा॥ ३६० ॥

यथा सुवर्णं पटुपाकशोधितं,
त्यक्त्वा मलं स्वात्मगुणं समृच्छति ॥
तथा मनः सत्त्वरजस्तमोमलं,
ध्यानेन सन्त्यज्य समेति तत्त्वम् ॥ ३६१ ॥

अतिशुद्धबुद्धिभिरित्युक्त्या सर्वथा बुद्धिशोधनमपि समाधिमन्तरा दुर्घटमित्युक्तं सदृष्टान्तं तदुपपादयति । यथेति । यथा सुवर्णं कार्तस्वरं पटुपाकशोधितं वह्निक्षारयोजितं मलं

त्यक्त्वा स्वात्मगुणं शुक्लभास्वरलक्षणं समृच्छति प्राप्नोति। "समोगमृच्छिभ्या" मिति नात्मनेपदमकर्मकाभ्यामित्युक्तेः । तथा मनश्चेतोध्यानेनात्मचिन्तनेन सत्त्वरजस्तमोमलं त्रिगुणावृत्तिप्रवाहप्रवृत्तिं परिहाय सत्त्वस्य गुणान्तरसंसर्गेणैव कार्यकरत्वान्मलत्वं निर्गुणास्वरूपापेक्षया केवलस्यापि तथात्वमव्याहृतमिति मलमध्येतस्यापि गणना साधीयसी तत्त्वं निर्विशेषावाध्यब्रह्मात्मत्वं समेति प्राप्नोति अभिव्यक्तमनुभवतीति यावत् ॥ ३६१ ॥

यथा । सुवर्णम् । पटुपाकशोधितम् । त्यक्त्वा । मलम् । स्वात्मगुणम् । समृच्छति ॥ तथा । मनः । सत्त्वरजस्तमोमलम् । ध्यानेन । संत्यज्य । समेति । तत्त्वम् ॥ ३६१ ॥

समाधिसे ही सर्वथा बुद्धि शुद्ध होवै है ऐसा कहे हैं । यथा इति । जैसें सुवर्ण सुहागा आदि क्षारद्रव्यकरके युक्त हुवा मलको त्यागके अपने प्रकाश शुक्लरूपको प्राप्त होवै है तैसें आत्माचिन्तनकरके सत्त्वगुण रजोगुण तमोगुणके वृत्तिप्रवाहको त्यागके चित्त बाह्य आन्तर विशेषरहित ब्रह्मरूपता को प्राप्त होवै है अर्थात् स्पष्ट ब्रह्मरूपताका अनुभव करे है ॥

निरन्तराभ्यासवशात्तदित्थं,
पक्वं मनोब्रह्मणि लीयते यदा ॥
तदा समाधिः सविकल्पवर्जितः,
स्वतोऽद्वयानन्दरसानुभावकः ॥ ३६२ ॥

सविकल्पसमाधिपूर्वकोनिर्विकल्पसमाधिर्लभ्यते इति क्रमार्थमाह। निरन्तराभ्यासवशादिति ।

इत्थमुक्तप्रकारेण निरन्तराभ्यासवशात्सदा तन्निष्ठतया ब्रह्मचिन्तनक्रियासमभिहारेण पक्वं बाह्यवासनाऽनाक्रान्तं मनोयदा ब्रह्मणि ध्येये प्रत्यगभिन्ने परमात्मनि लीयते ध्येयाभं भवति तदा ततः सविकल्पध्यानाभ्यासादनन्तरं सविकल्पवर्जितः सविकल्पैर्भेद-

विषयविज्ञानैर्वर्जितोऽद्वयानन्दरसानुभावकोनिर्द्वैतानन्दैकरसब्रह्मानन्दानुभवहेतुः समाधिर्भवति सएव निर्विकल्पसमाधिरित्यभिधीयतइत्यर्थः ॥ ३६२ ॥

निरन्तराभ्यासवशात् । तद् । इत्थम् । पक्वम् । मनः । ब्रह्मणि । लीयते । यदा ॥ तदा । समाधिः । सविकल्पवर्जितः । स्वतः । अद्वयानन्दरसानुभावकः ॥ ३६२ ॥

सविकल्प समाधिके करनेसे निर्विकल्प समाधि प्राप्त होवै है इस क्रमको दिखावै हैं। निरन्तराभ्यासइति । जब मन ब्रह्मके चिन्तनको पुनः पुनः करके बाह्य वासनाकरके आकृष्ट नहीं होता है और ध्यानके योग्य जीवाभिन्न ब्रह्ममें लीन होता है तब सविकल्प ध्यानके पश्चात् भेदविषयोंके ज्ञानसे रहित हुवा अद्वैत आनन्द एकरस ब्रह्मानन्दके अनुभवका हेतु समाधि बिनायत्न होवै है सोही निर्विकल्प समाधि कही जावै है ॥ ३६२ ॥

> समाधिनाऽनेन समस्तवासना-
> ग्रन्थेर्विनाशोऽखिलकर्मनाशः ॥
> अन्तर्बहिः सर्वतएव सर्वदा,
> स्वरूपविस्फूर्तिरयत्नतः स्यात् ॥ ३६३ ॥

समस्तसम्पत्सम्पादकत्वात्समाधेरत्युपादेयतामाह समाधिनेति ।

अनेन निर्विकल्पाख्येन समाधिना समस्तवासनाग्रन्थेः समस्तानां सर्वासां वासनानां बाह्यसंस्काराणां सम्बन्धिग्रन्थेः कामसंशयादेर्विनाशउच्छेदस्तथाऽखिलकर्मनाशोऽखिलानां निःशेषाणां प्रारब्धेतरकर्मणामशुभानां शुभानां च नाशोविध्वंसः “ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे” इति श्रुतेरिति भावः । तथा सर्वतः सर्वदा चान्तर्बहिश्च स्वरूपस्य विस्फूर्तिः प्रतिभानमयत्नेन समाधिरूपेण स्यादनेन सर्वसमृद्धिसिद्धेर्न श्रमान्तरापेक्षेति भावः ॥ ३६३ ॥

समाधिना । अनेन । समस्तवासनाग्रन्थेः । विनाशः । अखिलकर्मनाशः ॥ अन्तः । बहिः । सर्वतः । एव । सर्वदा । स्वरूपाविस्फूर्तिः । अयत्नतः । स्यात् ॥ ३६३ ॥

सर्व सम्पत्का हेतु होनेसे निर्विकल्प समाधिको उपादेय कहे हैं । समाधिना इति । इस निर्विकल्प समाधिकरके सर्व बाह्य संस्कारोंके संबंधीकाम संशयादिरूप ग्रन्थिका नाश होवैहै तैसें प्रारब्धभिन्न शुभ अशुभ सर्व कर्मोंका विनाश होवै है तब सर्व तरँफसे सर्वकालमें आन्तर बाहर स्वरूपंका भान होवै है उसमें यत्नान्तरकी अपेक्षा नहीं रहती एक समाधियत्नसे ही सर्व दैवसम्पत्की सिद्धि होवै है अन्य श्रमकी अपेक्षा होवैनहीं॥

श्रुतेः शतगुणं विद्यान्मननं मननादपि ॥
निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम् ३६४॥

कर्तव्यसोपानपरम्परासीमानं फलावधिप्रदर्शनेन प्रदर्शयति । श्रुतेरिति ।

श्रुतेः श्रवणादर्थाद्ब्रह्मणः मननं सत्तर्कैरर्थस्य सम्भावितत्वव्यवस्थापनं शतगुणं मननस्य निश्चयहेतुत्वादनवस्थितचेतसोऽवस्थानापादकतयाऽधिकफलं संख्या तु न विवक्षितेति स्फुटमेव मननादपि निदिध्यासं निदिध्यासनं लक्षगुणं विजातीयवस्तुतिरस्कारेण स्वरूपभासनादत्यन्तस्थैर्यनिमित्तं सन्ततोप्यधिकफलमेष्टव्यं निर्विकल्पकं समाधानं त्वनन्तमनन्तमोक्षाभिव्यञ्जकत्वादनन्तविकलफलमिति कर्तव्यस्य फलप्राप्तेश्च निर्विकल्पसमाधिरवधिरिति भावः॥ ३६४ ॥

श्रुतेः । शतगुणम् । विद्यात् । मननम् । मननात् । अपि ॥ निदिध्यासम् । लक्षगुणम् । अनन्तम् । निर्विकल्पकम् ॥३६४॥

कर्तव्यपरंपराकी अवधिको फलकी अवधि दिखाते हुवे वर्णन करे हैं । श्रुतेः इति । ब्रह्मके श्रवणसे वेदानुकूल तर्कोंसे

ब्रह्मकी संभावनारूप मनन शतगुणा अधिक फलका हेतु है ऐसा जानना चाहिये क्योंकि मननको निश्चयका हेतु होनेसे जिसका चित्त स्थिर नहीं है उसके चित्तकी स्थिरताका मनन साधक है इसी प्रकार मननसे निदिध्यासन लक्षगुणित फलका हेतु है क्योंकि विजातीय प्रतीतिका त्यागकरके स्वरूप-मात्रका प्रकाशक होनेसे अत्यन्त स्थिरताका हेतु है और निर्विकल्प समाधि तो अनन्त फलका हेतु है, अनन्त मोक्षरूप फलका हेतु होनेसे कर्तव्यका और फलप्राप्तिका निर्विकल्प समाधि अवधिरूप है ॥ ३६४ ॥

निर्विकल्पसमाधिना स्फुटं,
ब्रह्मतत्त्वमवगम्यते ध्रुवम् ॥
नान्यथा चलतया मनोगतेः,
प्रत्ययान्तरविमिश्रितं भवेत् ॥ ३६५ ॥

निर्विकल्पसमाधेः सर्वसंशयविनाशकत्वमुक्तं स्फुटयत्यन्ययोग-व्यवच्छेदेन । निर्विकल्पेत्यादिना ।
निर्विकल्पसमाधिना स्फुटं निःसंदिग्धं ब्रह्मतत्त्वं ध्रुवं निश्चित्यावगम्यते साक्षात्क्रियते अन्यथा निर्विकल्पकसमाध्यभावे तु न ध्रुवं न निश्चितं स्यात् ब्रह्मतत्त्वावगमोवान स्यादिति भावः । तत्रहेतुमाह चलतयेति मनोगतेरिति मनःस्वभावस्य चलतयाऽतिचञ्चलत्वेन 'चञ्चलं हि मनः कृष्णे'त्यर्जुनेन "असंशयं महाबाहो मनोदुर्निग्रहं चलमि"तिभगवता चाभिधानात् "अप्यब्धिपानान्महतःसुमेरून्मूलनादपि। अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः" इति वासिष्ठाच्च । कदाचित्प्रत्ययान्तर-विमिश्रितमनात्मप्रत्ययान्तरान्तरितमपि ब्रह्मतत्त्वावगमनं भवेत् संभाव्येत समाधौ तु मनसोनिश्चलतया न प्रत्ययान्तरमिश्रणान्तराय इति भावः ॥ ३६५ ॥

निर्विकल्पसमाधिना । स्फुटम् । ब्रह्मतत्त्वम् । अवगम्यते ।

ध्रुवम् ॥ न । अन्यथा । चलतया । मनोगतेः । प्रत्ययान्तरविमिश्रितम् । भवेत् ॥ ३६५ ॥

निर्विकल्प समाधिको सर्वसंशयनिवारकता स्पष्ट करे हैं । निर्विकल्पइति । निर्विकल्पसमाधिकरके संशयरहित ब्रह्मस्वरूप निश्चित साक्षात् प्रतीत होवै है और निर्विकल्प समाधिके न होनेसे तौ निश्चयरूप ब्रह्म साक्षात्कार न होगा, क्योंकि मनके स्वभावको अतिचंचल होनेसे कदाचित् अनात्मप्रतीतिसे मिश्रित आत्मप्रतीतिकी भी संभावना होवै है और समाधिमें तो मनको निश्चलहोनेसे अनात्मप्रतीतिकी संभावना ही नहीं होसकती केवल अद्वैत आत्माका ही साक्षात्कार होवै है॥ ३६५॥

अतः समाधत्स्व यतेन्द्रियः स-
न्निरन्तरं शान्तमनाः प्रतीचि ॥
विध्वंसय ध्वान्तमनाद्यविद्यया,
कृतं सदेकत्वविलोकनेन ॥ ३६६ ॥

महाफलसाधनं समाधानं निरूपितं प्रियशिष्यं दयालुर्गुरुर्ग्राहयति। अतःइति ।

यतोमहामहिमासमाधिर्निर्विकल्पोऽतोयतेन्द्रियः सन् जितेन्द्रियोभवन् शान्तमनानिश्चलचेताश्च सन् प्रतीचि प्रत्यग्रूपे परात्मनि निरन्तरं सततं समाधत्स्व समाधिनिष्ठोभव। तत्र सदेकत्वविलोकनेन ब्रह्मात्मैक्यसाक्षात्कारेणानाद्यविद्यया कृतमनादिभूतयाविद्यया जनितं ध्वान्तमावरणं विध्वंसय विनाशयेत्यर्थः ॥ ३६६ ॥

अतः । समाधत्स्व । जितेन्द्रियः । सन् । निरन्तरम् । शान्तमनाः । प्रतीचि ॥ विध्वंसय । ध्वान्तम् । अनाद्यविद्यया । कृतम् । सदेकत्वविलोकनेन ॥ ३६६ ॥

पूर्व कही समाधिमें शिष्यको गुरु प्रवृत्त करावै हैं । अतः इति ।

जिस कारण महाफलका हेतु समाधि है इसकारण जितेन्द्रिय होकर और निश्चलचित्त होकर सर्वान्तर परमात्मामें निरंन्तर समाधिनिष्ठ हो समाधिमें एक ब्रह्मको साक्षात्कारकरके अनादिरूप अविद्याकरके उत्पन्न हुवे आवरणको विनाश कर । तब आत्माका निरावरण मोक्षस्वरूप तेरेको हे शिष्य ! अभिव्यक्त होगा ॥ ३६६ ॥

योगस्य प्रथमद्वारं वाङ्निरोधोऽपरिग्रहः ॥
निराशा च निरीहा च नित्यमेकान्तशीलता ॥ ३६७॥

समाधिमभिधाय ग्राहयित्वा च सम्प्रति तत्साधनानि भाषते । योगस्येति ।

योगस्य मनःसमाधानस्य वाङ्निरोधोवाचोजल्पनान्नियमनं मौनमिति यावत् प्रथमद्वारं प्रथमं साधनं तथाऽपरिग्रहः परिग्रहश्चिन्तातृष्णादि हेतुवित्तादेरसंग्रहः सद्वितीयउपायोऽथानिराशाऽशात्यागस्तथा निरीहा चेष्टाऽभावस्तथा नित्यं सर्वदा एकान्तशीलतैकान्तनिवासशीलत्वम् ॥ ३६७ ॥

योगस्य । प्रथमद्वारम् । वाङ्निरोधः । अपरिग्रहः ॥ निराशा । च । निरीहा । च । नित्यम् । एकान्तशीलता ॥ ३६७ ॥

अब समाधिके साधनोंको कथन करें हैं । योगस्य इति । मनकी एकाग्रताका वाणीका निरोधरूप मौन प्रथम साधन है तैसेही योगके विरोधि द्रव्यादि जो चिन्ता आशाके कारण हैं उनका त्याग दूसरा उपाय है तैसेही आशाका त्याग, तैसेही देशान्तरोंमें गमनादिके संकल्पका त्याग और सर्वकाल एकान्त देशमें निवास करना साधन है ॥ ३६७ ॥

एकान्तस्थितिरिन्द्रियोपरमणे हेतुर्दमश्चेतसः,
संरोधे करणं शमेन विलयं यायादहंवासना ॥
तेनानन्दरसानुभूतिरचला ब्राह्मी सदा योगिनः,
तस्माच्चित्तनिरोधएव सततं कार्यः प्रयत्नोमुनेः ३६८

समाधिसाधनान्यभिहितानि तेषां तत्तत्कार्योपयोगं ज्ञापयतुमेकान्तशीलतां विवृणोति। एकान्तस्थितिरिति।

इन्द्रियोपरमणे नयनादीनां स्वस्वविषयेभ्योविमुखत्वे प्रत्याहारे इत्यर्थः। एकान्तस्थितिः।रहसि निवासोहेतुः सएव दमः सच चेतसः संरोधे निरोधे शमाख्येकरणं कारणमित्यर्थः। तेन च शमेनाहंवासना विलयं विनाशं यायात्प्राप्नुयात् तेन च वासनाविलयेन ब्राह्मी ब्रह्मसम्बन्धिनी अचला निश्चलाऽऽनन्दरसानुभूतिः सारानन्दानुभवः योगिनः सदा भवति तस्मादानन्दरसानुभवहेतुत्वाच्चित्तनिरोधेएव न बाह्यप्रवृत्तौ प्रयत्नः मुनेर्मननशीलस्य कर्तरि षष्ठी सततं निरन्तरं कार्यः कर्तव्यइत्यर्थः॥ ३६८॥

एकान्तस्थितिः। इन्द्रियोपरमणे। हेतुः। दमः। चेतसः। संरोधे। करणम्। शमेन। विलयम्। यायात्। अहंवासना॥ तेन। आनन्दरसानुभूतिः। अचला। ब्राह्मी। सदा। योगिनः। तस्मात्। चित्तनिरोधः। एव। सततम्। कार्यः। प्रयत्नः। मुनेः॥ ३६८॥

उक्त साधनोंका तत्तत्कार्योंमें उपयोग दिखाते हैं। एकान्तस्थितिः इति। इन्द्रियोंकी स्वस्वविषयोंसे उपरामता रूप प्रत्याहारमें एकान्तदेश निवासहेतु है उसीको दम कहे हैं सो चित्तके निरोधमें कारण है और तिसे एकाग्रतारूप शमकरके अहंकारकी वासना विनष्ट होती है और तिसे वासनानाशकरके ब्रह्मसंबन्धी निश्चल आनन्दरसका अनुभव योगीको सर्वकालमें होवे है तिसे कारण आनन्दरसके अनुभवका हेतु होनेसे चित्तके निरोधरूप समाधिमें मननशील पुरुषको निरन्तर यत्न करना चाहिये बाह्यप्रवृत्तिमें मनको न लगाना चाहिये,न उद्यम करना चाहिये॥ ३६८॥

वाचं नियच्छात्मनि तं नियच्छ,
बुद्धौ धियं यच्छ च बुद्धिसाक्षिणि॥

तं चापि पूर्णात्मनि निर्विकल्पे,
विलाप्य शान्तिं परमां भजस्व ॥ ३६९ ॥

समाधिसम्पादनक्रमं दर्शयितुं वाङ्निरोधं विवृणोति। वाचमिति। वागिन्द्रियमात्मनि मनसि नियच्छ नियमय वाग्व्यापारोपरमेण मनोमात्रमवशेषय वाग्ग्रहणं बाह्येन्द्रियमात्रोपलक्षकं तं चात्मानं बुद्धावध्यवसायलक्षणायां नियच्छ मनोव्यापारमपास्याध्यवसायपरायणोभव धियं बुद्धिं च बुद्धिसाक्षिणि नियच्छ तत्र बुद्धिं विलाप्य साक्षिमात्रेण तिष्ठ तं च बुद्धिसाक्षिणं प्रत्यञ्चं निर्विकल्पे पूर्णात्मनि ब्रह्मणि विलाप्य तदात्मना निश्चित्य परमामनुपमां शान्तिमानन्दरसानुभूतिं भजस्व याहीत्यर्थः । "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्तआत्मनि" इति श्रुत्यर्थोऽत्र वर्णितइति बोध्यम् ॥ ३६९ ॥

वाचम् । नियच्छ । आत्मनि । तम् । नियच्छ । बुद्धौ । धियम् । यच्छ । च । बुद्धिसाक्षिणि ॥ तम् । च । अपि । पूर्णात्मनि । निर्विकल्पे । विलाप्य । शान्तिम् । परमाम् । भजस्व ॥ ३६९ ॥

समाधिके सम्पादनक्रमको दिखानेके लिये वाणीनिरोध का विवरण करे हैं । वाचम् इति । वाणीको मनमें अर्पण कर अर्थात् वाणीके व्यापारको निरोधकरके मनके व्यापारमात्र को कर और तिसे मनको निश्चयरूप बुद्धिमें अर्पण कर अर्थात् बुद्धिमात्रके व्यापारको कर, मनके व्यापारको रोक । और बुद्धिको बुद्धिके साक्षीमें अर्पण कर अर्थात् बुद्धिव्यापार को त्यागके साक्षीरूप होकर स्थित हो और तिसे बुद्धिसाक्षी अन्तर आत्माको निर्विकल्प पूर्ण ब्रह्ममें लीन कर और ब्रह्मरूपका निश्चयकरके अनुपम शान्ति (आनन्दरसका अनुभव रूप) को प्राप्त हो ॥ ३६९ ॥

देहप्राणेन्द्रियमनोबुद्ध्यादिभिरुपाधिभिः ॥
यैर्यैर्वृत्तेः समायोगस्तत्तद्भावोऽस्य योगिनः ॥ ३७० ॥

समाध्यभावेऽनर्थम्प्रदर्शयति । देहप्राणेन्द्रियेति ।

देहप्राणेन्द्रियमनोबुद्ध्यादिभिः सुप्रसिद्धैरुपाधिभिरनात्मधर्माणामात्मन्यारोपनिमित्तैः तेषु यैर्यैर्वृत्तेश्चित्प्रतिबिम्बसमन्वितायाश्चिदवच्छिन्नायाः समायोगः संसर्गस्तत्तदाकारतेति यावत् । अस्य योगिनश्चिदात्मनस्तत्तद्भावस्तत्तद्रूपतापत्तिस्तत्समानाकारापत्तिरित्यर्थः । तथाच समाध्यभावे चेतसोबहिर्निर्गमाद्विषयाकारपरिणामे वृत्तिसारूप्यापत्तिरिति स्वरूपविस्मृत्याऽनर्थशतावाप्तिरिति भावः । "वृत्तिसारूप्यमितरत्र" इति योगसूत्रस्यार्थोऽत्र वर्णितः ॥ ३७० ॥

देहप्राणेन्द्रियमनोबुद्ध्यादिभिः । उपाधिभिः ॥ यैः । यैः । वृत्तेः । समायोगः । तत्तद्भावः । अस्य । योगिनः ॥३७०॥

समाधिके अभाव होनेपर अनर्थकी प्राप्तिको दिखावे हैं । देहप्राणेन्द्रियइति । देह प्राण इन्द्रिय मन बुद्धि आदि रूप उपाधि (अपने धर्मोंको आत्मामें आरोपका निमित्तरूप) करके इनमें जिस जिसके संग चेतनके प्रतिविम्बयुक्त वृत्तिका संबन्ध (तत्तत्आकारता) इस योगी चेतनरूपको होवै है तत्तत् समान आकारताकी प्राप्ति होवै है अर्थात् समाधिके न होनेपर वृत्तिको बाह्य विषयाकारताकी प्राप्तिरूप महानर्थ प्राप्त होवै है, आत्माके स्वरूपकी विस्मृति होवै है तब मोक्षकी अप्राप्तिरूप महाहानि होवै है ॥ ३७० ॥

तन्निवृत्त्या मुनेः सम्यक्सर्वोपरमणं सुखम् ॥
संदृश्यते सदानन्दरसानुभवविप्लवः ॥ ३७१ ॥

समाधिसद्भावे चानर्थानुदयमर्थलाभं चाह । तन्निवृत्त्येति ।

तन्निवृत्त्या देहाद्युपाधिस्वरूपापत्तिनिवृत्त्या मुनेः सम्यक्सर्वोपरमणं सर्वथा बाह्योपरतिः सुखं विनायत्नं क्रियाविशेषणं संदृश्यतेऽनुभूयते ध्याननिष्ठैः किंच सदानन्दरसानुभवविप्लवः सदानन्दरसस्यात्मनोऽनुभवस्य विप्लवः प्राप्तिः प्लुङ्गताविति धातुपाठात् । "समाधिनिर्धूतमलस्य चेतसोनिवेशितस्यात्मनि यत्सुखं भवेत् । न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते" इत्युक्तेरिति भावः।

'योगश्चित्तवृत्तिनिरोधः ' तदा द्रष्टुः स्वरूपेऽवस्थानम्' । इति सूत्रयोरर्थोऽत्र वर्णितः ॥ ३७१ ॥

तन्निवृत्त्या । मुनेः । सम्यक्सर्वोपरमणम् । सुखम् ॥ संदृश्यते । सदानन्दरसानुभवविप्लवः ॥ ३७१ ॥

समाधि करनेसे अनर्थकी निवृत्ति परमार्थका लाभ दिखावें हैं। तन्निवृत्त्याइति। देहादि उपाधिकी समानरूपताकी निवृत्ति से मननशील पुरुषको सर्व प्रकार बाह्यसे उपरतिसुख विना यत्न ध्याननिष्ठोंने अनुभव करीता है किंच सर्वकाल आत्मानन्दको अनुभवकी प्राप्ति होवै है ॥ ३७१ ॥

अन्तस्त्यागोवहिस्त्यागोविरक्तस्यैव युज्यते॥
त्यजत्यन्तर्बहिःसङ्गं विरक्तस्तु मुमुक्षया ॥३७२॥

वर्णितः समाधिस्तीव्रवैराग्यसम्पाद्यइति दर्शयितुं दर्शितमपरिग्रहं विवृणोति । अन्तस्त्यागइति ।

विरक्तस्यैव वैराग्यवतएव नतु विषयासक्तिमतोऽन्तस्त्यागोऽन्तःस्थानां वासनालक्षणानां विषयाणां त्यागः समाध्यभ्यासेन निवृत्तिः वहिस्त्यागोवाह्यानां स्थूलानां दारागारादीनां शब्दादीनां च त्यागोयुज्यते उपपद्यते तेषां त्यागे निमित्तमाह त्यजतीति विरक्तस्तु मुमुक्षया मोक्षाभिवाञ्छयाऽन्तर्बहिःसङ्गं त्यजति सर्वसङ्गं विहाय समाहितोभवतीत्यर्थः ॥ ३७२ ॥

अन्तस्त्यागः । वहिस्त्यागः । विरक्तस्य । एव । युज्यते ॥ त्यजति । अन्तर्बहिःसङ्गम् । विरक्तः । तु । मुमुक्षया ॥३७२॥

अब अपरिग्रहका वर्णन करे हैं । अन्तःइति । वैराग्यवाले कोही अन्तरका त्याग होता है अर्थात् समाधिके अभ्याससे मनमें स्थित वासनारूप विषयोंका त्याग सिद्ध होवै है,विषयों में आसक्तचित्त वालेको होवै नहीं और बाह्य जो स्त्री मकान आदि स्थूल विषय और शब्द स्पर्शादि है उनका त्याग भी

बनसके हैं क्योंकि विरक्त पुरुष मोक्षकी इच्छाकरके आन्तर बाह्य संगका त्याग करता है अर्थात् सर्व संगका त्यागकरके समाधिनिष्ठ होता है ॥ ३७२ ॥

बहिस्तु विषयैः सङ्गं तथान्तरहमादिभिः ॥
विरक्तएव शक्नोति त्यक्तुं ब्रह्मणि निष्ठितः॥३७३॥

उक्तमेव विवृणोति । बहिस्त्विति ।

ब्रह्मणि निष्ठितोनिश्चितोविरक्तएव बहिर्विषयैः शब्दादिभिस्तथान्तर्विषयैरहमादिभिरन्तःकरणतद्धर्मैः सङ्गं संसर्गं त्यक्तुं शक्नोति नान्योविषयलम्पटइत्यर्थः ॥ ३७३ ॥

बहिः । तु । विषयैः । सङ्गम् । तथा । अन्तः । अहमादिभिः ॥ विरक्तः । एव । शक्नोति । त्यक्तुम् । ब्रह्मणि । निष्ठितः ३७३

पूर्वोक्तका विवरण करते हैं । बहिः इति । ब्रह्मनिष्ठ जो विरक्त है सोही शब्दादि बाह्य विषय तथा अन्तरके अहंकारादि मनके धर्मोंके संबन्धके त्याग करनेमें समर्थ है । सोही सर्व संगको त्यागके समाधिमें जुड़ता है इसकारण तीव्र वैराग्य की आवश्यकता है ॥ ३७३ ॥

वैराग्यबोधौ पुरुषस्य पक्षिवत्,
पक्षौ विजानीहि विचक्षण त्वम् ॥
विमुक्तिसौधाग्रलताधिरोहणं,
ताभ्यां विना नान्यतरेण सिद्ध्यति॥३७४॥

ब्रह्मणि निष्ठितइति बोधोविरक्तइति वैराग्यं च मुक्तिकारणमभिहितं तद्द्वयं दृष्टान्तेन स्पष्टयति । वैराग्यबोधाविति ।

हेविचक्षण विचारचतुरचक्रचूडामणे शिष्य पुरुषस्य मुमुक्षोर्वैराग्यबोधौ बाह्याभ्यन्तरविषयजिहासाब्रह्मज्ञानं चेत्युभावेव पक्षिवत्पक्षौ यथा विष्णुपदमुत्पित्सतः पतत्रिणोऽन्तरेण पक्षाभ्याम-

भीष्टप्राप्तिर्दुर्लभा तथाऽऽभ्यामन्तरेण मोक्षप्राप्तिरिति भावः। तथाप्ये-
केनैवैषप्राप्स्यति कृतं द्वाभ्यां तत्राह विमुक्तीति। विमुक्तिसौधाग्रल-
ताधिरोहणं यथोच्चमन्दिरशिखरलग्ना दुर्लभफलालता नान्तर
पक्षाभ्यामाधिरुह्यते केनापि पक्षिणा तथाविमुक्तिरपि नान्तरा वै-
राग्यबोधाभ्यामासादयितुं शक्यते केनापि पुंसेति भावः। ताभ्यां
पूर्वोक्ताभ्यामाभ्यां विनाऽन्यतरेणैकतरेण बोधेन वैराग्येण वा न
सिद्ध्यति नाधिरोढुं शक्यतइत्यर्थः॥ ३७४॥

वैराग्यबोधौ। पुरुषस्य। पक्षिवत्। पक्षौ। विजानीहि।
विचक्षण। त्वम्॥ विमुक्तिसौधाग्रलताधिरोहणम्। ताभ्याम्।
विना। न। अन्यतरेण। सिध्यति॥ ३७४॥

पूर्वोक्त ज्ञान वैराग्यको दृष्टान्तकरके वर्णन करे हैं। वैराग्य-
बोधौ इति। हे विचारचतुर शिष्य! मुमुक्षु पुरुषको बाह्य
आन्तर विषय त्यागेच्छा आत्मज्ञान यह दोनों पक्षीके पक्षवत
पक्ष हैं तू जान। जैसे आकाशमें उडते पक्षीका पक्षों विना
वाञ्छित प्राप्ति दुर्लभ है तैसेही वैराग्यबोध विना मोक्षकी प्राप्ति
दुर्लभ है। और जैसे ऊंचे मन्दिरके अग्र लगीहुई दुर्लभता पक्षों
विना नहीं प्राप्त होती किसीको भी तैसेही मुक्ति भी वैराग्यज्ञान-
रूप पक्षों विना नहीं प्राप्त होती सो पूर्वोक्त वैराग्य बोध दोनों
में एक ज्ञान वा वैराग्यकरके नहीं सिद्ध होती किन्तु दोनोंसे
ही प्राप्त होवे है॥ ३७४॥

अत्यन्तवैराग्यवतः समाधिः,
समाहितस्यैव दृढप्रबोधः॥
प्रबुद्धतत्त्वस्य हि बन्धमुक्ति-
र्मुक्तात्मनोनित्यसुखानुभूतिः॥ ३७५॥

कथमेतत् तत्राह । अत्यन्तेति ।

अत्यन्तवैराग्यवतस्तीव्रवैराग्यवतः समाधिः समाहितस्यैव नतु विक्षिप्तचित्तस्य दृढप्रबोधः संशयादिराहित्येनात्मसाक्षात्कारः प्रबुद्धतत्त्वस्य साक्षात्कृतब्रह्मात्मस्वरूपस्यैव बन्धमुक्तिरविद्याविक्षेपविनाशोमुक्तात्मनोविध्वस्ताविद्याबन्धस्यैव नित्यसुखानुभूतिरात्मानन्दानुभवोभवतीत्येवं वैराग्यबोधौ मुक्तावुपयुज्येतइति भावः॥३७५॥

अत्यन्तवैराग्यवतः । समाधिः । समाहितस्य । एव । दृढप्रबोधः ॥ प्रबुद्धतत्त्वस्य । हि । बन्धमुक्तिः । मुक्तात्मनः । नित्यसुखानुभूतिः ॥ ३७५ ॥

पूर्वोक्त वार्ताको सिद्ध करे हैं। अत्यन्तइति । तीव्र वैराग्य वालेको समाधि होवै है,समाधि वालेको ही संशयादिरहित बोध होवै है और आत्मसाक्षात्कार वालेको ही अविद्याविक्षेप का नाश होवै है और जिसका अविद्याबन्धन विनष्ट हुवा है उसको ही आत्मानन्दका अनुभव होवै है इस रीतिसे वैराग्य बोध ही मुक्तिमें उपयोगी होवै हैं ॥ ३७५ ॥

वैराग्यान्न परं सुखस्य जनकं पश्यामि वश्यात्मन-
स्तच्चेच्छुद्धतरात्मबोधसहितं स्वाराज्यसाम्राज्यधुक्॥
एतद्द्वारमजस्रमुक्तियुवतेर्यस्मात्त्वमस्मात्परं,
सर्वत्रास्पृहया सदात्मनि सदा प्रज्ञां कुरु श्रेयसे३७६

ननु वैराग्यं युवतिसंगजसुखविरोधित्वाद्धेयमेव नह्यङ्गनालिङ्गनं विहाय तादृशं सुखं साधनान्तरसाध्यं संभावयामि तस्मात्त्वमपि विरक्ततां विहाय तत्सुखमनुभवेति चेन्नेत्याह । वैराग्यादिति ।

वश्यात्मनोजितचित्तस्य पुंसः सुखस्य जनकं वैराग्यात्परमन्यत् साधनान्तरं युवतिसंगमादि न पश्यामि विवेकदृष्ट्या न समीक्षे । यद्यप्यजितचित्तस्य भोगलम्पटस्याविवेकिनोयुवतिसंगः सुखायते तथापि सा तस्य भ्रान्तिरेव चित्तैकाग्र्यमन्तरा सुखस्याभानाद्विचा-

रेत्वात्मसुखस्यैवान्यत्र भानभ्रमात् । नचात्मसुखस्य नित्यत्वेन वैराग्यस्य तज्जनकत्वोक्तिरयुक्तेति वाच्यम् सुखवृत्तिं प्रतिवैराग्यस्य जनकत्वेन तथा व्यपदेशादिति बोध्यम्। ननु राज्यसुखं न वैराग्यलभ्यं तस्य सम्पत्समृद्धिसाध्यस्याकिञ्चनेन विरक्तेन लेशतोपि साधयितुमशक्यत्वादिति चेन्नेत्याह तच्चेदिति । तद्वैराग्यं शुद्धतरात्मबोधसहितमत्यन्तनिर्मलात्मज्ञानोदयसम्पत्सम्पन्नंचेत्स्वाराज्यसाम्राज्यधुक् । स्वः स्वर्गाणामानन्दानां राजा ब्रह्मानन्दः "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । तस्य भावस्तत्त्वं तदेव साम्राज्यं निरङ्कुशैश्वर्यं तस्य धुक् पूरकं भवति । ब्रह्मानन्दे निरङ्कुशे बोधसाहितवैराग्यतोलब्धेऽन्यदैहलौकिकं पारलौकिकं च राज्यसुखं तृणायते इति तत्त्वम् । तस्मान्मुक्तिरेव वास्तवी युवतिर्वास्तवसुखस्वहृया नान्या मांसमयीत्युपसंहरति एतद्द्वारमिति । यस्मादेतद्बोधसाहितवैराग्यमजस्रमुक्तियुवतेर्नित्यकैवल्यमुक्तिरूपायायुवतेर्द्वारं साधनमस्मात्तस्मात्सर्वत्र बाह्याभ्यन्तरविषयजातेऽस्पृहयाऽभिलापत्यागेन सदात्मनि ब्रह्मात्मनि श्रेयसे कैवल्याय परं केवलं प्रज्ञां समाधिं त्वं कुरु सम्पादय न युवतिषु दुःखदारिद्र्यागारेषु सुखभ्रान्त्या सलिलभ्रान्त्या कुरङ्गइव मरुषु कुसङ्गेन भ्रमेति भावः ॥ ३७६ ॥

वैराग्यात् । न । परम् । सुखस्य । जनकम्। पश्यामि । वश्यात्मनः । तत् । चेत् । शुद्धतरात्मबोधसहितम् । स्वाराज्यसाम्राज्यधुक् ॥ एतद् । द्वारम् । अजस्रमुक्तियुवतेः । यस्मात् । त्वम् । अस्मात् । परम् । सर्वत्र । अस्पृहया । सदात्मनि । सदा । प्रज्ञाम् । कुरु । श्रेयसे ॥ ३७६ ॥

जिसने चित्तको वश किया है उसको वैराग्यसे भिन्न कोई सुखका साधन नहीं देखता हूं । जेकर सो वैराग्य अतिशुद्ध आत्मज्ञानरूप ऐश्वर्ययुक्त होवै तौ सर्व आनन्द जिसमें अन्तभूत होते हैं ऐसा ब्रह्मानन्दरूप स्वर्गके राजा इन्द्रके ऐश्वर्यसमान सुखका भण्डार है तिसको प्राप्त करे है तिस कारण मांस

की पुतलीरूप युवती नारीके सुखभ्रमको और राज्यके सुखभ्रमको त्यागकर मुक्तिरूप वास्तव युवती नारी नित्य है, एक है, उसका यह साधन बोधसहित वैराग्य है। इस कारण तू सो बाह्य आन्तर विषयसमूहकी इच्छाको त्यागकर ब्रह्मात्मामें कैवल्य मोक्षके लिये समाधिप्रज्ञाको सम्पादन कर, सर्वकालमें विषयोंमें सुखभ्रमसे मत भ्रम ॥ ३७६ ॥

आशां छिन्द्धि विषोपमेषु विषयेष्वेषैव मृत्योः कृति-
स्त्यक्त्वा जातिकुलाश्रमेष्वभिमातिं मुञ्चातिदूरात्क्रियाः।
देहादावसति त्यजात्मधिषणां प्रज्ञां कुरुष्वात्मनि,
त्वं द्रष्टास्यमनोऽसि निर्द्वयपरं ब्रह्मासि यद्वस्तुतः ३७७

निराशाचेत्यभिहितं तद्विवृणोति। आशामिति।

विषोपमेषु विषवन्मृत्युप्रदेषु जायमानां स्वभावतआशां दुराशां छिन्द्धि निवर्तय विषयाशां माकार्षीरित्यर्थः। यतएषैव विषयाशैव मृत्योः कृतिराकृतिः मृत्युरेव विषयाशारूपेणान्तःस्फुरतीति भावः। तथैव जातिकुलाश्रमेषु बहुशोविवृतेष्वभिमतिमभिमानं मुञ्च त्यज तत्प्रयोज्याः क्रियाश्च सकामकर्माणि अतिदूरान्मुञ्च मनसापि न चिन्तय एवं देहादावसति मिथ्याभूते आत्मधिषणामात्मत्वमतिं त्यज आत्मनि च प्रज्ञां मतिं कुरुष्व सम्पादयस्व कीदृश्यात्मनि प्रज्ञा कर्तव्येत्याह त्वमिति। त्वं द्रष्टासि दृश्यासंस्पृश्यः साक्ष्यसीत्यर्थः। स्थूलदृश्यनिषेधमुक्त्वा मानसदृश्यनिषेधमाह अमनोसीति। सर्वमानसविकारवर्जितोसीत्यर्थः। कुतएतत् तत्राह निर्द्वयपरमिति। यद्यतोवस्तुतोनिरुपाधिस्वरूपेण निर्द्वयपरमद्वैतं सर्वतःपरं च ब्रह्मासि ततउक्तस्वरूपोसि तथाच निरुक्तस्वरूपोहमस्मीति प्रज्ञा कर्तव्येति भावः॥ ३७७॥

आशाम्। छिन्द्धि। विषोपमेषु। विषयेषु। एषा। एव। मृत्योः। कृतिः। त्यक्त्वा। जातिकुलाश्रमेषु। अभिमातिम्। मुञ्च। अतिदूरात्।

क्रियाः ॥ देहादौ । असति । त्यज । आत्ममधिषणाम् । प्रज्ञाम् । कुरुष्व । आत्मनि । त्वम् । द्रष्टा । असि । अमनः । असि । निर्द्वयपरम् । ब्रह्म । असि । यद् । वस्तुतः ॥ ३७७ ॥

निराशताका वर्णन करे हैं । आशाम् इति । विषके समान मृत्युके देने वाले विषयोंमें स्वभावसे उदय होनेवाली दुराशाको निवृत्त कर अर्थात् विषयोंकी आशा मत कर । जिस कारण यह विषयाशा ही मृत्युका रूप धारके देहके अन्तर बैठी है तैसेही जाति कुल आश्रमोंमें अभिमानको त्यागके उससे जन्य सकामकर्मोंको अतिदूरसे त्याग, उनका मनसे भी न चिन्तन कर, ऐसे मिथ्यारूप देहादिमें आत्मता बुद्धिको त्याग और आत्मामें प्रज्ञा कर, हे शिष्य ! तू साक्षी है, मनके सर्व विकारोंसे रहित है जिस कारण निरुपाधिरूपसे अद्वैतरूप है, वास्तवरूप तेरा ब्रह्म है सो अपने स्वरूपका निश्चय दृढ कर ॥ ३७७ ॥

लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येन्द्रियं,
स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम् ॥
ब्रह्मात्मैक्यमुपेत्य तन्मयतया चाखण्डवृत्त्याऽनिशं,
ब्रह्मानन्दरसं पिबात्मनि मुदा शून्यैः किमन्यैर्भृशम् ॥

सम्प्रति बाह्याभ्यन्तरभेदभिन्नं द्विविधां निरीहां विवृणोति । लक्ष्ये इति ।

लक्ष्ये निरुपाधिके ब्रह्मणि परमात्मनि मानसं मनो दृढतरं निश्चलं संस्थाप्य बाह्येन्द्रियं मनोभिन्नेन्द्रियसामान्यं स्वस्थाने स्वस्वगोलके विनिवेश्य संस्थाप्य निश्चलतनुर्बद्धस्थिरसुखाद्यासनः देहस्थितिं देहस्थितिः कथं मे स्यादिति चिन्तां तूपेक्ष्याकृत्वा प्रारब्धाधीनत्वाद्देहस्थितेरिति भावः । ब्रह्मात्मैक्यं स्वपराभेदमुपेत्य निश्चित्य तन्मयतया ब्रह्मात्मतयाऽखण्डवृत्त्या चिन्मात्रगोचरधीवृत्त्याऽनिशं सर्वदा

ब्रह्मानन्दरससमात्मनि स्वस्मिन् मुदा पिबानुभवान्यैरुक्तप्रकारविलक्षणैः शून्यैः श्रमैर्भृशमतिशयेनानुष्ठीयमानैरपि किं फलं न किमपि यत्किञ्चित्स्यात्तदपि भृशं किन्तु स्यान्न किन्तु तुच्छमेव फलं साधनान्तरेभ्यः स्यादिति भावः ॥ ३७८ ॥

लक्ष्ये । ब्रह्मणि । मानसम् । दृढतरम् । संस्थाप्य । बाह्येन्द्रियम् । स्वस्थाने । विनिवेश्य । निश्चलतनुः । च । उपेक्ष्य । देहस्थितिम् ॥ ब्रह्मात्मैक्यम् । उपेत्य । तन्मयतया । च । अखण्डवृत्त्या । अनिशम् । ब्रह्मानन्दरसम् । पिब । आत्मनि । मुदा । शून्यैः । किम् । अन्यैः । भृशम् ॥ ३७८ ॥

निरुपाधि ब्रह्ममें मनको निश्चल स्थापनकरके मनसे भिन्न सर्व इन्द्रियोंको अपने२ गोलकोंमें स्थापनकरके स्थिर सुख वा पद्मासनादि बाँधके, मेरी देहकी स्थिति कैसे होगी इस चिन्ताको न करके, जीव ब्रह्मके अभेदका निश्चयकरके ब्रह्मात्मरूप होकरके चेतनमात्र–विषयक बुद्धिकी वृत्तिकरके सर्वकालमें ब्रह्मानन्दरसको अपने आपमें हर्षकरके अनुभव कर । उक्तरीतिसे विलक्षण निष्फल दुःख देनेवाले साधनोंसे क्या फल होगा कुछभी नहीं, अगर कुछ होगा तो भी तुच्छ ही फल होगा, वास्तव सुखरूप फल तो ब्रह्मनिष्ठासे ही होगा ॥

अनात्मचिन्तनं त्यक्त्वा कश्मलं दुःखकारणम् ॥
चिन्तयात्मानमानन्दरूपं यन्मुक्तिकारणम् ॥ ३७९ ॥

उक्तमेव संक्षिप्य विवृणोति । अनात्मचिन्तनमिति ।

कश्मलं पापलक्षणं दुःखकारणं त्रिविधदुःखफलकमनात्मचिन्तनमनात्मनां देहादीनां चिन्तनं पोषणादिचिन्तां त्यक्त्वा हित्वा यद्यस्मान्मुक्तिकारणमतआनन्दरूपमात्मानं चिन्तयेत्यर्थः ॥ ३७९ ॥

अनात्मचिन्तनम् । त्यक्त्वा । कश्मलम् । दुःखकारणम् ॥ चिन्तय । आत्मानम् । आनन्दरूपम् । यत् । मुक्तिकारणम् ॥

उक्तका ही संक्षेपसे विवरण करे हैं । अनात्मचिन्तनम् इति। त्रिविध दुःखका कारण पापरूप देहादि अनात्माका चिन्तन है अर्थात् कैसे देहादिका पालन होगा इस चिन्ताको त्यागकर मुक्तिका साधन जो आत्माका चिन्तन है इसकारण आनन्द-रूप आत्माका चिन्तन कर ॥ ३७९ ॥

एषस्वयंज्योतिरशेषसाक्षी,
विज्ञानकोशोविलसत्यजस्रम् ॥
लक्ष्यं विधायैनमसद्विलक्षण-
मखण्डवृत्त्याऽऽत्मतयाऽनुभावय ॥ ३८० ॥

कथमतआह । एषइति ।

एषआत्मा स्वयंज्योतिः स्वप्रकाशः हेतुगर्भितं विशेषणमशेषसाक्षीति । उपलब्धिस्थानमाह विज्ञानकोशइति । विज्ञानं बुद्धिरेव कोश-उपलब्धिस्थानं यस्य सोऽजस्रं निरन्तरं विलसति एवमसद्विलक्षणं सद्रूपं लक्ष्यं विधाय धानुष्कइवैकाग्रचेतसा संचिन्त्य "प्रणवोधनुः शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते" इत्यादिश्रुतेः । अखण्डवृत्त्या तन्मात्रगोचरवृत्त्याऽऽत्मतया स्वाभेदेनानुभावय चिन्तयेत्यर्थः॥३८०॥

एषः । स्वयंज्योतिः । अशेषसाक्षी । विज्ञानकोशः । विलसति । अजस्रम् ॥ लक्ष्यम् । विधाय । एनम् । असद्विलक्षणम् । अखण्डवृत्त्या । आत्मतया । अनुभावय ॥ ३८० ॥

यह आत्मा स्वप्रकाश है इसी हेतुसे सर्वका साक्षीरूप है, बुद्धिरूप विज्ञानमय कोश ही जिसका प्राप्तिस्थान है इसीसे निरन्तर क्रीडा करे है, असत्से विलक्षण सत्रूपको धारण करके लक्ष्यरूप होकर वर्तमान है इसीको लक्ष्य (निशाना) करके एकाग्रचित्त करके चेतनमात्रको विषय करने वाली वृत्तिसे आत्माका अभेदरूपसे चिन्तन कर ॥ ३८० ॥

एतमच्छिन्नया वृत्त्या प्रत्ययान्तरशून्यया ॥
उल्लेखयन्विजानीयात्स्वस्वरूपतया स्फुटम्॥ ३८१ ॥

तथैवाह । एतमिति ।

अच्छिन्नया विच्छेदविधुरया अस्यैव विवरणं प्रत्ययान्तरशून्यया विजातीयप्रत्ययानन्तरितया एतमात्मानमुल्लेखयन् भावयन् स्वस्वरूपतया स्वात्मतया स्फुटमसन्दिग्धं यथा भवति तथा विजानीयात्साक्षात्कुर्य्यादित्यर्थः ॥ ३८१ ॥

एतम् । अच्छिन्नया । वृत्त्या । प्रत्ययान्तरशून्यया ॥ उल्लेखयन् । विजानीयात् । स्वस्वरूपतया । स्फुटम् ॥ ३८१ ॥

व्यवधानसे रहित जिसमें अन्य प्रतीतिका व्यवधान नहीं है इस प्रकार अखण्डवृत्तिकरके आत्माका चिन्तन करता हुवा संशयरहित आत्मरूपकरके ब्रह्मको जानो ॥ ३८१ ॥

अत्रात्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन् ॥
उदासीनतया तेषु तिष्ठेत्स्फुटघटादिवत् ॥ ३८२ ॥

तदेवोपपादयति । अत्रात्मत्वमिति ।

अत्र साक्ष्यात्मनि आत्मत्वमात्मभावनां दृढीकुर्वन् स्थिरीकुर्वन् अहमादिषु अहङ्कारादिविषयान्तेषु अहंममभावं च संत्यजन् व्यपोहमानः तेषु अहंदेहादिषु सकलेषु विकलेषु वा उदासीनतायां निदर्शनं स्फुटघटादिवदिति यथा घटादिषु मलपूर्णेषु त्यक्तेषु स्फुटितेषु सत्सु न शोचति न वा तेषां स्थित्यै यतते विवेकी किन्तु स्वयमुदासीनतया हर्षविषादराहित्येन तिष्ठति तद्वद्देहाद्यनात्मसु कामपिव्यवस्थामापन्नेषु स्वयमुदासीनतया हर्षविषादराहित्येन तिष्ठेदित्यर्थः ॥ ३८२ ॥

अत्र । आत्मत्वम् । दृढीकुर्वन् । अहमादिषु । संत्यजन् ॥ उदासीनतया । तेषु । तिष्ठेत् । स्फुटघटादिवत् ॥ ३८२ ॥

साक्षीरूप आत्मामें आत्मभावनाको दृढ स्थिर करता हुवा

अन्तःकरणादि अनात्मरूप जगत्में अहंता ममताका त्याग करता हुवा जैसें मलपूर्ण घटके त्यागने पीछे उसके फूटनेसे शोक नहीं करता और उसकी स्थितिके वास्ते यत्न नहीं करता तैसेंही अहंकारादि अनात्म देहान्त पदार्थ अनात्मभावना से त्यागे हुवोंमें इनके सुखी दुःखी न्यून अधिक जीवन मरणादिमें उदासीन वृत्ति धारके जो स्थित होवै है सो पुरुषही जीवन्मुक्त है ऐसा तुमको भी होना योग्य है ॥ ३८२ ॥

विशुद्धमन्तःकरणं स्वरूपे,
निवेश्य साक्षिण्यवबोधमात्रे ॥
शनैः शनैर्निश्चलतामुपानयन्,
पूर्णं स्वमेवानुविलोकयेत्ततः ॥ ३८३ ॥

आत्मावलोकनप्रकारमाह । विशुद्धमिति ।

विशुद्धं विध्वस्तरजस्तमस्कमन्तःकरणं मानसं साक्षिण्यवबोधमात्रे स्वरूपे चिदात्मनि निवेश्य निरुद्धं संस्थाप्य शनैः शनैरतिधैर्य्येण निश्चलतां स्थिरतामुपानयन् प्रापयन् ततश्चित्तस्थितेरनुपश्चात् पूर्णमपरिच्छिन्नं स्वमात्मानमेव विलोकयेत् साक्षात्कुर्य्यात् ३८३

विशुद्धम् । अन्तःकरणम् । स्वरूपे । निवेश्य । साक्षिणि । अवबोधमात्रे ॥ शनैः । शनैः । निश्चलताम् । उपानयन् । पूर्णम् । स्वम् । एव । अनु । विलोकयेत् । ततः ॥ ३८३ ॥

(आत्माके देखनेका प्रकार कहे हैं । विशुद्धम् इति ।) रजोगुण तमोगुण जिसका निवृत्त हुवा है ऐसे मनको साक्षी ज्ञानमात्र चेतन आत्मामें प्रवेशकरके धीरे२ स्थिरताको प्राप्त करता हुवा चित्तकी स्थितिके अनन्तर अपरिच्छिन्न अपने आत्माका साक्षात्कार करे ॥ ३८३ ॥

देहेन्द्रियप्राणमनोहमादिभिः,
स्वाज्ञानक्लृप्तैरखिलैरुपाधिभिः ॥
विमुक्तमात्मानमखण्डरूपं,
पूर्णं महाकाशमिवावलोकयेत् ॥ ३८४ ॥

उक्तं पूर्णशब्दं विवृणोति। देहेन्द्रियेति।
स्वाज्ञानक्लृप्तैरात्माज्ञानकल्पितैर्देहेन्द्रियप्राणमनोहमादिभिरखिलैरुपाधिभिर्विमुक्तं वर्जितमात्मानमखण्डरूपं केवलं महाकाशमिवापरिच्छिन्नं पूर्णमवलोकयेदिति पूर्ववत् ॥ ३८४ ॥

देहेन्द्रियप्राणमनोहमादिभिः। स्वाज्ञानक्लृप्तैः। अखिलैः। उपाधिभिः॥ विमुक्तम्। आत्मानम्। अखण्डरूपम्। पूर्णम्। महाकाशम्। इव। अवलोकयेत् ॥ ३८४ ॥

पूर्ण शब्दका विवरण करे हैं। देहेन्द्रियइति। आत्माके अज्ञानसे कल्पित, देह इन्द्रिय प्राण मन अहंकारादि सर्व उपाधियोंसे वर्जित, आत्माको अखण्डरूप केवल महाकाशवत् अपरिच्छिन्न पूर्ण देखो ॥ ३८४ ॥

घटकलशकुसूलसूचिमुख्यै-
र्गगनमुपाधिशतैर्विमुक्तमेकम् ॥
भवति न विविधं तथैव शुद्धं,
परमहमादिविमुक्तमेकमेव ॥ ३८५ ॥

महाकाशमिवेत्युक्तं विवृणोति। घटकलशेति।
यथा गगनं नभोघटकलशकुसूलसूचिमुख्यैरुपाधिशतैर्विविधमनेकरूपनामतया व्यवहृतमपि तत्र घटकलशेति नाममात्रेणोपाधेरपि भेदस्तयोः पर्यायत्वादेतत्सूचनायैव घटकलशशब्दयोः पर्याययोरप्युपादानं साधु। तैरभिहितोपाधिभिर्विमुक्तमेकं न विविधं भवति। तथैवाहं देहाद्युपाधिभिर्विविधं भातमपि परं ब्रह्माहमादिविमुक्त-

मद्दं देहाद्युपाधिवर्जितमेकमेव न विविधमित्यर्थः ॥ ३८९ ॥

घटकलशकुसूलसूचिमुख्यैः । गगनम् । उपाधिशतैः । विमुक्तम् । एकम् ॥ भवति । न । विविधम् । तथा । एवं । शुद्धम् । परम् । अहमादिविमुक्तम् । एकम् । एव ॥ ३८५ ॥

महाकाश दृष्टान्तका आशय वर्णन करे हैं । घट इति । जैसे आकाश घट कलश कुसूल सूचि आदि नाना उपाधिकरके तिस२ नाम रूपसे व्यवहारको प्राप्त होवै है तौ भी वास्तव से एक है, उपाधियोंसे रहित है, नाना नहीं है, तैसें ही अन्तःकरण देहादि उपाधियोंकरके नानारूपसे प्रतीत हुवा भी ब्रह्म अन्तःकरण देहादि उपाधिसे रहित, शुद्धस्वरूप वास्तव से एकरूप है, नानारूप नहीं है परब्रह्म परमात्मा ॥ ३८५ ॥

ब्रह्मादिस्तम्बपर्य्यन्तामृषामात्राउपाधयः ॥
ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम् ३८६

सूचितं नाममात्रेणोपाधेरपि मिथ्यात्वमाविष्करोति । ब्रह्मादीति । ब्रह्मादिस्तम्बपर्यन्ताः । विरिञ्चिदेहमारभ्य स्तम्बदेहान्ताउपाधयोमृषामात्रामृषैवेत्यर्थः । तेषां मिथ्यात्वेनाभावे फलितमाह तत इति । ततउपाधीनां मिथ्यात्वेनाभावात् पूर्णमपरिच्छिन्नं परिच्छेदहेत्वभावात्स्वमात्मानमेकात्मनाऽद्वैतरूपेण स्थितमवस्थितं पश्येदित्यर्थः ॥ ३८६ ॥

ब्रह्मादिस्तम्बपर्यन्ताः । मृषामात्राः । उपाधयः ॥ ततः । पूर्णम् । स्वम् । आत्मानम् । पश्येद् । एकात्मना । स्थितम् ॥

उपाधिको मिथ्यात्वरूपसे वर्णन करे हैं । ब्रह्मादि इति । ब्रह्माकी देहसे लेकर सर्व जीवोंसे छोटा सूक्ष्म स्तम्ब नामक जीव देहपर्यन्त उपाधि सर्व मिथ्या ही है। इस कारण उपाधियोंको मिथ्या होनेसे, अभाव होनेसे, परिच्छेद हेतुको न होनेसे,

अपने आत्माको अद्वैतरूप करके स्थित हुवेको अपरिच्छिन्न देखना चाहिये ॥ ३८६ ॥

यत्र भ्रान्त्या कल्पितं तद्विवेके,
तत्तन्मात्रं नैव तस्माद् विभिन्नम् ॥
भ्रान्तेर्नाशे भाति दृष्टाहितत्वं,
रज्जुस्तद्वद्विश्वमात्मस्वरूपम् ॥ ३८७ ॥

आत्मनएवैकत्वस्य सत्त्वे जगद्भानं व्यवस्थापनीयमतआह । यत्रेति । यद्वस्तु यत्राधिष्ठाने भ्रान्त्याऽधिष्ठानाज्ञानेन कल्पितमारोपितं तद्वस्तु तद्विवेके अधिष्ठानस्य विविक्तस्वरूपसाक्षात्कारे सति तस्मादधिष्ठानाद्विभिन्नं नैव भाति किन्तु तन्मात्रमधिष्ठानमात्रं भाति । सामान्यव्याप्तिं विशेषे उपसंहरति भ्रान्तेरिति । यथा भ्रान्तेरज्जुसर्पभ्रान्तेर्नाशेऽधिष्ठानसाक्षात्कारेणापवादे दृष्टाहितत्वं भ्रमदृष्टं यदहितत्वं सर्पस्वरूपं तत्तु रज्जुरधिष्ठानभूतं रज्जुस्वरूपमेव भाति नाधिष्ठानादहिरतिरिच्य दृश्यते तद्वत् तथा विश्वमात्मनि कल्पितमधिष्ठानैकत्वसाक्षात्कारेण भ्रमे निवृत्ते सत्यात्मस्वरूपमेवावशिष्यते न किञ्चिदपि ततोऽतिरिच्यते तथाच विश्वभानमाविद्यकमात्मैकत्वभानन्तु वास्तवमिति भावः ॥ ३८७ ॥

यत्र । भ्रान्त्या । कल्पितम् । तद्विवेके । तत् । तन्मात्रम् । न । एव । तस्माद् । विभिन्नम् ॥ भ्रान्तेः । नाशे । भाति । दृष्टाहितत्वम् । रज्जुः । तद्वद् । विश्वम् । आत्मस्वरूपम् ३८७

एक आत्माको ही सत्य मानोगे तो जगत्प्रतीतिकी व्यवस्था क्या होगी इस शङ्काको निवारण करे हैं । यत्र इति । जो वस्तु जिस अधिष्ठानमें अधिष्ठानके अज्ञानकरके आरोपित है सो वस्तु अधिष्ठानका अध्यस्तसे पृथक् होकर साक्षात्कार होने पर तिस अधिष्ठानसे भिन्न नहीं प्रतीत होती

१ भ्रान्तिदृष्टाहितत्वमिति पाठं केचिन्मन्यन्ते ।

किन्तु अधिष्ठानमात्र ही प्रतीत होवै है जैसे कि रज्जु सर्प-भ्रान्तिके अधिष्ठान रज्जुसाक्षात्कारसे निषेध होनेपर भ्रम से देखा जो सर्पस्वरूप सो अधिष्ठान रज्जुस्वरूप ही प्रतीत होवै है, अधिष्ठान रज्जुसे सर्प भिन्न नहीं प्रतीत देता है तैसे ही जगत् आत्मामें कल्पित है, अधिष्ठान ब्रह्मके एकत्व साक्षात्कारसे भ्रमके निवृत्त होनेपर आत्माका स्वरूप ही पीछे दीखै है, अधिष्ठानसे जुदा कुछ नहीं दीखता इसकारण जगत्का भान अविद्याकृत है, आत्माके एकत्वका भान वास्तव है ३८७

स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः ॥
स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किञ्चन ३८८

नन्वात्मनएकत्वे ब्रह्मादिदेवभेदः कथं नहि देवाअपि कल्पितामन्तुमुचिता येनाधिष्ठानान्नातिरिच्येरन्नतआह । स्वयमिति ।

स्वयमात्मैव ब्रह्मा विरिञ्चिः स्वयमेव च विष्णुरिन्द्रः शिवश्च एते देवास्तथाऽन्येपि बृहस्पत्यादयस्तदात्मानएव ततोभेदेनैषामपि मृषात्वात् । नहि ब्रह्मादिदेहानाविद्याविलासायेन मृषात्मतां न गच्छेयुस्तस्मादात्मैव शैलूषवन्नाना देवमनुष्यादिरूपेण भातीत्यर्थः । किंचेदं विश्वं जगत्सर्वं स्थावरं जङ्गमं च स्वस्मादात्मनोन्यन्न किञ्चनाणुमात्रमपीत्यर्थः। "सब्रह्मा सशिवः सेन्द्रः सोऽक्षरः परमः स्वराट् । सएव विष्णुः सप्राणः सकालाग्निः सचन्द्रमाः ॥" सएव सर्वं यद्भूतं यच्च भाव्यं सनातनम् । ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये" इतिश्रुत्यर्थोऽत्र वर्णितः ॥ ३८८ ॥

स्वयम् । ब्रह्मा । स्वयम् । विष्णुः । स्वयम् । इन्द्रः । स्वयम् । शिवः ॥ स्वयम् । विश्वम् । इदम् । सर्वम् । स्वस्माद् । अन्यत् । न । किञ्चन ॥ ३८८ ॥

आत्माकी ही एकताको मानोगे तो ब्रह्मा विष्णु आदि भेद व्यवहार कैसे बनेगा इस शङ्काका उत्तर कहे हैं । स्वयम् इति ॥

स्वयम् आत्मा ही ब्रह्मा चतुर्मुख है, आत्मा ही चतुर्भुज विष्णु है, आत्मा ही देवराज इन्द्र है, आत्मा ही शङ्कररूप है, यह देवता तैसेही बृहस्पति आदि अन्य देवता भी आत्मा ही हैं जैसे एक नट नानारूप रंगभूमिमें दिखावे है तैसे एक आत्मा ही स्थावर जंगमरूप होकर दीखे है, आत्मासे भिन्न लेशमात्र भी नहीं है ॥ ३८८ ॥

अन्तः स्वयं चापि बहिः स्वयं च,
स्वयं पुरस्तात् स्वयमेव पश्चात् ॥
स्वयं ह्यवाच्यां स्वयमप्युदीच्यां,
तथोपरिष्टात्स्वयमप्यधस्तात् ॥३८९॥

अत्रैव श्रुत्यन्तरार्थमुपनिबध्नाति। अन्तरिति।

अन्तः स्वप्नादौ मनोरथादौ च भातं मानसमाविद्यकं वा जगत्स्वयमात्मैव तथा बहिर्जागरे दृश्यमानं स्थूलं च स्वयं पुरस्तात्पूर्वस्यां दिशि दृश्यमानं पश्चात्पश्चिमायां जगत् तथाऽवाच्यां दक्षिणायां तथोदीच्यामुत्तरदिशि। उपरिष्टादन्तरिक्षस्वर्गादौ तथाऽधस्तात्पातालादौ च वर्तमानं जगत् स्वयमात्मैव नान्यत्ततइत्यर्थः। "तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः" "अथात आदेश आत्मैवाधस्तादात्मोपरिष्टादात्मापश्चादात्मापुरस्तादात्मादक्षिणत आत्मोत्तरत आत्मैवेदं सर्वम्" इति श्रुत्यर्थोत्र वर्णितः॥ ३८९ ॥

अन्तः। स्वयम्। च। अपि। बहिः। स्वयम्। च। स्वयम्। पुरस्तात्। स्वयम्। एव। पश्चात्॥ स्वयम्। हि। अवाच्याम्। स्वयम्। अपि। उदीच्याम्। तथा। उपरिष्टात्। स्वयम्। अपि। अधस्तात् ॥ ३८९ ॥

स्वप्न मनोरथमें प्रतीत जगत् मानसिक वा आविद्यक सर्व आत्मा ही है तैसे जाग्रत्में दीखता स्थूल प्रपंच आत्मा है, पूर्व दिशामें स्थित पदार्थ आत्मा है और पश्चिम दिशामें स्थित

पदार्थ आत्मा ही हैं तैसे ही दक्षिणदिशामें स्थित आत्मा है, उत्तर दिशामें स्थित आत्मा है तैसेही ऊपर स्वर्ग अन्तरिक्षमें स्थित और पातालादिमें स्थित सर्व पदार्थ आत्मा ही हैं॥३८९॥

तरङ्गफेनभ्रमबुद्बुदादि,
सर्वं स्वरूपेण जलं यथा तथा ॥
चिदेव देहाद्यहमन्तमेतत्,
सर्वं चिदेवैकरसं विशुद्धम् ॥ ३९० ॥

औतमर्थं दृष्टान्तेन स्फोरयति । तरङ्गेत्यादिना ।

यथा तरङ्गफेनभ्रमबुद्बुदादि वीचिफेनावर्त्तबुद्बुदादि सर्वं स्वरूपेण जलमेव नान्यत्तथा देहाद्यहमन्तं देहाद्यहङ्कारान्तं चिदेव तथैतत्सर्वं शब्दादिविषयजातमेकरसं विशुद्धं निर्मलं चिदेव चितो नातिरिच्यते किञ्चिदपि जगदित्यर्थः ॥ ३९० ॥

तरङ्गफेनभ्रमबुद्बुदादि । सर्वम् । स्वरूपेण । जलम् । यथा। तथा ॥ चिद् । एव । देहाद्यहमन्तम् । एतत् । सर्वम् । चिद् । एव । एकरसम् । विशुद्धम् ॥ ३९० ॥

श्रुतिउक्त अर्थको दृष्टान्तकरके स्पष्ट करे हैं । तरङ्गइति । जैसे तरंग फेन आवर्त बुद्बुदे आदि सर्व जलके अंशस्वरूप करके जलही है अन्य नहीं है तैसें ही देहसे आदि अहंकार पर्यन्त चेतनरूप ही है और शब्दादि विषयसमूह सर्व एकरस निर्मल चेतनरूप ही है, चेतनसे अतिरिक्त कुछ नहीं है ३९०

सदेवेदं सर्वं जगदवगतं वाङ्मनसयोः,
सतोऽन्यन्नास्त्येव प्रकृतिपरसीम्नि स्थितवतः ॥
पृथक् किं मृत्स्नायाः कलशघटकुम्भाद्यवगतं,
वदत्येषभ्रान्तस्त्वमहमिति मायामदिरया॥३९१॥

अत्र "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयम्" इति श्रुतिमर्थतः प्रमाणयति। सदेवेदमिति।

वाङ्मनसयोः संबन्धसामान्ये षष्ठी भजे शम्भोश्चरणयोरितिवत्। तथाच वाङ्मनससम्बन्धितयाऽवगतं ज्ञातमित्यर्थः। जगत् सर्वमनात्मजातमित्यर्थः। सदेव ब्रह्मैव प्रकृतिपरसीम्नि स्वभावेनैव परकाष्ठात्मनि "सा काष्ठा सा परागतिः" इति श्रुतेः। स्थितवतोऽवतिष्ठमानात्सतोब्रह्मणोऽन्यद्भिन्नमिदं नास्त्येव। अत्र दृष्टान्तमाह पृथगिति। घटकलशकुम्भाद्यवगतं घटादिशब्दैरवगतं ज्ञातं मृत्स्नायाः किं पृथगपितु नेत्यर्थस्तथाच यथैकमेव घटस्वरूपं घटकलशकुम्भकुटादिशब्दैः पर्य्यायैरभिधीयते नहि शब्दभेदेनात्र व्यक्तिभेदं भेदवादिनोपि मन्यन्ते तथैव सर्वं जगत्तत्तच्छब्दैरभिधीयमानमपि न सतोऽन्यदिति भावः। ननु जगतोब्रह्मविवर्तत्वेन ब्रह्ममात्रत्वेपि जीवानां त्वमहमादिशब्दैरभिधीयमानानामब्रह्मविवर्तानां ब्रह्मणोभेद एव स्यादिति चेत्तत्राह वदतीति। मायामदिरया मायारूपया मोहिन्योन्मादकरत्वेन सुरासमानयाऽऽवृतमतिस्तु एषभ्रान्तोमूढस्त्वमहमिति वदति। न मायापरब्रह्मनिष्ठइत्यर्थः। तथाच जीवत्वादेरपि कल्पितत्वस्य पूर्वमुपपादितत्वात्त्वहमहमादयोपि शब्दाएव भिद्यन्ते नात्माधिष्ठानातिरेकेणाभावादित्यर्थः॥ ३९१॥

सद्। एव। इदम्। सर्वम्। जगद्। अवगतम्। वाङ्मनसयोः। सतः। अन्यत्। न। अस्ति। एव। प्रकृतिपरसीम्नि। स्थितवतः॥ पृथक्। किम्। मृत्स्नायाः। कलशघटकुम्भादि। अवगतम्। वदति। एषः। भ्रान्तः। त्वम्। अहम्। इति। मायामदिरया॥ ३९१॥

इसी वार्ताको श्रुतिके अर्थ संग मिलावे हैं।सतइति। मनवाणीसे जो जाना है,अनात्मरूप सर्व जगत् सो सर्व ब्रह्म ही है। मायासे परे अपनी महिमामें स्थित जो सत्रूप परमात्मा है तिस ब्रह्मसे अन्य नहीं है, घट कलश कुम्भादि पदोंसे जो व्यक्ति ज्ञात होवे है सो क्या मृत्तिकाके स्वरूपसे भिन्न होसके

है अर्थात् नहीं तैसे जगत् आत्मासे भिन्न नहीं है और यह जीव भ्रमको[19] प्राप्त हुवा हुवा तूं मेरेसे भिन्न है मैं[21] तेरेसे भिन्न हूं ऐसे[22] मायारूप[23] मदिराकी मस्तीमें मग्न होकर बकता[24] है सो बकवाद मिथ्या है, भेदसाधक नहीं है ॥ ३९१ ॥

क्रियासमभिहारेण यत्र नान्यदिति श्रुतिः ॥
ब्रवीति द्वैतराहित्यं मिथ्याध्यासनिवृत्तये ॥ ३९२ ॥

इममेवार्थं श्रौतं कर्तुमाह । क्रियेति ।

यत्र सति नान्यदिति क्रियासमभिहारेण नान्यदितिशब्दस्यान्यत्वनिषेधार्थकस्य क्रियासमभिहारेण पौनःपुन्येनाभिधानेन श्रुतिः "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति सभूमा" इति श्रुतिः मिथ्याध्यासनिवृत्तये मिथ्याभूतस्य द्रष्ट्रादिभेदस्य योऽध्यासोभ्रमस्तन्निवृत्तये द्वैतराहित्यमद्वैतमेव तत्त्वं ब्रवीति तस्मात्त्वमहमादिवदनं भ्रान्तिनिमित्तकमेवेति भावः ॥ ३९२ ॥

क्रियासमभिहारेण । यत्र । न । अन्यद् । इति । श्रुतिः ॥ ब्रवीति । द्वैतराहित्यम् । मिथ्याध्यासनिवृत्तये ॥ ३९२ ॥

जिस ब्रह्ममें अन्य कोई पदार्थ नहीं है, ब्रह्म अद्वैत निर्विशेष है, इस प्रकारकी श्रुति पुनः पुनः अन्यताका अभाव कहे है उसका यह ही प्रयोजन है कि जीवको मिथ्याभेदका भ्रम जो होरहा है सो निवृत्त होजावे इसकारण भेद मिथ्या है ३९२

आकाशवन्निर्मलनिर्विकल्पं,
निःसीमनिष्पन्दननिर्विकारम् ॥
अन्तर्बहिः शून्यमनन्यमद्वयं,
स्वयं परं ब्रह्म किमस्ति बोद्धव्यम् ॥ ३९३ ॥

ननु बोद्धृबोद्धव्यभावस्य भवताप्यभ्युपगमाद्भेदसिद्धिर्नहि बोद्धैव बोद्धव्योभवति घटबोधुर्घटाद्भेददृष्टेरतआह । आकाशवदिति ।

सत्यं बोद्धृबोद्धव्यभावोभेदाधीनः सोपि त्वत्र कल्पितोवास्तवस्तु सिद्धान्तोयमाकाशवदाकाशनिभं निर्मलनिर्विकल्पं शुद्धं भेदकल्पनाविनिर्मुक्तं चेत्यर्थः। एवमाकाशवदेव सर्वगतं नित्यञ्चेत्यपि बोद्धयम्। निःसीमनिर्गतावधिकमपारमित्यर्थः। निष्पन्दननिर्विकारं निष्क्रियं कूटस्थं चेत्यर्थः। अन्तर्बहिः शून्यमान्तरबाह्यकल्पनाविकलम्। अनन्यं वस्तुपरिच्छेदहीनमद्वयं द्वैतवार्जितं परब्रह्मैवायं स्वयं किं बोध्यं बोद्धृभिन्नमस्ति नास्तीत्यर्थः। घटतद्बोद्धोस्तु जडचेतनयोः परस्परविरुद्धधर्मवतोः स्याद्भेदोऽत्र तु बोध्यस्वरूपएव बोद्धा न ततोऽन्यः "सयोह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेरिति भावः॥ ३९३॥

आकाशवत्। निर्मलनिर्विकल्पम्। निःसीमं। निष्पन्दननिर्विकारम्॥ अन्तर्बहिःशून्यम्। अनन्यम्। अद्वयम्। स्वयम्। परम्। ब्रह्म। किम्। अस्ति। बोद्धयम्॥ ३९३॥

परब्रह्म आकाशके समान निर्मल है, निर्विकल्प है, निरवधि है, निष्क्रिय है, निर्विकार है, बाह्य आन्तर कल्पनासे रहित है, सर्वात्मा अद्वैत है सोहि हमारा आत्मा है उससे भिन्न बोध्य वस्तु कोई नहीं है वह आपही बोद्धा है आपही बोध्य है॥

वक्तव्यं किमु विद्यतेऽत्र बहुधा ब्रह्मैव,जीवः स्वयं,
ब्रह्मैतज्जगदाततं नु सकलं ब्रह्माद्वितीयं श्रुतिः॥
ब्रह्मैवाहमिति प्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं,
ब्रह्मीभूय वसन्ति सन्ततचिदानन्दात्मनैतद्ध्रुवम्॥

उपसंहरति।

अत्र ब्रह्मणि जीवाभेदविषये बहुधा किमु वक्तव्यं न बहुवक्तव्यमस्ति जीवः स्वयं ब्रह्मैवेनयाततं विस्तृतं सकलं जगदपि ब्रह्मैव। यतः श्रुतिरद्वितीयं ब्रह्मेत्युपदिशति"एकमेवाद्वितीय"मिति श्रुतिस्वरूपम्। तथा विद्वदनुभवोपि प्रमाणमित्याह। ब्रह्मैवाहमितीति। संत्यक्तबाह्याः संन्यस्तदारागारादयः। ब्रह्मैवाहमिति प्रबुद्धमतयोऽहं

ब्रह्मैवास्मि न जीवइत्येवं रूपेण प्रबुद्धाऽविद्यानिद्रामुन्मुच्य बोधजागरमापन्नामतिर्येषां ते तथा ते ब्रह्मीभूय सन्ततचिदानन्दात्मना नित्यानन्दचिदात्मस्वरूपेण स्फुटं निःसन्दिग्धं वसन्ति तिष्ठन्ति तदेतत्तेषां विज्ञानं ध्रुवं निश्चलमबाध्यमित्यर्थः ॥ ३६४ ॥

वक्तव्यम्। किम्। नु। विद्यते। अत्र। बहुधा। ब्रह्म। एव। जीवः। स्वयम्। ब्रह्म। एतद्। जगद्। आततम्। नु। सकलम्। ब्रह्म। अद्वितीयम्। श्रुतिः॥ ब्रह्म। एव। अहम्। इति। प्रबुद्धमतयः। संत्यक्तबाह्याः। स्फुटम्। ब्रह्मीभूय। वसन्ति। सन्ततचिदानन्दात्मना। एतद्। ध्रुवम्॥ ३६४॥

यहां बहुता कहनेकी आवश्यकता क्या है, कुछ नहीं है, जीव स्वयं ब्रह्म ही है और यह जो विस्तृत जगत् है सोभी सर्व अद्वैत ब्रह्म है ऐसी वेदकी वाणी उपदेश करती है और मैं ब्रह्म हूं ऐसी जिनकी निश्चितबोध वाली बुद्धि हुई है और बाह्य दृष्टिका जिन्होंने त्याग करदिया है सो स्पष्ट ही निरन्तर चेतन आत्माका स्वरूप होकर ब्रह्मनिष्ठाको प्राप्त होकर वर्तमान होते हैं यह निश्चय आवश्यक है॥ ३६४ ॥

जहि मलमयकोशेऽहंधियोत्थापिताशां,
प्रसभमनिलकल्पे लिङ्गदेहेपि पश्चात्॥
निगमगदितकीर्तिं नित्यमानन्दमूर्तिं,
स्वयमिति परिचीय ब्रह्मरूपेण तिष्ठ ॥३६५॥

ब्रह्मीभूय वसन्तीत्युक्तमेव स्फुटं ग्राहयितुं योगद्वारमुपसंहरति। जहीति।

मलमयकोशे मलेन पूर्णे स्थूलशरीरेऽहंधियोत्थापिताशामहंबुद्ध्युत्पादितामात्मत्वाभिमतिं जहि विनाशय। हन्हिंसागत्योरिति धातुपाठात्। त्यजेति विवरणन्तु धात्वर्थविरुद्धम्। पश्चात् स्थूला-

भिमानतिरोधानानन्तरमनिलकल्पे समीरणवदतिचपले क्षणभङ्गुरे लिङ्गदेहेपि तां प्रसभं बलात्कारेण जहि। किञ्च निगमगदितकीर्तिं निगमैर्वेदान्तैर्गदिता उपदिष्टा कीर्तिः "स्वे महिम्नि प्रतिष्ठितः" इत्यादिरूपा यस्य तं नित्यमविनाशिनमानन्दमूर्तिमानन्दस्वरूपं परमात्मानं स्वयमात्मरूपेण परिचीय निश्चीय ब्रह्मरूपेण निश्चलानिर्विकारतया तिष्ठेत्यर्थः॥ ३६५।

जहि। मलमयकोशे। अहंधिया। उत्थापिताशाम्। प्रसभम्। अनिलकल्पे। लिङ्गदेहे। अपि। पश्चात्॥ निगमगदितकीर्तिम्। नित्यम्। आनन्दमूर्तिम्। स्वयम्। इति। परिचीय। ब्रह्मरूपेण। तिष्ठ॥ ३६५॥

हे शिष्य! मलपूर्ण स्थूल शरीरमें अहंताबुद्धिकरके उत्पन्न हुई आशाका बलात्कारसे नाश कर, अनन्तर वायुके वत् अतिचंचल लिङ्ग देहमें भी आशाका नाश करो। निगमकरके कथित महिमा जिसकी और नित्य है, आनन्दस्वरूप ब्रह्मको अपना आत्मा निश्चयकरके ब्रह्मरूप होकर स्थित हो अर्थात् ब्रह्मनिष्ठ होकर बर्तो॥ ३६५॥

शवाकारं यावद्भजति मनुजस्तावदशुचिः,
परेभ्यः स्यात्क्लेशोजननमरणव्याधिनिलयः॥
यदात्मानं शुद्धं कलयति शिवाकारमचलम्,
तदा तेभ्योमुक्तोभवति हि तदाह श्रुतिरपि॥ ३६६॥

अभिहितमर्थं श्रौतं कर्तुमाचष्टे। शवाकारमिति।

मनुजोमनुष्योयावच्छवाकारं शवस्वरूपं देहं भजति तत्राहंमत्याऽऽसक्तोभवति तावदशुचिरपहतपाप्माऽऽत्मा न भवति तदा च जननमरणव्याधिनिलयोजन्मजरामृत्युरोगनिमित्तकः परेभ्यः शत्रुभ्यः पुत्रमित्रादिभ्यश्च देहसम्बन्धिभ्यः क्लेशः स्यात् तेषां वैकल्यादिना स्ववैकल्याद्यभिमानेन दुःखं भवेदित्यर्थः। यथा स्पृष्टशवोऽन्यैस्तिरस्क्रियते तथा देहाभिमान्यन्यैरभिभूयतइत्यर्थः। यदा चात्मानं

१ बहुव्रीहिसमासेन शवस्पर्शकर्ता।

शुद्धमपहतपाप्मानं "य आत्माऽपहतपाप्मा" इति श्रुतेः । अचलं निर्विकारं शिवाकारं परमानन्दलक्षणं ब्रह्मकलयन् अभेदेनानुसंधत्ते तदा तेभ्योजन्मादिक्लेशेभ्योहि मुक्तोभवति । नायमपूर्वोर्थः किन्तु श्रुतिसिद्धइत्याह श्रुतिरपि 'मघवन्मर्त्यं वाइदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तोवै सशरीरः प्रियाप्रियाभ्यां न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ।' इत्येवं रूपा श्रुतिरपि तच्छरीरस्य मर्त्यत्वमाह शरीराभिमानरहितस्य चामृतत्वमाहेत्यर्थः ॥ ३९६ ॥

शवाकारम् । यावद् । भजति । मनुजः । तावद् । अशुचिः । परेभ्यः । स्यात् । क्लेशः । जननमरणव्याधिनिलयः ॥ यदा । आत्मानम् । शुद्धम् । कलयति । शिवाकारम् । अचलम् । तदा । तेभ्यः । मुक्तः । भवति । हि । तद् । आह । श्रुतिः । अपि ॥ ३९६ ॥

यह पुरुष जबतक शव (मुरदा) रूप देहमें अहंता करता है तब तक पापरहित नहीं होता और जन्म जरा मृत्यु रोगानिमित्तसे पुत्र मित्र शत्रुओंसे क्लेश प्राप्त होता है जैसे शवके स्पर्शसे दुःख होता है तैसे ही देहमें अभिमानके संबन्धसे अन्य पुरुष दुःख देते हैं और जब आत्माको पापरहित निर्विकार शिवरूप परम आनन्द स्वभाव ब्रह्म जानता है तब जन्मादि क्लेशों से छूट जाता है, इसी वार्ताको छांदोग्य उपनिषद्में श्रुति भी कहती है, प्रजापति कहते हैं हे इन्द्र ! यह शरीर आसक्तिरूप मृत्युकरके ग्रस्त है ॥ ३९६ ॥

स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः ॥
स्वयमेव परंब्रह्म पूर्णमद्वयमाक्रियम् ॥३९७॥

आरोपनिमित्तकमेवाब्रह्मत्वं तन्निवृत्तौ ततोयत्नोविधेयइत्याह । स्वात्मनीति ।

स्वात्मनि प्रतीचि आरोपितस्याशेषस्य भासवस्तुनः प्रतिभासमात्र-

शरीरस्याहमादेर्निरासतोनिषेधतः परं ब्रह्माद्वयमक्रियं स्वयमेवात्मरूपेणैव स्फुरति नान्यत्वं भजतइत्यर्थः ॥ ३९७ ॥

स्वात्मनि । आरोपिताशेषाभासवस्तुनिरासतः ॥ स्वयम् । एव । परम् । ब्रह्म । पूर्णम् । अद्वयम् । अक्रियम् ॥ ३९७ ॥

साक्षीरूप आत्मामें आरोपित सर्वप्रातिभासिक अहंकार आदिके निषेधसे अक्रिय पर ब्रह्म पूर्ण अद्वैत आत्मका रूप करकें ही प्रतीत होवै है, अन्यत्वकी प्रतीति भ्रमसे हुई थी भ्रम के नाशसे भेद नहीं रहता है ॥३९७॥

समाहितायां सति चित्तवृत्तौ,
परात्मनि ब्रह्मणि निर्विकल्पे ॥
न दृश्यते कश्चिदयं विकल्पः,
प्रजल्पमात्रः परिशिष्यते यतः ॥ ३९८ ॥

सत्यपि समाधौ जगद्दृश्यतएवेति शङ्कां निवारयन् समाधानफलमाह । समाहितायामिति ।

सति ब्रह्मणि निर्विकल्पे परात्मनि देहादिपरे प्रतीचि ब्रह्मणि चित्तवृत्तौ समाहितायां सत्यां निर्विकल्पसमाधिसिद्धावित्यर्थः।तदाऽयं विकल्पोनामरूपाधिकल्पः कश्चिदपि न दृश्यते किन्तु प्रजल्पमात्रः कथनमात्रः परिशिष्यतेऽवशिष्यते सोप्यन्यदृष्ट्या कल्पितोऽन्यैरेव दृश्यते न समाहितेन पुंसेति भावः ॥ ३९८ ॥

समाहितायाम् । सति । चित्तवृत्तौ । परात्मनि । ब्रह्मणि । निर्विकल्पे ॥ न । दृश्यते । कश्चित् । अयम् । विकल्पः । प्रजल्पमात्रः । परिशिष्यते । यतः ॥ ३९८ ॥

निर्विकल्प परमात्मा सत्य ब्रह्ममें चित्तकी वृत्तिके लीन होने पर अर्थात् निर्विकल्प समाधिके सिद्ध होने पर नामरूप विकल्प कुछ भी नहीं दीखता है किन्तु कथनमात्र अन्य पुरुषकी दृष्टिसे

होता है, समाहित पुरुषकी दृष्टिसे जगत् नामरूप लेशमात्रभी नहीं रहता है ॥ ३६८ ॥

असत्कल्पोविकल्पोयं विश्वमित्येकवस्तुनि ॥
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ३६६ ॥

विकल्पोन दृश्यते इत्युक्तं विवृणोति । असत्कल्पइति । एकवस्तुन्यनानात्मके ब्रह्मणि विश्वमित्ययं विकल्पोऽसत्कल्पोमिथ्या यथा ह्यसत्पदार्थः सद्भिन्नस्तथाऽयं विकल्पोपि, केवलमसति सद्भेदोविकल्पे त्वसतोपिभेदात्कल्पइत्युक्तामिति ज्ञेयम् । कुतस्तत्राह निर्विकारइति । निर्विकारेऽपरिणामिनि निराकारे कार्य्यकारणशून्ये निर्विशेषे नामजातिगुणक्रियाविधुरे ब्रह्मणि भिदा भेदः कुतोन कुतोपि हेतोः । सम्भवतीत्यर्थः । भेदोहि पृथक्त्वमन्योन्याभावोवा वैधर्म्यं वा स्वरूपं वा निरुक्तलक्षणे ब्रह्मणि निरूपयितुं न शक्यते सर्वस्यापि भेदस्य विकाराकारसाकाराविशेषान्यतमसापेक्षस्य निरुक्ते ब्रह्मणि निरूपयितुमशक्यत्वादिति भावः ॥ ३६६ ॥

असत्कल्पः। विकल्पः। अयम् । विश्वम् । इति। एकवस्तुनि॥ निर्विकारे । निराकारे । निर्विशेषे । भिदा । कुतः ॥ ३६६ ॥

अद्वितीय ब्रह्ममें यह जगत् है ऐसी कल्पना भी मिथ्या है क्योंकि अपरिणामि कार्य-कारणशून्य ब्रह्ममें भेद कहांसे प्राप्त होवै किन्तु कहींसे नहीं । ब्रह्ममें भेदप्राप्तिका हेतु नहीं ॥ ३६६ ॥

द्रष्टृदर्शनदृश्यादिभावशून्यैकवस्तुनि ॥
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०० ॥

भिदाभावमेव चतुर्भिराविष्करोति । द्रष्टृदर्शनेत्यादिभिः । द्रष्टृदर्शनदृश्यादिभावशून्यैकवस्तुनि। द्रष्टृदर्शनदृश्यादीनां भावोऽसाधारणधर्मोद्रष्टृत्वादिस्तच्छून्ये तद्रहिते एकवस्तुनि नानात्वानालिङ्गिते वस्तुभूते ब्रह्मणि निर्विकारे इत्यादिः पूर्ववत् । द्रष्टृत्वदर्शनत्वदृश्यत्वादीनामसाधारणधर्माणां हि भेदकत्वमात्मनश्च सर्वात्म-

त्वान्नासाधारणधर्माश्रयत्वं योहि केवलं द्रष्टैव भवेन्न दर्शनदृश्ये यद्वा दर्शनात्मैव भवेन्न द्रष्टृदृश्यात्माऽथवा दृश्यस्वभावएव न द्रष्टृदर्शनस्वभावः सतथाभेदभागपि भवेद्यस्तु स्वयमेव शैलूषवन्नानात्मभावमेकात्मनः स्वस्य दर्शयति सकथं स्वस्मादेव स्वयं भेदं भजेदित्यर्थः॥ ४००॥

द्रष्टृदर्शनदृश्यादिभावशून्यैकवस्तुनि ॥ निर्विकारे । निराकारे । निर्विशेषे । भिदा । कुतः ॥४००॥

भेदके अभावको चार श्लोकोंसे वर्णन करे हैं। द्रष्टृ इति । द्रष्टृत्व दर्शनत्व दृश्यत्व त्रिपुटिसे रहित,भेदसे रहित,वास्तव ब्रह्म में निर्विकार निराकार निर्भेदस्वरूप परमात्मामें किंस निमित्तसे भेद होवै । जो प्रतिव्यक्ति भेदवाला होता है उसमें द्रष्टृत्वादि धर्म होते हैं जो सर्वात्मा होवै उसमें एक व्यक्ति के असाधारण द्रष्टृत्वादि धर्म कैसे प्राप्त होवें॥ ४००॥

कल्पार्णवइवात्यन्तपरिपूर्णैकवस्तुनि ॥
निर्विकारे निराकारे निर्विशेषे भिदा कुतः॥४०१॥

किंच कल्पार्णवइव प्रलयसमयवर्तिसमुद्रवदत्यन्तपरिपूर्णैकवस्तुनि सर्वतः प्रसृता परिच्छिन्नाद्वितीयस्वभावे तस्मिन्। शेषंपूर्ववत् ४०१

कल्पार्णवे । इव । अत्यन्तपरिपूर्णैकवस्तुनि॥ निर्विकारे । निराकारे । निर्विशेषे । भिदा । कुतः ॥ ४०१ ॥

किंच प्रलयकालके समुद्रवत् चारों तर्फ व्यापक अपरिच्छिन्न अद्वितीयस्वरूप निर्विकार निराकार निर्विशेष ब्रह्म में किस कारण से भेद होवें॥ ४०१ ॥

तेजसीव तमोयत्र प्रलीनं भ्रान्तिकारणम् ॥
अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः ॥४०२॥

अपिच तेजसि दिनकरादौ तमइव यत्र ब्रह्मणि भ्रान्तिकारणं

प्रलीनमत्यन्तं निरस्तं स्वरूपतएवाविद्यमानं तस्मिन्नद्वितीये द्वैतवर्जिते परे मायापरे तत्त्वे तथ्ये अन्यत्पूर्ववत्। कस्याप्युपाधेरौपाधिकस्य वा सद्भावे भेदोभवेन्निर्द्वैते तु तदुभयाभावाद्भेदाभावइति भावः ४०२

तेजसि । इव । तमः । यत्र । प्रलीनम् । भ्रान्तिकारणम् ॥
अद्वितीये । परे । तत्त्वे । निर्विशेषे । भिदा । कुतः ॥ ४०२॥

किंच जिस ब्रह्ममें जैसे सूर्यादि तेजमें तम अत्यंतासंभव ग्रस्त है तैसे जिस अद्वैतमें भ्रमका कारण अज्ञान अत्यन्त अविद्यमान् है तिस द्वैतरहित मायासे पर यथार्थ स्वरूप निर्भेद ब्रह्ममें भेद कहांसे प्राप्त होवै ॥ ४०२ ॥

एकात्मके परे तत्त्वे भेदवार्त्ता कथं वसेत् ॥
सुषुप्तौ सुखमात्रायां भेदः केनावलोकितः ॥४०३॥

पृथक्त्वादीनां भेदानां किञ्चिद्धर्मपुरस्कारेण प्रवर्तमानानामभावं प्रसाध्य स्वरूपभेदमप्यपाकरोति । एकात्मके इति ।

एकात्मकेऽद्वितीयस्वरूपे परे तत्त्वे भेदवार्त्ता भेदोक्तिः कथं वसेत्सम्भवेदित्यर्थः । स्वरूपतोनानात्मत्वे हि भेदः स्यान्नहि स्वमेव स्वस्माद्भिन्नं मन्यते केनापि नच तदन्यत्वात्तद्भिन्नं भवेत्तदन्यासिद्धेरिति भावः । नन्वस्मदादिजीवात्मना तस्य नानात्वमेवेति भेदः प्राप्तोत्येवेति चेत्तत्राह सुषुप्ताविति । सुखमात्रायामानन्दमात्ररूपेण सम्प्रसादनाम्ना वेदेन वर्णितायां सुषुप्तौ विलीनवाह्यान्तःकरणावस्थायां केन त्वयाऽन्येन वा भेदोऽवलोकितोवदेत्यर्थः । जाग्रति तु स्वप्नवद्भेदभानमौपाधिकमिति भावः ॥ ४०३ ॥

एकात्मके । परे । तत्त्वे । भेदवार्त्ता । कथम् । वसेत् ॥
सुषुप्तौ । सुखमात्रायाम् । भेदः । केन । अवलोकितः॥ ४०३॥

एक अद्वितीय मायापर वस्तुस्वरूप परमात्मामें भेदका कथन कैसे संभव होसके है, आनन्दमात्ररूप स्थितिकरके वर्णन की सुषुप्तिअवस्थामें तुमने वा दूसरे किसीने भेद देखाहो

तौ कहो और जाग्रत् स्वप्नमें तौ उपाधिकरके भेदभान होवै है, निरुपाधि चेतनमें भेदका साधक नहीं है ॥ ४०३ ॥

न ह्यस्ति विश्वं परतत्त्वबोधा-
त्सदात्मनि ब्रह्मणि निर्विकल्पे ॥
कालत्रये नाप्यहिरीक्षितोगुणे,
नह्यम्बुविन्दुर्मृगतृष्णिकायाम् ॥ ४०४ ॥

ननु बोधोदये विकल्पोनिवर्तते इति संभवति बोधतः पुरस्तात्तु विकल्पोभातोविद्यतएवेति सकथमपाक्रियते तत्राह । नह्यस्तीति ।

परतत्त्वबोधात् । परतत्त्वस्य परब्रह्मणोबोधात्साक्षात्कारात् प्रागपीति शेषः । सदात्मनि सद्रूपे निर्विकल्पे ब्रह्मणि विश्वं जगन्न ह्यस्ति नैवास्ति न विद्यते कालत्रयेपि तन्नास्तीति भावः । तत्र दृष्टान्तमाह कालत्रयेपीति । गुणेरज्जावीक्षितः साक्षात्कृतोऽहिः सर्पः कालत्रयेपि नास्तीत्यर्थः । एवमेव मृगतृष्णिकायां मरुमरीचिकायामम्बुविन्दुर्नह्यस्ति नैवास्ति नह्यम्बुविन्दुरित्यपपाठः ॥ ४०४ ॥

न । हि । अस्ति । विश्वम् । परतत्त्वबोधात् । सदात्मनि । ब्रह्मणि । निर्विकल्पे ॥ कालत्रये । न । अपि । अहिः । ईक्षितः । गुणे । न । हि । अम्बुविन्दुः । मृगतृष्णिकायाम् ॥ ४०४ ॥

परब्रह्मके साक्षात्कारसे पूर्व भी सत्यरूप निर्विकल्प ब्रह्म में जगत् नहीं था, बोधकालमें भी नहीं और उत्तर काल तौ असंभव ही है इसकारण तीनोंकालमें भी जगतकी सत्ता नहीं है क्योंकि रज्जुमें साक्षात्किया सर्प जैसे तीन कालमें नहीं है जैसे मरुमरीचिकामें जलकी विन्दुमात्र भी सत्य नहीं है इसीप्रकार आत्मामें जगत् नहीं है ॥ ४०४ ॥

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥
इति ब्रूते श्रुतिः साक्षात्सुषुप्तावनुभूयते ॥ ४०५ ॥

उक्तार्थे श्रुतिम्प्रमाणयति । मायामात्रमिति ।

इदं द्वैतं द्वाभ्यां विरुद्धधर्माभ्यामितं प्राप्तं युक्तं द्वीतं तस्य भावो द्वैतं भेदइत्यर्थः । मायामात्रमनिर्वचनीयमात्रं मायाशब्दस्यात्रानिर्वचनीयार्थकत्वात् । यद्वा परमार्थतइति पदस्वारस्यान्मायाशब्दोऽत्र मिथ्यार्थकस्तथाच मिथ्यैवेत्यर्थः । अद्वैतं भेदशून्यं ब्रह्म परमार्थतः परमार्थमबाध्यं सार्वविभक्तिकस्तसिः । इतिश्रुतिः । द्वैतस्य त्रैकालिकाभावमद्वैतस्य सार्वदिकत्वं ब्रूते मायापरमार्थपदाभ्यां साक्षादुपदिशतीत्यर्थः । नचेदमनुभवानारूढं किन्तु सुषुप्तौ द्वैतस्याभावोऽद्वैतस्य च सद्भावोऽनुभूयते इत्यर्थः ॥ ४०५ ॥

मायामात्रम् । इदम् । द्वैतम् । अद्वैतम् । परमार्थतः॥ इति । ब्रूते । श्रुतिः । साक्षात् । सुषुप्तौ । अनुभूयते ॥ ४०५ ॥

उक्त अर्थमें श्रुतिप्रमाण दिखावे हैं । मायामात्रम् इति । यह भेद अनिर्वचनीय है, मिथ्या है और अद्वैत ब्रह्म परमार्थ अबाध्य है, यह श्रुति भेदका तीनों कालमें अभाव और अभेदको सत्यत्व कहे है और सुषुप्तिकालमें द्वैतका अभाव अद्वैतका भाव साक्षात् साक्षी आत्मा अनुभव करे है इसी कारण उत्थान काल में स्मृति होवे है ॥ ४०५ ॥

अनन्यत्वमधिष्ठानादारोप्यस्य निरीक्षितम् ॥
पण्डितैरज्जुसर्पादौ विकल्पोभ्रान्तिजीवनः ॥४०६॥

नन्वधिष्ठाने यदि विकल्पस्य त्रैकालिकाभावस्तर्हि सर्वानुभवविरोधस्तत्राह । अनन्यत्वमिति ।

रज्जुसर्पादावारोपितस्याधिष्ठानादनन्यत्वमन्यत्वाभावः पण्डितैर्विवेकिभिर्निरीक्षितं समीक्षितं विज्ञानचक्षुषेत्यर्थः। अज्ञजनानुभवसिद्धविकल्पस्तु भ्रान्तिजीवनोभ्रान्तिमात्रसिद्धइत्यर्थः । यथैषा व्यवस्था तथा प्रकृतेपि ब्रह्मानन्यत्वं जगद्विकल्पस्येति भावः। "तदनन्यत्वमारम्भणशब्दादिभ्यः" इतिसूत्रमत्रानुसन्धातव्यम् ॥४०६ ॥

अनन्यत्वम् । अधिष्ठानाद् । आरोप्यस्य । निरीक्षितम् ॥ पण्डितैः । रज्जुसर्पादौ । विकल्पः । भ्रान्तिजीवनः ॥४०६॥

जैसे रज्जु सर्पादिके भान स्थलमें आरोपित पदार्थका अधिष्ठानसे भेद कुछ नहीं प्रतीत होता है ऐसा विवेकी पुरुषों को अधिष्ठानमात्र ज्ञाननेत्रसे दीखता है, अज्ञानीकी दृष्टिसिद्ध भेद तो भ्रममात्रसे प्रतीत होवे है तैसे ही ब्रह्मसे अन्य कुछ नहीं है, भेदप्रतीति भ्रान्तिमात्र है ॥ ४०६ ॥

चित्तमूलोविकल्पोऽयं चित्ताभावे न कश्चन ॥
अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि ॥४०७॥

विकल्पनिराकरणस्य प्रकृतोपयोगमाह। चित्तमूलइति।

अयं विकल्पोभेदभ्रमश्चित्तमूलश्चित्तोपादानश्चित्ताभावे चित्तविलये न कश्चन न कोपि विकल्पोऽवशिष्यते तन्तुविलये पटइव यन्निवृत्तये यत्नान्तरमन्विष्येत यतोऽस्याभावे चित्ताभावएवकारणमतश्चित्तं प्रत्यग्रूपे शुद्धे परात्मनि ब्रह्माभिन्ने समाधेहि समाहितं कुर्वित्यर्थः ॥ ४०७ ॥

चित्तमूलः। विकल्पः। अयम्। चित्ताभावे। न। कश्चन॥ अतः। चित्तम्। समाधेहि। प्रत्यग्रूपे। परात्मनि ॥४०७॥

यह भेदभ्रमका मूलकारण चित्त है और चित्तके लय होने से कोई भेदभ्रम नहीं होता है, इसकारण साक्षीरूप परमात्मा में चित्तको समाहित कर ॥ ४०७ ॥

किमपि सततबोधं केवलानन्दरूपं,
निरुपममतिवेलं नित्यमुक्तं निरीहम् ॥
निरवधिगगनाभं निष्कलं निर्विकल्पं,
हृदि कलयति विद्वान् ब्रह्मपूर्णं समाधौ॥४०८॥

समाधौ कीदृग्रूपं मयाध्येयमतआह। किमपीत्यादित्रिभिः।

सततबोधं सदैकरसचिद्घनं केवलानन्दरूपं निर्दुःखसुखात्मकं निरुपममप्रतिममतिवेलं वेलामतिक्रान्तमपारावारमित्यर्थः। नित्यमुक्तं कालत्रयेपि बन्धविधुरं निरीहं निश्चेष्टं निरवधिगगनाभं निःसीमनभस्तुल्यं निष्कलं निर्विकल्पं पूर्णं ब्रह्म समाधौ ब्रह्मनिष्ठोहृदि चित्ते कलयति साक्षात्करोति त्वमपि तथा चिन्तयेति भावः ॥४०८

किम् । अपि । संततबोधम् । केवलानन्दरूपम् । निरुपमम् । अतिवेलम् । नित्यमुक्तम् । निरीहम् ॥ निरवधिगगनाभम् । निष्कलम् । निर्विकल्पम् । हृदि । कलयति । विद्वान् । ब्रह्म । पूर्णम् । समाधौ ॥ ४०८ ॥

समाधिमें ध्यान करने योग्य रूपको दिखाते हैं । किम् इति । सदा एकरस चैतन्य दुःखरहित, सुखरूप, उपमाशून्य, मर्यादासे वर्जित, अपारावार तीनोंकालों में बन्धसे रहित है क्रियारहित अवधिरहित आकाशसमान निरवयव निर्भेद पूर्ण परमात्माको समाधिकालमें ब्रह्मनिष्ठ चित्तमें साक्षात चिन्तन करता है हे शिष्य ! तूभी तैसेही चिन्तनकर ॥ ४०८ ॥

प्रकृतिविकृतिशून्यं भावनातीतभावं,
समरसमसमानं मानसम्वन्धदूरम् ॥
निगमवचनसिद्धं नित्यमस्मत्प्रसिद्धं,
हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ ॥ ४०९ ॥

प्रकृतिविकृतिशून्यं भावप्रधाननिर्देशेन कार्यकारणभावविधुरमित्यर्थः । भावनातीतभावं कल्पनाविनिर्मुक्तस्वभावं समरसमेकरसं निर्विकारमित्यर्थः । असमानमनुपमं मानसम्वन्धदूरं मानानां प्रमाणानां यः सम्वन्धो विषयविषयिभावस्तद्दूरं तदस्पृष्टं प्रमाणाविषयमित्यर्थः । निगमवचनसिद्धं वेदवचोभिः प्रसिद्धमुपनिषद्गम्यमित्यर्थः । नित्यमस्मत्प्रसिद्धं नित्यं सर्वदाऽस्मास्वस्माकं वा प्रसिद्धमहंप्रत्ययसिद्धमित्यर्थस्तथाच भाष्यं शारीरकसूत्रेषु शाङ्करम् । "सर्वोह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति" इति हृदि कलयतीति पूर्ववत् ॥ ४०९ ॥

प्रकृतिविकृतिशून्यम् । भावनातीतभावम् । समरसम् । असमानम् । मानसम्बन्धदूरम् ॥ निगमवचनसिद्धम् । नित्यम् । अस्मत्प्रसिद्धम् । हृदि । कलयति । विद्वान् । ब्रह्म । पूर्णम् । समाधौ ॥ ४०९ ॥

कार्य कारणतासे रहित, कल्पनासे रहित स्वभाव है जिसका, एकरस, निर्विकार, उपमासे रहित प्रमाणोंका जो संबन्ध है विषय विषयिभाव तिस संबन्धसे रहित है, वेदान्तवचनों करके प्रसिद्ध ज्ञात होवै है सर्वकालमें हमलोकोंको अहं प्रतीति करके स्पष्ट प्रतीत होवै है ऐसे ब्रह्मस्वरूपको समाधिकालमें विद्वान् चिन्तन करता है ॥ ४०९ ॥

अजरममरमस्ताभाववस्तुस्वरूपं,
स्तिमितसलिलराशिप्रख्यमाख्याविहीनम् ॥
समितगुणविकारं शाश्वतं शान्तमेकं,
हृदि कलयति विद्वान् ब्रह्मपूर्णं समाधौ ॥४१०॥

अजरमवार्द्धिक्यममरं मृत्युवर्जितममृतमित्यर्थः। अस्ताभाववस्तुस्वरूपं प्रत्यस्तमितसर्वाभाववस्तुस्वभावं तस्मिन्वस्तुस्वभावे न कोपि प्रागभावादिलक्षणोऽभावोऽवस्थानं प्रतियोगितासम्बन्धेन लभतइत्यर्थः। स्तिमितसलिलराशिप्रख्यं निश्चलमहोदधिवदचलमपारं पूर्णमेकरसं च सर्वतइत्यर्थः। आख्याविहीनं शब्दशक्त्यगम्यं समितगुणविकारं समिताः प्रत्यस्तंगतागुणविकारागुणदोषायस्मिंस्तत् शाश्वतमनादिं शान्तमरागद्वेषकमद्वयं ब्रह्म हृदि कलयतीति पूर्ववत् ॥ ४१० ॥

अजरम्। अमरम्। अस्ताभाववस्तुस्वरूपम्। स्तिमितसलिलराशिप्रख्यम्। आख्याविहीनम् ॥ समितगुणविकारम्। शाश्वतम्। शान्तम्। एकम्। हृदि। कलयति। विद्वान्। ब्रह्म। पूर्णम्। समाधौ ॥ ४१० ॥

जरा अवस्थासे रहित, मृत्युसे रहित, सर्व अभाव जिसमें लय होवें ऐसा वस्तुस्वरूप है अर्थात् प्रागभावादि सर्व अभावों

१ शमितेत्यपिपाठः।

का अप्रातियोगी है, निश्चल सागरवत् अचल है, अपार है, पूर्ण है, एकरस है, शब्दकी शक्तिका विषय नहीं है, गुण दोष शून्यस्वरूप है, अनादि है, रागद्वेषसे रहित है, एक अद्वैत पूर्ण ब्रह्मको विद्वान् समाधिकालमें हृदयमें साक्षात्कार करे है ॥ ४१० ॥

समाहितान्तःकरणः स्वरूपे,
विलोकयात्मानमखण्डवैभवम् ॥
विच्छिन्द्धि बन्धं भवगन्धिगन्धतं,
यत्नेन पुंस्त्वं सफलीकुरुष्व ॥ ४११ ॥

विद्वदनुभवमनूद्य शिष्यं तत्र प्रेरयति । समाहितेति ।

समाहितान्तःकरणः समाधिनिष्ठमानसः सन् स्वरूपे प्रतीचि अखण्डवैभवमखण्डितानन्दैश्वर्यमात्मानं परमात्मानमालोकय साक्षात्कुरु तद्भिन्नमात्मानं मामंस्था इति भावः। भवगन्धगन्धितं जन्मान्तरवासनावासितं बन्धमहंकारादिसंबन्धं विच्छिन्द्धि विनाशय एवं यत्नेन समाध्यभ्यासेन पुंस्त्वं पुंजन्म सफलीकुरुष्व समाधिसुखानुभवफलेन सार्थकं कुरुष्वेत्यर्थः ॥ ४११ ॥

समाहितान्तःकरणः । स्वरूपे । विलोकय । आत्मानम् । अखण्डवैभवम् ॥ विच्छिन्द्धि । बन्धम् । भवगन्धगन्धितम् । यत्नेन । पुंस्त्वम् । सफलीकुरुष्व ॥ ४११ ॥

विद्वान्के अनुभवका अनुवादकरके उसमें शिष्यको प्रेरणा करे हैं । समाहित इति । हे शिष्य ! समाधिनिष्ठ मानस हुवा हुवा साक्षिरूपमें अविनाशी आनन्द ऐश्वर्य वाला परमात्माको साक्षात्कार कर, उससे भिन्न आत्माको मत मान और जन्मान्तरोंकी वासनावेष्टित अहंकारादि संबन्धका विनाश कर, इसप्रकार समाधिके अभ्यास करनेसे पुरुषजन्मको सफल कर अर्थात् समाधिसुखके अनुभव करनेसे मनुष्यजन्म को सार्थक कर ॥ ४११ ॥

सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दमद्वयम् ॥
भावयात्मानमात्मस्थं न भूयः कल्पसेऽध्वने ॥४१२॥

सफलीकुरुष्वेत्युक्तं विवृणोति । सर्वोपाधीति ।
सर्वोपाधिविनिर्मुक्तं स्थूलसूक्ष्मकारणोपाधिरहितं सच्चिदानन्दमद्वयमात्मस्थं स्वान्तस्थमात्मानं भावय चिन्तय तथा चिन्तया च तत्साक्षात्कारे सति भूयः पुनरध्वने संसृतिमार्गाय न कल्पसे न योग्योभविष्यसि न संसृतिमवाप्स्यसीति यावत् ॥ ४१२ ॥

सर्वोपाधिविनिर्मुक्तम् । सच्चिदानन्दम् । अद्वयम् ॥ भावय । आत्मानम् । आत्मस्थम् । न । भूयः । कल्पसे । अध्वने ४१२

मनुष्यजन्म सफल करनेको वर्णन करे हैं।सर्वोपाधि इति। स्थूल सूक्ष्म कारण उपाधिसे रहित, सत् चित् आनन्द अद्वैत अपने हृदयमें स्थित आत्माका चिन्तन कर वैसें चिन्तनसे उसका साक्षात्कार होनेसे पीछे फिर संसारमार्गके योग्य नहीं रहेगा अर्थात् संसारको नहीं प्राप्त होवेगा॥४१२॥

छायेव पुंसः परिदृश्यमान-
माभासरूपेण फलानुभूत्या ॥
शरीरमाराच्छववन्निरस्तं,
पुनर्न संधत्तइदं महात्मा ॥ ४१३ ॥

शरीराध्यासनिवृत्त्या जीवन्मुक्तिरपि फलमित्याह । छायेवेति ।
महात्मा महान्ब्रह्माणि लीनआत्मा मानसं यस्य स तथा ब्रह्मनिष्ठइत्यर्थः । इदं शरीरं पुंसोदेहस्य छायेव वर्त्तमानमाभासरूपेण परिदृश्यमानं तत्र हेतुमाह फलानुभूत्येति । प्रारब्धकर्मफलस्य सुखदुःखरूपस्यानुभवरूपभोगलक्षणनिमित्तेनैवाभासमात्रेणापि तस्य भानमन्यथाऽऽभासमात्रमपि तस्य भानं न स्यादिति भावः । ततएव शववन्मृतवदेवारादूरे निरस्तं निक्षिप्तं

१ प्रारब्धभोगलक्षणनिमित्ताभावे ।

देहात्मदृष्टित्यागेन निषिद्धमित्यर्थः। पुनर्न संधत्ते समाधितोव्युत्थानेपि प्रारब्धवशतइत्यर्थः ॥ ४१३ ॥

छाया । इव । पुंसः । परिदृश्यमानम् । आभासरूपेण । फलानुभूत्या ॥ शरीरम् । आरात् । शववत् । निरस्तम् । पुनः । न । संधत्ते । इदम् । महात्मा ॥ ४१३ ॥

शरीराध्यासकी निवृत्तिसे जीवन्मुक्तिरूप भी फल प्राप्त होवै है ऐसा कहे हैं। छाया इति। ब्रह्ममें लीन है मन जिसका ऐसा ब्रह्मनिष्ठ देहकी छायावत् यह शरीर आभासरूपकरके दीखता है, शरीरके भोगदायक प्रारब्ध कर्मरूप निमित्तसे आभासमात्र भी शरीर प्रतीत होवै है, कर्मरूप निमित्त न होता तो आभासमात्र भी शरीरका भान न होता इसीकारण मृत शरीरवत् देहात्मदृष्टिके त्यागसे दूरमें प्रक्षिप्त किया हुवा है उस शरीरको समाधिसे उठकर भी पुनः समाधि करनेवाला ब्रह्मज्ञानी उसका ध्यान नहीं करता है ॥ ४१३॥

सततविमलबोधानन्दरूपं समेत्य,
त्यज जडमलरूपोपाधिमेतं सुदूरे ॥
अथ पुनरपि नैषस्मर्यतां वान्तवस्तु,
स्मरणविषयभूतं कल्पते कुत्सनाय ॥४१४॥

ननु समाधौ शरीरविस्मृतिर्भवतु व्युत्थाने तु तद्विस्मरणं निर्निमित्तं निष्फलं च प्रत्युत व्युत्थाने लौकिकसुखानुभवाय तत्स्मरणमेव साधुप्रतीयते तत्राह। सततेति।

सततविमलबोधानन्दरूपं शाश्वतनिर्मलज्ञानानन्दलक्षणं समेत्य समाधावनुभूयैतं जडमलरूपोपाधिं देहं सुदूरेऽतिदूरे त्यज जहीहि। स्वात्मानुभवसमये समाधौ त्यक्तमेवेत्यर्थः। अथ समाधेर्व्युत्थाने एषउपाधिः पुनरपि नस्मर्यतामनुसन्धीयतां यतोवान्तवस्तु यदि कस्यापि स्मरणविषयीभूतं भवति चेत्तर्हि स्वस्य चान्येषां

च कुत्सनाय निन्दायै कल्पतेऽर्हति यथैतत्तथा समाधित्यक्तभवसुखमपि वान्तवस्तुवद्घृणास्पदं न पुनरनुसन्धानार्हमित्यर्थः ॥४१४॥

सततविमलबोधानन्दरूपम् । समेत्य । त्यज । जडमलरूपोपाधिम् । एतम् । सुदूरे ॥ अथ । पुनः । अपि । न । एषः । स्मर्यताम् । वान्तवस्तु । स्मरणविषयभूतम् । कल्पते । कुत्सनाय ॥ ४१४ ॥

समाधिवत् उत्थानकालमें भी शरीरकी विस्मृतिकी आवश्यकता कहे हैं। सतत इति। निरन्तर निर्मल ज्ञान आनन्दस्वरूपको समाधिमें अनुभवकरके जडमलरूप उपाधि देहको अतिदूरमें त्याग दे । समाधिकालमें तो त्यागी ही थी परंच उत्थानकालमें फिर भी इस उपाधिका न स्मरण करना चाहिये । क्योंकि उलटी (उद्वमन) की वस्तु कभी याद आवै तो अपनेको भी अन्यको भी निन्दाका हेतु होती है तैसेही समाधिकालमें त्यागे विषयसुख फिर उत्थानकालमें स्मरण करनेसे लज्जाका कारण होते हैं इस लिये विषयसुखास्वादन-हेतु देहका स्मरण भी त्याग दे ॥४१४ ॥

समूलमेतत्परिदाह्य वह्नौ,
सदात्मनि ब्रह्मणि निर्विकल्पे ॥
ततः स्वयं नित्यविशुद्धबोधा-
नन्दात्मना तिष्ठति विद्वरिष्ठः ॥ ४१५ ॥

वर्णिते समाधिव्युत्थाननिष्ठे विद्वद्वरिष्ठनिष्ठे तथैव दृष्टे इत्याह द्वाभ्याम् समूलमिति ।

एतज्जडजातं समूलं साविद्यं सदात्मनि सद्रूपेप्रत्यगात्मनि निर्विकल्पेब्रह्मणि तत्पदार्थाभिन्ने साक्षात्कृते वह्नौ तृणतूलनिभाविद्यादाहकत्वेनाग्निनिभे परिदाह्य सर्वथा दग्ध्वा । ततः । तद्दाघानन्तो-

नित्यविशुद्धबोधानन्दात्मना विद्वरिष्ठस्तिष्ठति न स्वतःसमाधिं जिहात नापि तत्र देहादिकं पश्यतीत्यर्थः ॥ ४१५ ॥

समूलम् । एतत् । परिदाह्य । वह्नौ । सदात्मनि । ब्रह्मणि । निर्विकल्पे ॥ ततः । स्वयम् । नित्यविशुद्धबोधानन्दात्मना । तिष्ठति । विद्वरिष्ठः ॥ ४१५ ॥

पूर्वोक्त समाधिनिष्ठा और उत्थाननिष्ठा विद्वद्वरिष्ठोंमें दीखे हैं, ऐसा कहे हैं । समूलम् इति । अविद्यारूप कारणसहित जडप्रपंचको सत्‌रूप साक्षी निर्विकल्प ब्रह्म तत्पदार्थसे अभिन्नरूप अपने आत्माके साक्षात्काररूप अग्निमें सर्वप्रकारसे भस्मकरके तिस ज्ञानहेतुसे नित्य शुद्ध बोध आनन्दस्वरूप होकर विद्वद्वरिष्ठ स्थित होता है, अपने आप समाधिसे उत्थान भी नहीं होता और दूसरेसे उत्थान हुवा देहादिको देखता भी नहीं ॥ ४१५ ॥

प्रारब्धसूत्रग्रथितं शरीरं,
प्रयातु वा तिष्ठतु गोरिव स्रक् ॥
न तत्पुनः पश्यति तत्त्ववेत्ता-
ऽऽनन्दात्मनि ब्रह्मणि लीनवृत्तिः ॥ ४१६ ॥

व्युत्थाने तु तत्त्वविदोऽव्यवस्थां शृणु । प्रारब्धसूत्रग्रथितमिति । आनन्दात्मनि ब्रह्मणि लीनवृत्तिर्निमग्नमानसस्तत्त्ववेत्ता ब्रह्मात्मदर्शी प्रारब्धसूत्रग्रथितं शरीरं गोः स्रगिव प्रयातु पततु वा तिष्ठतु वा तत् पुनर्न पश्यति मृत्योर्न बिभेति जीवनं च न वाञ्छति यथाऽस्यारब्धं तथाव्यवस्थामास्थाय समाधिव्युत्थानसमयेपि समाहितइव तिष्ठति। अतएवात्रापि ब्रह्मणि लीनवृत्तिरिति विशेषणमुपात्तमिति भावः । यद्वाऽस्मादेव विशेषणादयमपि श्लोकः समाहितपक्षे योज्योऽग्रिमं श्लोकद्वयं तु व्युत्थानपक्षे संगमनीयमिति बोध्यम् ॥ ४१६ ॥

प्रारब्धसूत्रग्रथितम् । शरीरम् । प्रयातु । वा । तिष्ठतु । गोः ।

इव । स्रक् ॥ न । तत् । पुनः । पश्यति । तत्त्ववेत्ता । आनन्दात्मनि । ब्रह्मणि । लीनवृत्तिः ॥ ४१६ ॥

समाधिसे उत्थानकालमें ब्रह्मनिष्ठकी दृष्टिका वर्णन करे हैं। प्रारब्धइति। ब्रह्ममें जिसकी वृत्ति लीन है ऐसा जो ब्रह्मात्मा का ज्ञाता है सो ऐसा जानता है कि जैसे गौकी माला गिरजावे वा पडी रहै तो वह उसकी तरफ दृष्टि नहीं करती तैसे ही यह शरीर प्रारब्धरूप सूत्रकरके गुम्फन किया हुवा है सो नष्ट हो वा स्थित रहो तिसको नहीं देखता है, मृत्युसे भय नहीं, जीवनकी इच्छा नहीं ऐसा जानकर आनन्दरूप ब्रह्ममें लीनवृत्ति होता है, अपनी वृत्तिको दुःख में नहीं लीन करता॥४१६॥

अखण्डानन्दमात्मानं विज्ञाय स्वस्वरूपतः ॥
किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति तत्त्ववित्॥४१७

विदुषोभुक्तभोज्यस्य पुंसः पाकक्रियायामिव बाह्यक्रियायां प्रवृत्तिरनार्थिकाऽतोहेया सेत्याहाखण्डानन्दमिति।

तत्त्वविद्ब्रह्मविदखण्डानन्दमात्मानं स्वस्वरूपतः स्वस्वरूपाभेदेन विज्ञाय साक्षात्कृत्य किं भोग्यमिच्छन् कस्य प्रमातुर्वा साक्षिणोवा हेतोः प्रयोजनाय कामायेत्यर्थः । निमित्तपर्यायप्रयोगे षष्ठी कस्य निमित्तस्य वसतीत्यादिवत्। देहं पुष्णाति तत्पुष्टौ यतते तन्निमित्तं ज्वरतइति यावत् "आत्मानं चेद्विजानीयादहमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदि"ति श्रुतितात्पर्यमत्र गृहीतमिति ध्येयम् ॥ ४१७ ॥

अखण्डानन्दम् । आत्मानम् । विज्ञाय । स्वस्वरूपतः॥ किम्। इच्छन्। कस्य । वा । हेतोः । देहम् । पुष्णाति । तत्त्ववित्४१७

जैसे तृप्त पुरुषकी भोजनपाकक्रियामें प्रवृत्ति निष्फल है तैसेही ब्रह्मज्ञानीकी बाह्यक्रियामें प्रवृत्ति व्यर्थ है ऐसा निरूपण करे हैं। अखण्डानन्दम् इति । ब्रह्मवेत्ता अखण्ड आनन्दरूप परमात्माको अपना स्वरूप है ऐसा साक्षात्कारकरके किसे

भोगकी इच्छासे और किस भोक्ताके लिये देहकी पुष्टिके लिये यत्न करता है अर्थात् देहादिसंघातके पालनार्थ लोकोंकी दीनता करता है किन्तु कदापि नहीं करता ॥ ४१७ ॥

संसिद्धस्य फलं त्वेतज्जीवन्मुक्तस्य योगिनः॥
बहिरन्तः सदानन्दरसास्वादनमात्मनि ॥४१८॥

ननु समाधिमनुतिष्ठतोऽननुतिष्ठतश्च ब्रह्मविदुषोऽपुनरावृत्तिः समानेति समाधेर्विलक्षणं फलं किं येन देहसुखादपि विरज्य समाधिरनुष्ठेयो भवेदत आह । संसिद्धस्येति ।

संसिद्धस्यात्मज्ञाननिष्ठस्य जीवन्मुक्तस्य वक्ष्यमाणलक्षणस्यास्यैव योगिनः समाधिनिष्ठस्य तु सदा सर्वदा आत्मनि बहिरन्तरानन्दरसास्वादनमित्येतत्फलमसमाहितस्य तु विक्षेपबाहुल्येन कदाचिदेवानन्दरसानुभवइति भावः ॥ ४१८ ॥

संसिद्धस्य । फलम् । तु । एतत् । जीवन्मुक्तस्य । योगिनः॥
बहिः । अन्तः । सदा । आनन्दरसास्वादनम् । आत्मनि॥४१८॥

विदेहमुक्तिरूप फल समाधि करने वालेको वा न करनेवालेको समान है तो फिर देहसुखका त्यागकर समाधि करना निष्फल है इस शङ्काको वारणकरे हैं। संसिद्धस्यइति। आत्मज्ञाननिष्ठ जीवन्मुक्त समाधिमें जुडनेवाले योगीको सर्वकाल आत्मामें बाहर अन्तर आनन्दरसका साक्षात्काररूप स्वाद ही फल है और समाधि न करने वालेको विक्षेपकी बहुलता होने से कदाचित् ही आनन्दका अनुभव होवै है ॥ ४१८ ॥

वैराग्यस्य फलं बोधोबोधस्योपरतिः फलम् ॥
स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ॥४१९॥

समाधिसम्पत्तावेव सर्वा दैवीसम्पत्सफला भवतीत्याह । वैराग्यस्येति ।

वैराग्यस्य विषयदोषदर्शनजन्यजिहासायाबोधआत्मसाक्षात्कारः फलं बोधस्य चोपरतिर्बाह्यप्रवृत्तिनिरोधः फलमुपरतेश्च स्वानन्दानुभवादात्मानन्दानुभवाच्छान्तिः सर्वाभिलाषनिवृत्तिरेषैव फलं शान्तिशब्दस्य स्त्रीलिङ्गत्वात्तदपेक्षयैषेतिस्त्रीलिङ्गनिर्देशः ॥ ४१९ ॥

वैराग्यस्य । फलम् । बोधः । बोधस्य । उपरतिः । फलम् ॥ स्वानन्दानुभवात् । शान्तिः । एषा । एव । उपरतेः। फलम् ॥

समाधि होनेसे ही सर्व दैवी सम्पत् सफल होवे है ऐसा कहे हैं । वैराग्यस्य इति । विषयोंमें दोषदृष्टिसे उदय हुई त्यागेच्छाका फल आत्माका साक्षात्कार है, साक्षात्कारका फल बाह्यप्रवृत्तिनिरोध है, उपरतिका आत्मानन्दका अनुभव फल है, आत्मानन्दके अनुभवसे पश्चात् सर्वेच्छानिवृत्ति यह ही फल है ॥ ४१९ ॥

यद्युत्तरोत्तराभावः पूर्वपूर्वन्तु निष्फलम् ॥

निवृत्तिः परमा तृप्तिरानन्दोऽनुपमः स्वतः ॥४२० ॥

समाध्यसम्पत्तौ सर्वं साधनजातं निष्फलमित्याह । यदीति । यदिचोत्तरोत्तराभावः उत्तरोत्तरेषां फलानामभावोऽसिद्धिस्तर्हि पूर्वपूर्वं निष्फलमेव शान्त्यभावे उपरतिर्निष्फलोपरत्यभावे बोधोनिष्फलोबोधाभावे वैराग्यं निष्फलमिति भावः । नचैतद्युक्तं सफलत्वबोधकवेदस्याप्रामाण्यापत्त्यादिदोषेभ्यस्तस्माद्वैराग्यजन्यबोधे तज्जन्योपरतौ च सत्यामेव निवृत्तिर्बाह्यविक्षेपशान्तिः परमा निरङ्कुशा तृप्तिः स्वतश्चानुपमआनन्दोऽभिव्यज्यते इति शेषः ॥ ४२० ॥

यदि । उत्तरोत्तराभावः । पूर्वपूर्वम् । तु । निष्फलम् ॥ निवृत्तिः । परमा । तृप्तिः । आनन्दः । अनुपमः । स्वतः ॥ ४२० ॥

समाधिके न होनेपर सर्वसाधनोंकी निष्फलता कहे हैं । यदि इति । जो कभी उत्तर उत्तर फलोंकी सिद्धि पुरुषको न हुई तौ पूर्व पूर्व साधन करने निष्फल ही होवै हैं जैसे शान्तिके

अभाव हुवेसे उपरति निष्फल, उपरतिके न होनेसे साक्षात्कार निष्फल है उसके अभाव होनेपर तौ वैराग्य निष्फल होवै है । वेदको अप्रमाणताप्राप्ति होनेसे ऐसा मानना अयोग्य है तिस कारण वैराग्यसे बोध और बोधसे उपराति होनेपर ही बाह्यविक्षेपकी शान्ति और निरंकुश तृप्ति और स्वयमेव अनुपम आनन्द अभिव्यक्त होवै है ॥ ४२० ॥

दृष्टदुःखेष्वनुद्वेगोविद्यायाः प्रस्तुतं फलम् ॥
यत्कृतं भ्रान्तिवेलायां नाना कर्म जुगुप्सितम्॥
पश्चान्नरोविवेकेन तत्कथं कर्तुमर्हति ॥४२१॥

तथा दृष्टदुःखेषु शीतोष्णादिजन्येषु मानापमानादिनिमित्तकेषु वा दुःखेषु अनुद्वेगोभयचलनवैकल्यं सर्वमेतन्निवृत्त्यादि प्रस्तुतं प्रकृतं विद्यायाब्रह्मविद्यायाःफलमित्यर्थः।ननु विद्यायाअविद्याविरोधित्वेपि कर्मभिरविरोधादविरुद्धं बाह्यप्रवृत्तिरूपं कर्मेत्यतआह यत्कृतमिति यज्जुगुप्सितं श्रममात्रफलं घृणास्पदं नानाविधं कर्म लौकिकं वैदिकं वा सकामं बाह्यप्रवृत्तिलक्षणं भ्रान्तिवेलायामहंकाराद्यात्मत्वमतिसमयेऽविवेकतः कृतं तत् कर्म पश्चाद्भ्रान्तिविनाशे विवेकेनाविवेकस्य कर्मप्रवृत्तिहेतोर्निवृत्तौ सत्यां नरः कथं केनप्रकारेण केन हेतुनेति यावत् । कर्तुमर्हति न कथमपीत्यर्थः । विद्यायाःसाक्षात्कर्मभिरविरोधेपि तत्कारणद्वारा विरोधोस्त्येवेति न विद्योदये कुकर्मसम्भवइति भावः ॥ ४२१ ॥

दृष्टदुःखेषु । अनुद्वेगः । विद्यायाः । प्रस्तुतम् । फलम् ॥ यत् । कृतम् । भ्रान्तिवेलायाम् । नाना । कर्म । जुगुप्सितम् ॥ पश्चात् । नरः । विवेकेन । तत् । कथम् । कर्तुम् । अर्हति ॥ ४२१ ॥

शीत उष्ण आदि—मान अपमान आदि जन्य दुःखोंसे भय और चलायमान न होना यह दोनों और निवृत्ति आदि सर्व जो पूर्व कहे हैं सो ब्रह्मविद्याके फल हैं ।शङ्का। विद्याको अविद्या

के संग विरोध होने पर भी कर्मोंके संग विरोध न होनेसे बाह्यप्रवृत्तिरूप कर्म ज्ञानीको प्राप्त है । उत्तर । जो श्रममात्र देनेवाले ग्लानिके विषय लौकिक वैदिक नाना प्रकारके कर्म सकाम प्रवृत्तिरूप अहंकारादिमें आत्मबुद्धिकालमें अविवेकसे किये थे और विवेकसे अविवेक के नाश होने[११] पीछे[१२] पुरुष[१३] कैसे[१४] कर्म[१५] करसकता[१६] है,कारणके अभावसे कर्ममें प्रवृत्ति दुर्लभ है,कर्मके संग विद्याका साक्षात् विरोध न होनेपर भी कर्म कारण अविद्या विरोधद्वारा विरोध बना हुवा है इस कारण विद्याके होनेपर कर्म करना असंभव है॥

विद्याफलं स्यादसतोनिवृत्तिः,
प्रवृत्तिरज्ञाज्ञफलं तदीक्षितम् ॥
तज्ज्ञाज्ञयोर्यन्मृगतृष्णिकादौ,
नोचेद्विदां दृष्टफलं किमस्मात् ॥ ४२२ ॥

विज्ञस्य बाह्यनिवृत्तिमेव दृष्टान्तेन स्पष्टयति । विद्याफलमिति ।

असतोबाह्याज्जगतोमिथ्याभूतादसत्कल्पान्निवृत्तिः प्रवृत्तिवैमुख्यं विद्याफलं स्यात् अज्ञानफलं तु बाह्येऽसति प्रवृत्तिस्तदुभयं यस्मान्मृगतृष्णिकादौ तज्ज्ञाज्ञयोरीदितं तस्याधिष्ठानस्य तत्त्वज्ञोऽसतोजलात्काल्पितान्निवर्तते तदनभिज्ञस्तु तद्भ्रान्त्या तत्र प्रवर्तते तस्मात्प्रकृतेप्याधिष्ठानब्रह्मतत्त्वज्ञोबाह्ये भ्रान्तिसिद्धे कथं प्रवर्ततेत्यर्थः । नोचेद्यदितद्विद्वानपि बाह्यतोनिवर्तेत तर्हि विदां ब्रह्मविदामस्माद्ब्रह्मबोधात्किं दृष्टफलं स्यान्नकिमपीत्यर्थः । दृष्टफलस्य जीवन्मुक्तिसुखस्याभावे स्वर्गादिवत्परोक्षं विदेहमुक्तिफलमपि संदिह्येत तथाच न कोपि कर्माणि जह्याज्ज्ञानसाधनेषु श्रवणादिषु च न प्रवर्तेतेति वेदस्य ज्ञानकाण्डलक्षणस्य प्रामाण्यं लुप्येतेत्यर्थः॥४२२॥

विद्याफलम् । स्यात् । असतः । निवृत्तिः । प्रवृत्तिः । अज्ञानफलम् । तत् । ईक्षितम् ॥ तज्ज्ञाज्ञयोः । यत् । मृग-

तृष्णिकादौ । नो । चेत् । विदाम् । दृष्टफलम् । किम् । अस्मात् ॥ ४२२ ॥

बाह्य मिथ्यारूप जगत्से निवृत्ति ही विद्याका फल होवै है और बाह्य जगत्में प्रवृत्ति अज्ञानका फल है जिसकारण मृगतृष्णाके मिथ्यारूप जलादिमें अधिष्ठान ज्ञेय ज्ञाता अज्ञाता को सो फल दीखनेमें आवै है, ज्ञाताकी निवृत्ति और अज्ञाता की प्रवृत्तिरूप फल होवै है अगर वैसा न मांने तौ ब्रह्मज्ञानीको दृष्टफल क्या इससे विलक्षण होगा सो कोई नहीं किन्तु बाह्यप्रवृत्ति–विमुखता ही जीवन्मुक्तिरूप ज्ञानका दृष्ट फल है उसके वास्ते अवश्य ही बाह्यप्रवृत्तिकी विमुखता सम्पादनीय है ॥ ४२२ ॥

अज्ञानहृदयग्रन्थेर्विनाशोयद्यशेषतः ॥
अनिच्छोर्विषयः किं नु प्रवृत्तेः कारणं स्वतः॥४२३॥

नन्वनिच्छोरपि किञ्चिद्विदुषोवर्तमानताप्रवृत्तौ कथं निरोद्धव्या विषयस्य प्रवर्तकत्वात्तत्राह । अज्ञानेति ।

अज्ञानहृदयग्रन्थेरज्ञानजन्यस्य हृदयग्रन्थेश्चित्तवृत्तिकामादिबन्धनस्य यद्यशेषतोविनाशः सम्पन्नस्तदा तस्यानिच्छोरिच्छारहितस्य प्रवृत्तेः कारणं विषयः किन्तु भवेदपि तु न भवेद्विषयस्य जडत्वात्कामनायाश्च विनष्टत्वान्नानिच्छोः प्रवर्तकं किञ्चिदस्तीति भावः॥४२३॥

अज्ञानहृदयग्रन्थेः । विनाशः । यदि । अशेषतः ॥ अनिच्छोः। विषयः । किम् । नु । प्रवृत्तेः । कारणम् । स्वतः ॥ ४२३ ॥

विषयको प्रवर्तकता होनेसे विद्वान्की प्रवृत्ति बनसके है इस शङ्काका उत्तर कहे हैं । अज्ञान इति। अज्ञानसे जन्य मनके धर्मकामादि बन्धनग्रन्थिका जो कभी सर्वथा विनाश होगया तब इच्छारहित तिस विद्वान्की प्रवृत्तिका कारण क्या

१ किञ्चिदनिच्छोरपीत्यन्वयः ।

विषय अपने आप होसकता है किन्तु नहीं होसकता है विषयको जड होनेसे कामनाके नष्ट होनेसे इच्छारहितका कोई प्रवर्तक नहीं है ॥ ४२३॥

वासनानुदयोभोग्ये वैराग्यस्य तदावधिः ॥
अहंभावोदयाभावोबोधस्य परमावधिः ॥
लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ॥४२४॥

एतमेवार्थं साधयितुं वैराग्यबोधयोरुपरतेश्चावधिमाह । वासनानुदयइति ।

भोग्येस्रक्चन्दनवनितादौ बाह्येवासनानुदयोयदि सङ्कल्पमात्रेणापि न संस्कारोदयस्तदा वैराग्यस्यावधिरहंभावोदयाभावोऽहंभावस्यानात्मन्यहंकारस्योदयाभावोबोधस्य ज्ञानस्य परमावधिरुत्कृष्टा मर्यादा लीनवृत्तेर्ब्रह्मणि लीनायाश्चित्तवृत्तेरनुत्पत्तिः सोपरतेर्मर्यादा बोद्धव्येत्यर्थः ॥ ४२४ ॥

वासनानुदयः । भोग्ये । वैराग्यस्य । तदा । अवधिः ॥ अहंभावोदयाभावः । बोधस्य । परमावधिः ॥ लीनवृत्तेः । अनुत्पत्तिः । मर्यादा । उपरतेः । तु । सा ॥ ४२४ ॥

इसी वार्ताके बोधनार्थ वैराग्य बोध उपरातिकी अवधि कहे हैं। वासनानुदयःइति। पुष्प माला चन्दन नारी आदि बाह्य भोगोंमें जो कभीभी संकल्पमात्र संस्कार नहीं उदय होवै सो वैराग्यकी सर्वोत्तम अवधि है और अनात्म देहादिमें आत्मबुद्धि का न उदय होना ज्ञानकी अवधि है सो सर्वोत्तम है और ब्रह्म में लीन चित्तकी वृत्तिका पुनः उत्थान न होना सो उपरति का फल है ॥ ४२४ ॥

ब्रह्माकारतया सदा स्थिततया निर्मुक्तबाह्यार्थधीरन्यावेदितभोग्यभोगकलनोनिद्रालुवद्बालवत् ॥

स्वप्नालोकितलोकवज्जगदिदं पश्यन्क्वचिल्लब्धधी-
रास्ते कश्चिदनन्तपुण्यफलभुग्धन्यःसमान्योभुवि४२५

समाधिं सम्पाद्य व्युत्थितस्य जीवन्मुक्तस्य दशां वर्णयति । ब्रह्माकारतयेति ।

कश्चिद्विज्ञातशास्त्रार्थेषु सहस्रेषु मध्येऽनन्तफलभुगनन्तानां पुण्यानां फलस्य बोधसुखस्य भोक्ता ब्रह्माकारतया ब्रह्मरूपत्वेन सदास्थिततया ब्रह्मणि प्रतिष्ठिततया निर्मुक्तबाह्यार्थधीर्निर्मुक्ता निवृत्ता बाह्यार्थे शब्दादौ धीर्वृत्तिर्यस्य सः। किंचान्यावेदितभोग्यभोगकलनोऽन्यैः शिष्यादिभिरावेदिता ज्ञापिता समर्पितेति यावत् । भोग्यानां भक्ष्यभोज्यादीनां कलना प्रवृत्तिर्यस्य सतथा तत्र दृष्टान्तोनिद्रालुवद्बालवत् निद्रालुबालयोरिवेत्यर्थः। अपिचेदं जगत्स्वप्नालोकितलोकवत् स्वप्नदृष्टपदार्थवत् पश्यन्सन् क्वचिल्लब्धधीः क्वचिदेव विषयेऽस्य धीरुदेति जाग्रतः स्वप्नदृष्टपदार्थधीरिव यएवंभूतआस्ते तिष्ठति सएव धन्योभुवि मान्यश्च नान्योबाह्यविषयनिमग्नमानसइत्यर्थः४२५

ब्रह्माकारतया । सदा । स्थिततया । निर्मुक्तबाह्यार्थधीः । अन्यावेदितभोग्यभोगकलनः।निद्रालुवद्।बालवत् ॥ स्वप्नालोकितलोकवत् । जगद् । इदम् । पश्यन् । क्वचित् । लब्धधीः । आस्ते । कश्चिद्।अनन्तपुण्यफलभुग्। धन्यः। सः।मान्यः।भुवि॥

उत्थान हुवे जीवन्मुक्तकी दशाको वर्णन करे हैं । ब्रह्माकारतया इति। शास्त्रके अर्थका ज्ञाता हजारोंमें कोई एक अनन्त पुण्यके फलबोध सुखका भोक्ता ब्रह्मरूप होकर सर्वदा निष्ठाको प्राप्त होनेसे शब्दादि बाह्य विषयोंमें जिसकी वृत्ति निवृत्त हुई है,शिष्योंकरके अर्पण किया भक्ष्यभोज्यादिकी वृत्ति जिसके वर्त्तमान है सो जैसे निद्रावाले पुरुष और बालकवत् और इस जगत्को स्वप्नदृष्ट पदार्थवत् देखता हुवा किसी पदार्थमें ही इसकी बुद्धि उदय होवे है जैसे स्वप्नदृष्ट किसी पदार्थोंको पुरुष स्मरणकरता है ऐसाहोकर जो स्थित होता है सोही इस पृथिवी

में धन्य है और जो बाह्य विषयोंमें निमग्न मन है सो अधन्य है जो विद्वान् विषयवासनाशून्य है सो मान योग्य है ४२५

स्थितप्रज्ञोयतिरयं यः सदानन्दमश्नुते ॥
ब्रह्मण्येव विलीनात्मा निर्विकारोविनिष्क्रियः ४२६॥

अस्य बाह्यप्रवृत्तावनिमग्नस्य स्थितप्रज्ञस्य 'स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशवे' त्यादिनाऽर्जुनेन पृष्टलक्षणस्य 'प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतानि' त्यादिना भगवता भगवद्गीतायां वर्णनमित्याह स्थितप्रज्ञइति योब्रह्मण्येव विलीनात्मा ब्रह्ममात्रसमाहितचित्तोनिर्विकारः प्रत्यस्तकामादिमानसविकारः विनिष्क्रियः शरीरयात्रायामप्यलसः सदानन्दमश्नुते सर्वदा ब्रह्मानन्दमनुभवति सोऽयं यतिः स्थितप्रज्ञोऽन्यस्तु लौकिकोयतिरिति भावः ॥ ४१६ ॥

स्थितप्रज्ञः। यतिः। अयम्। यः। सदा। आनन्दम्। अश्नुते॥ ब्रह्मणि। एव। विलीनात्मा। निर्विकारः। विनिष्क्रियः॥

जो पुरुष केवल ब्रह्ममें मग्नमन है और मनके कामादि विकारोंसे रहित है, शरीरयात्रामें भी उद्यम विशेष नहीं करता, सर्वकाल ब्रह्मानन्दका अनुभव करता है सो यह यति स्थितप्रज्ञ संज्ञा वाला है और जो लोकमें प्रसिद्धिमात्रसे अपनेको जीवन्मुक्त कहाता है सो वकवादी है ॥ ४२६ ॥

ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी ॥
निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ॥
सुस्थिताऽसौ भवेद्यस्य स्थितप्रज्ञः सउच्यते॥४२७॥

उक्तस्मृतिस्थस्थितप्रज्ञशब्दं निर्वक्तुं तदवयवप्रज्ञाशब्दार्थमाह। ब्रह्मात्मनोरिति।

महावाक्येषु तत्त्वंपदार्थयोर्लक्षणया शोधितयोः शुद्धयोर्निरुपाधिरूपयोर्ब्रह्मात्मनोः प्रत्यक्परात्मनोरेकभावावगाहिनी नानात्वतिरस्कारेणाभेदावगाहिनी निर्विकल्पा संशयादिशून्या चिन्मात्रा चिन्मात्रगोचरावृत्तिः प्रज्ञेति कथ्यतेऽभिधीयतेइत्यर्थः। निरुक्तप्रज्ञा-

शब्दस्य स्थितशब्देनाभीष्टं समासमाह सुस्थितेति। यस्यासौ सुस्थिता यत्नमन्तराऽऽत्मनि प्रतिष्ठिता भवेत्सस्थितप्रज्ञउच्यते भगवता गीतायामित्यर्थः ॥ ४२७ ॥

ब्रह्मात्मनोः । शोधितयोः । एकभावावगाहिनी ॥ निर्विकल्पा । च । चिन्मात्रा । वृत्तिः । प्रज्ञा । इति । कथ्यते॥सुस्थिता। असौ । भवेद् । यस्य । स्थितप्रज्ञः । सः । उच्यते॥ ४२७ ॥

स्थितप्रज्ञ शब्दके अन्तर्गत प्रज्ञा शब्दका अर्थ वर्णन करे हैं । ब्रह्मात्मनोः इति । शोधित तत्त्वंपदार्थ उपाधिरहित ब्रह्म आत्माकी एकताको ग्रहण करने वाली, भेद तिरस्कारसे अभेद को विषय करनेवाली, संशय–विपर्ययशून्य, चेतनमात्रको विषय करने वाली वृत्तिको प्रज्ञा कहे हैं जिस पुरुषकी सो प्रज्ञा विना यत्न स्थिर हो सो स्थितप्रज्ञ शब्दसे गीतामें अर्जुन के प्रति भगवान् कृष्णजीने निरूपण किया है॥ ४२७ ॥

यस्य स्थिता भवेत्प्रज्ञा यस्यानन्दोनिरन्तरः ॥
प्रपञ्चोविस्मृतप्रायः सजीवन्मुक्तइष्यते ॥४२८॥

निरुक्तस्थितप्रज्ञस्य लक्षणमाकाङ्क्षितं चतुर्दशभिर्वर्णयति । यस्येति ।

यस्य विज्ञस्य निरुक्ता प्रज्ञा स्थिता भवेद्यस्य चानन्दोनिरन्तरोनिर्व्यवधानोयस्य च प्रपञ्चोभोक्तृभोग्यादिलक्षणोविस्मृतप्रायः विस्मृतसमः सपुरुषोजीवन्मुक्तइष्यते इष्टः ॥ ४२८ ॥

यस्य । स्थिता । भवेत् । प्रज्ञा । यस्य । आनन्दः । निरन्तरः॥ प्रपञ्चः । विस्मृतप्रायः । सः। जीवन्मुक्तः । इष्यते॥४२८॥

अब १४ श्लोकोंसे स्थितप्रज्ञके लक्षणको वर्णन करे हैं । जिस विद्वान्‌की पूर्वोक्त प्रज्ञा स्थिर होवै जिसको आत्मानन्दका व्यवधान नहीं है जिसको भोक्ता भोग्यादिरूप प्रपंच विस्मृतके समान है सो पुरुष जीवन्मुक्त माना है ॥४२८॥

लीनधीरपि जागर्ति जाग्रद्धर्मविवर्जितः॥
बोधोनिर्वासनोयस्य सजीवन्मुक्तइष्यते॥४२६॥

यश्च लीनधीरपि ब्रह्मणि लीनबुद्धिरपि जागर्ति न प्रमाद्यति अथ जाग्रद्धर्मवर्जितोजाग्रद्धर्मइन्द्रियैरर्थोपलब्धिलक्षणास्तद्वर्जितस्तदभिमानरहितः। यस्य च निर्वासनोविषयवासनावर्जितोबोधो-ब्रह्मसाक्षात्कारः निष्कलङ्कात्मसाक्षात्कारवासना हि कलङ्कोबोधइति बोध्यम्। सजीवन्मुक्तइत्यादिपूर्ववत्॥ ४२६॥

लीनधीः। अपि। जागर्ति। जाग्रद्धर्मविवर्जितः॥ बोधः। निर्वासनः। यस्य। सः। जीवन्मुक्तः। इष्यते॥४२६॥

और जो ब्रह्ममें लीनबुद्धि भी है परंच जाग्रत्वत् सावधान है, इंद्रियोंसे अर्थके ज्ञानके अभिमानरूप जाग्रत्के धर्मसे रहित है जिसको विषय-वासनारहित ज्ञान (ब्रह्मसाक्षात्कार) है, वासनाही ज्ञानमें कलंक है सो जिसके नहीं सो निष्कलंक ज्ञानी है सोही जीवन्मुक्त है॥ ४२६॥

शान्तसंसारकलनः कलावानपि निष्कलः॥
यस्य चित्तं विनिश्चिन्तं सजीवन्मुक्तइष्यते॥४३०॥

शान्तसंसारकलनः शान्ताऽत्यन्तं निवृत्ता संसारकलना कथं मे संसारोनिवर्तेतेत्यादिरूपा कल्पना यस्य सः कलावानपि करचरणाद्यवयवसम्पन्नदेहोप्यन्यदृष्ट्या दृश्यमानः स्वयमकलब्रह्मरूपत्वान्निष्कलोनिरवयवः यद्वा प्रश्नोपनिषदि प्रदर्शिताः प्राणाद्याः षोडशकलाअत्र कलाशब्देन ग्राह्याः। यस्य च चित्तं विनिश्चिन्तं जीवनमरणादिचिन्तनरहितं सजीवन्मुक्तः॥ ४३०॥

शान्तसंसारकलनः। कलावान्। अपि। निष्कलः॥ यस्य। चित्तम्। विनिश्चिन्तम्। सः। जीवन्मुक्तः। इष्यते॥ ४३०॥

कैसे मेरा संसार निवृत्त होगा यह कल्पना जिसके अत्यन्त निवृत्त है, अन्यकी दृष्टिसे कर चरण आदि अवयवों वाला दीखता

हुवा भी अपने मतसे निरवयव ब्रह्मरूप होनेसे निरवयव है अथवा प्राणादि षोडशकला प्रश्नोपनिषद्में जो कही हैं उनसे रहित है और जिसका चित्त जीवन मरणादिकी चिन्ता से रहित है सो ही जीवन्मुक्त है ॥ ४३० ॥

वर्तमानेपि देहेऽस्मिञ्छायावदनुवर्तिनि ॥
अहन्ताममताऽभावोजीवन्मुक्तस्य लक्षणम् ॥ ४३१ ॥

छायावदनुवर्तिनि नीरोगत्वादिनाऽनुकूलवर्तिनि यद्वा छायेव मिथ्याभूततयाऽनुवृत्तिमति वर्तमानेपि जीवत्यपि स्थूलदेहेऽस्मिन्प्रत्यक्षमुपलभ्यमानेऽहन्ताममताऽभावोऽहन्ता स्थूलोहं गौरोहमित्यादिलक्षणा ममता ममेदं शरीरं स्वस्थमित्याद्यात्मिका तयोरभावोऽनुदयः ॥ ४३१ ॥

वर्तमाने । अपि । देहे । अस्मिन् । छायावद् । अनुवर्तिनि ॥ अहंताममताऽभावः । जीवन्मुक्तस्य । लक्षणम् ॥ ४३१ ॥

रोगरहित होनेसे वा मिथ्याभूत होनेसे छायावत् अनुसारी जीवत् शरीर जो स्थूल देह है प्रत्यक्ष दीखे है इसमें मैं स्थूल हूं, मैं गौर हूं इत्यादि रूप अहंताका, मेरा शरीर अच्छा है इत्यादि रूप ममताका उदय नहीं होना यह जीवन्मुक्तका लक्षण है ॥ ४३१ ॥

अतीताननुसन्धानं भविष्यदविचारणम् ॥
औदासीन्यमपि प्राप्तं जीवन्मुक्तस्य लक्षणम् ॥ ४३२

अतीताननुसन्धानं महादुःखं मे पुरस्तादभूदित्यादिस्मरणस्याभावः भविष्यदविचारणं कथं सुखं भविष्यति मे इत्यादिविचारपरित्यागः प्राप्तमपि सुखसाधनमौदासीन्यमुदासीनवृत्त्या भुक्तं न तु हर्षवृत्त्या शेषमुक्त्यार्थम् ॥ ४३२ ॥

अतीताननुसन्धानम् । भविष्यदविचारणम् ॥ औदासी-

न्यम्। अपि। प्राप्तम्। जीवन्मुक्तस्य। लक्षणम् ॥ ४३२ ॥

मेरेको प्रथम बड़ाभारी दुःख था ऐसा स्मरण न करना और मेरेको सुख कैसा होगा इत्यादि भावी विचारका त्यागना, प्राप्त सुखको भी उदासीनवृत्ति से भोगना यह जीवनका लक्षण है ॥ ४३२ ॥

गुणदोषविशिष्टेऽस्मिन्स्वभावेन विलक्षणे ॥
सर्वत्र समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ॥४३३॥

अस्मिञ्जनजाते गुणदोषविशिष्टे दैवैर्गुणैरासुरैर्दोषैश्च युक्ते स्वभावेन प्रकृत्या विलक्षणे केचिद्राजसस्वभावास्तथा केचित्तामसप्रकृतयोऽपरे च सात्विकस्वभावाइत्येवं विचित्रे सर्वत्र सगुणे सदोषे च शुद्धप्रकृतिके मलिनस्वभावे च समदर्शित्वं ब्रह्मदर्शित्वं गुणदोषचिन्तनमकृत्वा ब्रह्मैवेदमिति दृष्टिमवष्टभ्यावस्थानमित्यर्थः ॥४३३॥

गुणदोषविशिष्टे। अस्मिन्। स्वभावेन। विलक्षणे॥ सर्वत्र। समदर्शित्वम्। जीवन्मुक्तस्य। लक्षणम् ॥ ४३३ ॥

संसारीजीव अनेक प्रकारके हैं कोई दैवगुणयुक्त है और कोई आसुरीसम्पत्-दोषयुक्त है, सर्वकी प्रकृति भिन्न भिन्न है। राजस तामस सात्विक भेदसे विलक्षण स्वभाव हैं, इन सर्व में शुद्धप्रकृति वालेमें गुणचिन्तन और मलिनप्रकृति वाले में दोषचिन्तनको त्यागके सर्वमें ब्रह्मरूप देखना यह जीवन्मुक्तका लक्षण है ॥ ४३३ ॥

इष्टानिष्टार्थसम्प्राप्तौ समदर्शितयात्मनि ॥
उभयत्राविकारित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३४ ॥

इष्टानिष्टार्थसंप्राप्तौ लौकिकदृष्ट्या सुखदुःखसाधनानां सन्निधानेपि समदर्शितया इष्टानिष्टबुद्ध्यस्फुरणतया उभयत्र इष्टानिष्टसाधनयोस्सतोरात्मनि मनसि अविकारित्वं हर्षविषादानुदयः ॥ ४३४ ॥

इष्टानिष्टार्थसम्प्राप्तौ । समदर्शितया । आत्मनि ॥ उभयत्र । अविकारित्वम् । जीवन्मुक्तस्य । लक्षणम् ॥ ४३४ ॥

लौकिकदृष्टिसे सुखसाधन तथा दुःखसाधनोंके प्राप्त होने पर भी इष्ट अनिष्टबुद्धिके न होनेसे इष्टसे व अनिष्ट से मनमें जो विकार न होना अर्थात् हर्ष विषाद न होना सो ही जीवन्मुक्तका लक्षण है ॥ ४३४ ॥

ब्रह्मानन्दरसास्वादासक्तचित्ततया यतेः ॥
अन्तर्बहिरविज्ञानं जीवन्मुक्तस्य लक्षणम् ॥ ४३५॥

यतेः समाहितचित्तस्य ब्रह्मानन्दरसास्वादासक्तचित्ततया। ब्रह्मानन्दएव रसःसारस्तस्यास्वादेऽनुभवे आसक्तचित्ततया निमग्नमानसतया अन्तर्बहिरविज्ञानं बाह्यान्तरभानाभावः ॥ ४३५ ॥

ब्रह्मानन्दरसास्वादासक्तचित्ततया । यतेः ॥ अन्तः । बहिः । अविज्ञानम् । जीवन्मुक्तस्य । लक्षणम् ॥ ४३५ ॥

समाहित चित्तवालेके मनको ब्रह्मानन्दके रसके स्वादमें आसक्त होने से (मग्न होनेसे) बाह्य अन्तरके विकारोंका भान न होना जीवन्मुक्तका लक्षण है ॥ ४३५ ॥

देहेन्द्रियादौ कर्तव्ये ममाहंभाववर्जितः ॥
औदासीन्येन यस्तिष्ठेत्सजीवन्मुक्तलक्षणः ॥ ४३६ ॥

देहेन्द्रियादौ तथा कर्तव्ये सम्पाद्ये गृहधनादौ ममाहंभाववर्जितो-देहेऽहंभावस्य गृहेममभावस्य चाभावेन सम्पन्नः औदासीन्येन राग-द्वेषराहित्येन यस्तिष्ठेद्वर्तेत सउक्तलक्षणः ॥ ४३६ ॥

देहेन्द्रियादौ । कर्तव्ये । ममाहंभाववर्जितः ॥ औदासीन्येन । यः । तिष्ठेत् । सः । जीवन्मुक्तलक्षणः ॥ ४३६ ॥

जो पुरुष शरीर इन्द्रिय आदिमें तथा गृह धनादिमें अहंता ममतासे रहित है और राग द्वेषसे रहित होकर जो स्थित होवे सो जीवन्मुक्तलक्षण वाला है ॥ ४३६ ॥

विज्ञातआत्मनोयस्य ब्रह्मभावः श्रुतेर्बलात् ॥
भवबन्धविनिर्मुक्तः सजीवन्मुक्तलक्षणः ॥४३७॥

यस्य संबन्धसामान्ये षष्ठी येनेत्यर्थः तथाच येनात्मनोजीवस्य स्वस्येत्यर्थः। श्रुतेर्बलात्। "अयमात्माब्रह्म" इति श्रुतिविचाराद्ब्रह्मभावो-ब्रह्मत्वं विज्ञातः साक्षात्कृतस्ततएव भवबन्धविनिर्मुक्तोजन्मादिसंसृतिरूपबन्धवर्जितः। सजीवन्मुक्तलक्षणः ॥ ४३७ ॥

विज्ञातः। आत्मनः। यस्य। ब्रह्मभावः। श्रुतेः। बलात्। भवबन्धविनिर्मुक्तः। सः। जीवन्मुक्तलक्षणः ॥ ४३७ ॥

जिस पुरुषने अपनी ब्रह्मरूपता यह आत्मा ब्रह्म है इस श्रुतिविचारसे साक्षात्कार की है सो उसीसे जन्मादि संसार-बन्धरहित हुवा है सोही जीवन्मुक्तके लक्षण वाला है ४३७

देहेन्द्रियेष्वहंभावइदंभावस्तदन्यके ॥
यस्य नो भवतः क्वापि सजीवन्मुक्तइष्यते ४३८

देहेन्द्रियेषु स्थूलशरीरे चक्षुरादिकरणेषु चेत्यर्थः। अहम्भावः। श्यामोहमन्धोहमित्यादिरूपः। तदन्यके तदन्यस्मिन्घटादाविदंभावोऽयं घटइत्यादिरूपः ताविमौ भावौ भावनाभिधानौ यस्य क्वापि नो भवतोनोपजायेते ॥ ४३८ ॥

देहेन्द्रियेषु। अहम्भावः। इदंभावः। तदन्यके। यस्य। नो। भवतः। क्व। अपि। सः। जीवन्मुक्तः। इष्यते ॥ ४३८ ॥

स्थूल शरीर और इन्द्रियसंघातरूप सूक्ष्म शरीरमें यह मैं हूं ऐसा मिथ्याभिमान और तिनसे अन्य घटादि बाह्यपदार्थों में यह घटादि पदार्थ हैं यह दो भावना जिसको कहीं भी नहीं होती हैं सो जीवन्मुक्त इष्ट है ॥ ४३८ ॥

न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः ॥
प्रज्ञया योविजानाति सजीवन्मुक्तलक्षणः ॥ ४३९ ॥

तथा यः प्रत्यग्ब्रह्मणोस्त्वम्पदार्थतत्पदार्थयोर्निरुपाधिकयोरेवं

ब्रह्मसर्गयोर्जगद्ब्रह्मणोश्च भेदमन्तरं प्रज्ञया यथार्थदृष्टया कदापि कालत्रयेपि न विजानाति किन्तु "ब्रह्मैवेदं सर्व" मिति जानाति सउक्तलक्षणसम्पन्नः ॥ ४३९ ॥

न । प्रत्यग्ब्रह्मणः । भेदम् । कदा । अपि । ब्रह्मसर्गयोः ॥ प्रज्ञया । यः । विजानाति । सः । जीवन्मुक्तलक्षणः॥ ४३९ ॥

तैसे जो पुरुष त्वंपदार्थ तत्पदार्थ निरुपाधि चेतनोंको और जगत् ब्रह्मके भेदको यथार्थबुद्धिकरके किसी कालमें भी नहीं जानता किन्तु सर्वको ब्रह्मरूप ही जानता है सो जीवन्मुक्तके लक्षण वाला है ॥ ४३९ ॥

साधुभिः पूज्यमानेऽस्मिन्पीड्यमानेपि दुर्जनैः ॥
समभावोभवेद्यस्य सजीवन्मुक्तलक्षणः ॥ ४४० ॥

अस्मिन्प्रत्यक्षसिद्धे स्थूलेसंघाते साधुभिः सत्कर्मकरैर्जिज्ञासुभिः पूज्यमाने समर्च्यमाने तथादुर्जनैर्दुष्टकर्मपरायणैः पीड्यमाने बाध्यमानेपि यस्य पुरुषस्य पूजके बाधके च समभावः समदृष्टिः प्रेमद्वेषाभावोभवेत्सः ॥ ४४० ॥

साधुभिः । पूज्यमाने । अस्मिन् । पीड्यमाने । अपि । दुर्जनैः । समभावः । भवेत् । यस्य । सः । जीवन्मुक्तलक्षणः॥ ४४० ॥

इस स्थूल शरीरको श्रेष्ठ पुरुषोंकरके पूजित होनेपर और दुष्टपुरुषोंकरके पीडित होनेपर भी समदृष्टि होवै है, अर्थात प्रीति द्वेष जिसको नहीं होवै सो जीवन्मुक्तके लक्षण वाला है ॥ ४४० ॥

यत्र प्रविष्टाविषयाः परेरिता-
नदीप्रवाहाइव वारिराशौ ॥
लीयन्ति सन्मात्रतया न विक्रिया-
मुत्पादयन्त्येषयतिर्विमुक्तः ॥ ४४१ ॥

यत्र यस्मिन्पुरुषधौरेये वारिराशौ जलनिधौ नदीप्रवाहाइव परेरिताः परप्रयत्नसाध्याविषयाभोज्यादयः प्रविष्टाः प्राप्ताअपि भुक्ताअपीति यावत् सन्मात्रतया ब्रह्मात्मतयैव लीयन्ति ब्रह्मानन्दमभिव्यञ्जयन्ति न विक्रियामुत्पादयन्ति न विषयानन्दभ्रममुत्पादयन्ति सम्पूर्णोऽस्मि सम्प्रत्येतैरिति मतिं वा न जनयन्ति एषउक्तलक्षणोयतिर्विमुक्तोजीवन्मुक्तइत्यर्थः। अत्र जीवन्मुक्तप्रस्तावे "प्रजहाति यदा कामानि"त्यारभ्या"पूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्तियद्वत् तद्वत्कामायं प्रविशन्ति सर्वे सशान्तिमाप्नोति न कामकामी" त्यन्तभगवद्गीतार्थोगीतइतिबोध्यम् ॥ ४४१ ॥

यत्र। प्रविष्टाः। विषयाः। परेरिताः। नदीप्रवाहाः। इव। वारिराशौ ॥ लीयन्ति। सन्मात्रतया। न। विक्रियाम्। उत्पादयन्ति। एषः। यतिः। विमुक्तः ॥ ४४१ ॥

जैसे सागरमें नदीके प्रवाह प्रेरितहुवे प्रविष्ट होते हैं तैसे ही जिसे पुरुषोत्तममें दूसरे पुरुषोंके यत्नकरके अर्पण किये भोज्य भक्ष्यादि भोग प्राप्त होते हैं और भोगनेमें भी आते हैं परंच ब्रह्म आत्मरूप होकर ब्रह्मानन्दके ही अभिव्यक्तिके कारण होते हैं, विकारको नहीं उत्पन्न करते अर्थात् विषयानन्दभ्रान्तिको नहीं उत्पादन करते हैं मैं अब इनके प्राप्त होनेसे तृप्त हुवा हूं ऐसी मतिको नहीं उत्पन्न करते हैं ऐसे लक्षणवाला सन्त जीवन्मुक्त है ॥४४१॥

विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः॥
अस्ति चेन्न सविज्ञातब्रह्मभावोबहिर्मुखः॥४४२

ननु प्रारब्धकर्मणां प्राबल्यादज्ञदशायामिव विज्ञातेपि तत्त्वे विज्ञस्य प्रवृत्तिरविरुद्धेति चेन्नेत्याह। विज्ञातेति।

विज्ञातब्रह्मतत्त्वस्य साक्षात्कृतब्रह्मात्मैक्यस्य यथापूर्वमज्ञानदशायामिव न संसृतिर्नासक्त्या प्रवृत्तिरस्ति चेद्यथासक्तिपूर्वा प्रवृत्तिरस्ति कस्यचिल्लौकिकस्य ब्रह्मविदस्तर्हि सपुरुषोविज्ञातब्रह्मभावोन किन्तु बहिर्मुखोबाह्यदृष्टिरेव नात्मदृष्टिसम्पन्नइत्यर्थः॥ ४४२ ॥

विज्ञातब्रह्मतत्त्वस्य । यथापूर्वम् । न । संस्रतिः॥ अस्ति । चेत् । न । सः । विज्ञातब्रह्मभावः । बहिर्मुखः ॥ ४४२ ॥

प्रारब्ध कर्मकी प्रबलतासे ज्ञानीकी प्रवृत्ति होवे है इस प्रश्नका उत्तर कहे हैं। विज्ञात इति । हे शिष्य! जिसने जीव ब्रह्मका अभेद साक्षात्कार करलिया है उसकी अज्ञानअवस्थावत् आसक्तिपूर्वक प्रवृत्ति नहीं होती अगर जो होती है किसी लौकिक ज्ञानीकी तौ सो ब्रह्मात्मज्ञानी नहीं किन्तु बाह्यदृष्टि है उसको आत्मदृष्टि नहीं हुई किन्तु अनात्मदृष्टि है ॥ ४४२ ॥

प्राचीनवासनावेगादसौ संसरतीति चेत् ॥
न सदेकत्वविज्ञानान्मन्दीभवति वासना ॥ ४४३ ॥

ननु नैषविदुषोपराधोयेनैवं सउपालभ्यते किन्तु प्राचीनकर्मवासनाप्राबल्यादनिच्छन्नपि संसरत्येव विद्वानिति चेत्तत्राह प्राचीनेति। असौ ब्रह्मनिष्ठः प्राचीनवासनावेगात् पूर्वोपार्जितादृष्टभावनावशात् संसरति विषयासक्तिपुरःसरमेव व्यवहरतीति चेन्न यतः सदेकत्वविज्ञानात्सद्ब्रह्माभेदबोधाद्वासनैव मन्दीभवति आसक्त्युत्पादनक्षमा न भवति अन्यथा बोधाबोधयोरज्ञविज्ञयोश्चाविशेषो भवेदिति भावः ॥ ४४३ ॥

प्राचीनवासनावेगात् । असौ । संसरति । इति । चेत् ॥ न । सदेकत्वविज्ञानात् । मन्दी । भवति । वासना ॥ ४४३ ॥

यह विद्वान्का अपराध नहीं है प्राचीन कर्मोंकी वासना की प्रबलतासे आसक्तिपूर्वक प्रवृत्ति भी होजाती है इस शङ्का का समाधान करे हैं । प्राचीन इति । हे शिष्य ! पूर्वजन्मकी एकत्र हुई अदृष्टभावनावशसे विषयोंमें आसक्तिपूर्वक ही ज्ञानी व्यवहार करता है ऐसा मत कहो, अविनाशी ब्रह्माभेदके ज्ञानसे वासना ही मन्द होजाती है, आसक्तिके उत्पादनमें समर्थ नहीं होती है ऐसा न हो तौ अज्ञानी से ज्ञानीकी क्या विशेषता होगी ॥ ४४३ ॥

अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि ॥
तथैव ब्रह्मणि ज्ञाते पूर्णानन्दे मनीषिणः ॥४४४॥

वस्तुज्ञानस्वभावएवायं नापूर्वमिदमभिहितमिति सदृष्टान्तमाह। अत्यन्तकामुकस्यापीति।

अत्यन्तकामुकस्यापि निरन्तरं कामलम्पटस्यापि सर्वथा बहिर्मुखस्य पुंसोमातरि स्वजनन्यां वृत्तिर्भोगेच्छा कुण्ठति प्रतिबध्यते नोदेत्युदितापि नश्यतीत्यर्थस्तथैव पूर्णानन्दे ब्रह्मणि ज्ञातेऽभेदेन साक्षात्कृते सति विषयानन्दभ्रान्तेर्विनाशान्मनीषिणोब्रह्मविदुषः संसृतिहेतुवासनाकुण्ठी भवति न कार्यमुत्पादयितुमलमिति भावः॥

अत्यन्तकामुकस्य। अपि। वृत्तिः। कुण्ठति। मातरि॥ तथा। एव। ब्रह्मणि। ज्ञाते। पूर्णानन्दे। मनीषिणः॥४४४॥

पूर्वोक्त अर्थमें दृष्टान्त कहते हैं। अत्यन्त इति। निरन्तर कामलम्पट पुरुषकी भी अपनी मातामें भोगकी इच्छा रुकजाती है तैसे पूर्ण आनन्दरूप ब्रह्मके साक्षात्कार होने पर विषयानन्दभ्रान्तिका विनाश होनेसे ब्रह्मनिष्ठ पुरुषकी संसारकी हेतुवासना मन्द होती है स्वकार्यप्रवृत्तिके उत्पन्न करनेमें असमर्थ होजाती है॥ ४४४॥

निदिध्यासनशीलस्य बाह्यप्रत्ययईक्ष्यते॥
ब्रवीति श्रुतिरेतस्य प्रारब्धं फलदर्शनात्॥ ४४५॥

अनासक्तिपूर्वाबाह्यप्रवृत्तिस्तु श्रौती यौक्तिकी च युज्यते इत्याह। निदिध्यासनशीलस्येति।

निदिध्यासनशीलस्य स्वाभाविकसमाध्यभ्यासशालिनोपि विदुषो बाह्यप्रत्ययउपदेशभोजनपानादिव्यवहारः कर्मण्यच्प्रत्ययः प्रत्ययशब्दे। एतस्य समाधेर्व्युत्थितस्य प्रारब्धं श्रुतिः "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति रूपा ब्रवीति। वदति किंचैवमेव फलदर्शनादपि दृश्यते इत्याह फलेति। फलदर्शनाद्भोगदर्शनात्प्रारब्धमनुमीयते इत्यर्थः॥ ४४५॥

निदिध्यासनशीलस्य । बाह्यप्रत्ययः । ईक्ष्यते ॥ ब्रवीति । श्रुतिः । एतस्य । प्रारब्धम् । फलदर्शनात् ॥ ४४५ ॥

आसक्तिको त्यागकरके बाह्यप्रवृत्ति वैदिकी और लौकिकी करनी उचित है ऐसा कहे हैं। निदिध्यासनशीलस्य इति । स्वाभाविक समाधिके अभ्यास वाले विद्वान्को उपदेश भोजनादि व्यवहार दीखता है, समाधिसे उत्थान हुवेके प्रारब्धकर्मको श्रुति कहती है कि जबतक विद्वान्का देह त्याग नहीं होता तब तक विदेह मोक्षमें विलम्ब है और भोगरूप फलके देखनेसे भी प्रारब्धका अनुमान विद्वान् लोक करते हैं ॥ ४४५ ॥

सुखाद्यनुभवोयावत्तावत्प्रारब्धमिष्यते ॥
फलोदयः क्रियापूर्वोनिष्क्रियोनहि कुत्रचित् ॥ ४४६ ॥

उक्तं विवृणोति । सुखादीति ।

यावत्सुखाद्यनुभवः । सुखदुःखादीनांकर्मफलानामनुभवोभोगोयावदस्ति तावत्तत्पर्यन्तमेव प्रारब्धमेतच्छरीरारम्भकं कर्मेष्यते स्वीक्रियते कुतस्तत्राह फलोदयइति । फलोदयः कार्योदयः सुखदुःखभोगोदयइत्यर्थः । क्रियापूर्वः पूर्वोपार्जितपुण्यपापाख्यकर्मजन्यः सनिष्क्रियः स्वकारणक्रियामन्तरेण कुत्रचिल्लोके वेदे वा लोकपरलोकयोर्वा नहि दृश्यते इत्यर्थः । तथाच जीवन्मुक्तमनोऽवशिष्टकर्म सुखाद्यनुभूतेर्व्यतिरेके विदेहमुक्तवदन्वये चाज्ञवदिति युक्तिः फलितेति भावः ॥ ४४६ ॥

सुखाद्यनुभवः । यावत् । तावत् । प्रारब्धम् । इष्यते ॥ फलोदयः । क्रियापूर्वः । निष्क्रियः । नहि । कुत्रचित् ॥ ४४६ ॥

अनुमानको दिखावै हैं । सुखादि इति । कर्म फलका भोग, प्रारब्ध जबतक है तबतक ही होता है सो प्रारब्ध इस शरीरके भोगोंका हेतु आरंभक कर्म है सो स्वकार किया जाता

१ जीवन्मुक्तमनइति पक्षनिर्देशः । अवशिष्टकर्मेतिसाध्यंसुखाद्यनुभूतेरितिहेतुः ।

है क्योंकि सुख दुःख भोगकी प्राप्ति पूर्वकृत पुण्य पापरूप कर्म से जन्य होती है विना कारणसे कार्यकी प्राप्ति कहीं भी लोक परलोकमें नहीं दीखती है ॥ ४४६ ॥

अहंब्रह्मेति विज्ञानात्कल्पकोटिशतार्जितम् ॥
सञ्चितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥४४७॥

ननु प्रारब्धकर्मोदये बोधोनिष्फलस्तत्राह। अहंब्रह्मेतीति।

अहंब्रह्मेति विज्ञानात्। अहंब्रह्मास्मीति बोधात्। प्रबोधाज्जागरणात्स्वप्नकर्मवत् स्वप्नावस्थायां कृतकर्माभासवत्। कल्पकोटिशतार्जितमनेकजन्मपरम्परासम्पादितं सञ्चितं ज्ञानप्राक्कालिकं कर्म विलयं विनाशं याति प्राप्नोति तथाच तद्विनाशनेन बोधसाफल्यमिति भावः ॥ ४४७ ॥

अहम्। ब्रह्म। इति। विज्ञानात्। कल्पकोटिशतार्जितम् ॥ सञ्चितम्। विलयम्। याति। प्रबोधात्। स्वप्नकर्मवत् ॥४४७॥

मैं शुद्ध ब्रह्म हूं इस ज्ञानसे अनेक जन्मकरके सम्पादित और ज्ञानसे पूर्व जो किये हैं कर्म पुण्य पाप सो नाशको प्राप्त होते हैं जैसें जाग्रत् हुवे पर स्वप्नअवस्थामें किये कर्मोंका नाश होवै है ॥ ४४७ ॥

यत्कृतं स्वप्नवेलायां पुण्यं वा पापमुल्वणम् ॥
सुप्तोत्थितस्य किन्तत्स्यात्स्वर्गाय नरकाय वा॥४४८॥

स्वप्नकर्मवदित्युक्तं विवृणोति। यत्कृतमिति।

स्वप्नवेलायां स्वप्नकाले पुण्यं यज्ञादि उल्वणं भयंकरं पापं ब्रह्महत्यादि सुप्तोत्थितस्य सुप्तात्स्वप्नावस्थायाउत्थितस्य प्रबुद्धस्य तत्। स्वप्नसमयानुष्ठितं पुण्यं पापं वा स्वर्गाय नरकाय स्वर्गनरकफलकं किं स्यादपि तु न स्यादित्यर्थः ॥ ४४८ ॥

यत्। कृतम्। स्वप्नवेलायाम्। पुण्यम्। वा। पापम्। उल्वणम् ॥ सुप्तोत्थितस्य। किम्। तत्। स्यात्। स्वर्गाय। नरकाय। वा ॥ ४४८ ॥

स्वप्नदृष्टान्तको स्पष्ट करे हैं। यत् इति। स्वप्नकालमें जो किये यज्ञादि वा भयंकर पाप ब्रह्महत्यादि सो कर्म स्वप्नसे उत्थान हुवेको स्वर्गका अथवा नरकका कारण होता है क्या अर्थात् नहीं होता है ॥ ४४८ ॥

स्वप्नसङ्गमुदासीनं परिज्ञाय नभोयथा ॥
न श्लिष्यति च यत्किञ्चित्कदाचिद्भाविकर्मभिः॥४४९

भाविकर्मभिरपि विदुषोऽश्लेषमाह स्वप्नसङ्गमिति।

स्वप्नात्मानं नभोयथा नभइवासङ्गं निर्लेपमुदासीनं च परिज्ञाय कदाचिदपि भाविकर्मभिर्यत्किञ्चिदपि न श्लिष्यति लेशमात्रेणापि न लिप्यतइत्यर्थः॥ ४४९ ॥

स्वप्नम्। असङ्गम्। उदासीनम्। परिज्ञाय। नभः। यथा॥ न। श्लिष्यति। च। यत्किञ्चित्। कदाचित्। भाविकर्मभिः॥

भाविकर्मके संगभी संबन्ध विद्वान्को नहीं होवै है ऐसा कहे हैं। स्वप्नम् इति। आत्माको आकाशवत् निर्लेप उदासीन जानके कभी भी भाविकर्मकरके लेशमात्र भी लेप नहीं होता है ॥ ४४९ ॥

न नभोघटयोगेन सुरागन्धेन लिप्यते ॥
तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते॥ ४५० ॥

नभोयथेत्युक्तं विवृणोति। न नभइति।

यथाहि सुरागन्धेन पूर्णेन घटेन सहयोगेन संयोगेनापि नभोन लिप्यते तथोपाधियोगेन तद्धर्मैरुपाधिधर्मैः पुण्यपापादिभिरात्मापि नैव लिप्यतेऽसङ्गत्वहेतोरुभयत्रावशिष्टत्वादिति भावः॥ ४५० ॥

न। नभः। घटयोगेन। सुरागन्धेन। लिप्यते ॥ तथा। आत्मा। उपाधियोगेन। तद्धर्मैः। न। एव। लिप्यते॥४५०॥

आकाश दृष्टान्तको स्पष्ट करे हैं। न इति। जैसे मदिरासे

पूर्ण घटके संबन्धसे आकाश नहीं लिप्त होता है तैसेही उपाधि के संबन्धसे, उपाधिके पुण्य पापादि धर्मोंकरके आत्माभी नहीं लिप्त होता है, असंगरूपतारूप कारणको तुल्य होने से॥४५०॥

ज्ञानोदयात्पुरारब्धं कर्म ज्ञानान्न नश्यति॥
अदत्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत्॥४५१॥

ननु कर्मत्वाविशेषात्प्रारब्धकर्मणामपि ज्ञानेन लयः प्राप्नोत्येवात-स्तेषां भोगैकविलयमाह। ज्ञानोदयादिति।

ज्ञानोदयात्पुरा पूर्वमारब्धं कर्मारब्धसंज्ञं येनेदं शरीरमारब्धं तत्स्व-फलं भोगमदत्वाऽसम्पाद्य ज्ञानादात्मज्ञानादपि न नश्यति तत्र दृष्टा-न्तमाह लक्ष्यमिति। लक्ष्यं मृगादिकमुद्दिश्योत्सृष्टबाणवत्। यथा-लक्ष्योद्देशेन प्रक्षिप्तबाणस्य मध्ये नोपसंहारस्तथाऽऽरब्धकर्मणोपि भोगमन्तरा न लयइति भावः॥ ४५१॥

ज्ञानोदयात्। पुरा। आरब्धम्। कर्म। ज्ञानात्। न। नश्यति॥ अदत्वा। स्वफलम्। लक्ष्यम्। उद्दिश्य। उत्सृ-ष्टबाणवत्॥ ४५१॥

प्रारब्ध कर्मका भी ज्ञानसे नाश क्यों नहीं होता इस शङ्काका समाधान करते हैं। ज्ञानोदयात् इति। हे शिष्य! जिस कर्मने ज्ञानोदयसे प्रथम इस शरीरका आरम्भ किया है सो कर्मभोगको न देकर आत्मज्ञानसे भी नहीं शान्त होता है जैसे निशानेको उद्देशकरके चलाया हुवा बाण पकड़ा नहीं जाता किन्तु मृगादिको मारके अचल होता है तैसेही प्रारब्ध-कर्मभोग देकर ही नष्ट होता है॥ ४५१॥

व्याघ्रबुद्ध्या विनिर्मुक्तोबाणः पश्चात्तु गोमतौ॥
न तिष्ठति छिनत्त्येव लक्ष्यं वेगेन निर्भरम्॥४५२॥

उत्सृष्टबाणवदित्युक्तं विवृणोति। व्याघ्रबुद्ध्येति। विनिर्मुक्तोधानु-बाणोव्याघ्रबुद्ध्या सम्मुखं जीवं व्याघ्रं मत्वा

ष्केण धनुषउत्सृष्टः पश्चादुत्सर्गानन्तरं तु गोमतौ गौरयमिति मतौ जातायामपि न तिष्ठति न गतिनिवृत्तिमान्भवति किन्तु निर्भरमत्यन्तं वेगेन लक्ष्यं छिनत्त्येवेत्यर्थः । अत्र "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् । नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति स्मृतिरनुसन्धेया ॥ ४५२ ॥

व्याघ्रबुद्ध्या । विनिर्मुक्तः । बाणः । पश्चात् । तु । गोमतौ ॥ न । तिष्ठति । छिनत्ति । एव । लक्ष्यम् । वेगेन । निर्भरम् ॥

बाणदृष्टान्तको स्पष्ट करे हैं । व्याघ्रइति । अपने सन्मुख जीवको व्याघ्र जानकर बाण चलाने वालेने धनुषसे बाण चलादिया । पीछे यह तो व्याघ्र नहीं था गौ है ऐसी बुद्धिके होनेपर भी बाण चलनेसे रुकता नहीं किन्तु अतिवेगकरके निशानेको छेदन करता है चाहे गौ हो चाहे व्याघ्र हो तैसे ही प्रारब्ध कर्म भी सर्वको ही भोगना पड़ता है चाहे ज्ञानी हो चाहे अज्ञानी हो ॥ ४५२ ॥

प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः,
सम्यग्ज्ञानहुताशनेन विलयः प्राक्संचितागामिनाम् ॥
ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थिता-
स्तेषां तत् त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम् ॥

प्रारब्धस्य भोगेन क्षये ज्ञानेन चेतरकर्मक्षये सिद्धमाह । प्रारब्धमिति । विदां खलु विदुषामपि प्रारब्धं बलवत्तरमवश्यंभोगप्रदमित्यर्थः । तथाचोक्त "मवश्यंभाविभावानां प्रतिकारोभवेद्यदि । तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः" इति । ततश्च तस्य भोगेन क्षयोविनाशः प्राक्संचितागामिनां कर्मणां तु सम्यग्ज्ञानहुताशनेन ब्रह्मात्मैक्यज्ञानाग्निना विलयोविनाशोभवति । अन्यदृष्ट्या खल्वियं कथा तद्दृष्ट्या तु नैवमित्याह ब्रह्मात्मैक्यमिति । इत्थं च ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ब्रह्मात्मतया ये संस्थितास्तेषां तत्त्रितयं प्राक्संचितागामिप्रारब्धाख्यं कर्म त्रितयं क्वचिदपि नहि तद्दृष्ट्या त्रितय-

मपि नष्टमेव यतस्ते महात्मानोनिर्गुणं ब्रह्मैव न ब्रह्मान्ये येन कर्मणा संबध्येरन्निति भावः॥४५३ ॥

प्रारब्धम् । बलवत्तरम् । खलु । विदाम् । भोगेन । तस्य । क्षयः । सम्यग्ज्ञानहुताशनेन । विलयः । प्राक्संचितागामिनाम् ॥ ब्रह्मात्मैक्यम् । अवेक्ष्य । तन्मयतया । ये । सर्वदा । संस्थिताः । तेषाम् । तत् । त्रितयम् । न हि । क्वचित् । अपि । ब्रह्म । एव । ते । निर्गुणम् ॥ ४५३ ॥

भोगसे प्रारब्ध कर्मके और ज्ञानसे संचित आगामि कर्मके नाश होनेपर सिद्धहुवे फलको कहे हैं।प्रारब्धम् इति।विद्वानोंको भी प्रारब्ध कर्म अवश्य भोग देवै है इसकारण तिसका भोग से ही नाश होवै है और पूर्वकृत संचित और आगामि कर्मोंका यथार्थ आत्मका ज्ञानरूप अग्निसे नाश होवै है परन्तु यह निर्णय अन्यपुरुषकी दृष्टिको लेकर किया है,ब्रह्मज्ञानीकी दृष्टि में प्रारब्धकथा नहीं है और ब्रह्म आत्माकी एकताका साक्षात्कार करके ब्रह्मरूप होकर सर्वकाल जो स्थित हैं तिनके मतमें पूर्वसंचित आगामि और प्रारब्धरूप कर्म तीनों ही कहीं भी नहीं हैं, तीनों नष्ट होगये हैं जिस कारण सो महात्मा निर्गुण ब्रह्मरूप होगये हैं,ब्रह्मसे अन्य नहीं हैं इसी कारण कर्मसंबंध से रहित हैं ॥ ४५३ ॥

उपाधितादात्म्यविहीनकेवल-
ब्रह्मात्मनैवात्मनि तिष्ठतोमुनेः ॥
प्रारब्धसद्भावकथा न युक्ता,
स्वप्नार्थसंबन्धकथेव जाग्रतः ॥ ४५४ ॥

तन्मयतया ये संस्थिताइत्युक्तं विवृणोति । उपाधीति ।

उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैव अहंकारादीनामुपाधीनां तादात्म्यविहीनेनातएव केवलेनाद्वितीयेन ब्रह्मात्मना ब्रह्मस्वरूपेणात्मनि हृदि तिष्ठतोनिष्ठांलब्धवतोमुनेर्ब्रह्मनिष्ठस्य जाग्रतः प्रबुद्धस्य स्वप्नार्थसम्बन्धकथेव स्वप्नदृष्टपदार्थसम्बन्धापादकवार्तेव प्रारब्धसद्भावकथा प्रारब्धमस्यावशिष्टं न ज्ञाननष्टमित्येषा कथा न युक्ताऽसङ्गे तस्मिन्मिथ्यासङ्गापादनकथा मिथ्याप्रलापवदयोग्यैवेत्यर्थः॥४५४

उपाधितादात्म्यविहीनकेवलब्रह्मात्मना । एव । आत्मनि । तिष्ठतः । मुनेः ॥ प्रारब्धसद्भावकथा । न । युक्ता । स्वप्नार्थसम्बन्धकथा । इव । जाग्रतः ॥ ४५४ ॥

पूर्वोक्तका विवरण करे हैं । उपाधि इति । अहंकारादि उपाधियोंके तादात्म्यसे रहित केवल अद्वितीय ब्रह्मस्वरूपकरके हृदयमें निष्ठाको प्राप्त हुवे ब्रह्मनिष्ठको जागे हुवे पुरुषको स्वप्नदृष्ट पदार्थोंके सम्बन्धको प्राप्त करनेकी कथावत् प्रारब्ध ज्ञानीका नष्ट नहीं हुवा अभी बना है यह कथा युक्त नहीं है, असंगरूप विद्वान्में मिथ्या पदार्थोंके संगके आपादनकी कथा मिथ्या बकवादके समान है ॥ ४५४ ॥

नहि प्रबुद्धः प्रतिभासदेहे,
देहोपयोगिन्यपि च प्रपञ्चे ॥
करोत्यहन्तां ममतामिदंतां,
किन्तु स्वयं तिष्ठति जागरेण ॥४५५॥

जाग्रतइत्युक्तं विवृणोति । नहीति ।

प्रबुद्धोविनष्टस्वप्नः प्राप्तजागरश्च जनः प्रतिभासदेहे स्वप्ने प्रतीते प्रतीतिमात्रे देहे । देहोपयोगिनि प्रतिभासदेहसुखसाधने प्रपञ्चेपि च पुत्रवित्तगृहादौ चाअहन्तां तद्देहे, ममतां तत्पुत्रे, इदन्तां तद्वित्तगृहादौ, नहि करोति, किन्तु स्वयमात्मनैव केवलेनाद्वितीयेन जागरेण, तिष्ठति तद्वद्ब्रह्मविद्याजागरेण ब्रह्मनिष्ठस्तिष्ठतीत्यर्थः ॥

नहि । प्रबुद्धः । प्रतिभासदेहे । देहोपयोगिनि । अपि । च ।

प्रपञ्चे ॥ करोति । अहन्ताम् । ममताम् । इदंताम् । किन्तु । स्वयम् । तिष्ठति । जागरेण ॥ ४५५ ॥

पूर्वोक्तका विवरण करे हैं । नाहि इति । जिसका स्वप्न दूर होगया है और जाग्रत् अवस्थाको प्राप्त हुवा है सो स्वप्नमें प्रतिभास हुवे देहमें और प्रतिभास देहके साधन पुत्र धन गृह आदि सामग्रीमें, अहन्ता ममता इदन्ता नहीं करता है। स्वप्नदृष्ट देहमें अहन्ताको, उसके पुत्रोंमें ममताको, उसके धनादिमें इदन्ताको जागाहुआ कभी नहीं करता । किन्तु केवल जाग्रत्करके आत्मरूपतासे ही स्थित होता है तैसे ही ब्रह्मनिष्ठ विद्वान् ब्रह्मविद्यारूप जाग्रत्करके ही स्थित होता है, अविद्यारात्रिमें दृष्ट मायिक देहादिमें कदापि आसक्त नहीं होता है ॥ ४५५ ॥

न तस्य मिथ्यार्थसमर्थनेच्छा,
न संग्रहस्तज्जगतोपि दृष्टः ॥
तत्रानुवृत्तिर्यदि चेन्मृषार्थे,
न निद्रया मुक्तइतीष्यते ध्रुवम् ॥४५६॥

दृष्टान्तं विशेषेण स्पष्टयति । न तस्येति । मिथ्याभूतस्यार्थस्य वित्तस्य प्रबुद्धजनस्य मिथ्यार्थसमर्थनेच्छा न तज्जगतोपि स्वप्नदृष्टस्य वित्तादेः पदार्थस्य न समर्थनेच्छा अभ्यर्थना न तज्जगतोपि संग्रहः संरक्षणादिर्न दृष्टोनैव दृश्यते च। यदि चेत्तत्र स्वप्नदृष्टे मृषार्थे मिथ्याभूतेर्थे पदार्थे वित्तादौ कस्यचिदज्ञस्यानुवृत्तिरनुवर्तनं दृश्यते तर्हि सनिद्रया ध्रुवं न मुक्तोन रहितइतीष्यते तवैव तत्र प्रबुद्धत्वभ्रमः सतु निद्रालुरेवेति भावः ॥ ४५६ ॥

न । तस्य । मिथ्यार्थसमर्थनेच्छा । न । संग्रहः । तज्जगतः । अपि । दृष्टः ॥ तत्र । अनुवृत्तिः । यदि । चेत् । मृषार्थे । न । निद्रया । मुक्तः । इति । इष्यते । ध्रुवम् ॥ ४५६ ॥

दृष्टान्तको विशेषकरके स्पष्ट करे हैं। न तस्य इति। ज्ञान जाग्रत्को प्राप्त हुये ब्रह्मनिष्ठ पुरुषको मिथ्यारूप पदार्थकी प्रार्थना करनेकी इच्छा नहीं होती है स्वप्नदृष्ट जगत्की रक्षा भी नहीं दीखे है जेकर स्वप्नदृष्ट मिथ्याभूत धनादिमें किसी अज्ञानीका अनुवर्तन (अर्जन,पालन) दीखे है तौ सो निद्रासे रहित नहीं हुवा है निश्चय करो तुम उसको जागता समझते हो वह तौ सोता पड़ा है यह दृष्टान्त है ॥ ४५६ ॥

तद्वत्परे ब्रह्मणि वर्तमानः,
सदात्मना तिष्ठति नान्यदीक्षते ॥
स्मृतिर्यथा स्वप्नविलोकितार्थे,
तथा विदः प्राशनमोचनादौ ॥ ४५७ ॥

दृष्टान्तसिद्धं दार्ष्टान्तिके स्पष्टयति। तद्वदिति।

तद्वत् प्रबुद्धवत् परे ब्रह्मणि वर्तमानः ब्रह्ममात्रवृत्तिरित्यर्थः। सदात्मना ब्रह्मात्मना तिष्ठति अन्यद् ब्रह्मभिन्नं कर्म तत्फलं च नेक्षते न विजानाति। तर्हि भुजिक्रियादिकमावश्यकं कर्म तस्य कथमिति चेत्तत्राह स्मृतिरिति यथा प्रबुद्धस्य स्वप्नविलोकितार्थे स्मृतिर्मिथ्यामात्रगोचरा तथा विदोब्रह्मविदोपि प्राशनमोचनादौ भोजनमलोत्सर्गाद्यावश्यकेकर्मण्यपि प्रवृत्तिरिति कथमनेनादृष्टं प्रारब्धादिकमदृष्टं सुधैव कल्प्यतइति भावः ॥ ४५७ ॥

तद्वत्। परे। ब्रह्मणि। वर्तमानः। सदात्मना। तिष्ठति। न। अन्यद्। ईक्षते ॥ स्मृतिः। यथा। स्वप्नविलोकितार्थे। तथा। विदः। प्राशनमोचनादौ ॥ ४५७ ॥

दृष्टान्तसिद्ध अर्थको दार्ष्टान्तिकमें दिखावै हैं। तद्वत्इति। जागेहुये पुरुषवत् ब्रह्ममात्रमें जिसकी मनकी वृत्ति लगी है सो

१ धर्माधर्मस्वरूपम्।

ब्रह्मरूप होकर स्थित होवै है, ब्रह्मसे भिन्न कर्म वा उसका फल नहीं जानता है जैसें जागेहुवे पुरुषको स्वप्न पदार्थकी स्मृति मिथ्या अर्थविषयक होवै है तैसे ही ब्रह्मवेत्ताको भोजन शौचादि आवश्यक कर्ममें प्रवृत्ति भी स्वप्नप्रवृत्तिवत् अवास्तव दृष्टिसे होवै है ॥ ४५७ ॥

कर्मणा निर्मितोदेहः प्रारब्धं तस्य कल्प्यताम्॥
नानादेरात्मनोयुक्तं नैवात्मा कर्मनिर्मितः ॥४५८

ब्रह्मवित्स्वरूपविचारणया तु प्रारब्धकल्पनापि न सम्भवतीत्याह। कर्मणेति।

देहः कर्मणा निर्मितोरचितस्तस्य देहस्य प्रारब्धं कल्प्यतां समर्प्यतामनादेः शाश्वतस्यात्मनस्तु तन्नो युक्तं कुतोयतआत्मा कर्मनिर्मितोन यद्धि प्रारब्धकर्मणा रचितं तस्य तदात्मनस्तु नित्यत्वादनारभ्यत्वेन कर्मानारब्धत्वात्प्रारब्धकल्पना न युक्ता अन्यथा नित्यत्वविलोपापत्तिर्नहि भवति नित्यं चारब्धं चेतीति दिक् ४५८

कर्मणा। निर्मितः। देहः। प्रारब्धम्। तस्य। कल्प्यताम्॥ न। अनादेः। आत्मनः। युक्तम्। न। एव। आत्मा। कर्मनिर्मितः॥ ४५८॥

ब्रह्मज्ञानीके स्वरूपके विचारसे तौ प्रारब्ध कर्मकी कल्पना भी नहीं बने है ऐसा कहे हैं। कर्मणा इति। देह कर्मोंकरके रचित है तिसका प्रारब्ध कर्म कल्पना होगा, अनादि निरन्तर आत्माका तौ प्रारब्ध कर्म कल्पना करना उचित नहीं है जिस कारण आत्मा कर्मोंसे रचा हुवा नहीं है। जो कर्मसे रचित है उसका कर्म कहना बनसके है और जो रचाहुआ ही नहीं उस आत्माका कर्म कहना अयोग्य है॥ ४५८ ॥

अजोनित्यः शाश्वतइति ब्रूते श्रुतिरमोघवाक्॥
तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ४५९

आत्मानादित्वे श्रुतिं प्रमाणयति । अजइति ।

अमोघवाक् सफलावाणी अबाध्यार्था सरस्वतीत्यर्थः । "अजो-नित्यः शाश्वतोऽयं पुराणोन हन्यते हन्यमाने शरीरे" । इति रूपा श्रुतिर्वेदोऽजोनित्यइति ब्रूते तथाचात्मनित्यत्वमबाध्यार्थकवेदप्रमाणसिद्धमिति भावः। भवतु निरुक्तरूपत्वमात्मनस्तथापि ब्रह्मविदः किमायातमतआह तदात्मनेति। अस्य विदुषस्तदात्मना नित्यब्रह्मात्मना तिष्ठतः स्थितस्य प्रारब्धकल्पना कुतोन कुतोपि हेतोरित्यर्थः॥

अजः । नित्यः । शाश्वतः । इति । ब्रूते । श्रुतिः । अमोघवाक् ॥ तदात्मना । तिष्ठतः । अस्य । कुतः । प्रारब्धकल्पना॥

आत्माको अनादि होनेमें श्रुतिप्रमाण दिखावे हैं । अजइति । अबाध्य अर्थ वाली वेदवाणी यह आत्मा जन्मसे रहित है, नित्य है, अनादि निरन्तर है ऐसा कहती है जबकि आत्मा वेदप्रमाणसिद्ध अनादि अनन्त नित्य है तब उसके संग अभेदरूप होकर वर्तमान ब्रह्मनिष्ठको प्रारब्ध कर्मकल्पना कहांसे होसक्ती है कहीं से भी नहीं होसके है ॥४५९॥

प्रारब्धं सिध्यति तदा यदा देहात्मना स्थितिः॥
देहात्मभावोनैवेष्टः प्रारब्धं त्यज्यतामतः ॥४६०॥

ननु शवस्य प्रारब्धाभावाज्जीवतएव तद्वाच्यं तथाच जीवन्मुक्तस्यापि तत्प्राप्तोत्येवेति चेन्नेत्याह । प्रारब्धमिति ।

यदा पुरुषस्य देहात्मना देहतादात्म्येन स्थितिस्तदा प्रारब्धं सिध्यति स्थितिं लभते विदुषस्तु देहात्मभावोनैवेष्टोनाभिमतोनित्यात्मदर्शित्वात्तस्यातोविदुषि प्रारब्धं प्रारब्धाग्रहस्त्यज्यतां नापाद्यतामित्यर्थः ॥ ४६० ॥

प्रारब्धम् । सिध्यति । तदा । यदा । देहात्मना । स्थितिः ॥ देहात्मभावः । न । एव । इष्टः । प्रारब्धम् । त्यज्यताम् । अतः ॥ ४६० ॥

अन्य जीवते पुरुषोंवत जीवन्मुक्तको भी जीवित होनेसे

प्रारब्ध कर्म अवश्य मानना चाहिये इस शङ्काका उत्तर कहे हैं। प्रारब्धम् इति। हे शिष्य! जब पुरुषकी देहके संग तादात्म्य होकर स्थिति होवै है तब प्रारब्ध सिद्ध होवै है, विद्वान् को तौ देहात्मभाव है नहीं, विद्वानोंने माना भी नहीं उसको नित्य आत्मदर्शी होनेसे विद्वान्में प्रारब्धका आग्रह न करना चाहिये उसमें प्रारब्ध कर्मका आपादन नहीं होसकता है॥

शरीरस्यापि प्रारब्धकल्पनाभ्रान्तिरेव हि॥
अध्यस्तस्य कुतः सत्त्वमसत्यस्य कुतोजनिः॥
अजातस्य कुतोनाशः प्रारब्धमसतः कुतः॥४६१॥

ननु माभूद्विदुषोब्रह्मीभूतस्य प्रारब्धं तद्देहस्य तु कर्मनिर्मितस्य तत्स्यादेवेत्यतआह। शरीरस्यापीति।

शरीरस्य विद्वच्छरीरस्य प्रारब्धकल्पनापि प्रारब्धापादनमपि भ्रान्तिर्भ्रमएव हि तथाहि तच्छरीरस्याध्यस्तस्याध्यस्तत्वेन निश्चितस्य कुतः सत्त्वं सद्भावोऽसत्यस्य च तस्य जनिर्जन्म कुतोन कुतोपीत्यर्थः। शरीरमपि चित्तादात्म्येन गृहीतमेव जनिकर्मादित्वं लभतेऽन्यथा स्वस्यैवासिद्धेरिति भावः। तथाचाजातस्य कुतोनाशोन कुतोप्यन्यथा बन्ध्यासूनोरपि मरणापत्तिरिति भावः। तथाचानिरूपितजनिमृतेरनिरूपितस्वरूपस्य च विद्वच्छरीरस्यासतोऽविद्यमानस्य कुतः प्रारब्धं न कुतोपि हेतोरित्यर्थः॥ ४६१॥

शरीरस्य। अपि। प्रारब्धकल्पना। भ्रान्तिः। एव। हि॥
अध्यस्तस्य। कुतः। सत्त्वम्। असत्यस्य। कुतः। जनिः॥
अजातस्य। कुतः। नाशः। प्रारब्धम्। असतः। कुतः॥४६१

आत्मरूप हुवे ब्रह्मनिष्ठका प्रारब्ध न हो परंच उसके शरीरको प्रारब्ध कर्मोंका रचा हुवा होनेसे प्रारब्ध उसके शरीरकी तौ माननी उचित है इस शङ्काका उत्तर देते हैं। शरीरस्य इति। विद्वान्के शरीरकी प्रारब्ध कल्पना भी दूसरे अज्ञानीजनोंकी कल्पनामात्र भ्रम ही है क्योंकि विद्वान्

का शरीर अध्यस्तरूपताकरके निश्चित है उसकी सत्ता कैसे होसके है और असत्य शरीरका जन्म कहांसे होसके है तैसेही अजातका नाश कहांसे होसकता है इस कारण अविद्यमान विद्वान्के देहका प्रारब्ध कहांसे कह सकते हैं कोई हेतु नहीं जिससे विद्वान्का शरीर हो वा प्रारब्ध हो यह केवल अज्ञानी पुरुषोंकी कल्पना है ॥ ४६१ ॥

ज्ञानेनाज्ञानकार्यस्य समूलस्य लयोयदि ॥
तिष्ठत्ययं कथं देहइति शङ्कावतोजडान् ॥ ४६२ ॥

कथन्तर्हि "तस्य तावदेव चिरमि"त्यादिः श्रुतिर्विदुषः प्रारब्धं वदति तत्राह सार्द्धेन । ज्ञानेनेति ।

ज्ञानेनाधिष्ठानब्रह्मात्मैक्यज्ञानेन अज्ञानकार्यस्य दृश्यस्य समूलस्य साज्ञानस्य यदि लयोजातस्तर्हि अयं प्रत्यक्षोपलभ्योदेहोविद्वच्छरीरं कथं तिष्ठति तन्तुलये पटास्थितिवन्न तिष्ठेदिति भावः। इति शङ्कावतएवं पृच्छतोजडानविवेकिनः ॥ ४६२ ॥

ज्ञानेन । अज्ञानकार्यस्य । समूलस्य । लयः । यदि ॥ तिष्ठति । अयम् । कथम् । देहः । इति । शङ्कावतः । जडान् ॥ ४६२ ॥

जो विद्वान्की जबतक प्रारब्ध है तबतक विदेह—मोक्षमें विलम्ब है ऐसा श्रुतिमें कथन करनेसे विद्वान्की प्रारब्ध कैसे नहीं है इस शङ्काका उत्तर देवै हैं। ज्ञानेन इति। अधिष्ठान ब्रह्मका आत्माके संग एकत्व ज्ञानसे कारणसहित अज्ञानकार्य प्रपंच का जो लय हुवा तव यह जो विद्वान्का देहँ प्रत्यक्ष दीखे है कैसे स्थित रहा जैसे तन्तुके नाशसे पटकी स्थिति नहीं होवै तैसेही अज्ञानके नाश होनेसे विद्वान्के देहकी स्थिति न रहनी चाहिये ऐसी शङ्कासे पूछने वाले अविवेकीजनोंको ॥ ४६२ ॥

समाधातुं वाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः ॥
न तु देहादिसत्यत्वबोधनाय विपश्चिताम् ॥ ४६३ ॥

समाधातुं समाधानसम्पादनेन सन्तोषयितुं वाह्यदृष्ट्या वाह्यानामविवेकिनां दृष्ट्या श्रुतिरभिहिता वेदवाक् प्रारब्धं तद्दृष्टिदृष्टं वदति ब्रवीति विपश्चितामात्मानं विदुषां देहादिसत्यत्वबोधनाय विदुषोदेहादेः संघातस्य विद्यमानत्वेन प्रारब्धसत्ताबोधनाय तु न वदतीत्यर्थः । परदृष्ट्या परोबोधनीयइति न्यायेन श्रुतिप्रवृत्तिरिति भावः ॥ ४६३ ॥

समाधातुम् । बाह्यदृष्ट्या । प्रारब्धम् । वदति । श्रुतिः ॥ न । तु । देहादिसत्यत्वबोधनाय । विपश्चिताम् ॥ ४६३ ॥

उत्तर देकर सन्तुष्ट करनेके लिये अविवेकी पुरुषोंकी दृष्टिको लेकर वेदवाणी अविवेकीजनकी दृष्टिसिद्ध प्रारब्धको कहे हैं और आत्मज्ञानियोंके प्रति विद्वान्के देहादि संघातको विद्यमान होनेसे प्रारब्धकी सत्ताके सिद्ध करनेके लिये तो नहीं कहे हैं ॥ ४६३ ॥

परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६४ ॥

वाह्यदृष्ट्या श्रुतिर्वदतीत्युक्तं तेन समाहितस्यान्तरदृष्टिरिति सूचितं तत्र कान्तरदृष्टिर्यया न वाह्यारोपशङ्केति जिज्ञासायामान्तरदृष्टिविषयमविषयं सप्तभिर्वर्णयति । परिपूर्णमिति ।

परिपूर्णमपरिच्छिन्नमनाद्यन्तमाद्यन्ताभ्यामुत्पादविनाशाभ्यां रहितमप्रमेयं वृत्तिप्रतिफलितचिदविषयं अविक्रियं निष्क्रियमेकमेवाद्वयं सजातीयविजातीयस्वगतभेदशून्यं ब्रह्म परमात्मतत्त्वमिह ब्रह्मणि नानाभेदावच्छिन्नं किञ्चन किञ्चिदपि नास्ति न विद्यते "पूर्णमदः पूर्णमिदं" "न जायते म्रियते वा" "तदेतदप्रमेयं" "निष्कलं निष्क्रियम्" "सदेव सोम्येदमग्रआसीदेकमेवाद्वितीयम्" "मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन" इत्यादयः श्रुतयोऽत्रार्थतः पठिता इति बोध्यम् ॥ ४६४ ॥

परिपूर्णम् । अनाद्यन्तम् । अप्रमेयम् । अविक्रियम् ॥ एकम् ।

एव । अद्वयम् । ब्रह्म । न । इह । नाना । अस्ति । किञ्चन ॥

बाह्यदृष्टिसे प्रारब्धका कथन है ऐसा निरूपण किया अब जिस आन्तरदृष्टिमें प्रारब्धका अभाव है उसको सात श्लोकोंसे वर्णन करे हैं। परिपूर्णम् इति। अपरिच्छिन्न उत्पत्ति विनाशरहित वृत्ति प्रतिबिम्बित चेतनका अविषय निष्क्रिय सजातीय विजातीय स्वगत भेद-शून्य परमात्माका स्वरूप है तिसमें भेदविशिष्ट जगत् लेशमात्र भी नहीं है ॥ ४६४ ॥

सद्घनं चिद्घनं नित्यमानन्दघनमक्रियम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥४६५॥

सद्घनं अत्र सर्वत्र घनशब्दस्यैकरस। यकत्वात्सन्मात्रमित्यर्थः। चिद्घनं चिन्मात्रं नित्यमानन्दघनमविनाश्यानन्दमात्रमाक्रियमविकारमन्यत्पूर्ववत् ॥ ४६५ ॥

सद्घनम् । चिद्घनम् । नित्यम् । आनन्दघनम् । अक्रियम् ॥ एकम् । एव । अद्वयम् । ब्रह्म । न । इह । नाना । अस्ति । किञ्चन ॥ ४६५ ॥

सत्मात्र चेतनमात्र अविनाशी आनन्दमात्र विकारसे रहित एक अद्वैत ब्रह्म है तिसमें नानारूप प्रपंच किंचित्भी नहीं है ॥ ४६५ ॥

प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥४६६॥

प्रत्यगेकरसं प्रत्यगान्तरमेकरसं कूटस्थं पूर्णं सर्वव्यापकमनन्तमन्तविवर्जितम् सर्वतोमुखं सर्वात्मकम् ॥ ४६६ ॥

प्रत्यग् । एकरसम् । पूर्णम् । अनन्तम् । सर्वतोमुखम् ॥ एकम् । एव । अद्वयम् । ब्रह्म । न । इह । नाना । अस्ति । किञ्चन ॥

देहादिसे अनन्तर एकरस कूटस्थ सर्वव्यापक अन्तसे रहित सर्वात्मा एक अद्वैत ब्रह्म है तिसमें नानारूप प्रपंच किंचित् भी नहीं है ॥ ४६६ ॥

अहेयमनुपादेयमनादेयमनाश्रयम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥४६७॥

अहेयमनुपादेयमात्मत्वात्सर्वस्य हानोपादानागोचरः अनाश्रयं स्वे महिम्नि प्रतिष्ठितत्वादाश्रयानपेक्षस्वभावम् ॥ ४६७ ॥

अहेयम्। अनुपादेयम्। अनादेयम्। अनाश्रयम्॥ एकम्। एव। अद्वयम्। ब्रह्म। न। इह। नाना। अस्ति। किञ्चन ॥

सर्वका आत्मा होनेसे ग्रहण त्यागके योग्य नहीं है और स्वस्वरूपमें सदा स्थित होनेसे आश्रयकी अपेक्षासे रहित है ऐसा एक अद्वैत ब्रह्म है तिसमें नानारूप प्रपंच किंचित् भी नहीं है ॥ ४६७ ॥

निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरञ्जनम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥४६८॥

निर्गुणं गुणवर्जितं निर्दोषं च बोध्यं निष्कलं निरवयवं प्राणादिषोडशकलाविकलं वा निरञ्जनमविद्यावरणवर्जितम् ॥ ४६८ ॥

निर्गुणम्। निष्कलम्। सूक्ष्मम्। निर्विकल्पम्। निरञ्जनम्। एकम्। एव। अद्वयम्। ब्रह्म। न। इह। नाना। अस्ति। किञ्चन॥

गुण दोषवर्जित स्वरूप है, निरवयव प्राणादि षोडश कला से रहित और अविद्यारूप आवरणसे रहित है ऐसा एक अद्वैत ब्रह्म है तिसमें नाना प्रपंच किंचित्भी नहीं है॥४६८

अनिरूप्यस्वरूपं यन्मनोवाचामगोचरम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४६९॥

अनिरूप्यस्वरूपमिदं तया न निरूपयितुं शक्यते स्वरूपं यस्य तत् यद्ब्रह्म मनोवाचामगोचरं मनसोवाचां च गोचरोविषयोनेत्यर्थः । "यतोवाचोनिवर्तन्तेऽप्राप्य मनसा सह" इति श्रुतेरिति भावः॥४६९॥

अनिरूप्यस्वरूपम्यत् । मनोवाचाम् । अगोचरम् ॥ एकम् । एव । अद्वयम् । ब्रह्म । न । इह । नाना । अस्ति । किञ्चन ॥

इदन्ताकरके जिसके स्वरूपका निरूपण नहीं होसकता जो मन वाणीका अविषय है ऐसा एक अद्वितीय ब्रह्म है तिसमें नाना प्रपंच किंचित् भी नहीं है ॥ ४६९ ॥

सत्समृद्धं स्वतः सिद्धं शुद्धं बुद्धमनीदृशम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥ ४७० ॥

सत्समृद्धं सचतत्समृद्धं सर्वैश्वर्यसम्पन्नं सम्राट्त्वात् स्वतः सिद्धं स्वस्य सिद्धौ परापेक्षाविधुरं शुद्धं निर्मलं बुद्धमनावृतचिद्रूपम् अनीदृशमप्रतिमानम् । अत्र सर्वत्र श्रुत्यर्थोविर्गीतोबोद्धव्यः श्रुतयस्तु बहुधोक्तत्वादुक्तप्रायत्वाच्च नात्र प्रदर्शिताइति चिन्तनीयम् "नेहनानास्ती" त्यस्याभ्यासस्तु सर्वत्र श्रुतिषु निर्विशेषार्थतात्पर्यसूचनायेत्यलम् ॥ ४७० ॥

सत्समृद्धम् । स्वतःसिद्धम् । शुद्धम् । बुद्धम् । अनीदृशम् ॥ एकम् । एव । अद्वयम् । ब्रह्म । न । इह । नाना । अस्ति । किंचन ॥

सत्रूप और सर्व ऐश्वर्ययुक्त है, सर्वका स्वामी होनेसे और अपनी सिद्धिमें अन्यकी अपेक्षा न करने वाला है, निर्मल आवरणसे रहित चेतनरूप उपमारहित है ऐसा ब्रह्म एक अद्वितीय है तिसमें नाना प्रपंच किंचित्भी नहीं है ॥ ४७० ॥

निरस्तरागाविनिरस्तभोगाः,
शान्ताः सुदान्तायतयोमहान्तः ॥
विज्ञाय तत्त्वं परमेतदन्ते,
प्राप्ताः परां निर्वृतिमात्मयोगात् ॥ ४७१ ॥

आन्तरदृष्टिविषयमविषयं ब्रह्म निरूप्य तदात्मना स्थितानां बहूनामपुनरावृत्तिफलं प्राप्तमिति दर्शयति। निरस्तरागाइति।

निरस्तरागानिरस्तोरागोविषयाभिलाषोयेषांते तथा तथा विनिरस्तभोगाः थूत्कृताङ्गनालिङ्गनानन्दानुभवाः शान्ताः शमसम्पन्नाः सुदान्ताः सर्वथा वशीकृतेन्द्रियाः यतयः समाधिसिद्धौ यतनवन्तोमहान्तोमहाशयागम्भीरचेतसएतत्तत्त्वं परं ब्रह्म विज्ञाय साक्षात्कृत्यान्ते लोकदृष्ट्या कल्पितभोगावसाने आत्मयोगादात्मज्ञानप्रसादात् परां निर्वृतिं प्राप्ताइत्यर्थः॥ ४७१॥

निरस्तरागाः। विनिरस्तभोगाः। शान्ताः। सुदान्ताः। यतयः। महान्तः॥ विज्ञाय। तत्त्वम्। परम्। एतद्। अन्ते। प्राप्ताः। पराम्। निर्वृतिम्। आत्मयोगात्॥ ४७१॥

आन्तरदृष्टिका विषय निर्गुण ब्रह्मका निरूपण किया है अब उस स्वरूपकरके स्थित हुवे बहुत ब्रह्मनिष्ठोंको अपुनरावृत्तिरूप मोक्षफल प्राप्त हुवा है इस वार्ताको निरूपण करे हैं। निरस्तरागाः इति। विषयोंकी इच्छा जिनकी निवृत्त हुई है, थूक दिये हैं स्त्रीसंग सुख भोग जिन्होंने, शान्तियुक्त सर्व प्रकारसे बाह्य इन्द्रियोंको जिन्होंने वश करलिया है समाधीसिद्धमें यत्न करनेवाले गंम्भीर चित्त वाले इस यथार्थस्वरूप परब्रह्मको जानकर भोगसमाप्तिकालमें आत्मज्ञानके प्रतापसे अत्यन्त आनन्दको प्राप्त हुवे हैं॥ ४७१॥

भवानपीदं परतत्त्वमात्मनः,
स्वरूपमानन्दघनं विचार्य॥
विधूय मोहं स्वमनःप्रकल्पितं,
मुक्तः कृतार्थोभवतु प्रबुद्धः॥ ४७२॥

यथा तेऽभूवंस्तथा भवानपि भवत्वित्याह। भवानपीदमिति।

भवानपि आत्मनः प्रतीचइदमस्मदपरोक्षं परतत्त्वं निरवध्यबाध्यमानन्दघनं स्वरूपं विचार्य साक्षात्कृत्य स्वमनःप्रकल्पितं मोहमुक्तानेकविधं भ्रमं विधूय विध्वंस्य प्रबुद्धः साक्षात्कृतात्मतत्त्वोमुक्तोजीवन्मुक्तः कृतार्थः समाप्तप्रयोजनोभवतु न प्रमाद्यत्वित्यर्थः ४७२

भवान्। अपि। इदम्। परतत्त्वम्। आत्मनः। स्वरूपम्। आनन्दघनम्। विचार्य्य॥ विधूय। मोहम्। स्वमनःप्रकल्पितम्। मुक्तः। कृतार्थः। भवतु। प्रबुद्धः॥ ४७२॥

हे शिष्य! जैसे प्राचीन ब्रह्मनिष्ठ हुवे हैं ऐसे तुमभी होवो ऐसा निरूपण करे हैं। भवान्इति। साक्षी आत्माका अपरोक्ष निरवधि अबाध्य आनन्दमात्र स्वरूपको विचारके साक्षात्कारकरके अपने मनसे काल्पित अनेक प्रकारके भ्रमको विनाश करके तुम भी आत्मसाक्षात्कार वाला जविन्मुक्त होकर प्रयोजनकी समाप्ति होनेसे कृतकृत्य होवो॥ ४७२॥

समाधिना साधुविनिश्चलात्मना,
पश्यात्मतत्त्वं स्फुटबोधचक्षुषा॥
निःसंशयं सम्यगवेक्षितश्चे-
च्छ्रुतः पदार्थोन पुनर्विकल्प्यते॥४७३॥

मुक्तइत्युक्तं तच्च जीवन्मुक्तावस्थासूचनाय सा च समाधिमन्तरा दुर्घटेति तदर्थं निःसंशयसाक्षात्कारार्थं समाधिं ग्राहयति। समाधिनेति।

साधुविनिश्चलात्मना सम्यग्बाह्यकल्पनाविनिर्मुक्तोविनिश्चलो निरस्तसमस्तचापलआत्मा मनोयेन यत्र वा तेन समाधिना निर्विकल्पेन समाधानेन सम्पादितेन स्फुटबोधचक्षुषा निःसन्दिग्धात्मसाक्षात्कारचक्षुषाऽऽत्मतत्त्वं पश्य।असंदिग्धबोधः समाध्येकसाध्यइत्याह निःसंशयमिति। श्रुतोगुरुशास्त्रतआकर्णितोनिःसंशयं सम्यगवेक्षितः संशयवैधुर्य्येण सम्यग्विपर्ययाभावेनावेक्षितश्चेत्पुनर्नविकल्प्यते न सन्देहगोचरोभवति तस्मादसन्दिग्धबोधाय समाधिरनुष्ठेयइति भावः॥ ४७३॥

समाधिना । साधुविनिश्चलात्मना । पश्य । आत्मतत्त्वम् । स्फुटबोधचक्षुषा ॥ निःसंशयम् । सम्यग् । अवेक्षितः । चेत् । श्रुतः । पदार्थः । न । पुनः । विकल्प्यते ॥ ४७३ ॥

अब जीवन्मुक्तिकी सिद्धिके लिये समाधिकी आवश्यकता कहे हैं । समाधिना इति । बाह्य कल्पनासे अत्यन्त विनिर्मुक्त, सर्व चपलतासे रहित, मनकी सिद्धि जिससे होवै है तिसे निर्विकल्प समाधिकरके सम्पादन किया जो संशयरहित आत्माका साक्षात्काररूप नेत्र तिसकरके आत्माका संशय विना अपरोक्ष अनुभव करा गुरुउपदेशसे श्रवण किया और संशयरहित साक्षात्कार किया पदार्थ पुनः सन्देहका विषय नहीं होता इस कारण संशयरहित अपरोक्ष आत्माके अनुभवार्थ निर्विकल्प समाधिका अभ्यास कर ॥ ४७३ ॥

स्वस्याविद्याबन्धसम्बन्धमोक्षा-
त्सत्यज्ञानानन्दरूपात्मलब्धौ ॥
शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं,
चान्तःसिद्धा स्वानुभूतिःप्रमाणम् ॥ ४७४ ॥

विदेहमुक्तौ जीवन्मुक्तिलक्षणसमाधिरेव मुख्यं प्रमाणमन्यथा शास्त्रादितोऽविद्यानिवृत्त्याऽऽनन्दावाप्तिलक्षणमोक्षस्य पारोक्ष्येण बोधः स्वर्गादिवत्स्यादित्याशयेन मोक्षे प्रमाणानि दर्शयति । स्वस्येति । स्वस्य जीवस्याविद्याबन्धमोक्षादविद्याजनितोऽविद्यैव वा यो बन्धस्तत्सम्बन्धस्य निवृत्तेः सत्यज्ञानानन्दरूपात्मलब्धौ सच्चिदानन्दलक्षणब्रह्मभावापत्तौ शास्त्रं "भिद्यते हृदयग्रन्थिः" तरति शोकमात्मवित्" यथा नद्यः स्पन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः "परात्परं पुरुषमुपैति दिव्यम्" इत्यादिश्रुतिरूपं युक्तिः बन्धोऽज्ञाननिवर्त्यः कल्पितत्वादित्याद्यनुमानं कल्पितत्वं तु वर्णितमेव । देशिकोक्तिः गुरूपदेशः निर्निमित्तानु-

पदेशंकुर्वतोदेशिकस्यापि “ मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ” इति न्यायसूत्रे प्रमाणत्वेन व्यवहाराद्देशिकोपदेशस्य प्रमाणेषु गणना साधीयसी अन्तः सिद्धा अन्तरात्मनि समाधानेन सिद्धा स्वानुभूतिः स्वानुभवश्च प्रमाणं साधकं तथाच प्रमाणदृष्टिपरित्यागेन प्रमेयं साक्षात्कुर्वाणस्येव तव ब्रह्मण्यपरोक्षबोधोयथा स्यादित्यवश्यं समाधिरनुष्ठेयइति भावः ॥ ४७४ ॥

स्वस्य। अविद्याबन्धसम्बन्धमोक्षात् । सत्यज्ञानानन्दरूपात्मलब्धौ॥ शास्त्रम् ।युक्तिः । देशिकोक्तिः । प्रमाणम् । च । अन्तः । सिद्धा । स्वानुभूतिः । प्रमाणम् ॥ ४७४ ॥

विदेहमुक्तिकी सिद्धि भी जीवन्मुक्तिरूप समाधिसे ही सिद्ध होवै है, शास्त्रसे तो परोक्षरूपसे विदेहमुक्तिकी स्वर्गादिवत् सिद्धि होगी ऐसा निरूपण करनेके लिये मोक्षमें प्रमाण दिखावै हैं । स्वस्य इति । जीवको अविद्यारूप बन्धके संबन्ध की निवृत्तिसे सत् चित् आनन्दरूप ब्रह्मरूपताकी प्राप्तिमें हृदयग्रन्थिकी निवृत्ति होती है, संशय कर्म सर्व नष्ट होते हैं जब ब्रह्मज्ञान प्राप्त होता है इत्यादि वेदवाणी, और बंधकी ब्रह्मज्ञानसे निवृत्ति होवै है कल्पित होनेसे, इत्यादि अनुमान प्रमाण है । ऐसी प्रकार पूजालाभादि निमित्तसे विना उपदेशदाता दयालु, गुरुदेव ब्रह्मनिष्ठका उपदेश प्रमाण है फिर अन्तर आत्मामें समाधि करनेसे सिद्ध जो अपना अनुभव है सो प्रमाण है अर्थात् यह मोक्षके साधक हैं अर्थात् जैसे प्रमाणदृष्टिका त्याग करके प्रमेयमें साक्षात्कारार्थ पुरुष उद्यम करते हैं तैसे ब्रह्मात्माके अपरोक्ष बोधके लिये अवश्य समाधिमें यत्न करना उचित है यह तात्पर्य सिद्ध होवै है ॥ ४७४ ॥

बन्धोमोक्षश्च तृप्तिश्च चिन्ताऽऽरोग्यक्षुदादयः॥
स्वेनैव वेद्यायज्ज्ञानं परेषामानुमानिकम् ॥४७५

ननु ब्रह्मविदुषोऽनुभवः कथं ज्ञेयस्तत्राह । बन्धइति ।

बन्धोविषयासङ्गोमोक्षः समस्तसंकल्पविनिर्मुक्तता तृप्तिरभिलाषाभावः चिन्ताऽऽरोग्यक्षुदादयः कथं मेमनीषितं सिध्येदिति लक्षणा चित्तवृत्तिश्चिन्ता चित्तरोगःआरोग्यं रोगनिवृत्त्या स्वस्थता क्षुद्बुभुक्षा एवमादयः स्वेनैवात्मनैव वेद्याज्ञातुमर्हायेयतः परेषामेतदन्यतमरहितानां पुंसामेतदन्यतमस्य ज्ञानमानुमानिकमनुमानजन्यमनुमानं व्याप्तिज्ञानं तच्च बाह्यलिङ्गगोचरं वाच्यमान्तरलिङ्गस्य तत्समानयोगक्षेमत्वाद्बाह्यं च लिङ्गं तदन्यतमाभाववत्यपि तद्वत्तयाऽनुकुर्वाणेषूपलब्धचरत्वाद्व्यभिचारीति भावः ॥ ४७५ ॥

बन्धः । मोक्षः । च । तृप्तिः । च । चिन्तारोग्यक्षुदादयः ॥ स्वेन । एव । वेद्याः । यद् । ज्ञानम् । परेषाम् । आनुमानिकम् ॥

ब्रह्मज्ञानीका अनुभव कैसे जानसकेंगे इस शङ्काका उत्तर देवै हैं । बन्ध इति । विषयसंबन्ध सर्व संकल्पकी निवृत्ति ईच्छाका अभाव मेरेकौ वाञ्छित पदार्थ कैसे प्राप्त होवैगा, इसप्रकारकी चित्तकी वृत्तिरूप मानसरोग और रोगकी निवृत्तिसे स्वस्थता भोजनेच्छा आदि अपने अनुभवकरके ही जाने जाते हैं जिसकारण दूसरे पुरुषोंको इनका समझना अनुमानमात्र है, परोक्ष है, इन वस्तुओंकी अपरोक्षता तो जिसके अन्तर यह बर्ते हैं उसको ही होवै है और अनुमान बाह्यलिङ्गसे होता है सो चिह्न पाखण्डीमें भी दीखते हैं इससे व्यभिचारदोष आनेसे सन्दिग्ध ही रहता है ॥ ४७५ ॥

तटस्थिताबोधयन्ति गुरवः श्रुतयोयथा ॥
प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया ॥ ४७६ ॥

ननु ब्रह्मानुभवस्य स्वमात्रसंवेद्यत्वे देशिकैस्तदुपदेशानुपपत्तिरित्यत्राह । तटस्थिताइति ।

यथा श्रुतयस्तत्त्वमस्यादिवदास्तटस्थिताः स्वानुभवग्राह्यत्वे साक्षि-

भूतास्तथा गुरवोपि तटस्थाएव ब्रह्माद्वैतं बोधयन्ति नतु प्रज्ञां तस्मै घटादिवत्प्रदर्श्य ग्राहयन्ति कथं बोधयन्ति तत्राह प्रज्ञयैवेति विद्वानुपदिष्टपदार्थतत्त्ववेत्ता ब्रह्माद्वैतं जिज्ञासुरीश्वरानुगृहीतया परमेश्वरकरुणालब्धया प्रज्ञयैव वाक्यजन्यब्रह्मात्मैक्यवृत्त्यैव तरेद-विद्यामहोदधेः पारं परं प्राप्नुयादिति बोधयन्तीत्यर्थः ॥ ४७६ ॥

तटस्थिताः । बोधयन्ति । गुरवः । श्रुतयः । यथा ॥ प्रज्ञया । एव । तरेद् । विद्वान् । ईश्वरानुगृहीतया ॥ ४७६ ॥

ब्रह्मात्माके अनुभवको अपने अनुभवमात्रसे गम्य मानोगे तो गुरुदेवजीकी उपदेशमें प्रवृत्ति कैसे होवैगी इस शङ्काको निवारण करे हैं। तटस्थिता इति। जैसे "तत्त्वमसि" आदि वेद-वाणी अपने अनुभवग्रहणमें साक्षीरूप हैं तैसे गुरुदेवजी भी साक्षीरूप ही होकर अद्वैत ब्रह्मको बोधन करे हैं, घटादि स्थूल पदार्थोंवत् ब्रह्मप्रज्ञाको दिखा नहीं सकते किन्तु वेदान्तशास्त्र के पद पदार्थका तत्त्ववेत्ता पुरुष ब्रह्मजिज्ञासु परमेश्वरकी कृपा से प्राप्त हुई "तत्त्वमसि" आदि वाक्यार्थके मननसे जन्य ब्रह्मात्माकी एकतावृत्तिकरके ही अविद्यारूप सागरसे पार परब्रह्मको प्राप्त होवै है ऐसा बोधन करते हैं ॥ ४७६ ॥

स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम् ॥
संसिद्धः सन्मुखं तिष्ठेन्निर्विकल्पात्मनात्मनि ॥४७७॥

तथाच स्वानुभूत्या स्वाभ्यासपरिपाकजनिताहंब्रह्मास्मीति भावनया अखण्डितं नित्यं स्वमात्मानं स्वयं स्वयमेव ज्ञात्वा साक्षात्कृत्य संसिद्धोलब्धाभीष्टः सम्मुखं सम्मुखं यथा भवति तथा तदेकप्रवणोनिर्विकल्पात्मना निःसंकल्पस्वरूपेणात्मनि तिष्ठेदात्मनिष्ठोभवेदित्यर्थः ॥ ४७७ ॥

स्वानुभूत्या । स्वयम् । ज्ञात्वा । स्वम् । आत्मानम् । अखण्डितम् ॥ संसिद्धः । सम्मुखम् । तिष्ठेत् । निर्विकल्पात्मना । आत्मनि ॥ ४७७ ॥

अपने अभ्याससे उत्पन्न हुई मैं ब्रह्म हूं ऐसी भावनाकरके नित्य अपने आत्माको आप ही साक्षात्कारकरके मनोरथ सिद्ध करता हुवा ब्रह्मात्मज्ञानमें तत्पर होके स्थित होवै, संकल्पादिरहित मनकरके शुद्ध आत्मामें निष्ठाको प्राप्त हुवा ब्रह्मनिष्ठ होवै ॥ ४७७ ॥

वेदान्तसिद्धान्तनिरुक्तिरेषा,
ब्रह्मैव जीवः सकलं जगच्च ॥
अखण्डरूपस्थितिरेव मोक्षो-
ब्रह्माद्वितीये श्रुतयः प्रमाणम् ॥ ४७८ ॥

समस्तवेदान्तसिद्धान्तं संगृह्योपदिशति । वेदान्तेति ।

वेदान्तानामुपनिषद्वचसां सिद्धान्तस्य निर्णीतार्थस्यैषा निरुक्तिः संगृह्योपदेशः केत्यतआह ब्रह्मैवेति जीवः सकलं जगच्च ब्रह्मैव न ब्रह्मान्यज्जडचेतनस्वरूपमस्त्यतोऽखण्डरूपास्थितिरखण्डरूपे निर्द्वैते ब्रह्मात्मनि स्थितिःस्वस्वरूपप्रातिष्ठैव मोक्षोब्रह्माद्वितीये ब्रह्माद्वैते श्रुतयः पूर्वमुपदर्शिताः प्रमाणमिति न निष्प्रमाणकत्वशङ्कया मनः खेदनीयमिति भावः । ननु 'याविशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः । प्रायस्ताएव कर्तव्याः समानार्थे विशेषणे' इत्युक्तेः प्रमाणानीति भाव्यमिति चेन्न यतोयत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयीभूतसंख्याविरुद्धसंख्यायाअविवक्षितत्वं तत्रैव विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वनियमोऽत्र तु प्रमितिकरणताववाचकपदयोः समानविभक्तिकत्वनियमोऽत्र तु प्रमितिकरणताववच्छेदकरूपप्रमाणत्वस्यैकत्वबोधनार्थमेकत्वस्य विवक्षयैकवचनप्रयोगः प्रमितिकरणत्वं च शब्दत्वावच्छिन्नं यावच्छेदनिष्ठमेकमेवेति नायोग्यतापि शङ्कितव्येति संक्षेपः ॥ ४७८ ॥

वेदान्तसिद्धान्तनिरुक्तिः । एषा । ब्रह्म । एव । जीवः । सकलम् । जगत् । च ॥ अखण्डरूपस्थितिः । एव । मोक्षः । ब्रह्माद्वितीये । श्रुतयः । प्रमाणम् ॥ ४७८ ॥

सर्व वेदान्तोंके सारार्थका संग्रहकरके उपदेश करे हैं ।

वेदान्तइति । उपनिषद्वचनोंके सिद्धान्तनिर्णीत अर्थका यह संग्रहकरके उपदेश है जीव और सर्व जगत् यह सर्व ब्रह्म ही है, जड चेतन कोई पदार्थ ब्रह्मसे अन्य नहीं है इस कारण निर्द्वैत ब्रह्मात्मामें स्थितिस्वरूप प्रतिष्ठा ही मोक्ष है, अद्वैत ब्रह्ममें पूर्व दिखाई अनन्त वेदवाणीरूप श्रुति प्रमाण हैं ॥ ४७८ ॥

इति गुरुवचनाच्छ्रुतिप्रमाणा-
त्परमवगम्य सतत्त्वमात्मयुक्त्या ॥
प्रशमितकरणः समाहितात्मा,
क्वचिदचलाकृतिरात्मनिष्ठितोऽभूत् ॥ ४७९ ॥

अधिकारिण्युपदेशसाफल्यसूचनाय शिष्यस्य श्रुतोपदेशस्य दशां दर्शयति । इति गुरुवचनादिति ।

प्रशमितकरणोनिगृहीतसर्वेन्द्रियः समाहितात्मा समाहितचित्तः शिष्यः इति पूर्वमुपदिष्टाद्गुरुवचनाच्छ्रुतिप्रमाणादात्मयुक्त्या च परं सतत्त्वं ब्रह्मस्वरूपमवगम्य क्वचिद्विजने वने गृहे वाऽऽत्मनिष्ठितोलब्धात्मनिष्ठोऽचलाकृतिः कुलाचलवदकम्प्याङ्गः समाधिनिष्ठोऽभूज्जातइत्यर्थः ॥ ४७९ ॥

इति । गुरुवचनात् । श्रुतिप्रमाणात् । परम् । अवगम्य । सतत्त्वम् । आत्मयुक्त्या ॥ प्रशमितकरणः । समाहितात्मा । क्वचित् । अचलाकृतिः । आत्मनिष्ठितः । अभूत ॥ ४७९ ॥

अधिकारीमें किये हुवे उपदेशकी सफलता—सूचनार्थ उपदेशके श्रवणसे प्राप्त हुई शिष्यकी दशाको दिखावे हैं । इति इति। सर्व इन्द्रियोंका जिसने निग्रह किया है चित्तको भी जिसने जीतलिया है सो शिष्य पूर्व उपदेश किये गुरुवाक्यसे श्रुतिप्रमाणसे और अपनी युक्तिसे परब्रह्म स्वरूपको जानकर वनमें

व गृहमें कहींभी एकान्त देशमें प्राप्त आत्मनिष्ठा वाला पर्वत-वत्, निश्चल हुवा समाधिनिष्ठ होता भया ॥ ४७९ ॥

किञ्चित्कालं समाधाय परे ब्रह्मणि मानसम् ॥
उत्थाय परमानन्दादिदं वचनमब्रवीत् ॥४८०॥

समाधिफलमपरोक्षमिति ख्यापयितुं समाध्युत्थानकालकं शिष्यस्य वचनमनुवदति। किञ्चित्कालमिति।

मानसं मनः परे ब्रह्मणि किञ्चित्कालं यथाऽभ्यासं समाधाय समाहितं विधाय ततश्च प्रारब्धवेगादुत्थाय परमानन्दात्परमानन्दमनुभूय ल्यब्लोपे पञ्चमी परमानन्दहेतोः समाधेर्वोत्थायेदं वक्ष्यमाणं वचनमब्रवीदित्यर्थः ॥ ४८० ॥

किञ्चित्। कालम्। समाधाय। परे। ब्रह्मणि। मानसम् ॥
उत्थाय। परमानन्दात्। इदम्। वचनम्। अब्रवीत् ॥ ४८० ॥

समाधिका अपरोक्ष फल दिखानेके लिये समाधिसे उठे हुवे शिष्यके वाक्यका अनुवाद करे हैं। किंचित् इति। अपने मन को परमात्मा ब्रह्ममें अपने अभ्यासानुसार कुछ काल लगाकर समाधिनिष्ठाको करके पीछे प्रारब्धभोगसे उत्थान हुवा परमानन्दका अनुभवकरके उत्थानकालमें आगे जो कहेंगे उस वचनको बोलता भया ॥ ४८० ॥

बुद्धिर्विनष्टा गलिता प्रवृत्ति-
र्ब्रह्मात्मनोरेकतयाऽधिगत्या ॥
इदं न जानेऽप्यनिदं न जाने,
किं वा कियद्वा सुखमस्त्यपारम् ॥ ४८१ ॥

वचनमब्रवीदित्युक्तं तदेव वचनमेकोनचत्वारिंशच्छ्लोकयाऽनुवदति। बुद्धिर्विनष्टेत्यादिना।

एकतयाऽभेदेन ब्रह्मात्मनोरधिगत्याऽवगत्या मे बुद्धिर्विनष्टा वि-

ध्वस्ता, साक्षिणा दृष्टा प्रवृत्तिश्च बाह्यान्तर्गलिता विलीना, इदमपरोक्षमैहलौकिकमनिदं परोक्षं पारलौकिकं च न जाने तद्भेदभासाने सम्प्रतीति भावः। नेतिपदाभ्यासः सर्वथाप्यभावस्य, जानेपदाभ्यासश्च ज्ञानरूपात्मनः सदा सद्भावस्य सूचनायेति बोध्यम्। यच्च निर्विकल्पसमाधावनुभूतं तत्किं वा किमिवेति कियद्वा किंपरिमाणकं किमवधिकमित्यर्थः। निरवधिकमिति यावत् तदेवाह अपारमिति॥

बुद्धिः। विनष्टा। गलिता। प्रवृत्तिः। ब्रह्मात्मनोः। एकतया। अधिगत्या॥ इदम्। न। जाने। अपि। अनिदम्। न। जाने। किम्। वा। कियत्। वा। सुखम्। अस्ति। अपारम्॥

उस वचनका एक कम चौंतीस श्लोकों कर अनुवाद करे हैं। बुद्धिः इति। अभेदकरके ब्रह्म जीवके साक्षात्कार होनेसे मेरी बुद्धि लय हुई है बाह्य आन्तर दोनों प्रकारकी प्रवृत्ति लीन हुई है इस लोकका कर्तव्य और परलोकका कुछभी कर्तव्य नहीं जानता हूं और निर्विकल्प समाधिमें अनुभव किया सुख सो कैसा है, कितना है और कहांतक है सो भी जाननेसे परे है ॥

वाचा वक्तुमशक्यमेव मनसा मन्तुं न वा शक्यते,
स्वानन्दामृतपूरपूरितपरब्रह्माम्बुधेर्वैभवम् ॥
अम्भोराशिविशीर्णवार्षिकशिलाभावं भजन्मे मनो-
यस्यांशांशलवे विलीनमधुनानन्दात्मना निर्वृतम् ॥

एतदेव स्पष्टयति। वाचेति।

स्वानन्दामृतपूरपूरितपरब्रह्माम्बुधेः स्वस्यात्मनः स्वरूपभूतानन्दलक्षणामृतस्य पूरेण प्रवाहेण पूरितस्य पूर्णतां प्राप्तस्य ब्रह्माम्बुधेः परमात्मस्वरूपजलनिधेर्वैभवमैश्वर्यं वाचा वक्तुमशक्यमेव लक्ष्यत्वात्तस्येति भावः। न वा नापि मनसाऽन्तःकरणेन मन्तुं शक्यते वाङ्मनसयोः प्रवृत्तिदूरगमित्यर्थः। कथं तर्हि तदवगतमत आह अम्भोराशिरिति मे मम मनोऽन्तःकरणमम्भोराशिविशीर्णवार्षिकशिलाभा-

वमम्भोराशौ सागरे विशीर्णानभसः पतित्वा विलयमुपगता वार्षिकशिला करकस्तद्भावं तस्यैवाभेदभावं यथा वार्षिकशिला जलराशौ विशीर्यभेदभावं भजते तथा मे मनोपि ब्रह्मानन्दाब्धौ पतित्वा तद्भावमेव भजत् प्रासवत् यस्योक्तसागरस्यांशांशलवे ब्रह्मणोंशोऽव्याकृतात्मा तस्यांशः सूत्रात्मा तस्य लवोवैराजः पुरुषस्तत्र विलीनमासीदसमाधिदशायामधुना तु तेनैव सागरानन्दात्मना निर्वृतमानन्दितं सत्तृप्तमित्यर्थः। कथमन्यथा तृप्तिरिति भावः॥ ४८२॥

वाचा। वक्तुम्। अशक्यम्। एव। मनसा। मन्तुम्। न। वा। शक्यते। स्वानन्दामृतपूरपूरितपरब्रह्माम्बुधेः। वैभवम्॥ अम्भोराशिविशीर्णवार्षिकशिलाभावम्। भजत्। मे। मनः। यस्य। अंशांशलवे। विलीनम्। अधुना। आनन्दात्मना। निर्वृतम्॥ ४८२॥

आत्मस्वरूप अमृतके प्रवाहकरके पूर्णताको प्राप्त परमात्मारूप समुद्रका ऐश्वर्य वाणीसे नहीं कहनेमें आता है और मनकरके भी मनन करना अशक्य है। मेरा अन्तःकरण जैसे सागरमें मेघसे पतित हुवे बरफके गोलाकार कणके (ओले गले) गलकर जलरूप होजाते हैं, समुद्रके जलसे उस जलका कुछ भेद नहीं रहता है तैसेही ब्रह्मानन्द समुद्रसे अभिन्न हुवा है जिसे ब्रह्मानन्दरूप सागरका अंश अव्याकृतात्मा है उसका अंश सूत्रात्मा है और उसका लेश विराट् पुरुष है तिसमें मेरा मन लीन हुवा था, समाधिकालमें और अब तो तिसे आनन्दरूपकरके ही आनन्दित हुवा तृप्त हुवा है॥४८२॥

क्वगतं केन वा नीतं कुत्र लीनमिदं जगत्॥
अधुनैव मया दृष्टं नास्ति किं महदद्भुतम्॥४८३॥

जगदभावश्च निश्चितइत्याह। क्वगतमिति।

इदं जगत् क्वगतं पलायितं जडस्य पलायनासम्भवे तु केन वा नीतमन्यत्र प्रापितमसतस्तथाभावाभावे तु कुत्र लीनं विलयमुपगतं तत्रैतादृशं जगदभावस्य साधकं ब्रह्म मया अधुनैव समाधिसमय एव दृष्टं साक्षात्कृतं किं महदद्भुतं महाश्चर्यं नास्ति किन्त्वस्त्येवेत्यर्थः "आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः" इति स्मृतेरिति भावः ॥ ४८३ ॥

क्व । गतम् । केन । वा । नीतम् । कुत्र । लीनम् । इदम् । जगत् ॥ अधुना । एव । मया । दृष्टम् । न । अस्ति । किम् । महत् । अद्भुतम् ॥ ४८३ ॥

जगत्का अभाव भी निश्चित हुवा है ऐसा कहे हैं । क्वइति । यह जगत् कहां भाग गया है अथवा किसीने दूसरी जगह जाकर धरदिया है यद्वा किसमें लीन हुवा है, जगत्के अभाव करने हारा ब्रह्म मैंने समाधिकालमें ही देखा है क्या महा-आश्चर्य नहीं है ॥ ४८३ ॥

किं हेयं किमुपादेयं किमन्यत्किं विलक्षणम् ॥
अखण्डानन्दपीयूषपूर्णे ब्रह्ममहार्णवे ॥ ४८४ ॥

हेयोपादेयकल्पनापि समाधावेव विध्वस्तेत्याह । किं हेयमिति । हेयं किं तथोपादेयं च किं न समाधौ हेयोपादेयकल्पनमवशिष्टमित्यर्थः । कुतस्तत्राह अखण्डानन्देति अखण्डानन्दपीयूषपूर्णे नित्यानन्दामृतभरिते ब्रह्ममहार्णवे परमात्ममहोदधौ साक्षात्कृते सति किमन्यदवशिष्टं यदुपादेयं भवेत् किं वा विलक्षणं स्वविजातीयं प्रतिकूलं यद्धेयं भवेदित्यर्थः ॥ ४८४ ॥

किम् । हेयम् । किम् । उपादेयम् । किम् । अन्यत् । किम् । विलक्षणम् ॥ अखण्डानन्दपीयूषपूर्णे । ब्रह्ममहार्णवे ॥ ४८४ ॥

हेय उपादेय कल्पनाभी समाधिमें नष्ट हुई है ऐसा कहे हैं । किं हेयम् इति । ग्रहणयोग्य क्या है, त्यागयोग्य क्या है,

समाधिमें मेरी ग्रहण त्यागकी कल्पना भी न रही क्योंकि नित्य आनन्द अमृतकरके भरे हुवे परमात्मारूप सागरके साक्षात्कार हुवे क्या पीछे बचे है जिसका ग्रहणादि करें और क्या अपने प्रतिकूल है जिसको त्यागें ॥ ४८४ ॥

न किञ्चिदत्र पश्यामि न शृणोमि न वेद्म्यहम्॥
स्वात्मनैव सदानन्दरूपेणास्मि विलक्षणः ४८५

अहं विलक्षणोवर्णाश्रमाद्यभिमानिभ्योविलक्षणोयतः सदानन्दरूपेण स्वात्मनैवास्मि ततोऽत्रात्मनि जगति वा न किञ्चित्पश्यामि चक्षुर्भ्यां नच शृणोमि श्रोत्राभ्यां नच मनसा सुखदुःखादिकं वेद्मि विजानामि स्वात्माभिन्नं न किञ्चिदपि पश्यामीत्यर्थः ॥ ४८५ ॥

न। किञ्चित्। अत्र। पश्यामि। न। शृणोमि। न। वेद्मि। अहम्॥ स्वात्मना। एव। सदानन्दरूपेण। अस्मि। विलक्षणः ॥ ४८५ ॥

मैं वर्णाश्रमाभिमानियोंसे भिन्न हूं, सत् आनन्दरूप अपने आत्माकरके ही वर्तमान हूं इस कारण जगत्में आत्मा में कुछ देखता नहीं हूं, नेत्रोंकरके और न श्रोत्रोंकरके सुनता हू और न मनकरके सुख दुःखादिको जानता हूं, आत्मरूप ही सर्व जानता हूं, आत्मासे भिन्न कुछ नहीं मानताहूं ४८५

नमोनमस्ते गुरवे महात्मने,
विमुक्तसङ्गाय सदुत्तमाय ॥
नित्याद्वयानन्दरसस्वरूपिणे,
भूम्ने सदाऽपारदयाम्बुधाम्ने ॥ ४८६ ॥

गुरोर्महोपकारमनुस्मृत्य तं प्रणमति। नमोनमस्तइति। भोभगवन् अपारदयाम्बुधाम्ने निरवधिकरुणार्णवाय भूम्ने व्यापकाय नित्याद्वयानन्दरसस्वरूपिणे अविनाश्यद्वैतसुखसारस्वरूपाय

विमुक्तसङ्गाय कुसङ्गिसङ्गेऽपि चन्दनवन्निर्लेपायातएव सदुत्तमाय सत्सुसतां वोत्तमाय पुरुषोत्तमवत् समासः महात्मने गम्भीरचेतसे गुरवे देशिकाय, ते तुभ्यं सदासर्वावस्थासु नमोनमः क्रियासमभिहारेण नमनं मेस्त्वित्यर्थः ॥ ४८६ ॥

नमः । नमः । ते । गुरवे । महात्मने । विमुक्तसङ्गाय । सदुत्तमाय ॥ नित्याद्वयानन्दरसस्वरूपिणे । भूम्ने । सदा । अपारदयाम्बुधाम्ने ॥ ४८६ ॥

शिष्य गुरुदेवके महान् उपकारको याद करता हुवा प्रणाम करता है।नमइति।हेभगवन्! निरवधि कृपासागर व्यापक अविनाशी अद्वैत सुखसारस्वरूप कुसंगी पुरुषके संग होनेपर भी चन्दनवत् निर्लेप सन्तोंमें उत्तम कोटिमें गिनेहुवे गम्भीर चित्त वाले गुरुदेवजी आपको नमस्कार हो, नमस्कार हो॥ ४८६ ॥

यत्कटाक्षशशिसान्द्रचन्द्रिका-
पातधूतभवतापजश्रमः ॥
प्राप्तवानहमखण्डवैभवा-
नन्दमात्मपदमक्षयं क्षणात् ॥ ४८७ ॥

प्रणामनिमित्तमाविष्करोति । यत्कटाक्षेति ।

यत्कटाक्षशशिसान्द्रचन्द्रिकापातधूतभवतापजश्रमः यस्य ते देशिकस्य कटाक्षः करुणार्द्रदृष्टिः सएव शशिसान्द्रचन्द्रिका शरदिन्दुसघनज्योत्स्ना तस्याः पातेन प्राप्त्या धूतस्तिरस्कृतोभवतापजः संसारदुःखजन्यः श्रमः खेदोयस्य सोऽहमखण्डवैभवानन्दमखण्डितैश्वर्यसुखमात्मपदं क्षणात्सत्वरमेव प्राप्तवांस्तस्मै ते इति पूर्वेण सम्बन्धः ॥ ४८७ ॥

यत्कटाक्षशशिसान्द्रचन्द्रिकापातधूतभवतापजश्रमः॥ प्राप्तवान्। अहम्। अखण्डवैभवानन्दम् । आत्मपदम्। अक्षयम्। क्षणात् ॥ ४८७ ॥

प्रणामका निमित्त वर्णन करे हैं । यत्कटाक्ष इति। जिस गुरुदेवके करुणाकटाक्षदृष्टिरूप ही हुई शरदृऋतुके चन्द्रमाकी सघन चांदनी उसकी प्राप्तिकरके निवृत्त हुवा है संसारदुःखजन्य खेद जिसका सो मैं अखण्ड ऐश्वर्य सुख अक्षय आत्मपदवी को शीघ्रही प्राप्त हुवा हूं ऐसे गुरुदेवजी आपको प्रणाम है। ऐसा पूर्व श्लोकार्थके संग संबन्ध है ॥ ४८७ ॥

धन्योहं कृतकृत्योहं विमुक्तोहं भवग्रहात् ॥
नित्यानन्दस्वरूपोहं पूर्णोहं त्वदनुग्रहात् ॥ ४८८ ॥

देशिककरुणालब्धतृप्तिमाविष्करोति। धन्योहमिति।

धन्योहं कृतनिष्कामपुण्योहं कृतकृत्योहं कृतं सम्पादितं कृत्यं स्वात्मज्ञानं येन सोहं भवग्रहाद्भवरूपाद् ग्राहाद्दुःखहेतोर्विमुक्तोहं नित्यानन्दस्वरूपोहं त्वदनुग्रहात्पूर्णोहं तृप्तोहमित्यर्थः ॥ ४८८ ॥

धन्यः । अहम् । कृतकृत्यः । अहम् । विमुक्तः । अहम् । भवग्रहात् ॥ नित्यानन्दस्वरूपः । अहम् । पूर्णः । अहम् । त्वदनुग्रहात् ॥ ४८८ ॥

गुरुकी कृपासे प्राप्त हुई तृप्तिको प्रकट करे हैं। धन्यः इति। मैं निष्काम पुण्य वाला हूं, कर्तव्य आत्माका मैंने सम्पादन करलिया है, संसाररूप दुःखके कारण ग्राहसे मैं छुटगया हूं, मैं नित्य आनन्दस्वरूप हूं आपकी कृपासे तृप्त हूं ॥ ४८८ ॥

असङ्गोहमनङ्गोहमलिङ्गोहमभङ्गुरः ॥
प्रशान्तोहमनन्तोहममलोहं चिरन्तनः ॥ ४८९ ॥

उक्ततृप्तिहेतुं स्वानुभवं स्फोरयति। असङ्गोहमिति।

असङ्गोहं सङ्गदोषवर्जितोहं तथाऽनङ्गोऽहं स्थूलशरीराभिमानाभावाद्देहोहं तथाऽलिङ्गोहं लिङ्गाभिमानवर्जितोहमभंगुरो नित्योहं प्रशान्तोहं निरस्तरागादिरहमनन्तोहमन्तवर्जितोहममलोहमाविद्या-तत्कार्यमलाविकलोहं चिरन्तनः सनातनोहमित्यर्थः ॥ ४८९ ॥

अ॒संङ्गः । अ॒हम्॒ । अ॒नङ्गः । अ॒हम्॒ । अ॒लिङ्गः । अ॒हम्॒ । अभ॒ङ्गुरः ॥ प्रशान्तः । अ॒हम्॒ । अ॒नन्तः । अ॒हम् । अ॒मलः । अ॒हम् । चिरन्तनः ॥ ४८६ ॥

पूर्वोक्त तृप्तिका कारण अनुभवको शिष्य स्पष्ट दिखाता है। असंगः इति । मैं संङ्ग दोषसे रहित हूं, स्थूल शरीरके अभिमानका अभाव होनेसे मैं देहरहित हूं तैसे मैं लिंगदेहके अभिमानसे रहित हूं, मैं नित्य हूं, रागादि दोषरहित हूं, मैं अन्तवर्जित हूं, मैं अविद्या और उसके कार्यसे रहित हूं; मैं सनातन हूं ॥ ४८६ ॥

अकर्ताहमभोक्ताहमविकारोऽहमक्रियः ॥
शुद्धबोधस्वरूपोहं केवलोहं सदाशिवः॥ ४६० ॥

तथाऽकर्ताहं कर्तृत्वरहितोहं तथाऽभोक्ताहमविकारोहं षड्भावविकारवर्जितोहमक्रियोनिष्क्रियोहं, कुतस्तत्राह शुद्धेति यतोहं शुद्धबोधस्वरूपस्ततोऽकर्त्रादिस्वरूपः केवलोनिर्विशेषः सदाशिवः सदा मङ्गलस्वभावः नामङ्गल्यं मयि मनागपीति भावः ॥ ४९० ॥

अकर्ता । अहम् । अभोक्ता । अहम् । अविकारः । अहम् । अक्रियः ॥ शुद्धबोधस्वरूपः । अहम् । केवलः । अहम् । सदाशिवः ॥

मैं कर्तृत्वसे रहित हूं, मैं भोक्तृत्वसे रहित हूं, मैं षट्भाव विकारसे रहित हूं, मैं निष्क्रिय हूं, मैं शुद्धबोधस्वरूप हूं, मैं निर्विशेष हूं, अर्थात् नामरूप-गुणादिरहित हूं, मैं सर्वकाल मंगलस्वरूप हूं ॥ ४६० ॥

द्रष्टुः श्रोतुर्वक्तुः कर्तुर्भोक्तुर्विभिन्नएवाहम् ॥
नित्यनिरन्तरनिष्क्रियनिःसीमासङ्गपूर्णबोधात्मा ४६१

किंचाहंचिदात्मा द्रष्टुश्चाक्षुषवृत्त्याश्रयाद्वक्तुरुच्चारणकर्तृत्वाश्रयात्कर्तुर्यत्नाश्रयाद्भोक्तुः सुखदुःखवृत्त्याश्रयाच साभासान्तःकरणा-

द्विभिन्नएव न भेदाभेदवाद्यभिमतरीत्या कथंचिंदभिन्नः कथंचिच्च भिन्नइति भावः। नित्यनिरन्तरनिष्क्रियनिःसीमासङ्गपूर्णबोधात्मा नित्योऽन्तविकलोनिरन्तरोनिर्भेदोनिष्क्रियोऽचलोनिःसीमाऽपारोऽसङ्गोनिर्लेपः पूर्णोऽपरिच्छिन्नोयोबोधश्चित्स्वभावः सएवात्मा स्वरूपं यस्य सः ॥ ४६१ ॥

द्रष्टुः। श्रोतुः। वक्तुः। कर्तुः। विभिन्नः। एव। अहम्॥ नित्यनिरन्तरनिष्क्रियनिःसीमासङ्गपूर्णबोधात्मा ॥ ४६१ ॥

मैं चेतनस्वरूप नेत्रजन्य वृत्तिका आश्रय द्रष्टासे कर्णजन्य वृत्तिका आश्रय श्रोतासे उच्चारणकर्तासे यत्नके आश्रयसे सुख दुःखके अनुभवके आश्रयसे भिन्न हूं, मेरेमें भेदका लेश भी नहीं है, अन्तरहित भेदरहित अचल अपार निर्लेप अपरिच्छिन्न जो बोध है सो मेरा स्वरूप है ॥ ४६१ ॥

नाहमिदं नाहमदोप्युभयोरवभासकं परं शुद्धम् ॥
बाह्याभ्यन्तरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम् ४६२

किंचाहमिदमपरोक्षज्ञानविषयोनाहमदः परोक्षज्ञानविषयश्च न किन्तूभयोरपि परोक्षापरोक्षज्ञानविषययोरवभासकं परं कार्यकारणातः शुद्धं निर्मलं बाह्याभ्यन्तरशून्यं बाह्याभ्यन्तरकल्पनाविकलं पूर्णमद्वितीयं ब्रह्मैवाहमित्यर्थः ॥ ४६२ ॥

न। अहम्। इदम्। न। अहम्। अदः। अपि। उभयोः। अवभासकम्। परम्। शुद्धम्॥ बाह्याभ्यन्तरशून्यम्। पूर्णम्। ब्रह्म। अद्वितीयम्। एव। अहम्॥ ४६२ ॥

मैं अपरोक्षज्ञानका विषय नहीं हूं, मैं परोक्षज्ञानका विषय भी नहीं हूं किन्तु परोक्षज्ञान अपरोक्ष ज्ञानके विषयोंका प्रकाशक मैं हूं, कार्यकारणसे परे हूं, निर्मल हूं, बाह्य आन्तर कल्पना से रहित हूं, पूर्ण अद्वितीय ब्रह्म ही हूं ॥ ४६२ ॥

निरुपममनादितत्त्वं त्वमहमिदमदइति कल्पनादूरम् ।
नित्यानन्दैकरसं सत्यं ब्रह्माद्वितीयमेवाहम् ॥ ४९३ ॥

निरुपममुपमारहितमनादितत्त्वमादिरहितस्वरूपं प्रागभावाप्रतियोगीत्यर्थः । त्वमहमदइति कल्पनादूरं प्रत्यक्पराक्जडभेदकल्पनावर्जितं नित्यानन्दैकरसमद्वितीयं ब्रह्मैवाहं न संसारीत्यर्थः ॥ ४९३ ॥

निरुपमम् । अनादितत्त्वम् ॥ त्वम् । अहम् । इदम् । अदः । इति । कल्पनादूरम् ॥ नित्यानन्दैकरसम् । सत्यम् । ब्रह्म । अद्वितीयम् । एव । अहम् ॥ ४९३ ॥

उपमासे रहित हूं, आदिरहित स्वरूप हूं तूं मैं यह वह इस कल्पनासे रहित हूं, नित्य आनन्द एकरस अद्वितीय ब्रह्म ही हूं मैं संसारी नहीं हूं ॥ ४९३ ॥

नारायणोहं नरकान्तकोहं,
पुरान्तकोहं पुरुषोहमीशः ॥
अखण्डबोधोहमशेषसाक्षी,
निरीश्वरोहं निरहं च निर्ममः ॥ ४९४ ॥

जगत्पालकनारायणादीनां स्वरूपाभिन्नत्वमपि स्वस्य तदभिन्नब्रह्मात्मत्वेनानुसन्दधदाह । नारायणोहमिति ।

अहं नारायणोजलशायी 'आपोनाराइति प्रोक्ताआपोवै नरसूनवः । तायदस्यायनं पूर्वं तेन नारायणः स्मृतः' इति स्मृतेः । अतएव नरकान्तकोनरकासुरनाशकः कृष्णोहं यद्वा स्वाश्रितानां नरकदुःखस्य निवारकोऽहं पुरान्तकोहं त्रिपुरासुरनाशकः पशुपतिरहं यश्चेशः सर्वैश्वर्यशाली पुरुषोऽव्याकृतात्मा सोप्यहमेव अखण्डबोधोहं नित्यचिद्रूपोहमहं चाशेषसाक्षी सर्वप्रकाशकः अहं च निरीश्वरः ईश्वरान्तरशून्योन ममेश्वरोनियन्ता कश्चित्किन्त्वहमेवेश्वरइत्यर्थः । अहं च निरहं निरहङ्कारोनिर्ममश्चाप्यहमेवेत्यर्थः ॥ ४९४ ॥

नारायणः । अहम् । नरकान्तकः । अहम् । पुरान्तकः ।

अहम् । पुरुषः । अहम् । ईशः ॥ अखण्डबोधः । अहम् । अशेषसाक्षी । निरीश्वरः । अहम् । निरहम् । च । निर्ममः ॥ ४६४ ॥

मैंही जलशायी नारायण हूं, नरकासुरका नाश करने वाला कृष्ण भी मैं हूं अथवा अपने भक्तोंके नरकदुःखका निवारण करनेवाला मैं हूं, त्रिपुरदैत्यका नाशक शिव मैं हूं, सर्वपुरीओंमें स्थित मैं हूं, ऐश्वर्यवाला माया उपाधिक अव्याकृतात्मा मैं हूं, नित्य चेतनरूप मैं हूं और मैं ही सर्वका प्रकाशक साक्षीरूप हूं। मेरा प्रेरक ईश्वर कोई नहीं है किन्तु मैं ही ईश्वर हूं,मैं अहंकारवर्जित हूं और ममतासे रहित हूं॥

सर्वेषु भूतेष्वहमेव संस्थितो-
ज्ञानात्मनान्तर्बहिराश्रयः सन् ॥
भोक्ता च भोग्यं स्वयमेव सर्वं,
यद्यत्पृथग्दृष्टमिदन्तया पुरा ॥ ४६५ ॥

किं चाहमेवाश्रयः सन् ज्ञानात्मना ज्ञानस्वरूपेण सर्वेषु भूतेष्वन्तर्बहिश्च संस्थितोनभिन्नोमत्तः कश्चन प्राणिनां बाह्याभ्यन्तराधिष्ठानं किमाश्रयकथनेन स्वयमेवाहमेव भोक्ता च भोग्यं च सर्वं यद्यदज्ञैर्मया वा पुराऽज्ञानदशायामिदन्तयाऽनात्मतया पृथग्दृष्टं पृथक्त्वेन गृहीतं तदप्यहमेवेति बोध्यम् ॥ ४६५ ॥

सर्वेषु । भूतेषु । अहम् । एव । संस्थितः । ज्ञानात्मना । अन्तर्बहिराश्रितः । सन् ॥ भोक्ता । च । भोग्यम् । स्वयम् । एव । सर्वम् । यत् । यत् । पृथक् । दृष्टम् । इदन्तया । पुरा ॥

किंच मैं ही आश्रय हुवा ज्ञानस्वरूप सर्व प्राणियोंमें अन्तर बाहर स्थित हूं, मेरेसे अन्य प्राणियोंका बाह्य आन्तर अधिष्ठान कोई नहीं है, मैंही भोक्ता और भोग्य जो जो अज्ञानी पुरुषों ने वा मैंने अज्ञानसे पूर्वकालमें अनात्मरूपसे अपनेसे भिन्न देखाथा सो सर्व मैं ही हूं ॥ ४६५ ॥

मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः ॥
उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात् ॥ ४९६ ॥

किंच सर्वाधिष्ठानमहमेवेत्याह । मयीति ।

अखण्डसुखाम्भोधौ मयि विश्ववीचयोब्रह्माण्डतरङ्गाबहुधा बहुप्रकारेणोत्पद्यन्ते विलीयन्ते तत्र निमित्तमाह मायामारुतेति मायामारुतविभ्रमात् मायारूपोयोमारुतः प्रभञ्जनस्तस्य विभ्रमात्परिवर्तनात् क्षोभादित्यर्थः ॥ ४९६ ॥

मयि । अखण्डसुखाम्भोधौ । बहुधा । विश्ववीचयः ॥ उत्पद्यन्ते । विलीयन्ते । मायामारुतविभ्रमात् ॥ ४९६ ॥

सर्वका अधिष्ठान मैं ही हूं ऐसा कहे हैं । मयि इति । अखण्ड सुखका समुद्र जो मैं हूं मेरे में ब्रह्माण्डरूप तरंग बहुत प्रकार से उत्पन्न लय होते हैं उसमें मायारूप जो वायु है तिसके गुणोंका क्षोभ ही निमित्त है ॥ ४९६ ॥

स्थूलादिभावामयि कल्पिताभ्रमा-
दारोपितानु स्फुरणेन लोकैः ॥
काले यथा कल्पकवत्सराय-
नर्त्वादयोनिष्कलनिर्विकल्पे ॥ ४९७ ॥

किंच स्थूलसूक्ष्मादिशरीरकल्पनापि विचारे सति मयि स्थितिं न लभतइत्याह । स्थूलादिभावामयीति ।

निष्कलनिर्विकल्पे निरवयवे निर्विशेषे निर्भेदे इति यावत् मयि चिदात्मनि यथा तथाभूते कालेपि कल्पकवत्सरायनर्त्वादयः आद्यः कल्पस्तया वत्सरः संवत्सरः उत्तरायणदक्षिणायने अयने द्वे ऋत्वादयोग्रीष्मादयः षड्ऋतवआदिशब्दान्मासपक्षदिनप्रहरमुहूर्तादीनां संग्रहः लोकैर्जनैरनुस्फुरणेन सूर्यादिचलनभानेनारोपितास्तथा स्थू-

१ निरवयवादिस्वरूपे ।

लादिभावाः स्थूलसूक्ष्मकारणानि भावाउपाधयोभ्रमादधिष्ठानाज्ञानात्कल्पितान सत्याइत्यर्थः ॥ ४९७ ॥

स्थूलादिभावाः। मयि। कल्पिताः। भ्रमात्। आरोपिताः। नु। स्फुरणेन। लोकैः॥ काले। यथा। कल्पकवत्सरायनर्त्वादयः। निष्कलनिर्विकल्पे॥ ४९७॥

किंच विचार करनेसे स्थूलसूक्ष्मादि कल्पना भीं मेरेमें नहीं बनती है ऐसा वर्णन करे हैं। स्थूलादि इति। निरवयव निर्भेद चेतनरूप मेरेमें स्थूल सूक्ष्म कारणरूप उपाधियें अधिष्ठानके अज्ञानसे कल्पित हैं,सत्य नहीं हैं, जैसें कालमें ब्राह्म कल्प वर्ष उत्तरायण दाक्षिणायनरूप दो अयन ग्रीष्मादि छै ऋतु मास पक्ष दिन मुहूर्तादि पुरुषोंने सूर्यादिके चलने से आरोपण किये हैं तैसेही शुद्ध आत्मामें उपाधिकल्पित हैं॥ ४९७॥

आरोपितं नाश्रयदूषकं भवेत्,
कदापि मूढैरतिदोषदूषितैः॥
नार्द्रीकरोत्यूषरभूमिभागं,
मरीचिकावारिमहाप्रवाहः॥ ४९८॥

माभूवन्वास्तवाः स्थूलादिभावालोककल्पिताअपि ते दोषमाधक्ष्यन्त्येवेत्यतआह। आरोपितमिति।

अतिदोषदूषितैरविद्याकामलोभादिदोषैर्दूषितानि चित्तानि येषां तैर्मूढैरविवेकिभिरारोपितं भ्रमादापादितमाश्रयदूषकमधिष्ठानान्यथात्वापादकं कदापि भ्रमसमयेऽन्यदापि च न भवेन्न भवति तथैव दृष्टं भ्रमस्थले इत्याह नार्द्रीति मरीचिकावारिमहाप्रवाहोमरीचिकासु मरुभूमिसमुद्भूतोष्मसंसृष्टसूर्य्यादितेजोरश्मिषु प्रतीयमानोयोवारिमहाप्रवाहः सलिलपूर्णसरिदोघः। ऊषरभूमिभागं नार्द्रीकरोति न पङ्काद्युत्पादनेन मलिनयतीत्यर्थः। तथाच नान्यकल्पितदोषामयि प्रसरन्तीति भावः॥ ४९८॥

आरोपितम्। न। आश्रयदूषकम्। भवेत्। कदापि। मूढैः। अतिदोषदूषितैः॥ न। आर्द्री करोति। ऊषरभूमिभागम्। मरीचिकावारिमहाप्रवाहः॥ ४६८॥

आरोपित पदार्थोंको दूषकता नहीं है ऐसा वर्णन करे हैं। आरोपितम् इति। अविद्या काम लोभादि दोषोंकरके जिनके चित्त दूषित हैं तिनें अविवेकी पुरुषोंकरके भ्रमसे आपादन किया हुवा, आश्रयको अन्यथा करे नहीं, भ्रमकालमें वा पूर्वोत्तर कालमें कदापि अन्यथा नहीं करे हैं जैसे मरुभूमिके संग संबद्ध सूर्यकी रश्मिमें कल्पना किया जलका प्रबल नदीप्रवाह ऊषरभूमिके एक देशको भी गीला कभी नहीं करता है॥

आकाशवल्लोकविदूरगोह-
मादित्यवद्भास्यविलक्षणोहम्॥
अहार्यवन्नित्यविनिश्चलोह-
मम्भोधिवत्पारविवर्जितोहम्॥ ४६९॥

दृष्टान्तसिद्धं स्वस्मिन्दर्शयति। आकाशवदिति।

अहमाकाशवद्यथाऽऽकाशोमेघरजोधूमादिभिर्न लिप्यते तथाहमपि लेपविदूरगोलेपासंस्पृष्टोनिर्लेपइत्यर्थः। किंचाहमादित्यवद्भानुरिव भास्यविलक्षणोभास्येभ्यः पङ्कादिपदार्थेभ्योभिन्नोसंस्पृष्टश्च यथा भानुस्तथाहमपि भास्येभ्योहमादिभ्योविकारिभ्योविलक्षणस्तद्भिन्नस्तदसंस्पृष्टश्चास्मि तथाऽहार्यवत् कुलाचलवत् नित्यविनिश्चलोहं कूटस्थोहमिति यावत्। अम्भोधिवन्महोदधिरिव पारविवर्जितोऽपारोऽहमित्यर्थः॥ ४९९॥

आकाशवत्। लेपविदूरगः। अहम्। आदित्यवद्। भास्यविलक्षणः। अहम्॥ अहार्य्यवत्। नित्यविनिश्चलः। अहम्। अम्भोधिवत्। पारविवर्जितः। अहम्॥ ४६९॥

दृष्टान्तकरके सिद्धधर्मको दार्ष्टान्तिकमें दिखावै हैं। आकाशवत् इति । जैसें आकाश मेघधूलि आदिसे लिप्त नहीं होता है तैसेंही मैं साक्षीरूप निर्लेप हूं और जैसे सूर्य अपनेसे प्रकाश्य पंकादि पदार्थोंसे भिन्न है और उनके संबन्धसे रहित है तैसें मैं भी अपनेसे प्रकाश्य अन्तःकरण आदिसे भिन्न और उनके संबन्धसे रहित हूं और जैसें हिमालय आदि पर्वत निश्चल हैं तैसेंही मैं अचल कूटस्थ हूं। और जैसें समुद्रका पार नहीं है तैसेही मैं अपार ब्रह्मरूप हूं ॥ ४९९ ॥

न मे देहेन संबन्धोमेघेनेव विहायसः ॥
अतः कुतोमे तद्धर्माजाग्रत्स्वप्नसुषुप्तयः॥ ५०० ॥

आकाशवदितिदृष्टान्तसंग्रहश्लोकस्थाकाशवदित्याद्यपादं विवृणोति । न मे देहेनेति ।

मेघेन विहायसोनभसइव मे निर्लेपस्य देहेन सूक्ष्मादिना संबन्धः संसर्गोयतोनास्त्यतस्तद्धर्माः सूक्ष्मदेहधर्माजाग्रत्स्वप्नसुषुप्तयोनिरुक्तामे कुतोन कुतोपीत्यर्थः । स्वधर्मापादनस्य स्वसंबन्धनियतत्वादिति भावः ॥ ५०० ॥

न । मे । देहेन । संबन्धः । मेघेन । इव । विहायसः ॥ अतः । कुतः । मे । तद्धर्माः । जाग्रत्स्वप्नसुषुप्तयः ॥ ५०० ॥

पूर्व दृष्टान्तोंके संग्रहके बीचमें आकाशदृष्टान्तका वर्णन करे हैं। न इति। मेघकरके आकाशको जैसें लेप नहीं होता तैसे ही मेरेको सूक्ष्म देहादिके साथ संबन्ध नहीं है इस कारण सूक्ष्म देहके धर्म जाग्रत् स्वप्न सुषुप्ति मेरे धर्म कैसें होसकते हैं। धर्मीके संबन्ध बिना धर्मोंका आपादन असम्भव है ॥ ५०० ॥

उपाधिरायाति सएव गच्छति,
सएव कर्माणि करोति भुङ्क्ते ॥

सएव जीर्यन् म्रियते सदाहं,
कुलाद्रिवन्निश्चलएव संस्थितः ॥ ५०१ ॥

तस्यैवाहार्यवदितितृतीयपादं व्याचष्टे। उपाधिरायातीति। उपाधिः सूक्ष्मदेहः आयाति स्थूलदेहे तथा सएव गच्छति प्रारब्धभोगावसाने स्थूलदेहान्निष्क्रामति सएव च कर्माणि धर्मादीनि करोति स्थूलमाधिष्ठाय भुङ्क्ते च चिच्छायासम्पन्नबुद्धिसंवलितः सन् सुखादिकमनुभवति सएवास्मिन्नन्यास्मिंश्च भवे जीर्यन् जरादुःखमनुभवन् म्रियते मरणदुःखमनुभवति "लक्षणहेत्वोः क्रियाया" इति शता अनेन दुःखहेतुत्वमेवास्य स्फोरितम्। अहन्तु कुलाद्रिवत्कुलाचलइव निश्चलएव संस्थितोस्मीत्यर्थः ॥ ५०१ ॥

उपाधिः। आयाति। सः। एव। गच्छति। सः। एव। कर्माणि। करोति। भुंक्ते ॥ सः। एव। जीर्यन्। म्रियते। सदा। अहम्। कुलाद्रिवत्। निश्चलः। एव। संस्थितः॥५०१॥

पूर्व कथन कियेके दृष्टान्तको स्पष्ट वर्णन करे हैं। उपाधिः इति। सूक्ष्म देहरूप उपाधि ही प्रारब्ध भोगकी समाप्ति कालमें स्थूल देहसे निकसके देहान्तरमें जावै है। और उपाधि ही देहान्तरमें आवै है सो ही धर्माधर्मादि कर्मोंको करे है, स्थूल देहको आश्रयकरके भोगों को भी भोगे है, चेतनके प्रतिबिम्बयुक्त बुद्धिवाला होनेसे सुख दुःखादिका अनुभव करे है सो ही इसमें तथा अन्य जन्ममें जरादि दुःखोंका अनुभव करता हुवा मरता है और मैं तो सर्वकालमें कुलपर्वतों वत्, निश्चल ही कूटस्थ हूं ॥ ५०१ ॥

न मे प्रवृत्तिर्नच मे निवृत्तिः,
सदैकरूपस्य निरंशकस्य ॥

१ दृष्टान्तसंग्रहश्लोकस्यैव । २जन्मनि ॥

एकात्मकोयोनिविडोनिरन्तरो-
व्योमेव पूर्णः सकथं नु चेष्टते ॥ ५०२ ॥

आकाशदृष्टान्तदृष्टमवशिष्टमंशं स्फोरयति। न मे प्रवृत्तिरिति। सदैकरूपस्य सर्वदैकरसस्य निरंशकस्य निरवयवस्य मे न प्रवृत्तिर्बाह्येऽभ्यन्तरे वेष्टे, न च मे निवृत्तिरपि कुताश्चिदनिष्टात्। योब्रह्मवित् व्योमेवैकात्मकोऽद्वैतोऽतोनिरन्तरोऽतएव च निविडः सैन्धवघनवत्पूर्णश्च सर्वत्र सनु कथं चेष्टते न कथमपीत्यर्थः ॥ ५०२ ॥

न। मे। प्रवृत्तिः। न। च। मे। निवृत्तिः। सदा। एकरूपस्य। निरंशकस्य॥ एकात्मकः। यः। निविडः। निरन्तरः। व्योम। इव। पूर्णः। सः। कथम्। नु। चेष्टते॥ ५०२॥

आकाशदृष्टान्तसे एकरूपताकी सिद्धि भी दिखावै हैं। न इति। सर्वकालमें एकरस निरवयवमें हूं इस कारण मेरी प्रवृत्ति किसी बाह्य आन्तर पदार्थमें नहीं होती इसी कारण किसीको अनिष्ट जानकर मेरी निवृत्ति भी नहीं होती जो ब्रह्मज्ञानी आकाशवत् अद्वैत निर्भेद सैन्धव खंडवत् अन्तर बाहर एकरस सर्वमें पूर्णरूप है सो कैसे चेष्टावाला होसकता है कभी नहीं होता है ॥ ५०२ ॥

पुण्यानि पापानि निरिन्द्रियस्य,
निश्चेतसोनिर्विकृतेर्निराकृतेः ॥
कुतोममाखण्डसुखानुभूते-
र्ब्रूते ह्यनन्वागतमित्यपि श्रुतिः॥ ५०३ ॥

संग्रहश्लोकस्य प्रथमतृतीयपादे व्याख्याते सम्प्रत्यादित्यवदिति द्वितीयपादं व्याख्यातुं स्वस्य साक्षित्वमादित्यपदस्य च तेजःसामान्योपलक्षणत्वं त्रिभिर्दर्शयति। पुण्यानीति। निरिन्द्रियस्य ज्ञानकर्मकरणवर्जितस्य निश्चेतसोऽमनस्कःयातएव

निर्विकृतेर्निर्विकारस्य निराकृतेर्निराकारस्याखण्डसुखानुभूतेर्नित्यानन्दानुभवलक्षणस्य च मम पुण्यानि पापानि च कुतो न कुतोपीत्यर्थः। देहेन्द्रियान्तःकरणसंघातसम्बन्धेन पुण्यादिसम्भवादिति भावः। मम द्रष्टुः पुण्याद्यसंसर्गो न केवलं न्यायसिद्धः किन्तु श्रुतिरपि। "अनन्वागतं पुण्येनानन्वागतं पापेन" इत्येवं रूपा वेदगीर्ब्रूते तस्मात्पुण्याद्यसम्बन्धइति भावः ॥ ५०३ ॥

पुण्यानि । पापानि । निरिन्द्रियस्य। निश्चेतसः। निर्विकृतेः । निराकृतेः ॥ कुतः। मम । अखण्डसुखानुभूतेः । ब्रूते । हि । अनन्वागतम् । इति । अपि । श्रुतिः ॥ ५०३ ॥

सूर्यदृष्टान्तको तीन श्लोकोंसे वर्णन करे हैं। पुण्यानि इति। ज्ञानेन्द्रिय कर्मेन्द्रियसे, रहित मनसे रहित निर्विकार निराकार नित्य आनन्द अनुभवरूप मेरेको पुण्यकर्म पापकर्म किस हेतुसे होसके है किसी से नहीं । और "वेदकी श्रुति" भी पाप पुण्यकरके आत्माको संबन्ध नहीं होता है ऐसी" कहती है इस कारण श्रुतियुक्तिसिद्ध पुण्यादि संबन्धरहित मेरा स्वरूप है ॥ ५०३ ॥

छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुःष्ठु वा ॥
न स्पृशत्येव यत्किञ्चित्पुरुषं तद्विलक्षणम् ॥५०४॥

पुण्यादीनि कर्माणि तव न सन्ति चेत्तर्हि कस्य सन्ति कर्तारमन्तरा कर्मासिद्धेरतआह। छाययेति।

यथा देहच्छायास्पृष्टं किञ्चिदपि देहं न स्पृशति तथा चिदात्मनो मम छायारूपेण चिदाभासेन स्पृष्टं पुण्यादिकं न मां चिदात्मानं स्पृशतीति भावार्थः। अन्वयस्तु छायया स्पृष्टं सम्बद्धमुष्णं वह्न्यादिकं वा शीत जलादिकं वा सुष्ठु स्वाभीष्टं दुःष्ठु स्वानभीष्टं वा यत्किंचिदपि भवतु पुण्यापुण्यहेतुः सुखदुःखहेतुर्वा तद्विलक्षणं छायाभिन्नं पुरुषं नैव स्पृशतीति बोध्यः ॥ ५०४ ॥

छायया । स्पृष्टम् । उष्णम् । वा। शीतम् । वा। सुष्ठु। दुःष्ठु।

वा ॥ नं । स्पृशति । एत्र । यत्किञ्चित् । पुरुषम् । तद्विलक्षणम् ॥ ५०४ ॥

पुण्यादि कर्मोंका आत्मामें संबन्ध नहीं तो किसके संग संबंध है इस शङ्काको वारण करे हैं। छायया इति। जैसे देहकी छायाके संग स्पर्श हुई किसी वस्तुका भी देहके संग स्पर्श नहीं होता है तैसेही चेतन आत्मा मैं हूं मेरेमें पुण्य पापका संबन्ध नहीं है किन्तु चिदाभासमें है, यह भावार्थ है। पदोंका अर्थ यह है—छायाकरके संबद्ध अग्नि आदि जलादि अपनेको वांछित अपनी इच्छासे विपरीत जो कुछ भी हो पुण्य पापका हेतु अथवा सुख दुःखका हेतु सो छायासे भिन्न पुरुषको नहीं स्पर्श करे है॥ ५०४ ॥

न साक्षिणं साक्ष्यधर्माः संस्पृशन्ति विलक्षणम् ॥
अविकारमुदासीनं गृहधर्माः प्रदीपवत् ॥५०५

फलितमाह । न साक्षिणमिति ।

साक्ष्यधर्माः स्वेनैव प्रकाश्यस्याहमादेर्धर्माः कर्तृत्वादयः साक्षिणमात्मानं विलक्षणं भिन्नमविकारमुदासीनं गृहधर्माः श्यामत्वधूसरत्वादयः प्रदीपवत् प्रदीपमिव न स्पृशन्तीत्यर्थः ॥ ५०५ ॥

नं । साक्षिणम् । साक्ष्यधर्माः । संस्पृशन्ति । विलक्षणम् ॥ अविकारम् । उदासीनम् । गृहधर्माः । प्रदीपवत् ॥ ५०५ ॥

फलित कहे हैं। न इति । अपनेसे प्रकाशित अन्तःकरणके कर्तृत्वादि धर्म साक्षीरूप भिन्न अविकार उदासीनको नहीं स्पर्श करते जैसे गृहके श्यामत्वादि धर्म गृहसाक्षी दीपकको नहीं स्पर्श करते हैं ॥ ५०५ ॥

रवेर्यथा कर्मणि साक्षिभावो-

वह्नेर्यथा दाहनियामकत्वम् ॥
रज्जोर्यथा ऽऽरोपितवस्तुसङ्ग-
स्तथैव कूटस्थचिदात्मनो मे ॥ ५०६ ॥

आत्मनः साक्षित्वेन साक्ष्यधर्मासम्बन्धमभिधाय संग्रहश्लोकस्थादित्यवदिति द्वितीयपादं विवृणोति । रवेर्यथेति ।

यथा रवेः सूर्यस्य कर्मणि लोकनिर्वृत्ते पुण्यापुण्ये कर्मणि रविप्रकाशनिमित्तके साक्षिभावोऽसंसर्गित्वं यथाच वह्नेरग्नेर्दाहनियामकत्वं सुजनदुर्जनसाधारण्येन दाहकत्वं न च दाहप्रयुक्तहत्याभागित्वं यथावा रज्जोरारोपितवस्तुसङ्गः, आरोपितस्य दोषदूषितलोचनकल्पितस्य वस्तुनोनागादेः सङ्गः सम्बन्धः कल्पितोन वास्तवस्तथैव कूटस्थचिदात्मनोनिर्विकारचिद्रूपस्य मे मम साक्षिभावएवेत्यर्थः ५०६

रवेः । यथा । कर्मणि । साक्षिभावः । वह्नेः । यथा । दाहनियामकत्वम् ॥ रज्जोः । यथा । आरोपितवस्तुसङ्गः । तथा । एव । कूटस्थचिदात्मनः । मे ॥ ५०६ ॥

पूर्वोक्त दृष्टान्तसंग्रह श्लोकमें उक्त सूर्यदृष्टान्तको वर्णन करते हैं।रवेः इति। जैसे लोककृत पुण्य पापकर्ममें सूर्यको साक्षिरूपता है और अग्निका जैसे सुजन दुर्जन किसीके भी संग स्पर्श होवै दाह करना स्वभाव है, पुरुषके पुण्य पापका भागिपना नहीं है और रज्जुको जैसे कल्पित सर्पादिका संबन्ध है सोभी मिथ्या है तैसें ही निर्विकार कूटस्थ चेतन आत्मा मुझको साक्षीपना होगा,किसी धर्मका वास्तव संबन्ध नहीं होगा५०६

कर्तापि वा कारयितापि नाहं,
भोक्तापि वा भोजयितापि नाहम् ॥
द्रष्टापि वा दर्शयितापि नाहं,
सोहं स्वयंज्योतिरनीदृगात्मा ॥ ५०७ ॥

रव्यादिदृष्टान्तलब्धमर्थं प्रकाशयति। कर्तापि वेत्यादिभ्यां द्वाभ्यां कर्तापि वेति।

अहं कर्ता तत्तत्क्रियानुकूलयत्नवान् कारयिता तत्तत्क्रियायां प्रयोजकोपि न तथा भोक्ता सुखाद्यनुभवाश्रयोभोजयिताऽन्येषां सुखाद्यनुभवे प्रयोजकश्च नाहं तथा द्रष्टा चाक्षुषवृत्त्याश्रयोदर्शयिता दर्शनक्रियाप्रयोजकश्च नाहं, कस्तर्हि त्वं तत्राह सोहमिति अनीदृगात्मा अक्षागोचरस्वरूपः स्वयंज्योतिः स्वप्रकाशोऽन्येषां च स्वसत्तया प्रकाशापादकोयः परमात्मा सोहमस्मि रविवदिति भावः ५०७

कर्ता । अपि । वा । कारयिता । अपि । न । अहम् । भोक्ता । अपि । वा । भोजयिता । अपि न । अहम् ॥ द्रष्टा । अपि । वा । दर्शयिता । अपि । न । अहम् । सः । अहम् । स्वयंज्योतिः । अनीदृक् आत्मा ॥ ५०७ ॥

सूर्यदृष्टान्तसे लब्ध अर्थका वर्णन करे हैं । कर्ता इति । मैं तिस तिस क्रियाका जनक यत्न वाला और उसका प्रेरक भी नहीं हूं । सुख दुःख अनुभवका आश्रय अन्य पुरुषोंको सुखादिके अनुभवका कराने वाला भी मैं नहीं हूं । देखनेवाला और दिखानेवाला भी मैं नहीं हूं, इन्द्रियोंका अविषय स्वप्रकाश अपनी सत्तासे जडका प्रकाशक सूर्यवत् परमात्मा मैं हूं ॥

चलत्युपाधौ प्रतिबिम्बलौल्य-
मौपाधिकं मूढधियोनयन्ति ॥
स्वबिम्बभूतं रविवद्विनिष्क्रियं,
कर्तास्मि भोक्तास्मि हतोस्मि हेति ॥५०८॥

यथा मूढधियोनिर्विवेकाउपाधौ जलादौ चलति सक्रिये सत्यौपाधिकमुपाधिकृतं प्रतिबिम्बलौल्यं सलिलान्तःप्रविष्टरविप्रतिबिम्बचापल्यं स्वबिम्बभूतं सलिलगतप्रतिबिम्बनिमित्तबिम्बरूपं रविमेव नयन्ति तथोपाधौ बुद्ध्यादौ चलति सति तदौपाधिकं चिदाभास-

वृत्तिचापल्यं स्वबिम्बभूतं स्वतोरविवद्विनिष्क्रियं नयन्ति प्रापयन्ति तत्रारोपयन्तीति यावत् तदभिनयति कर्त्तास्मि हा हतोस्मि कष्टतरमिदं मृतसुतदारादिरहं हतप्रायोस्मीत्येवं नयन्तीत्यर्थः॥५०८॥

चलति । उपाधौ । प्रतिबिम्बलौल्यम् । औपाधिकम् । मूढधियः । नयन्ति ॥ स्वबिम्बभूतम् । रविवद् । विनिष्क्रियम् । कर्ता । अस्मि । भोक्ता । अस्मि । हतः । अस्मि । हा । इति ॥

जैसे मूढबुद्धिवाले पुरुष जलरूप उपाधिके चलने पर उपाधिकृत प्रतिबिंबके चलनेको जलके बीच पडे प्रतिबिम्ब का हेतु बिम्बरूप सूर्यमें मानते हैं तैसे ही बुद्धि आदि उपाधि के विकार होनेसे उपाधिगत विकारको सूर्यवत् निर्विकार चिदाभासके विंबरूप साक्षी आत्मामें आरोप करते हैं, आरोप का स्वरूप यह है मैं कर्ता हूं, भोक्ता हूं बडा कष्ट है, मेरे पुत्र, स्त्री-वर्ग सर्व मरगये हैं सो मैं ही मरा हूं ॥५०८॥

जले वापि स्थले वापि लुठत्वेषजडात्मकः ॥
नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभोयथा ॥५०९॥

सम्प्रति सिंहावलोकितन्यायेन नभोदृष्टान्तदृष्टमन्यदपि लब्धं प्रकाशयति चतुर्भिर्जले वापीति ।

एषजडात्मकः स्थूलोदेहोजले वापि गङ्गाम्भसि वा स्थले वापि मगधादिदेशेपि वा लुठतु पततु । अहं तद्धर्मैर्देहधर्मैर्घटधर्मैरूपादिभिर्यथा नभोन लिप्यते तथा न विलिप्ये, देहाभिमानशून्यस्यासङ्गाभङ्गात्मानन्दस्य न किञ्चिद्देहत्यागे न्यूनाधिक्यमिति भावः॥

जले। वा। अपि। स्थले। वा। अपि। लुठतु। एषः। जडात्मकः॥ न। अहम्। विलिप्ये। तद्धर्मैः। घटधर्मैः। नभः। यथा॥

अब सिंहावलोकन दृष्टान्तके अनुसार आकाशदृष्टान्तका प्रकारान्तरसे वर्णन करे हैं । जले इति । यह जडस्वरूप स्थूलदेह गंगाजलमें अथवा मघादेशमें पतित हो परंच जैसे

घटादिके रूपादि धर्मोंकरके आकाश लिप्त नहीं होता है तैसे ही मैं भी देहके धर्मोंकरके लिप्त नहीं होता हूं। देहके अभिमानसे रहित असंग अभंग आत्मानन्दको उत्तम देशमें वा नीचदेशमें देहत्यागनेसे न्यूनता अधिकताका लेशमात्र भी हानि व लाभ नहीं होवै है यह तात्पर्य है ॥५०६॥

कर्तृत्वभोक्तृत्वखलत्वमत्तता-
जडत्वबद्धत्वविमुक्ततादयः ॥
बुद्धेर्विकल्पानतु सन्ति वस्तुतः,
स्वस्मिन् परे ब्रह्मणि केवलेऽद्वये ॥ ५१० ॥

नभोवदेव केवलेऽद्वये परे ब्रह्मणि स्वस्मिन् मयि कर्तृत्वभोक्तृत्वखलत्वमत्ततास्तथा जडत्वबद्धत्वविमुक्ततादयोबुद्धेर्विकल्पाधर्मास्ते वस्तुतोनतु सन्ति अन्यधर्माणामन्यत्राध्यासमन्तरेणाप्राप्तेर्मयि चाध्यासगन्धस्याप्यभावादिति भावः ॥ ५१०॥

कर्तृत्वभोक्तृत्वखलत्वमत्तताः। जडत्वबद्धत्वविमुक्ततादयः॥ बुद्धेः। विकल्पाः। न। तु। सन्ति। वस्तुतः। स्वस्मिन्। परे। ब्रह्मणि। केवले। अद्वये ॥ ५१० ॥

आकाशवत् केवल अद्वैत परब्रह्मरूप मेरेमें कर्तृत्व भोक्तृत्व मूर्खत्व उन्मत्तता जडता बद्धता विमुक्तता आदि बुद्धिके धर्म हैं सोभी कल्पित हैं वास्तवरूप सो धर्म नहीं है, मेरेमें भ्रम न होनेसे अन्य धर्मोंकी प्राप्ति नहीं है ॥ ५१० ॥

सन्तु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि ॥
किं मेऽसङ्गचितस्तैर्न घनः क्वचिदम्बरं स्पृशति ५११

किंच प्रकृतेर्मम मायाशक्तेर्दशधा शतधा सहस्रधा वापि विकाराः सन्तु परमात्मनश्चिद्रूपस्य निर्विकारत्वादेकस्मिन् विकाराभावात्संख्यायाश्च दशगुणत्तया वृद्धेर्दशधेत्यादिक्रमउक्तः। अनन्ताविकाराः

सन्त्विति फलितोर्थः । मेऽसङ्कुचितोनिःसङ्गस्य चिद्रूपस्य तैर्विकारैः किं न किमपीत्यर्थः । न तैर्मे लेपइति यावत् यथा घनोमेघः क्वचिदप्यम्बरं न स्पृशाति तथाहं निर्लेपइत्यर्थः ॥ ५११ ॥

सन्तु । विकाराः । प्रकृतेः । दशधा । शतधा । सहस्रधा । वा । अपि ॥ किम् । मे । असङ्गचितः । तैः । न । घनः । क्वचित् । अम्बरम् । स्पृशति ॥ ५११ ॥

मेरी मायाशक्तिरूप प्रकृतिके दश प्रकारके सौ प्रकारके हजार प्रकारके विकार होवें अर्थात् अनन्त विकार होवें परन्तु चेतनरूप परमात्माको निर्विकार होनेसे असंग चेतनस्वरूप मेरेको उन विकारों से क्या हानि है कुछभी नहीं अर्थात् उनसे मैं लिप्त नहीं होता हूं । जैसे मेघ कहींभी आकाशको नहीं स्पर्श करता तैसेही मैं निर्लेप हूं ॥ ५११ ॥

अव्यक्तादिस्थूलपर्यन्तमेत-
द्विश्वं यत्राभासमात्रं प्रतीतम् ॥
व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं,
ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१२ ॥

यत्र ब्रह्मणि एतदव्यक्तादिस्थूलपर्यन्तं प्रकृत्यादिस्थूलदेहान्तं विश्वं जगदाभासमात्रं प्रतिभासमात्रशरीरं न वास्तवमित्यर्थः।प्रतीतमज्ञैश्च सूक्ष्ममाद्यन्तहीनमुत्पादप्रध्वंसवर्जितमद्वैतं व्योमप्रख्यं गगननिभं यद्ब्रह्म तदेवाहमस्मि नान्यज्जीवोजगद्वेति भावः ॥५१२॥

अव्यक्तादिस्थूलपर्यन्तम् । एतद् । विश्वम् । यत्र । आभासमात्रम् । प्रतीतम् ॥ व्योमप्रख्यम् । सूक्ष्मम् । आद्यन्तहीनम् । ब्रह्म । अद्वैतम् । यत् । तद् । एव । अहम् । अस्मि ॥५१२॥

जिस ब्रह्ममें माया आदि स्थूलदेहान्त यह जगत् प्रतीतिमात्र स्वरूप है,वास्तव नहीं है, अज्ञानियोंको ही सत्प्रतीत

होवे है और जो सूक्ष्म है आदि अन्तसे वर्जित है, आकाशवत् है ऐसा जो अद्वैत ब्रह्म[2] है सो[13] ही[15] मैं[14] हूं[16] जगत् वा जीव मेरा स्वरूप नहीं है ॥५१२॥

सर्वाधारं सर्ववस्तुप्रकाशं,
सर्वाकारं सर्वगं सर्वशून्यम् ॥
नित्यं शुद्धं निश्चलं निर्विकल्पं,
ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१३ ॥

एकदेवचतुर्भिः प्रपञ्चयति। सर्वाधारमिति।

सर्वाधारं कल्पितस्य सर्वस्याशेषस्य जगतआधारमाधिष्ठानं सर्ववस्तुप्रकाशं सर्वेषां वस्तूनां प्रकाशः स्फुरणं यस्मात्तत् जगत्स्फूर्ति निमित्तमित्यर्थः। सर्वाकारमपरिच्छिन्नाकारं सर्वगं मणिगणेषु सूत्रमिव सर्वत्रानुस्यूतं सर्वशून्यमद्वैतं नित्यं शुद्धं निश्चलं निर्विकल्पं निर्भेदं शेषं पूर्ववत् ॥ ५१३ ॥

सर्वाधारम्। सर्ववस्तुप्रकाशम्। सर्वाकारम्। सर्वगम्। सर्वशून्यम् ॥ नित्यम्। शुद्धम्। निश्चलम्। निर्विकल्पम्। ब्रह्म। अद्वैतम्। यत्। तद्। एव। अहम्। अस्मि ॥ ५१३ ॥

इसी वार्त्ताको चार श्लोकोंकरके वर्णन करे हैं। सर्वाधारम् इति। जो कल्पित सर्व जगत्का अधिष्ठान है, सर्व वस्तु का स्फुरणरूप है जिससे अपरिच्छिन्न है स्वरूप जिसका, मणकियोंमें सूत्रवत् सर्वमें अनुस्यूत है, अद्वैत है, नित्य है, शुद्ध है, निश्चल है, निर्विकल्प है ऐसा जो एक ब्रह्म[12] है सो[13] ही[14] मैं[15] हूं[16] ॥५१३॥

यत्प्रत्यस्ताशेषमायाविशेषं,
प्रत्यग्रूपं प्रत्ययागम्यमानम् ॥

सत्यज्ञानानन्तमानन्दरूपं,
ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१४ ॥

प्रत्यस्ताशेषमायं प्रत्यस्ता निरस्ता अशेषा सर्वा माया कार्यकारणरूपा यस्मिंस्तत् प्रत्यग्रूपं सर्वान्तरं प्रत्ययागम्यमानं प्रत्ययेन वृत्तिप्रतिफलितचेतनेनागम्यमानमगोचरीकृतमप्रमेयत्वात् सत्यज्ञानानन्तमानन्दरूपम् ॥ ५१४ ॥

यत्प्रत्यस्ताशेषमायाविशेषम् । प्रत्यग्रूपम् । प्रत्ययागम्यमानम् ॥ सत्यज्ञानानन्तम् । आनन्दरूपम् । ब्रह्म । अद्वैतम् । यत् । तद् । एव । अहम् । अस्मि ॥५१४॥

माया और मायाके विशेष कार्य सर्व जिसमें है नहीं और सर्वसे अन्तर है वृत्तिप्रतिबिंबित चेतनकरके भी जो विषयकृत नहीं है, सत्य ज्ञान अनन्त आनन्द यह हैं स्वरूप जिसका ऐसा अद्वैत ब्रह्म मैं हूं ॥५१४॥

निष्क्रियोस्म्यविकारोस्मि निष्कलोस्मि निराकृतिः ॥
निर्विकल्पोस्मि नित्योस्मि निरालम्बोस्मि निर्द्वयः ५१५

निष्क्रियोस्मि क्रियावर्जितोऽस्मि अविकारोस्मि निर्विकारोस्मि निष्कलोस्मि निरंशोस्मि निराकृतिर्निराकारोस्मि निर्विकल्पोस्मि निःसंकल्पोस्मि नित्योस्मि सत्योस्मि निरालम्बोस्मि निराश्रयोस्मि निर्द्वयोनिर्द्वैतोस्मि ॥ ५१५ ॥

निष्क्रियः । अस्मि । अविकारः । अस्मि । निष्कलः । अस्मि । निराकृतिः ॥ निर्विकल्पः । अस्मि । नित्यः । अस्मि । निरालम्बः । अस्मि । निर्द्वयः ॥ ५१५ ॥

मैं क्रियारहित हूं । निर्विकार हूं, निरवयव हूं, निराकार हूं, संकल्परहित हूं, सत्य हूं, निराश्रय हूं, द्वैतवर्जित हूं ५१५

सर्वात्मकोहं सर्वोहं सर्वातीतोहमद्वयः ॥

केवलाखण्डबोधोहमानन्दोहं निरन्तरः॥ ५१६॥

सर्वात्मकोहं नाल्पात्मकोहं सर्वोहं नाल्पोहं व्यापकत्वात्। सर्वातीतोहं वाङ्मनसादिकरणग्रामागम्योऽद्वयः केवलाखण्डबोधोहं निर्द्वैतनित्यचिन्मात्रोहमानन्दोहं निरन्तरोनिर्भेदोहम्॥ ५१६॥

सर्वात्मकः। अहम्। सर्वः। अहम्। सर्वातीतः।अहम्। अद्वयः॥ केवलाखण्डबोधः। अहम्। आनन्दः। अहम्। निरन्तरः॥५१६॥

मैं परिच्छिन्नरूप नहीं हूं, मैं अल्प नहीं हूं, मैंन वाणीका अविषय हूं, मैं द्वैतसे रहित हूं, नित्य चेतनमात्र मैं हूं, मैं आनन्दरूप हूं, भेदसे रहित हूं॥५१६॥

स्वाराज्यसाम्राज्यविभूतिरेषा,
भवत्कृपाश्रीमहिमप्रसादात्॥
प्राप्ता मया श्रीगुरवे महात्मने,
नमोनमस्तेऽस्तु पुनर्नमोस्तु॥ ५१७॥

श्रीगुरोरुपकारमनुस्मृत्य भूयोभूयस्तं नमस्यति।स्वाराज्येत्यादिना। हेश्रीगुरो एषा स्वाराज्यसाम्राज्यविभूतिःस्वः स्वर्गाणां सुखानां राट् राजा ब्रह्मानन्दस्तस्य साम्राज्यं निरङ्कुशैश्वर्यं सैव विभूतिर्वैभवं भवत्कृपाश्रीमहिमप्रसादात् भवदीयया कृपया निमित्तभूतया लब्धोयः श्रीमहिम्नईश्वरस्य प्रसादः प्रसन्नता तस्मात् मया प्राप्ता लब्धा ततस्ते महात्मने महोपकाराय श्रीगुरवे नमोनमोस्तु पुनर्भूयोपि नमोस्तु त्रिर्नमनमनन्तार्थकम्॥ ५१७॥

स्वाराज्यसाम्राज्यविभूतिः। एषा। भवत्कृपाश्रीमहिमप्रसादात्॥ प्राप्ता। मया। श्रीगुरवे। महात्मने। नमः। नमः। ते। अस्तु। पुनः। नमः। अस्तु॥ ५१७॥

गुरुदेवके उपकारको स्मरणकरके प्रणाम करते हैं। स्वाराज्य-

इति। हे गुरो! यह आत्मानन्दरूप राज ब्रह्मानन्दका निरंकुश ऐश्वर्य है सो आपकी कृपासे प्राप्त हुई जो भगवत्प्रसन्नता उससे मेरेको प्राप्त हुवा है, इस कारण महाउपकारकारक श्रीगुरुदेवजीको नमस्कार हो, आपको नमस्कार हो फिर नमस्कार हो ऐसा तीन वार नमस्कार अनन्तवारको सूचन करे है॥ ५१७॥

महास्वप्ने मायाकृतजनिजरामृत्युगहने,
भ्रमन्तं क्लिश्यन्तं बहुलतरतापैरनुदिनम्॥
अहंकारव्याघ्रव्यथितमिममत्यन्तकृपया,
प्रबोध्य प्रस्वापात्परमवितवान्मामसि गुरो॥५१८॥

महोपकारमानन्दलाभलक्षणमभिधायानर्थनिवृत्तिलक्षणमपि तमाह। महास्वप्नइति।

हेगुरो भवान् मायाकृतजनिजरामृत्युगहने मायाकृतानां जनिजरामृत्यूनां गहने वने महास्वप्ने दीर्घस्वप्नावस्थायामज्ञैरेव निद्राशौर्जागरेतिकल्पितनामधेयायां भ्रमन्तं अनवस्थित्या जातश्रमभरम्। अनुदिनं महास्वप्नएव कल्पितसूर्यादिनिमित्तकदिनप्रहरमुहूर्तादिसमये सर्वदैव बहुलतरतापैराध्यात्मिकादिभिर्दुःखैः क्लिश्यन्तं बाध्यमानं किंच तस्मिन्नेव जरादितरुविततेस्वाप्निके वनेऽहंकारव्याघ्रव्यथितमहंकारलक्षणेन व्याघ्रेण जातभयमिमं भवच्चरणशरणावलम्बिनं मामत्यन्तकृपया लौकिकालौकिकलाभमनपेक्ष्य कृतया करुणया परं केवलं प्रस्वापान्निद्रायामोहमय्याः प्रबोध्योत्थाप्यावितवाननर्थजातं निवर्त्यरक्षितवानसि तथाचैषमहोपकारोभवतइति भावः॥

महास्वप्ने। मायाकृतजनिजरामृत्युगहने। भ्रमन्तम्। क्लिश्यन्तम्। बहुलतरतापैः। अनुदिनम्॥ अहंकारव्याघ्रव्यथितम्। इमम्। अत्यन्तकृपया। प्रबोध्य। प्रस्वापात्। परम्। अवितवान्। माम्। असि। गुरो॥ ५१८॥

आनन्दप्राप्तिरूप उपकारका निरूपण किया है अब अनर्थनिवृत्तिरूप उपकारका निरूपण करे हैं । महास्वप्ने इति। हे गुरुदेवजी! आप मायाकृत जन्म जराका गह्वरवन अज्ञानिकृत जाग्रत् नाम वाला वास्तवसे महादीर्घ स्वप्नअवस्थामें भ्रमण करते हुवे सर्व दिनोंमें आध्यात्मिकादि दुःखोंकरके पीडित जन्मादि वृक्षोंके जंगलमें अहंकाररूप व्याघ्रकरके दुःख भयको प्राप्त हुवे आपके चरणकी शरणमें पड़े हुवे मुझको लोकके परलोककी लाभ इच्छा विना करी हुई आपने कृपाकरके केवल महामोहरूप निद्रासे जगाके सर्व अनर्थोंसे छुडाके मेरी रक्षा की है सो यह आपका महान् उपकार है॥

नमस्तस्मै सदैकस्मै कस्मैचिन्महसे नमः ॥
यदेतद्विश्वरूपेण राजते गुरुराजते ॥५१९॥

तस्मै निरपेक्षायाकिञ्चनोहं नतिसपर्यामेव समर्पयामीत्याह। नमस्तस्माइति।

हेगुरुराज यदेतद्विश्वरूपेण यन्महोब्रह्मैतज्जगदात्मना नानागुरुशिष्यप्रशिष्याद्यात्मना वा राजते दीप्यते तस्मै महसेऽमिततेजोरूपाय ते तुभ्यं नमः कस्मै सदैकस्मै अनेकरूपजगद्विवर्तसमयेप्येकत्वात्सदैकरूपाय सदेत्यस्य नमइत्यनेन वान्वयः सदानमोस्त्विवत्यर्थः। पुनः कस्मैचिन्मनोवाचामगोचराय भूयोपि नमोस्त्वित्यर्थः ॥ ५१९ ॥

नमः। तस्मै। सदा। एकस्मै। कस्मैचित्। महसे। नमः॥ यद्। एतद्। विश्वरूपेण। राजते। गुरुराजते ॥ ५१९ ॥

सो आप निरपेक्ष गुरुको मैं विरक्त शिष्य नमस्कारसे ही पूजन करता हूं ऐसा कहे हैं। नमःइति। हे गुरुराज! जो ब्रह्म सर्व इस जगत्के रूपकरके अथवा गुरु शिष्य उनके शिष्य आदि रूपकरके प्रकाशता है तिस अपरिच्छिन्न तेजरूप आपको जो

सदा एकरूप मन वाणीका अगोचर आप हैं तिनको पुनः पुनः मेरी नमस्कार हो ॥ ५१९ ॥

इति नतमवलोक्य शिष्यवर्यं,
समधिगतात्मसुखं प्रबुद्धतत्त्वम् ॥
प्रमुदितहृदयं सदेशिकेन्द्रः,
पुनरिदमाह वचः परं महात्मा ॥ ५२० ॥

शिष्यानुवादमुपपाद्य तदुत्तरं गुरुवादमनुवदितुमुपक्रामते । इति नतमिति ।

समधिगतात्मसुखं साक्षात्कृतनिजानन्दं प्रबुद्धतत्त्वं निरावृत-ब्रह्मस्वरूपं प्रमुदितहृदयं विगतशोकमानसं शिष्यवर्यमुत्तमं सच्छिष्य-मिति नतं भूयोभूयोनतिं कुर्वाणमालोक्य विलोक्य सदेशिकेन्द्रोगुरु-राजोमहात्मा पुनरिदं परमुत्कृष्टं वचश्चाह उवाचेत्यर्थः ॥ ५२० ॥

इति । नतम् । अवलोक्य । शिष्यवर्यम् । समधिगतात्म-सुखम् । प्रबुद्धतत्त्वम् ॥ प्रमुदितहृदयः । सः । देशिकेन्द्रः।पुनः। इदम् । आह । वचः । परम् । महात्मा ॥ ५२० ॥

शिष्यके कथनका अनुवाद किया है अब गुरुदेवके कथनका अनुवाद करे हैं। इति इति।साक्षात्कार कियाहै आत्माके सुखरूप का जिसने।निरावरण ब्रह्मस्वरूपको जो प्राप्त हुवा है शोकरहित जिसका मन है, उत्तम शिष्य जो पूर्वोक्त प्रकारसे फिर फिर नमस्कार करता है,उसको देखकर सो गुरुराज महात्मा फिर इस उत्तम वचनको कहते भये ॥ ५२० ॥

ब्रह्मप्रत्ययसन्ततिर्जगदतोब्रह्मैव तत्सर्वतः,
पश्याध्यात्मदृशा प्रशान्तमनसा सर्वास्ववस्थास्वपि॥
रूपादन्यदवेक्षितं किमभितश्चक्षुष्मतां दृश्यते,
तद्वद्ब्रह्मविदः सतः किमपरं बुद्धेर्विहारास्पदम्॥५२१॥

हेशिष्य सर्वास्ववस्थास्वपि जाग्रदादिसमये सर्वदा यतोजगद्विश्वं ब्रह्मप्रत्ययसन्ततिः ब्रह्मप्रतीतिप्रवाहएव सन् घटः सन् पटइत्याकाराः सदाकारब्रह्मविषयाये प्रत्ययाजायन्ते तएव जगद्यथा नागदण्डविषयाइदमाकाराअयं नागोऽयं दण्डइत्यादयः प्रत्ययाउत्पद्यन्ते ते सर्वे नागादिप्रातिभासिकं जगत्तथैवेदं व्यावहारिकमपि जगदतः सर्वतः सद्ब्रह्मैवेदं न ततोऽतिरिच्यते इत्यध्यात्मदृशा आत्मविषयदृष्टया प्रशान्तमनसा नीरागद्वेषचित्तेन पश्य विजानीहि अभितः सर्वतोऽवेक्षितमविवेकिभिर्नीलपीतादिवस्तु दृष्टं चक्षुष्मतां चक्षुष्मद्भिर्विवेकनयनैरूपादन्यद्रूपभिन्नं दृश्यते किं नकिमपि तैरूपसामान्यादन्यन्नीलपीतादिदृश्यते किन्तु रूपप्रत्ययसन्ततिरेव नीलपीताद्यात्मना विवर्तते तद्वत् तथा ब्रह्मविदोब्रह्मनिष्ठस्य बुद्धेर्विवेकविकलनानारूपजगद्गोचरायामतेर्विहारास्पदं वृत्त्या गोचरीकृतं जगत् सतः सद्रूपब्रह्मणोऽपरं भिन्नं किं दृश्यते न किमपि दृश्यते किन्तु ब्रह्मैव सर्वन्तैर्दृश्यतइत्यर्थः ॥ ५२१ ॥

ब्रह्मप्रत्ययसन्ततिः। जगद्। अतः। ब्रह्म। एव। तत्। सर्वतः। पश्य। अध्यात्मदृशा। प्रशान्तमनसा। सर्वासु। अवस्थासु। अपि॥ रूपाद्। अन्यद्। अवेक्षितम्। किम्। अभितः। चक्षुष्मता। दृश्यते। तद्वद्। ब्रह्मविदः। सतः। किम्। अपरम्। बुद्धेः। विहारास्पदम् ॥ ५२१ ॥

गुरुवाक्यका प्रकाश करे हैं। हे शिष्य! जाग्रत् आदि सर्व अवस्थामें सर्वकालमें जिस कारण सर्व प्रपंच ब्रह्मप्रतीतिका प्रवाहरूप है घट सत् है, पट सत् है इत्यादि जो प्रतीति है सो ही जगत् है इसकारण सर्व तर्फसे सद् ब्रह्म ही यह जगत् है ब्रह्मसे भिन्न नहीं है ऐसा आत्मगोचर दृष्टिकरके रागद्वेषरहित चित्तकरके जान जैसे सर्वप्रकारसे अविवेकिदृष्ट नील पीतादि पदार्थ विवेकनेत्रोंवाले पुरुषोंने रूप सामान्यसे भिन्न कुछ भी देखा है क्या किन्तु नहीं देखा है। रूपसामान्य

ही नील पीत प्रतीति होकर भासे है तैसेही ब्रह्मज्ञानी पुरुष को विवेकरहित जगत् गोचरबुद्धिका विषयभूत जगत् सतरूप ब्रह्म से भिन्न क्या दीखता है किन्तु नहीं दीखता,सर्व ब्रह्म ही उन्होंने देखा है ॥ ५२१ ॥

कस्तां परानन्दरसानुभूति-
मुत्सृज्य शून्येषु रमेत विद्वान्॥
चन्द्रे महाह्लादिनि दीप्यमाने,
चित्रेन्दुमालोकयितुं कइच्छेत्॥५२२॥

तथाच ब्रह्मभिन्नतया किञ्चित्कल्पयित्वा तत्र रमणमात्मवैमुख्यनिमित्तं नोचितमुचितानुचितविचारवतइत्याह । कस्तामिति ।

कोविद्वान् विवेकी परानन्दरसानुभूतिं सारभूतात्मानन्दसाक्षात्कारमुत्सृज्य विहाय शून्येषु ब्रह्मभिन्नतया कल्पितेषु विषयेषु रमेत सज्जेत यथा महाह्लादिनि परमानन्दाभिवृद्धिनिमित्ते चन्द्रे चन्द्रमसि दीप्यमाने भासमाने चित्रेन्दुं भित्त्यादौ शिल्प्यादिना लिखितां चन्द्रप्रतिकृतिमालोकयितुं विलोकयितुं कइच्छेत् न कोपीत्यर्थः । सम्भावनायां लिङ् एवं सम्भावयितुमपि न शक्यतइति यावत् ५२२

कः । ताम् । परानन्दरसानुभूतिम् । उत्सृज्य । शून्येषु । रमेत । विद्वान् ॥ चन्द्रे । महाह्लादिनि । दीप्यमाने । चित्रेन्दुम् । आलोकयितुम् । कः । इच्छेत् ॥ ५२२ ॥

ब्रह्मभिन्नरूप दृश्यकी कल्पनाकरके उसमें रमण करना अनुचित है इस वार्ताको निरूपण करे हैं । कःइति । कौन विवेकी साररूप आत्मानन्दके साक्षात्कारको त्यागके ब्रह्मभिन्नरूप करके कल्पित विषयोंमें रमण करे(आसक्त होवै) जैसे परम आनन्दवृद्धिका कारण चन्द्रमाके प्रकाश हुवे पर दिवालके ऊपर लिखीहुई चन्द्रमाकी मूर्तिको कौन देखनेकी इच्छा

करता है अर्थात् कोईभी नहीं करता, ऐसी संभावना भी नहीं होती है ॥ ५२२ ॥

असत्पदार्थानुभवेन किञ्चि-
न्नह्यस्ति तृप्तिर्नच दुःखहानिः ॥
तदद्वयानन्दरसानुभूत्या,
तृप्तः सुखं तिष्ठ सदात्मनिष्ठया ॥ ५२३ ॥

दृष्टचेष्टाया आनर्थक्येन तद्दृष्टेरपोहमाह । असत्पदार्थानुभवेनेति ।

असत्पदार्थानुभवेन सद्रूपब्रह्मान्यस्य पदार्थस्य कस्यापि दृश्यस्यानुभवेन किञ्चित् काचित् तृप्तिरिच्छाप्रतिहतिर्नह्यस्ति किन्तु तृष्णा वर्द्धते "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूयएवाभिवर्द्धते" इति स्मृतेः।नच नापि दुःखहानिरैकान्तिकात्यान्तिकदुःखविनाशःतत्तस्माद्धेतोरद्वयानन्दरसानुभूत्या अद्वैतात्मानन्दानुभवेन तृप्तोविगततृष्णः सन् सदात्मनिष्ठया सद्ब्रह्माभिन्नप्रत्यगात्मज्ञाननिष्ठया समाहितया वृत्त्या सुखं यथा स्यात्तथा निर्विक्षेपः संस्तिष्ठेत्यर्थः ॥ ५२३ ॥

असत्पदार्थानुभवेन । किंचित् । न । हि । अस्ति । तृप्तिः । न । च । दुःखहानिः ॥ तद् । अद्वयानन्दरसानुभूत्या । तृप्तः । सुखम् । तिष्ठ । सदात्मनिष्ठया ॥ ५२३ ॥

दृष्ट चेष्टाको अनर्थक होनेसे दृष्ट दृष्टिका त्याग करावें हैं । असत्पदार्थानुभवेन इति । सत्‌रूप ब्रह्मसे अन्य किसी पदार्थका अनुभव न होनेसे कोई भी इच्छा विघातरूप तृप्ति नहीं है किन्तु मिथ्या पदार्थोंके अनुभवसे इच्छाकी वृद्धि होवैं है और अत्यन्त दुःखनिवृत्ति भी नहीं होवै है तिसंकारण अद्वैत आत्म

१ केचित्तु मूलेऽसत्पदार्थानुभवेनेत्यत्र नकारच्छेदं विधाय असत्पदार्थानुभवे सति किञ्चिदपि प्रयोजन न लभ्यते इत्यर्थं वर्णयन्तीति बोध्यम् ।

नन्दके अनुभवकरके तृप्त हुवा हुवा संत् आत्मरूप ब्रह्मनिष्ठा-रूप समाहितवृत्तिकरके सुखपूर्वक निर्विक्षेप होकर स्थित हो॥

स्वमेव सर्वथा पश्यन्मन्यमानः स्वमद्वयम् ॥
स्वानन्दमनुभुञ्जानः कालं नय महामते ॥५२४॥

ननु बाह्यव्यापाराभावे कथं कालक्षेपस्तत्राह । स्वमेवेति ।

हे महामते विशालबुद्धे स्वमात्मानमद्वयं निर्द्वैतं मन्यमानो निश्चिन्वन् सर्वथा सर्वदा सर्वं च स्वमात्मानमेव पश्यन् स्वातिरिक्तमतिमकुर्वन् रागद्वेषाभावेन स्वानन्दमनुभुञ्जानः कालं यावत्प्रारब्धभोगं पुरुषायुषं नय यापयेत्यर्थः ॥ ५२४॥

स्वम् । एव । सर्वथा । पश्यन् । मन्यमानः । स्वम् । अद्वयम् ॥ स्वानन्दम् । अनुभुञ्जानः । कालम् । नय । महामते ॥

बाह्य व्यापारके न करनेसे भी कालव्यतीत करनेका प्रकार कहे हैं । स्वम् इति । हे विशाल बुद्धिवाले ! आत्माको अद्वैतरूप निश्चय करता हुवा, सर्व प्रकार सर्वकालमें सर्व वस्तुका आत्मरूप देखता हुवा, आत्मभिन्न मतिका त्याग करता हुवा रागद्वेषके अभाव होनेसे आत्मानन्दको भोगता हुवा जबतक प्रारब्धभोग हो काल व्यतीत करो ॥ ५२४ ॥

अखण्डबोधात्मनि निर्विकल्पे,
विकल्पनं व्योम्नि पुरप्रकल्पनम् ॥
तदद्वयानन्दमयात्मना सदा,
शान्तिं परामेत्य भजस्व मौनम् ॥५२५॥

कालं नयेत्युक्तं तत्प्रकारमाह । अखण्डबोधात्मनीति ।

निर्विकल्पे निर्भेदेऽखण्डबोधात्मनि विकल्पनं भेदभानं व्योम्नि नभसि पुरप्रकल्पनं नगरकल्पनवदेव न वास्तवं तत्तस्मात्त्वं सदाद्वयानन्दमयात्मना निर्द्वैतानन्दस्वरूपेण परां शान्तिं निरवधिशमं मनसो-

नैश्चल्यमेत्य प्राप्य मौनं बाह्योन्मेषाभावं भजस्वाङ्गीकुरुष्व सदा समाहितोभवेत्यर्थः ॥ १२५ ॥

अखण्डबोधात्मनि। निर्विकल्पे। विकल्पनम्। व्योम्नि। पुरप्रकल्पनम्॥ तद्। अद्वयानन्दमयात्मना। सदा। शान्तिम्। पराम्। एत्य। भजस्व। मौनम् ॥ ५२५ ॥

कालव्यतीत करनेके प्रकारको कहे हैं। अखण्डबोधात्मनि इति। भेदशून्य केवल बोधरूप आत्मा निर्विकल्पमें भेदप्रतीति आकाशमें नगर कल्पनाके समान है वास्तव नहीं है तिसकारण तुम अद्वैत आनन्दरूपकरके सर्वकाल निरबाधि शांन्ति (मन की निश्चलता) को प्राप्त होकर बाह्य दृष्टिके अभावको अङ्गीकार कर अर्थात् सर्वकाल समाहित हो ॥ ५२५ ॥

तूष्णीमवस्था परमोपशान्ति-
र्बुद्धेरसत्कल्पविकल्पहेतोः ॥
ब्रह्मात्मना ब्रह्मविदो महात्मनो-
यत्राद्वयानन्दसुखं निरन्तरम् ॥ ५२६ ॥

मौनंभजस्वेत्युक्तं विवृणोति। तूष्णीमिति।

ब्रह्मविदोब्रह्मनिष्ठस्य महात्मनोमहाशयस्यासत्कल्पविकल्पहेतोरसत्कल्पामिथ्याभूताये विकल्पाः कल्पनास्तद्धेतोस्तदुपादानस्य बुद्धेर्या ब्रह्मात्मना ब्रह्मरूपतया तूष्णीमवस्था चिल्लयावस्था सा परमोपशान्तिः सर्वथाद्वैतविस्मृतिरूपा निर्विक्षेपावस्था यत्र यस्यामवस्थायां निरन्तरं बाह्याभ्यन्तरानात्मप्रत्ययान्तरायरहितमद्वयानन्दसुखं निरायासाद्वयानन्दोऽनुभूयतइत्यर्थः ॥ ५२६ ॥

तूष्णीम्। अवस्था। परमा। उपशान्तिः। बुद्धेः। असत्कल्पविकल्पहेतोः॥ ब्रह्मात्मना। ब्रह्मविदः। महात्मनः। यत्र। अद्वयानन्दसुखम्। निरन्तरम्॥ ५२६ ॥

पूर्वोक्तका विवरण करे हैं।तूष्णीम् इति। ब्रह्मनिष्ठ महात्माका मिथ्यारूप कल्पनाका उपादान कारण बुद्धिकी जो ब्रह्मरूपता करके चेतनमें लय अवस्था है सो सर्व प्रकारसे द्वैतकी विस्मृतिरूप निर्विक्षेप अवस्था है जिस अवस्थामें बाह्य आन्तर प्रतीतिके व्यवधानरहित अयत्नसिद्ध अद्वैत आनन्दका अनुभव होता है ॥ ५२६ ॥

नास्ति निर्वासनान्मौनात्परं सुखकृदुत्तमम् ॥
विज्ञातात्मस्वरूपस्य स्वानन्दरसपायिनः ॥५२७॥

उक्तमेव तनोति। नास्तीति।

विज्ञातात्मस्वरूपस्य साक्षात्कृतात्मतत्त्वस्य स्वानन्दरसपायिनः सारभूतस्वानन्दानुभवशीलस्य निर्वासनान्मौनाद्बाह्याभ्यन्तरानात्मवासनाविकलान्मौनादुक्तलक्षणात्परमन्यत्सुखकृत् श्रमापनोदकमुत्तममुत्कृष्टं नास्ति नैव विद्यतइत्यर्थः ॥ ५२७ ॥

न। अस्ति। निर्वासनात्। मौनात्। परम्। सुखकृत्। उत्तमम् ॥ विज्ञातात्मस्वरूपस्य। स्वानन्दरसपायिनः ॥ ५२७ ॥

पूर्वोक्तका ही विस्तार करे हैं। न इति। जिसने आत्माका साक्षात्कार किया है साररूप आत्मानन्दके अनुभव करनेका जिसको स्वभाव है उसको बाह्य आन्तर अनात्म वासनारहित पूर्वोक्त मौनसे अन्य सुखकारी दुःखहारी उत्कृष्ट वस्तु नहीं विद्यमान है ॥ ५२७॥

गच्छंस्तिष्ठन्नुपविशञ्छयानोवाऽन्यथापि वा ॥
यथेच्छया वसेद्विद्वानात्मारामः सदा मुनिः ॥५२८॥

ब्रह्मविदुषः सदा समाधिस्थितिं स्फोरयति। गच्छन्निति।

आत्मारामआत्मनि आरामआनन्दस्तृप्तिर्यस्य सततया मुनिर्मननशीलोविद्वान् ब्रह्मवित् गच्छंस्तीर्थानि तिष्ठन् विजने वने उपविशन्

स्थिरसुखासनादिषु शयानोमहीतले निद्राणोवाऽन्यथापि गच्छन्मगधादीन्निषिद्धदेशान् तिष्ठन्सभायामुपविशन् मूर्खेषु शयानोमहाप्रासादेषु वा सदा यथेच्छया स्वमनीषयैव नतु पारतन्त्र्येण सदा वसेच्चेष्टेत न ब्रह्मदर्शिनश्चेष्टा नियन्तुं शक्यते तस्य विधिकिङ्करत्वाभावादिति भावः ॥ ५२८ ॥

गच्छन्। तिष्ठन्। उपविशन्। शयानः। वा। अन्यथा। अपि। वा ॥ यथा। इच्छया। वसेत्। विद्वान्। आत्मारामः। सदा। मुनिः॥

ब्रह्मज्ञानीकी सर्वकाल समाधिस्थितिको वर्णन करे हैं। गच्छन्इति। जो पुरुष आत्मामें तृप्त हुवा है और मननशील है, ब्रह्मज्ञानी है, तीर्थोंमें जाता हुवा अथवा जनशून्य वनमें पद्मादि आसनोंमें बैठता हुवा पृथिवीमें शयन करता हुवा अथवा अन्य प्रकारसे मघा आदि निषिद्ध देशोंमें गमन करता हुवा सभामें स्थित हुवा वा मूर्खोंमें बैठता हुवा, महलोंमें सोता हुवा, सर्वकालमें अपनी इच्छानुसार चेष्टा करे, परतंत्र कभी न होवै, ब्रह्मज्ञानीको निरंकुश होनेसे उसकी चेष्टाका नियम नहीं है ॥ ५२८ ॥

न देशकालासनदिग्यमादि-
लक्ष्याद्यपेक्षाऽप्रतिबद्धवृत्तेः ॥
संसिद्धतत्त्वस्य महात्मनोस्ति,
स्ववेदने का नियमाद्यवस्था ॥ ५२९ ॥

ननु विदुषश्चेष्टानियमाभावेपि रहोदेशाद्यपेक्षा तु भविष्यतीत्यत आह। न देशेत्यादिना।

अप्रतिबद्धवृत्तेः प्रतिबन्धशून्यवृत्तेः संसिद्धतत्त्वस्य सम्यङ्निश्चितात्मस्वरूपस्य महात्मनः क्षोभविकलचित्तस्य देशकालासनदिग्यमादिलक्ष्याद्यपेक्षा अरण्यादिर्देशः दर्शपूर्णमासादिकालः स्थिरसुखासनादीनि आसनानि उदीच्यादयोदिशः यमनियमादयो-

यमादयः लक्ष्यादयःस्थूलसूक्ष्मादौ लक्ष्ये धारणादयस्तेषामपेक्षा नास्ति स्वयेदने ब्रह्मात्मज्ञाने नियमाद्यवस्था देशकालादीनां नियमादेरवस्था व्यवस्था नियमनामितियावत् का न कापीत्यर्थः ॥ ५२९ ॥

न । देशकालासनदिग्यमादिलक्ष्याद्यपेक्षा । अप्रतिबद्धवृत्तेः ॥ संसिद्धतत्त्वस्य । महात्मनः । अस्ति । स्ववेदने । का । नियमाद्यवस्था ॥५२६॥

विद्वान्की चेष्टाका नियम न होवै तौ भी एकान्त देशादिं की अपेक्षा होगी इस शङ्काका समाधान करे हैं । न इति। प्रतिबन्धरहित जिसकी वृत्ति है, सम्यक् आत्माके स्वरूपका जिसने निश्चय करलिया है , क्षोभरहित जिसका मन है उस ब्रह्मज्ञानीको वन आदि देश, दर्श पूर्णमासी आदि काल, पद्मादि आसन,उत्तरादि दिशा यम नियमादि योगसाधन,स्थूल सूक्ष्मादि लक्ष्यमें धारणादिकी अपेक्षा नहीं हैं, ब्रह्मात्माके ज्ञानमें देशकालादिके नियमादिकी व्यवस्था क्या होसकती है किन्तु कुछ नहीं होसकती ॥५२६॥

घटोऽयमिति विज्ञातुं नियमः कोन्ववेक्ष्यते ॥
विना प्रमाणसुष्ठुत्वं यस्मिन्सति पदार्थधीः॥५३०॥

ज्ञानमात्रे प्रमातृमाणापेक्षामुदाहरणेन दर्शयति। घटोऽयमिति । अयं घटइति विज्ञातुं साक्षात्कर्तुं नियमोदेशादेः कोन्ववेक्ष्यते न कोप्यपेक्ष्यतइत्यर्थः । किंतर्हि निर्निमित्तमेव ज्ञानमुदेति नेत्याह विनेति प्रमाणसुष्ठुत्वं प्रमाणानां चक्षुरादीनां सुष्ठुत्वं निर्दोषत्वं विना निर्दोषप्रमाणं त्वपेक्ष्यते इत्यर्थः । तदपि कुतोपेक्ष्यते तत्राह यस्मिन्निति यस्मिन्निर्दोषप्रमाणे सति पदार्थधीः पदार्थज्ञानं भवति यस्मिन्नसति पदार्थधीर्न भवति तदवश्यमपेक्ष्यतेऽन्वयव्यतिरेकग्राह्यत्वात्कारणभावस्येति भावः ॥ ५३० ॥

घटः । अयम् । इति । विज्ञातुम् । नियमः । कः । अनु ।

अवेक्ष्यते ॥ विना । प्रमाणसुष्ठुत्वम् । यस्मिन् । सति । पदार्थधीः ॥ ५३० ॥

ज्ञानमात्रमें प्रमाणमात्रकी अपेक्षाको उदाहरणद्वारा दिखाते हैं। घटः इति। यह घट है इसप्रकार अपरोक्ष ज्ञानके लिये देशादिका नियम क्या दीखता है किन्तु नहीं, केवल चक्षु आदि प्रमाणोंकी निर्दोषताको त्यागके अर्थात् निर्दोष प्रमाणमात्रकी अपेक्षा होवै है जिस निर्दोष प्रमाणके होने पर पदार्थका ज्ञान होवै है और जिसके न होनेसे पदार्थज्ञान नहीं होवै है सो निर्दोष प्रमाणमात्र प्रमामात्रको अपेक्षित होवै है ॥ ५३० ॥

अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ॥
न देशं नापि वा कालं न शुद्धिं वाप्यपेक्षते ॥ ५३१ ॥

अपेक्षानपेक्षयोर्हेतुं दर्शयति। अयमात्मेति।

अयं सर्वानुभवमारूढः प्रकृतोनित्यआत्मा नित्यसिद्धस्वरूपः प्रमाणे सति प्रमाणप्रवृत्तौ सत्यां भासते प्रमाणजन्यप्रमागोचरो-भवति न देशं न कालमपि शुद्धिं वापि नापेक्षते, योगयागयोः खलु क्रियारूपतया स्वसिद्ध्यर्थं देशकालापेक्षत्वेपि आत्मनोनित्यसिद्ध-त्वाद्देशकालानपेक्षणेपि स्वाभिव्यक्त्यर्थं प्रमाणप्रवृत्त्यपेक्षणस्याव-श्यकत्वादन्यथा सर्वेस्युरात्मज्ञाइति भावः ॥ ५३१ ॥

अयम् । आत्मा । नित्यसिद्धः । प्रमाणे । सति । भासते ॥ न । देशम् । न । अपि । वा । कालम् । न । शुद्धिम् । वा । अपि । अपेक्षते ॥ ५३१ ॥

अपेक्षा अनपेक्षामें हेतु दिखावै हैं। अयम् इति। यह सर्वके अनुभवमें आरूढ, प्रकरणमें प्राप्त, नित्य आत्मा सदा सिद्ध-स्वरूप है, प्रमाणकी प्रवृत्तिके होनेपर प्रतीत होवै है अर्थात्

प्रमाणजन्य प्रमाका विषय होवै है, न देशकी न कालकी और न शुद्धिकी भी अपेक्षा करे है,योग यज्ञादिको क्रियारूप होने से अपनी सिद्धिके लिये देश कालादिकी अपेक्षा होवै है और आत्माको नित्य सिद्ध होनेसे देशकालकी अनपेक्षा होनेपर भी अपनी अभिव्यक्ति (प्रकटता)के लिये प्रमाण प्रवृत्तिकी अपेक्षा आवश्यक है, प्रमाणकी भी अपेक्षा नहीं होवै तो सर्व पुरुष आत्मज्ञानी होने चाहियें॥ ५३१॥

देवदत्तोहमित्येतद्विज्ञानं निरपेक्षकम्॥
तद्वद्ब्रह्मविदोप्यस्य ब्रह्माहमिति वेदनम्५३२

लौकिकज्ञानवदात्मज्ञानमित्याह। देवदत्तोऽहमितीति।
यथादेवदत्तोहमित्येतत् देवदत्तोहमिति शब्दसमानाकारं व्यक्तिमात्रविषयं विज्ञानं साक्षात्कारोनिरपेक्षकं देशकालाद्यपेक्षाविकलं तद्वदस्य ब्रह्मविदोब्रह्माहमिति स्वात्मस्वरूपमात्रविषयं वैदिकं वेदनं साक्षात्कारोदेशकालाद्यनपेक्षकमेव स्वरूपज्ञानत्वेन तुल्यत्वादिति भावः॥ ५३२॥

देवदत्तः। अहम्। इति। एतद्। विज्ञानम्। निरपेक्षकम्॥
तद्वत्। ब्रह्मविदः। अपि। अस्य। ब्रह्म। अहम्। इति। वेदनम्॥

लौकिक ज्ञानके समान आत्मज्ञानको दिखावै हैं। देवदत्त इति।जैसे मैं देवदत्त हूं ऐसा व्यक्तिमात्र विषयक साक्षात्कार देश कालादिकी अपेक्षासे रहित है तैसेंही ब्रह्मज्ञानीको मैं ब्रह्म हूं ऐसो आत्माके स्वरूपमात्रको विषय करनेवाला वेदजन्यज्ञान, देश कालादिकी अपेक्षासे रहित है। स्वरूप का ज्ञान दोनों हैं, इस कारण निरपेक्षस्वरूप दोनोंको समान है५३२

भानुनेव जगत्सर्वं भासते यस्य तेजसा॥
अनात्मकमसत्तुच्छं किं नु तस्यावभासकम्॥५३३॥

तथाप्यात्मावभासकं किञ्चिद्वाच्यमिति चेत्तत्राह । भानुनेवेति । सर्वं जगद्रूपजातं भानुना भास्करेणेव यस्य ब्रह्मणो नित्यस्फुरणात्मनस्तेजसा प्रकाशेनानात्मकमात्मभिन्नं स्वार्थिकः कः । असन्मिथ्याभूतं भासते प्रतीयते तस्य सर्वभासकस्यावभासकं प्रकाशकं किन्तु नुवितर्के किमपि नेत्यर्थः ॥ ५३३ ॥

भानुना । इव । जगत् । सर्वम् । भासते । यस्य । तेजसा ॥ अनात्मकम् । असत् । तुच्छम् । किम् । नु । तस्य । अवभासकम् ॥

आत्माका प्रकाशक कौन है इस शङ्का का उत्तर कहे हैं भानुना इति । सकल नील पीतादि रूप और रूपवाला द्रव्य जैसे सूर्यकरके प्रकाशित होवैहै तैसे ही जिस नित्य स्फुरणरूप ब्रह्म करके आत्मासे भिन्न सर्व जगत् मिथ्याभूत प्रतीत होवै है तिस सर्वके प्रकाशक आत्माका प्रकाशक कौन होसकता है किन्तु कोई भी नहीं होसकता ॥ ५३३ ॥

वेदशास्त्रपुराणानि भूतानि सकलान्यपि ॥
येनार्थवन्ति तं किन्नु विज्ञातारं प्रकाशयेत्५३४॥

किन्तु तस्यावभासकमित्युक्तं विवृणोति । वेदशास्त्रेति । वेदशास्त्रपुराणानि वेदाऋगादयश्चत्वारः शास्त्राणि गौतमीयन्यायादीनि षट् पुराणानि ब्राह्मादीन्यष्टादश तथा भूतानि देवादीनि गगनादीनि वा सकलान्यपि येनात्मना विज्ञात्राऽर्थवन्ति तत्तदर्थप्रतिपादकानि तत्तदर्थज्ञानवन्ति च भवन्ति तं विज्ञातारं किं नु किमपि न प्रकाशयेद्भासयेदित्यर्थः ॥ ५३४ ॥

वेदशास्त्रपुराणानि । भूतानि । सकलानि । अपि ॥ येन । अर्थवन्ति । तम् । किम् । नु । विज्ञातारम् । प्रकाशयेत् ५३४

पूर्वोक्तका विवरण करे हैं । वेदशास्त्रपुराणानि इति । ऋग् यजुः साम अथर्व यह चार वेद न्यायादि छे शास्त्र, ब्राह्मादि अठारह पुराण, देवादि वा गगनादि (आकाशादि) भूत यह सर्व

जिसे ज्ञातारूप आत्माकरके सार्थक होते हैं(अर्थका प्रतिपादन अर्थबोधनरूप प्रयोजनवाले होते हैं) तिसे ज्ञातारूप आत्माको कोई भी नहीं प्रकाश करसकता है ॥५३४॥

एषस्वयंज्योतिरनन्तशक्ति-
रात्माऽप्रमेयः सकलानुभूतिः ॥
यमेव विज्ञाय विमुक्तबन्धो-
जयत्ययं ब्रह्मविदुत्तमोत्तमः ॥ ५३५ ॥

कुतोन तस्यावभासकं किञ्चिदतआह । एषस्वयंज्योतिरिति । अयं ब्रह्मविदुत्तमोत्तमः ब्रह्मविदोवेदान्तशास्त्रश्रवणजन्यब्रह्मज्ञानसम्पन्नास्तेभ्यउत्तमाब्रह्मसाक्षात्कारशालिनस्तेभ्योप्युत्तमः कृतसमाधिः यमेवात्मानं विज्ञाय साक्षात्कृत्य विमुक्तबन्धनोनिरस्ताविद्यातत्कार्योजयति उत्कर्षमालम्बते एषआत्मास्वयंज्योतिः स्वप्रकाशोऽनन्तशक्तिर्विविधसामर्थ्योपेतोऽप्रमेयः सकलानुभूतिः सर्वेषामनुभवात्मेत्यर्थः ॥ ५३५ ॥

एषः । स्वयंज्योतिः । अनन्तशक्तिः । आत्मा । अप्रमेयः । सकलानुभूतिः ॥ यम् । एव । विज्ञाय । विमुक्तबन्धः । जयति । अयम् । ब्रह्मविदुत्तमोत्तमः ॥५३५॥

शङ्का । उसका प्रकाशक क्यों नहीं? उत्तर । यह ब्रह्मज्ञानियोंमें उत्तमोंसे भी उत्तम जिस आत्माको साक्षात्कारकरके अविद्या और अविद्याका कार्यरूप बन्धनसे रहित होता है, सर्वसे उत्कृष्ट होकर वर्तें हैं सो यह आत्मा स्वप्रकाश है, अनेक सामर्थ्ययुक्त है,प्रमाणका विषय नहीं है और सर्वका अनुभवरूप है ॥

न खिद्यते नो विषयैः प्रमोदते,
न सज्जते नापि विरज्यते च ॥

स्वस्मिन्सदा क्रीडति नन्दति स्वयं,
निरन्तरानन्दरसेन तृप्तः ॥ ५३६ ॥

ब्रह्मविदुत्तमोत्तमइत्युक्तं विवृणोति । न खिद्यतइत्यादिना । वित्तादिवियोगे सति न खिद्यते न खेदभाग्भवति विषयैश्च धनादिभिर्लब्धैर्न प्रमोदते न हृष्यति कुत्रापि सुखसाधने च न सज्जते नासक्तोभवति विरज्यतेपि च न कुतश्चिदपि दुःखसाधनात्प्रासादुद्वेगं न प्राप्नोति स्वस्मिन्नात्मन्येव सदा क्रीडति बाह्यक्रीडोपरतोभवति तत्रैव च स्वयं नन्दति समृद्धोभवति तत्रैव निरन्तरानन्दरसेन नित्यानन्दानुभूत्या तृप्तः कृतार्थोभवतीत्यर्थः ॥ ५३६ ॥

न । खिद्यते । नो । विषयैः । प्रमोदते । न । सज्जते । न । अपि । विरज्यते । च ॥ स्वस्मिन् । सदा । क्रीडति । नन्दति । स्वयम् । निरन्तरानन्दरसेन । तृप्तः ॥ ५३६ ॥

पूर्वोक्तका वर्णन करे हैं । न इति । द्रव्यादिके वियोग होनेसे खेदका भागी नहीं होता, धनादि विषयोंके लाभसे प्रसन्न नहीं होता, किसी सुखसाधनमें आसक्त नहीं होता और किसी भी दुःखसाधनसे उद्वेगको नहीं प्राप्तहोता है और आत्मा में सर्वकाल क्रीडा करता है, बाह्यक्रीडासे उपराम होजाता है और आत्मामें ही आनन्द मानता है और आत्मामें ही नित्य आनन्दके अनुभवसे तृप्त हुवा कृतार्थ होता है ॥ ५३६ ॥

क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनि ॥
तथैव विद्वान् रमते निर्ममोनिरहं सुखी ॥ ५३७ ॥

क्रीडतीत्युक्तं विवृणोति । क्षुधामिति ।
यथा बालोराजकुमारः क्षुधां बुभुक्षां भागुरिमतेनटाप् देहव्यथां शरीरश्रमं च त्यक्त्वाऽचिन्तयित्वा वस्तुनि कन्दुकादौ क्रीडति तथैव विद्वान् निर्ममोनिरहं निरहङ्कारश्च वस्तुनि ब्रह्मात्मनि वस्तुभूते रमते क्रीडति तेनैव च सुखी भवति न बाह्यभोगैः स्वात्मानं सुखिनं मन्यते इत्यर्थः ॥ ५३७ ॥

क्षुधाम्। देहव्यथाम्। त्यक्त्वा। बालः। क्रीडति। वस्तुनि॥
तथा। एव। विद्वान्। रमते। निर्ममः। निरहम्। सुखी ५३७

क्रीडाका विवरण करे हैं। क्षुधाम् इति। जैसे बालक भूख और शरीरके श्रमको त्यागके गेंदकी क्रीडामें रमण करता है तैसेही ब्रह्मज्ञानी पुरुष ममता अहन्तासे रहित होकर ब्रह्म आत्मारूप वास्तवस्वरूपमें रमण करता है और तिसीसे सुखी होता है,बाह्य भोगोंसे आत्माको सुखी नहीं मानता॥

चिन्ताशून्यमदैन्यभैक्षमशनं पानं सरिद्वारिषु,
स्वातन्त्र्येण निरंकुशास्थितिरभीर्निद्रा श्मशाने वने॥
वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तु शय्या मही,
संचारो निगमान्तवीथिषु विदां क्रीडा परे ब्रह्मणि ५३८

कथं रमते तत्राह। चिन्ताशून्यमिति।

विदां ब्रह्मविदामशनं भोजनं चिन्ताशून्यं चूर्णोपार्जननिष्पादनादिचिन्तनवर्जितमदैन्यं स्वामिदीनताविधुरं सर्वमेतत्कुतस्तत्राह भैक्षमिति। भिक्षासम्बन्धीत्यर्थः,पानं च सरिद्वारिषु सरितां स्वर्गङ्गागोदावर्यादीनां नदीनां वारिषु तेषामित्यर्थः। स्थितिः स्वातन्त्र्येण स्वच्छन्दं निरंकुशा अपराधीनाऽत एवाभीर्भयवर्जिता,निद्रा तु श्मशाने परेषां भयहेतौ स्वस्य सदा वैराग्योद्बोधके चितासविधे स्थानेऽथवा वने निर्जने,वस्त्रं च क्षालनशोषणादिरहितं दिग्वास्तु दिगेवास्तु यद्वा वा शब्दो विकल्पे काषायादिकं वल्कलकृत्तित्वचादिकं वास्तु यथोपलब्धमित्यर्थः। शय्या च मही भूमिः संचारश्च निगमान्तवीथिषु वेदान्तरथ्यासु, क्रीडा स्वविश्रमणहेतुविचारश्च परे निर्गुणे ब्रह्मणि, तद्विचारेण तद्ध्यानेन तज्ज्ञानेन च रमणमितिभावः॥ ५३८॥

चिन्ताशून्यम्। अदैन्यभैक्षम्। अशनम्। पानम्। सरिद्वारिषु। स्वातन्त्र्येण। निरङ्कुशा। स्थितिः। अभीः। निद्रा। श्मशाने। वने॥ वस्त्रम्। क्षालनशोषणादिरहितम्।

दिक् । वा । अस्तु । शय्या । मही । संचारः । निगमान्तवीथिषु । विदाम् । क्रीडा । परे । ब्रह्मणि ॥५३८॥

रमणप्रकारको निरूपण करे हैं । चिन्ताशून्यम् इति । ब्रह्मज्ञानियोंका भोजन चिन्तनसे रहित है और दीनतासे रहित है सो भिक्षासंबन्धी अन्नमात्रका है। और नदीके जलका पान है और स्वतन्त्रताकरके अपराधीन स्थिति है सो भी भयरहित है और सदा वैराग्यका हेतु श्मशानभूमिके समीप स्थित होकर वा निर्जन वनमें निद्रा करनी धोना सुखानासे रहित दिशा ही वस्त्र रहो अथवा वृक्षोंकी छाल भोजपत्रादि वस्त्र रहो, शय्या भूमि है, वेदान्तरूप गलियोंमें क्रीडा है, शान्तिहेतु विचार निर्गुण ब्रह्ममें है अर्थात् ब्रह्मके ध्यान ज्ञानमें रमण होवे है ॥ ५३८ ॥

विमानमालम्ब्य शरीरमेतद्-
भुनक्त्यशेषान्विषयानुपस्थितान् ॥
परेच्छया बालवदात्मवेत्ता,
योऽव्यक्तलिङ्गोऽननुषक्तबाह्यः ॥ ५३९ ॥

बालः क्रीडतीत्युक्तं द्वाभ्यां तनोति । विमानमिति ।

आत्मवेत्ता ब्रह्मात्मविदेतच्छरीरं विमानं यथा भवति तथाऽवलम्ब्याशेषान् यथारब्धमुपस्थितान् विषयानन्नजलादीन् परेच्छया बालवद्भुनक्ति भुङ्क्ते भुजोऽनवने इत्युक्तेः यश्चात्मवेत्ताऽव्यक्तलिङ्गोऽव्यञ्जितवर्णाश्रमादिलक्षणः अननुषक्तबाह्यः बाह्ये विषयेऽनासक्तचित्त इत्यर्थः ॥ ५३९ ॥

विमानम् । आलम्ब्य । शरीरम् । एतद् । भुनक्ति । अशेषान् । विषयान् । उपस्थितान् ॥ परेच्छया । बालवत् । आत्मवेत्ता । यः । अव्यक्तलिङ्गः । अननुषक्तबाह्यः ॥ ५३९ ॥

बालककी क्रीडारूप दृष्टान्तका विस्तारसे वर्णन करे हैं । विमानम् इति । ब्रह्मज्ञानी निर्मानतापूर्वक शरीरको धारण करके प्रारब्धानुसार प्राप्त अन्न जलादि सर्वको बालकवत् परेच्छासे भोगता है और जो आत्मज्ञानी गुप्त वर्णाश्रमादि चिह्नोंवाला है, बाह्य विषयोंमें आसक्त जिसका चित्त नहीं है सो बालवत् कहा जाता है ॥ ५३९ ॥

दिगम्बरोवापि च साम्बरोवा,
त्वगम्बरोवापि चिदम्बरस्थः ॥
उन्मत्तवद्वापि च बालवद्वा,
पिशाचवद्वापि चरत्यवन्याम् ॥ ५४० ॥

बालदृष्टान्तेनावशिष्टमप्यंशं लब्धं प्रकाशयन् बालपदस्योपलक्षकत्वं सूचयति । दिगम्बरइति ।

दिगम्बरआशावासाः स्वयं परेच्छया तु साम्बरोवा सवसनोपि, त्वगम्बरोवापि स्वीयामृगाणां तरूणां वा त्वगम्बरंवासोयस्य सतथा यथा सम्भवमिदम्, अथ चिदम्बरस्थश्चिदाकाशनिष्ठः । उन्मत्तवद्वापि जनसङ्गनिवृत्तये च पुनः बालवद्वा ब्रह्मवित्समागमे, पिशाचवद्वापि प्रमादिजनसंसर्गाभावाय, स्वच्छन्दं वै तत्सर्वं विदुषोनियोगपर्यनुयोगानर्हत्वादिति बोध्यम् । अवन्यां दिगङ्गनाङ्गणे चरति सञ्चरति पवमानवदिति भावः ॥ ५४० ॥

दिगम्बरः । वा । अपि । च । साम्बरः । वा । त्वगम्बरः । वा । अपि । चिदम्बरस्थः ॥ उन्मत्तवत् । वा । अपि । च । बालवत् । वा । पिशाचवत् । वा । अपि । चरति । अवन्याम् ॥ ५४० ॥

स्वेच्छासे दिशारूप वस्त्र धारता है, परेच्छासे जो प्राप्त हों उन वस्त्रोंको भी धारता है और मृगोंकी वा वृक्षोंकी त्वचारूप वस्त्रोंको धारता है, चिदाकाशमें जिसकी निष्ठा है, जन-

संग न होवै इस लिये पागलवत् विचरता है अथवा बालकवत् भी विचरता है, पिशाचवत् गुप्तभी विचरता है, इस पृथिवी में जैसे रुचि होती है वैसा विचरता है किसीका किंकर होता नहीं। जैसे वायु है तैसेही निर्लेप विचरता है ॥५४०॥

कामान्निष्कामरूपी संश्चरत्येकचरोमुनिः ॥
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः॥५४१॥

एकचरएकएव चरति एकाकीत्यर्थः। स्वात्मनैव नतु भोगेन सदातुष्टः सर्वदा सन्तोषपूर्णः सर्वात्मना परिच्छेदबुद्धित्यागादशेषात्मना स्वयं स्थितः स्वात्मानमेव सर्वात्मानं भावयन् स्थितः इत्यर्थः। मुनिः कामान् भोगान् निष्कामरूपी संश्चरति भक्षयति चरगतिभक्षणयोरित्युक्तेः भुङ्क्तइति यावत् ॥५४१॥

कामान्। निष्कामरूपी। सन्। चरति। एकचरः। मुनिः॥ स्वात्मना। एव। सदा। तुष्टः। स्वयम्। सर्वात्मना। स्थितः५४१

अकेला विचरने वाला, भोगोंकी अपेक्षा न करके आत्मरूप करके ही सर्वकाल सन्तोषसे पूर्ण होता है, परिच्छेदबुद्धिके त्याग होनेसे आत्माको सर्वात्मा जान कर स्थित होता है ऐसा मुनि भोगोंको निष्काम होकर भोगता है ॥ ५४१ ॥

क्वचिन्मूढोविद्वान् क्वचिदपि महाराजविभवः,
क्वचिद्भ्रान्तः सौम्यः क्वचिदजगराकारकलितः ॥
क्वचित्पात्रीभूतः क्वचिदवमतः क्वाप्यविदित-
श्चरत्येवं प्राज्ञः सततपरमानन्दसुखितः ॥५४२॥

अव्यक्तालिङ्गइत्युक्तं तत्रानियताकारत्वानियताचारत्वयोर्हेतुत्वमाह क्वचिदिति। यदेकचरइत्येतद्विवृणोति। क्वचिदिति।
विद्वान् ब्रह्मवित् क्वचिद्देशे मूढैरलक्षितलक्षणोमूढोमूढव्यपदेशं लभमानोभवति क्वचिच्च वित्तादिसम्पत्सम्पन्नैर्मुमुक्षुभिर्लालितर्कि-

चिह्नस्तथोऽभूत्सं धिमवैर्धुरभ्यर्चितोमहाराजविभवोभवन् सम्राडैश्वर्यमनुभवन् भातीत्यर्थः। सच्च सौम्यः प्रियदर्शनोभ्रान्तोदिगन्तेषु दृश्यते भ्रमेः कर्तरि क्तःक्वचिच्च दृश्यदृष्टिविलापनेनाजगराचारकलितः शयाहिरिव शयानोऽहानि भूरीणि दिष्टभुगित्यर्थः। क्वचिज्जिज्ञासूनां ब्रह्मविदां वा समाजे पात्रीभूतः सत्कृतः सपर्यया। क्वचित्तु मूढैरवमतस्तिरस्कृतः क्वापि तु प्राज्ञोऽविदितोऽज्ञातोऽलक्ष्यगतिः संचरति। एवं बाह्यव्यवहृतेरन्यथाऽन्यथाभावेपि स्वयमन्तस्तु सततपरमानन्दसुखितः परमानन्देन निरतिशयानन्दरूपात्मोपलम्भेन सुखितोनिर्विक्षेपोनिःशोकोनित्यानन्दनिमग्नमानसःसंचरतीत्यर्थः॥५४२

क्वचित्। मूढः। विद्वान्। क्वचित्। अपि। महाराजविभवः। क्वचित्। भ्रान्तः। सौम्यः। क्वचित्। अजगराकारकलितः॥ क्वचित्। पात्रीभूतः। क्वचित्। अवमतः। क्व। अपि। अविदितः। चरति। एवम्। प्राज्ञः। संततपरमानन्दसुखितः॥५४२

ब्रह्मज्ञानी कहीं मूर्ख पुरुषोंकरके अज्ञात चिह्न हुवा मूर्ख व्यवहारभागी होता है, कहीं धनी पुरुषोंकरके ज्ञात चिह्न हुवा, धनादिसे पूजित हुवा राजाके ऐश्वर्यको भोगता भान होता है जिसके दर्शनसे मनमें आनन्द हो ऐसा स्वरूप प्रतीत होता है। कहीं देशोंमें विचरता दीखता है, कहीं दृष्टिके संकोचसे अजगरवत् पड़ा ही दीखता है कहीं ब्रह्मज्ञानी वा जिज्ञासुजनोंके समाजमें सत्कार पूजाको प्राप्त होता है, कहीं मूर्खोंकरके तिरस्कारको प्राप्त होता है, कहीं अज्ञात हुवा ही विचरता है इसप्रकार बाह्यव्यवहारको अनेक प्रकार होनेपर भी आप अन्तरसे निरतिशय आनन्दके लाभ निर्विक्षेप निःशोक नित्य आनन्द मग्नमन होकर विचरता है॥५४२॥

निर्धनोपि सदा तुष्टोऽप्यसहायोमहाबलः॥
नित्यतृप्तोप्यभुञ्जानोप्यसमः समदर्शनः॥५४३॥

सम्प्रति विदुषोविचित्रवैभवमाह । निर्धनइति ।

विद्वान् निर्धनोपि कुप्याकुप्यविवर्जितोपि स्वात्ममतिवित्तसम्पन्नत्वात्सदातुष्टः सन्तोषविशेषविशिष्टः असहायोपि सजातीयद्वितीयसहायवर्जितोपि महाबलोविवेकादिधैर्यादिबलसम्पन्नः 'नायमात्मा बलहीनेन लभ्योनच प्रमादादि'ति श्रुतेः किञ्चाभुञ्जानोपि बाह्यभोगालाभेपि नित्यतृप्तः स्वात्मानन्दानुभवात् असमोपि न विद्यमानः समस्तुल्योयस्य सतथा अप्रतिमोपि समदर्शनः सर्वत्र शत्रौ मित्रे च समदृष्टिरित्यर्थः ॥ ५४२ ॥

निर्धनः । अपि । सदा । तुष्टः । अपि । असहायः । महाबलः ॥ नित्यतृप्तः । अपि । अभुञ्जानः । अपि । असमः । समदर्शनः ॥ ५४३ ॥

ब्रह्मज्ञानी धनसे रहित भी आत्मधनसे सदा सन्तोषवाला होता है, सजातीय सहायक न होनेपर भी विवेक धैर्यरूप प्रबल बलयुक्त होताहै, बाह्य भोगके अलाभ होनेपर भी आत्मानन्दके अनुभवसे तृप्त रहता है उसके समान कोई नहीं है, उपमासे रहित है और शत्रु मित्रमें समदृष्टि करता है ऐसा चित्र ऐश्वर्यवान् ब्रह्मज्ञानी विलक्षण स्वभाव वाला है ॥ ५४३ ॥

अपि कुर्वन्नकुर्वाणश्चाभोक्ता फलभोग्यपि ॥
शरीर्यप्यशरीर्येषपरिच्छिन्नोपि सर्वगः ॥५४४॥

किञ्च कुर्वन्नपि प्राकृतदृष्ट्या, स्वयमकर्त्रात्मबोधादकुर्वाणः स्वार्थमप्रयतमानः, फलभोग्यपि स्वादृष्टफलसुखदुःखभोक्तापि, भोगिदृष्ट्या स्वयमभोक्ता चाभोक्तैव तद्रूपात्मानुभवात्, लोकदृष्ट्या शरीर्यपि शरीरसंबद्धोपिस्वयमेषविद्वानशरीरएव शरीरसंसर्गशून्यएवाशरीरत्वादात्मनइति भावः। मूढदृष्ट्या परिच्छिन्नोपि कुत्रचिद्वर्तमानोपि स्वदृष्ट्या सर्वात्मत्वनिश्चयात्सर्वगः सर्वव्यापकः एतयोः पदयोर्विरोधाभासोलङ्कारः “ आभासत्वे विरोधस्य विरोधाभासइष्यते ”

१ सुवर्णरजतभिन्नं धनं कुप्यं तद्द्वयं त्वकुप्यमिति विवेकः ।

इत्युक्तेः, यथा विरोधस्तथा प्रतीयतएव स्फुटं यथाच विरोधवारणं तथा तु विवृतमेव । अन्यत्राप्येवं बोद्धव्यम् ॥ ५४४ ॥

अपि । कुर्वन् । अकुर्वाणः । च । अभोक्ता । फलभोगी । अपि ॥ शरीरी । अपि । अशरीरी । एषः । परिच्छिन्नः। अपि । सर्वगः ॥ ५४४ ॥

अज्ञानी पुरुषोंकी दृष्टिसे कर्ता भी प्रतीत होता है परंच स्वदृष्टिसे अकर्ता है, अपने अदृष्टोंके फल सुख दुःखका भोक्ता भी है भोगी पुरुषोंकी दृष्टिसे परंच आप अभोक्तारूप आत्माके अभेद ज्ञान होनेसे अभोक्ता है, लोकदृष्टिसे शरीर वाला है, आप अशरीर है, मूर्खोंकी दृष्टिसे किसी एक देशमें वर्तमान परिच्छिन्न भी प्रतीत होता है परंच अपनी दृष्टिसे सर्वका स्वरूपभूत आत्माको अपना स्वरूप जाननेसे सर्वमें व्यापक है॥५४४ ॥

अशरीरं सदा सन्तमिमं ब्रह्मविदं क्वचित् ॥
प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे ॥५४५॥

शरीर्यप्येषोऽशरीरीत्युक्तं विवृणोति । अशरीरमिति ।

इमं ब्रह्मविदं ब्रह्मात्मानं विद्वांसमतएवाशरीरं शरीराभिमान-शून्यं सन्तं विद्यमानं क्वचित्कदाचित्कथंचिदपि शुभाशुभे पुण्यपापे तथैव प्रियाप्रिये सुखदुःखे न स्पृशतोन हर्षविषादावुत्पादयतः संसर्गिणी वा न भवतोऽसङ्गत्वात्तस्य, सुखदुःखयोश्चान्तःकरणधर्मत्वादिति भावः ॥ ५४५ ॥

अशरीरम् । सदा । सन्तम् । इमम् । ब्रह्मविदम् । क्वचित् ॥ प्रियाप्रिये । न । स्पृशतः । तथा । एव । च । शुभाशुभे ५४५

अशरीरका विवरण करे हैं । ब्रह्मको अपना आत्मा जानने वाले शरीरके अभिमानसे रहित होकर सर्वकाल विद्यमान इस ब्रह्मज्ञानीको कहीं भी कभीभी किसी कालमें भी पुण्य

पाप तैसें ही सुख दुःख, हर्ष विषादको नहीं उदय करते हैं। और उसको असंग होनेसे उसके सम्बन्धवाले भी नहीं होते हैं सुख दुःखको मनका धर्म होनेसे ॥५४५॥

स्थूलादिसम्बन्धवतोऽभिमानिनः,
सुखं च दुःखं च शुभाशुभे च ॥
विध्वस्तबन्धस्य सदात्मनोमुनेः,
कुतः शुभं वऽप्यशुभं फलं वा ॥ ५४६ ॥

उक्तमुपपादयति। स्थूलादीति।

स्थूलादिसंबन्धवतोऽस्यैव विवरणमभिमानिनइति अभिमानमभिभूय जडेन चेतनस्य संबन्धानिरूपणात्स्थूलाद्यभिमानवतइत्यर्थः। शुभाशुभे पुण्यपापाख्ये कर्मणी तत्फलं सुखं दुःखं च स्पृशतः विध्वस्तबन्धस्य विनष्टाभिमानस्य सदात्मनोब्रह्मात्मनोमुनेर्ब्रह्मविदः शुभं वाप्यशुभं तत्फलं सुखं दुःखं वा कुतोन कुतोपीत्यर्थः। "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इत्येषा श्रुतिरनयोःसोपपत्तिर्वर्णि[1]तेति बोध्यम् ॥

स्थूलादिसम्बन्धवतः। अभिमानिनः। सुखम्। च। दुःखम्। च। शुभाशुभे। च॥ विध्वस्तबन्धस्य। सदा। आत्मनः। मुनेः। कुतः। शुभम्। वा। अपि। अशुभम्। फलम्। वा॥ ५४६॥

पूर्वोक्तका उपपादन करे हैं। स्थूलादि इति। स्थूलादिके संग अभिमानवालेको पुण्य पापरूप कर्म और उनके फल सुख दुःखका स्पर्श होवै है और जिसका अभिमान नष्ट हुवा है अपनेको ब्रह्मरूप जिसने जानलिया है ऐसे ब्रह्मज्ञानीको पुण्य पाप और उनका फल सुख दुःख कहांसे हो किसी निमित्तसे भी नहीं बनसके है ॥ ५४६ ॥

१ अनयोः पद्ययोरुपपत्तिसहिता एषा श्रुतिर्वर्णितेत्यर्थः।

तमसा ग्रस्तवद्भानादग्रस्तोपि रविर्जनैः ॥
ग्रस्त इत्युच्यते भ्रान्त्या ह्यज्ञात्वा वस्तुलक्षणम् ॥

ननु सनयनैरस्मदादिभिः सशरीरएव विद्वान् दृश्यते तत्कथमशरीरत्वं तस्य वर्णितं प्रत्यक्षविरुद्धमतः सदृष्टान्तमाह । द्वाभ्यां तमसेति ।

यथा वस्तुलक्षणम् वस्तुनो निर्मलस्य सूर्यस्य लक्षणं स्वच्छं स्वरूपमज्ञात्वा हि जनैः प्राकृतैः पुरुषैरग्रस्तोप्यनाच्छन्नोपि रविः सूर्यो ग्रस्तवदाच्छन्नवद्भानाद्भासनात्तमसा राहुणा "तमस्तु राहुः स्वर्भानु"रित्यमरः। ग्रस्तआच्छन्नइति भ्रान्त्योच्यते कथ्यते न प्रमया ॥ ५४७

तमसा । ग्रस्तवत् । भानात् । अग्रस्तः । अपि । रविः । जनैः ॥
ग्रस्तः । इति । उच्यते । भ्रान्त्या । हि । अज्ञात्वा । वस्तुलक्षणम् ॥

जैसे निर्मल सूर्यके स्वच्छस्वरूपको न जानकर अज्ञानी जनोंकरके अनाच्छादित सूर्यको आच्छादितवत् भान होनेसे राहुकरके सूर्य आच्छादित भ्रमसे कहा जाता है ॥ ५४७ ॥

तद्वद्देहादिबन्धेभ्यो विमुक्तं ब्रह्मवित्तमम् ॥
पश्यन्ति देहवन्मूढाः शरीराभासदर्शनात् ५४८

तद्वत्तथा रविवदेव मूढा मिथ्यात्मदर्शिनोऽनात्मज्ञाः शरीरमात्रदृष्टयो देहादिबन्धेभ्यो विमुक्तं विनिर्मुक्तं ब्रह्मवित्तमं शरीराभासदर्शनात् ब्रह्मविच्छरीरस्य त्यक्ताभिमानस्याभासमात्रस्य दर्शनात्समीक्षणात्तद्विविक्तात्मस्वरूपापरिचयाद्देहवत् पश्यन्ति स्वमिव तमपि देहमात्रमीक्षन्ते नात्मानं ब्रह्मविद्विविक्तमिति न ते प्रमाणमिति भावः।

तद्वत् । देहादिबन्धेभ्यः । विमुक्तम् । ब्रह्मवित्तमम् ॥ पश्यन्ति । देहवत् । मूढाः । शरीराभासदर्शनात् ॥ ५४८ ॥

तैसे आत्मज्ञानसे शून्य पुरुष सूर्यवत् देहादि बन्धनसे रहित ब्रह्मज्ञानियोंमें श्रेष्ठ जिसने देहाभिमानका त्याग कर दिया है तिसके विवेकसे पृथक् जानेहुवे आत्माको न जाननेसे और

देहकी आभास प्रतीति होनेसे अपने समान देहमात्र देखते हैं सो द्रष्टा पुरुष भ्रान्त होनेसे प्रमाण नहीं है ॥ ५४८ ॥

अहिर्निर्ल्वयनीं वायं मुक्त्वा देहं तु तिष्ठति ॥
इतस्ततश्चाल्यमानोयत्किञ्चित्प्राणवायुना ५४९

ननु देहे ब्रह्मविदोभिमानाभावे देहधृतिःकथमतआह।अहिरिति। अयं ब्रह्मवित् निर्ल्वयनीं कञ्चुकमहिरिव वशब्दइवार्थे "वं प्रचेतसि जानीयादिवार्थे च तदव्ययम्"इति कोशात्।देहं मुक्त्वा नाहं न मे देहइति निश्चयेन हित्वा प्राणवायुनेतःपूर्वस्मात्ततोऽपरस्माद्यत्किंचिच्चाल्यमानस्तिष्ठति न तत्र दृष्टिमपि ददातीत्यर्थः । तथा च प्रारब्धानुरोधेन प्राणाधीनदेहस्थितेः सम्भवइति भावः'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदमशरीरं शेते'। इति श्रुत्यर्थोत्र वर्णितइति बोध्यम् ॥ ५४९ ॥

अहिः । निर्ल्वयनीम् । वं । अयम् । मुक्त्वा । देहम् । तु । तिष्ठति॥ इतः । ततः । चाल्यमानः । यत्किञ्चित् । प्राणवायुना॥

देहमें ब्रह्मज्ञानीको अभिमान नहीं होता तो शरीरका धारण कैसे होवेगा इस शङ्काका उत्तर कहे हैं।अहिःइति। जैसे सर्प अपनी उपरवचारूप कुंजको त्यागता है तैसेही ब्रह्मज्ञानी पुरुष देह मैं नहीं,देह मेरा नहीं ऐसा निश्चयकरके देहाभिमान को त्यागकर प्राणवायुसे पूर्वसे पश्चिम, पश्चिमसे पूर्वमें यत् किंचित् चेष्टा करता हुवा प्रतीत होता है उसमें दृष्टि भी नहीं देता,प्रारब्धके अधीन ब्रह्मज्ञानीके देहकी स्थिति होवै है॥

स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम् ॥
दैवेन नीयते देहोयथा कालोपभुक्तिषु ॥५५०॥

प्राणानां तत्र चलनमपि दैवाधीनमित्याह। स्रोतसेति। यथा स्रोतसा सरित्प्रवाहेण दारु काष्ठं निम्नोन्नतस्थलमुच्चनीचस्थानं नीयते प्राप्यते तथैव विद्वद्देहोपि यथा कालोपभुक्तिषु प्राप्त-

कालभुजिक्रियादिषु दैवेन प्रारब्धकर्मणा नीयते न तत्राभिमानलेशस्याप्यपेक्षेति भावः ॥ ५० ॥

स्रोतसा । नीयते । दारु । यथा । निम्नोन्नतस्थलम् ॥ दैवेन । नीयते । देहः । यथाकालोपभुक्तिषु ॥ ५५० ॥

ब्रह्मज्ञानीके देहमें प्राणोंकी चेष्टाभी दैवाधीन है ऐसा कहे हैं। स्रोतसा इति। जैसे नदीके प्रवाहकरके काष्ठ ऊँचे नीचे स्थानमें प्राप्त किया जाता है तैसेही विद्वान्‌का देहभी प्राप्त हुई भोजनादि क्रियामें प्रारब्धकर्म करके प्राप्त किया जाता है उसमें अभिमानकी लेशमात्रभी अपेक्षा नहीं है ॥ ५५० ॥

प्रारब्धकर्मपरिकल्पितवासनाभिः,
संसारिवच्चरति भुक्तिषु मुक्तदेहः ॥
सिद्धः स्वयं वसति साक्षिवदत्र तूष्णीं,
चक्रस्य मूलमिव कल्पविकल्पशून्यः ॥ ५५१ ॥

ननु त्यक्तदेहस्य कथं कर्मेति चेत्तत्राह । प्रारब्धकर्मेति ।

मुक्तदेहस्त्यक्तदेहाभिमानोब्रह्मवित् प्रारब्धकर्मपरिकल्पितवासनाभिः स्वदृष्ट्या प्रारब्धाभावेप्यज्ञदृष्ट्या प्रारब्धकर्मभिः परिकल्पिता या वासना भोगसंस्कारास्ताभिर्भुक्तिषु भोगेषु प्राशनपानादिषु संसारिवच्चरति मूढवदभिमानाभावेन तद्वदनुकरोतीत्यर्थः। किञ्चात्र देहे कल्पविकल्पशून्यः संकल्पविकल्पविवर्जितः सिद्धोनिश्चितात्मतत्त्वः चक्रस्य कलशकारणकाष्ठविशेषस्य मूलमिव साक्षिवच्च निरपेक्षोनिष्क्रियश्च स्वयं तूष्णीं मनसापि दृश्यसंकल्पमकुर्वन् वसति लोकदृष्ट्या तु सापेक्षःसक्रियश्च भातीति भावः ॥ ५५१ ॥

प्रारब्धकर्मपरिकल्पितवासनाभिः । संसारिवत् । चरति । भुक्तिषु । मुक्तदेहः ॥ सिद्धः । स्वयम् । वसति । साक्षिवत् । अत्र । तूष्णीम् । चक्रस्य । मूलम् । इव । कल्पविकल्पशून्यः ॥ ५५१ ॥

विद्वान्‌का देहाभिमान त्याग होनेसे कर्म कैसे रहेगा

इस शङ्काका समाधान करे हैं । प्रारब्धकर्म इति । देहाभिमान का जिसने त्याग करदिया है ऐसा ब्रह्मज्ञानी पुरुष अपनी दृष्टि से कर्म न होनेपर भी अज्ञानीजनकी दृष्टिसे, प्रारब्धकर्मसे कल्पना किये भोगसंस्कारोंसे, खानपानादि भोगोंमें अभिमान के अभाव होनेसे अज्ञानिवत् अनुकरण करता है किंच इस देहमें संकल्पविकल्परहित होकर आत्मतत्त्वका जिसने निश्चय किया है सो घंट रचनाके कारण चक्रके मूल वत् और साक्षी पुरुषवत् निरपेक्ष और निष्क्रिय हुवा आप मनकरके भी दृश्य के संकल्पको न करता हुवा निवासै करे है, लोकदृष्टिसे सापेक्ष और सक्रिय प्रतीत होवै है ॥ ५५१ ॥

नैवेन्द्रियाणि विषयेषु नियुङ्क्तएष-
नैवापयुङ्क्तउपदर्शनलक्षणस्थः ॥
नैव क्रियाफलमपीषदवेक्षतेस-
सानन्दसान्द्ररसपानसुमत्तचित्तः॥ ५५२ ॥

साक्षिवदित्युक्तं विवृणोति । नैवेति ।

एषब्रह्मवित् विषयेषु भोग्येषु । इन्द्रियाणि बाह्याभ्यन्तराणि न प्रवर्तयति तेभ्यश्च तानि नापयुङ्क्ते न निवर्तयति । किन्तूपदर्शनलक्षणस्थउपदर्शनं साक्षित्वं लक्ष्यते ज्ञायते येन निर्विकारत्वेन तदुपदर्शनलक्षणं निर्विकारत्वं तेन तिष्ठतीति तथा । इन्द्रियाणां प्रवृत्तौ वा निवृत्तौ वा निर्विकारत्वेनैव तिष्ठतीति यावत् । यद्वोपदर्शनमुपलक्षणं गृहादेः काकादिस्तस्य लक्षणं तटस्थत्वं धर्मस्तेन तिष्ठतीति तथा अर्द्धेन साक्षित्वं विवृत्यार्द्धेन सिंहावलोकितन्यायेनोन्मत्तवच्चापीत्युक्तं विवृणोति नैवेति । सब्रह्मवित् । क्रियाफलं चक्षुरादीनां करणानां क्रियायाः प्रवृत्तेर्निवृत्तेर्वा फलं सुखं दुःखं वा ईषदपि नैवेक्षते न समीक्षते । अहं फलभागी वान्योवेति।सानन्दसान्द्ररसपानसुमत्तचित्तः । आनन्दैः क्षुद्रैः सुखैः सहितः सानन्दः। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।' इतिश्रुतेः ।

अन्तर्भूतविषयानन्दवृन्दइत्यर्थः । सानन्दएवसान्द्ररसः सघनानन्दो-ब्रह्मानन्दस्तस्य पानेन सुमत्तःउन्मत्तवत्स्वभानरहितं चित्तं यस्य सतथा ॥ ५५२ ॥

न । एव । इन्द्रियाणि । विषयेषु । नियुङ्क्ते । एषः । न । एव । अपयुङ्क्ते । उपदर्शनलक्षणस्थः ॥ न । एव । क्रियाफलम् । अपि । ईषत् । अवेक्षते । सः । सानन्दसान्द्ररसपान-सुमत्तचित्तः ॥ ५५२ ॥

साक्षी दृष्टान्तका वर्णन करे हैं । न इति । भोग्य पदार्थों में बाह्य आन्तर इन्द्रियोंको नहीं प्रवृत्त करता और न उनसे निवृत्त करता है किन्तु साँक्षित्वसूचक निर्विकारस्वरूप करके स्थित होता है अर्थात् इन्द्रियोंकी प्रवृत्ति निवृत्तिमें निर्वि-कार होकर रहता है और ब्रह्मज्ञानी पुरुष नेत्रादि इन्द्रियोंकी प्रवृत्ति निवृत्तिके सुख दुःखरूप फलको लेशमात्रभी नहीं देखता है, जिसमें ब्रह्मा इन्द्रादिके आनन्दोंका अन्तर्भाव है ऐसा जो सघन ब्रह्मानन्द है उसके अनुभवरूप पानकरके अपने भानसे रहित जिसका चित्त है ऐसा मस्त होता है ॥

लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत्केवलात्मना ॥
शिवएव स्वयं साक्षादयं ब्रह्मविदुत्तमः ॥ ५५३ ॥

ब्रह्मविदुत्तमोत्तमइत्युक्तं विवृणोति त्रिभिः लक्ष्यालक्ष्यगतिमिति। इदं लक्ष्यं समाधिना धारणादिना वा लक्षयितुं मयायोग्यमिदं चालक्ष्यं लक्ष्यधारणादावन्तरायभूतं विजातीयानात्मजातं लक्षयि-तुमयोग्यमिति गतिं चिन्तामित्यर्थः । यद्वेदं लक्ष्यं शुद्धं ब्रह्मेदं चाल-क्ष्यं वाच्यं विशिष्टमिति रूपां गतिं चित्तवृत्तिमित्यर्थः । त्यक्त्वा हित्वा केवलात्मना अद्वैतात्मस्वरूपेण यस्तिष्ठति निःसंकल्पो भवति अयं साक्षाच्छिवएवाद्वैतब्रह्मात्मा सदा शिवएव सएव ब्रह्म-विदुत्तमइत्यभिधीयतइत्यर्थः ॥ ५५३ ॥

लक्ष्यालक्ष्यगतिम् । त्यक्त्वा । यः । तिष्ठेत् । केवलात्मना । शिवः । एव । स्वयम् । साक्षात् । अयम् । ब्रह्मविदुत्तमः ५५३

ब्रह्मज्ञानियोंमें उत्तमोंसे भी उत्तमका विवरण करे हैं तीन-श्लोकों करके। लक्ष्यालक्ष्यगतिम् इति। यह धारणा ध्यान समाधि लक्ष्य है और यह अनात्म पदार्थ आत्माकी धारणादि में विघ्नरूप अलक्ष्य हैं इस चिन्ताको अथवा यह शुद्ध ब्रह्म लक्ष्य है और यह सगुण ब्रह्म अलक्ष्य वाच्य है ऐसी चित्तकी वृत्तिको त्यागके अद्वैत आत्माके स्वरूपसे जो संकल्पवार्जित होकर स्थित होता है सो यह साक्षात् अद्वैत ब्रह्मस्वरूप सदा शिव ही ब्रह्मज्ञानियोंमें उत्तमोंसे भी उत्तम है ऐसा ऋषि मुनि कथन करे हैं ॥ ५५३ ॥

जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः ॥
उपाधिनाशाद्ब्रह्मैव सन् ब्रह्माप्येति निर्द्वयम् ॥

जीवन्नेव लोकदृष्ट्या सासुरेव सदामुक्तो बन्धात्यन्ताभाववान् कृतार्थः सम्पादितपुरुषार्थः। उपाधिनाशाल्लोकदृष्ट्या दृश्यमानपञ्च-कोशाद्युपाधिप्रहाणात् पुरस्तादपि ब्रह्मैव सन्निर्द्वयमद्वैतं ब्रह्माप्येति ब्रह्माभेदभाग्भवति यः सब्रह्मवित्तमः 'विमुक्तश्च विमुच्यते' ब्रह्मैव सन्ब्रह्माप्येति' इति श्रुत्योरर्थोऽत्र वर्णितः ॥ ५५४ ॥

जीवन्। एव। सदा। मुक्तः। कृतार्थः। ब्रह्मवित्तमः॥ उपा-धिनाशात्। ब्रह्म। एव। सन्। ब्रह्म। अपि। एति। निर्द्वयम्॥

लोकदृष्टिसे प्राणों वाला है, और वास्तवसे सर्वकाल बन्धनके अत्यन्ताभाव वाला है, पुरुषार्थका जिसने सम्पादन कर लिया है, लोकदृष्टिसे पंचकोशादिरूप उपाधिके त्यागसे ब्रह्म हुवा है, वास्तवदृष्टिसे ब्रह्म ही था और पश्चात् भी अद्वैत ब्रह्म के अभेदका भागी होवे है ऐसा जो है सो ब्रह्मज्ञानियोंमें श्रेष्ठ है ब्रह्म हुवा ही ब्रह्मको प्राप्त होवै है, मुक्तही मुक्त होता है ऐसा वेदभी कहता है ॥ ५५४ ॥

शैलूषोवेषसद्भावाभावयोश्च यथा पुमान् ॥
तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः ॥ ५५५ ॥

यथा वेषसद्भावाभावयोश्च वेषाणां नारीपशुप्रभृतिपरकीयानुकृतीनां सद्भावाभावयोर्ग्रहणत्यागयोः सतोः शैलूषोनटः पुमानेव न वैलक्षण्यमालम्बते तथैव देवतिर्यगादिवेषसद्भावाभावयोर्ब्रह्मैव सदा नापरोजीवोभवति कदापि तद्भावमापन्नोयः सोपि सएवैषब्रह्मविच्छ्रेष्ठः ब्रह्मविदुत्तमोत्तमइत्यर्थः ॥ ५५५ ॥

शैलूषः । वेषसद्भावाभावयोः । च । यथा । पुमान् ॥ तथा । एव । ब्रह्मवित्श्रेष्ठः । सदा । ब्रह्म । एव । न । अपरः ॥ ५५५ ॥

जैसे परके अनुकरण करते समय और अनुकरण न करते समयमें नट पुरुषमात्र ही है, वेषके ग्रहण त्यागसे अन्यथा नहीं होता तैसेंही देव पशु मनुष्य आदि वेषके ग्रहण त्यागसे ब्रह्मज्ञानियोंमें श्रेष्ठ ब्रह्म ही है, जीव नहीं है उस ब्रह्मके स्वरूप को प्राप्त जो विद्वान् है सो भी ब्रह्म ही है, ब्रह्मज्ञानियोंमें श्रेष्ठहै ॥

यत्र क्वापि विशीर्णं सत्पर्णमिव तरोर्वपुः पततात् ॥
ब्रह्मीभूतस्य यतेः प्रागेव तच्चिदग्निनादग्धम् ५५६

आत्मज्ञाने देशकालाद्यनपेक्षत्वमुपपादितं सम्प्रति तदेव स्मरन् देशकालाद्यनपेक्षामन्यत्राप्युपदर्शयति । यत्र क्वापीति द्वाभ्याम् ।

ब्रह्मीभूतस्य ब्रह्मात्मतामुपगतस्य यतेर्वपुः शरीरं तरोर्विशीर्णम् सत्पर्णमिव यत्रक्वापि यदा कदा वापि यथा कथंचिदपि पततात् सन देशादिकमपेक्षते देहत्यागे, पर्णत्यागे तरुरिवेति भावः । ननु शवसंस्कारास्त्ववश्यं चिन्तनीयानेत्याह प्रागेवेति । तद्वपुः प्रागेव पतनात्पुरस्तादेव चिदग्निना ज्ञानाग्निनादग्धं कृतसंस्कारमित्यर्थः ॥

यत्र । क्व । अपि । विशीर्णम् । सत् । पर्णम् । इव । तरोः । वपुः । पततात् ॥ ब्रह्मीभूतस्य । यतेः । प्राग् । एव । तत् । चिदग्निना । दग्धम् ॥ ५५६ ॥

ब्रह्मज्ञानीको देहत्यागमें भी अनपेक्षा दिखावें हैं दो श्लोकों से । यत्रइति । ब्रह्मको आत्माका रूप जाननेवाले ज्ञानीका वृक्षसे गिरे हुवे पत्र वत् जिस किसी देशमें जिस किसीकाल में जिस किसी प्रकारसे शरीर पडजावे, पत्रके त्यागमें वृक्ष-वत् शरीरके त्यागमें विद्वान् देशादिकी अपेक्षा नहीं करता है और विद्वान्का शरीर पडनेसे प्रथम ही ज्ञानाग्निसे दग्ध होगया है इसकारण मृतकसंस्कारके चिन्तनकी भी अपेक्षा नहीं है ॥ ५५६ ॥

सदात्मनि ब्रह्मणि तिष्ठतोमुनेः,
पूर्णाऽद्वयानन्दमयात्मना सदा ॥
न देशकालाद्युचितप्रतीक्षा-
त्वङ्मांसविट्पिण्डविसर्जनाय ॥ ५५७ ॥

सदात्मनि सद्रूपे ब्रह्मणि पूर्णाद्वयानन्दमयात्मनाऽपरिच्छिन्नाद्वैतसुखरूपेण सदा तिष्ठतोनिष्ठां लब्धवतोमुनेस्त्वङ्मांसविट्पिण्डविसर्जनायापवित्रदेहत्यागाय देशकालाद्युचितप्रतीक्षा उचिताचासौ प्रतीक्षोचितप्रतीक्षा देशकालादीनां प्रतीक्षा नोचितेत्यर्थः। यथाहि वर्चस्कादिमलविसर्जनाय केनापि नोत्तमक्षेत्रादिकमपेक्ष्यते तथा विदुषा तद्रूपतया निर्णीतदेहस्य त्यागायापीति भावः ॥५५७॥

सदात्मनि । ब्रह्मणि । तिष्ठतः । मुनेः । पूर्णाद्वयानन्दमयात्मना । सदा ॥ न । देशकालाद्युचितप्रतीक्षा । त्वङ्मांसविट्पिण्डविसर्जनाय ॥ ५५७ ॥

सत् रूप ब्रह्ममें अपरिच्छिन्न अद्वैत सुखरूपकरके सर्व कालमें निष्ठाको प्राप्तहुवे ज्ञानीको त्वचा मांस विष्ठा आदिका समुदायरूप देहके त्यागके लिये देशकालादिकी प्रतीक्षा (अपेक्षा) उचित नहीं है । जैसे मलके त्यागमें कुछ उत्तम

देशादिकी अपेक्षा नहीं होती तैसे ही विद्वान् के मलरूप जाने हुवे देहके त्यागमें भी उत्तम देशादिकी अपेक्षा नहीं है॥५५७॥

देहस्य मोक्षोनो मोक्षोन दण्डस्य कमण्डलोः॥
अविद्याहृदयग्रन्थिमोक्षोमोक्षोयतस्ततः ॥५५८॥

ननु वाराणसीमरणादीनां मोक्षहेतुत्वं 'काशीमरणान्मुक्ति'रित्यादिश्रुतिभ्यः श्रूयते तथोदीच्यां त्यक्तदण्डकमण्डलुर्मोक्षाय निवसेदिति कथयन्ति केचिदुदीचीनिवासिनस्तथाच कथं देशानपेक्षेत्यत आह। देहस्येति।

देहस्य मोक्षउत्तमक्षेत्रे विसर्गस्तथा दण्डस्य कमण्डलोश्च मोक्षो न कैवल्यलक्षणाऽपुनरावृत्तिमोक्षसाधनं देहदण्डादिमोक्षस्याज्ञसाधारणस्य तथात्वापत्तौ'ज्ञानादेव तु कैवल्यं'तमेव विदित्वाऽतिमृत्युमेति'इत्यादिश्रुतिशतवैयर्थ्यापत्तेर्ज्ञानोदयार्थं शमादिसाधनसन्ततिविधानस्य च वैयर्थ्यापत्तेः किन्तु अविद्याहृदयग्रन्थिमोक्षोऽविद्यासम्पादितचिदचित्तादात्म्यलक्षणग्रन्थिनिवृत्तिरेव मोक्षोयतस्ततोन देशकालाद्युचितप्रतीक्षेति सम्बन्धः सच ज्ञानमात्रसाध्यो'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः'।तरति शोकमात्मवित्'इत्यादिश्रुतिभ्यः काशीमरणादेरपि विश्वनाथगुरूपदिष्टब्रह्मविद्योपदेशजन्यज्ञानद्वारैव मोक्षसाधनत्वं न साक्षादुक्तयुक्तेरिति भावः॥ ५५८ ॥

देहस्य। मोक्षः। नो। मोक्षः। न। दण्डस्य। कमण्डलोः॥
अविद्याहृदयग्रन्थिमोक्षः। मोक्षः। यतः। ततः॥ ५५८ ॥

काशीमरणादिसे मुक्तिहोनी श्रुतिमें कही है और उत्तरदिशामें दण्ड कमण्डलुके त्यागसे मोक्ष होता है ऐसे उत्तरदिशावासी पण्डित कहे हैं इसकारण मोक्षमें देशादिकी अपेक्षा अवश्य होनी चाहिये इस शङ्काका समाधान करे हैं। देहस्य इति। हे शिष्य ! शरीरका काशी आदि उत्तम स्थानमें त्याग अथवा उत्तराखण्डमें दण्ड कमण्डलुका त्याग कैवल्यमुक्तिका साधन नहीं है किन्तु अज्ञानकरके सम्पादित जड चेतनकी

तादात्म्यरूप ग्रन्थिकी निवृत्ति ही जिस हेतुसे वास्तव मोक्ष है, तिस कारणसे देशकालादिकी अपेक्षा उचित नहीं है। मोक्ष तौ केवल ज्ञानमात्रसे प्राप्त होवै है। और काशीमरणसे मुक्तिको कहनेवाली श्रुतिका भी गुरुउपदेशद्वारा उत्पन्न हुवे ज्ञानसे ही मुक्ति कहनेमें तात्पर्य है ॥ ५५८ ॥

कुल्यायामथ नद्यां वा शिवक्षेत्रेऽपि चत्वरे ॥
पर्णं पतति चेत्तेन तरोः किं नु शुभाशुभम् ॥५५९॥

तरोरित्युक्तं विवृणोति। कुल्यायामिति।

पर्णं स्वस्माद्विशीर्णं पलाशं कुल्यायामथवा नद्यां स्वर्गगङ्गागोदावर्यादिकायां सरिति शिवक्षेत्रे वाराणस्यां चत्वरे चतुर्मार्ग्यां चेद्यदि पतति तेन शुभाशुभस्थानेषु स्वपलाशपतनेन तरोः शुभाशुभं किन्तु न किमपि भवतीति दृष्टान्तविवृतिः। अत्र तरोरपि देहित्वमभ्युपेत्य शुभाशुभप्राप्तिप्रतिषेधोयुक्तउक्तोऽन्यथा " नान्तरिक्षेऽग्निश्चेतव्य " इत्यादिवदप्रसक्तप्रतिषेधापत्तिस्तथाचोक्तं " नर्मदातीरसंजाताः सरलार्जुनपादपाः। नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिम्।" गुरुं हुं कृत्य तुं कृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः" इति " योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथा श्रुतम् " इति श्रुतेश्चेति बोध्यम् ॥ ५५९ ॥

कुल्यायाम्। अथ। नद्याम्। वा। शिवक्षेत्रे। अपि। चत्वरे॥ पर्णम्। पतति। चेत्। तेन। तरोः। किम्। नु। शुभाशुभम् ५५९

वृक्षपत्रके दृष्टान्तको विवरण करे हैं। कुल्यायाम् इति। वृक्षसे गिराहुवा पत्र कूहलमें वा भागीरथी गोदावरी आदि नदीमें काशीमें वा चौरस्तेमें इत्यादि अनेक शुभ अशुभ स्थानोंमें पत्र गिरे तौ क्या वृक्षको शुभ वा अशुभका लेप होताहै, अर्थात् वृक्षको शुभ अशुभका लेप नहीं होता है। यहां दृष्टान्तमात्रका वर्णन है ॥ ५५९ ॥

पत्रस्य पुष्पस्य फलस्य नाशव-
द्देहेन्द्रियप्राणधियां विनाशः ॥
नैवात्मनः स्वस्य सदात्मकस्या-
नन्दाकृतेर्वृक्षवदस्ति चैषः ॥ ५६० ॥

दृष्टान्तसिद्धमर्थन्दार्ष्टान्तिके ग्राहयति। पत्रस्येति।

पत्रस्य पुष्पस्य फलस्य च नाशवत् पतनवत् देहेन्द्रियप्राणधियां विनाशएषामुपाधीनामेव पतनं स्वस्य स्वरूपभूतस्य सदात्मकस्य ब्रह्मात्मकस्यानन्दाकृतेरानन्दरूपस्यात्मनोवृक्षवदेव नाशोनैवास्ति च। यथाहि पर्णादिपातेपि वृक्षोऽविनाशी तथा देहादिनाशेप्यात्माऽविनाशीति तरुदृष्टान्ततोलभ्यतइति भावः ॥ ५६० ॥

पत्रस्य। पुष्पस्य। फलस्य। नाशवत्। देहेन्द्रियप्राणधियाम्। विनाशः॥ न। एव। आत्मनः। स्वस्य। सदात्मकस्य। आनन्दाकृतेः। वृक्षवत्। अस्ति। च। एषः ॥ ५६० ॥

दृष्टान्तसिद्ध पदार्थको प्रकृतमें ग्रहण करावे हैं। पत्रस्य इति। पत्र पुष्प वा फलके नाशके समान देह इन्द्रिय प्राण मन बुद्धिका नाश होवै है और अपना स्वरूप जो सत्स्वरूप ब्रह्म आनन्दस्वरूप आत्मा है तिसका वृक्षवत् नाश नहीं है जैसे वृक्षके पत्रपतन होनेपर भी वृक्षका पतन होवै नहीं तैसेही देहादि उपाधिओंके नाश होनेपर भी आत्माका नाश नहीं होवै है ॥ ५६० ॥

प्रज्ञानघनइत्यात्मलक्षणं सत्यसूचकम् ॥
अनूद्यौपाधिकस्यैव कथयन्ति विनाशनम् ॥ ५६१ ॥

ननु तरुदृष्टान्तसिद्धमप्यात्माविनाशित्वं "विनाशमेवापीतोभवती"ति श्रुतिविरुद्धमतआह। प्रज्ञानघनइति।

सत्यसूचकमविनाश्यर्थसाधकं प्रज्ञानघनइत्याकारमात्मलक्षणा-

मात्मस्वरूपमनूद्यौपाधिकस्यैव रूपस्य विनाशनं "विनाशमेवापीत्तो-भवती"ति वचसा कथयन्ति वाजसनेयिनोनतु निरुपाधिकस्य तस्य यतः "प्रज्ञानघनएवैतेभ्योभूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ती"ति श्रुतिराहेति भावः॥ ९६१॥

प्रज्ञानघनः। इति। आत्मलक्षणम्। सत्यसूचकम्॥ अनूद्य। औपाधिकस्य। एव। कथयन्ति। विनाशनम्॥ ५६१॥

यद्यपि वृक्षदृष्टान्तसे आत्माको अविनाशित्व सिद्ध है तथापि आत्मा विनाशको प्राप्त होवै है ऐसा श्रुतिवाक्य होनेसे आत्मा का विनाश होना चाहिये, इस शङ्काका समाधान करे हैं। प्रज्ञानघन इति। आत्माको अविनाशिताका सूचक प्रज्ञान घन इस प्रकारका आत्माके स्वरूपका अनुवादकरके उपाधि-विशिष्ट आत्माका विनाश कहा है, श्रुतिमें उपाधिरहित स्वरूप का विनाश नहीं होवै है निरुपाधि शुद्ध आत्माका विनाश किसी श्रुतिमें भी नहीं है॥ ५६१॥

अविनाशी वाअरेयमात्मेति श्रुतिरात्मनः॥
ब्रवीत्यविनाशित्वं विनश्यत्सु विकारिषु॥५६२॥

वाक्यशेषाच्चैषोर्थोऽवसीयते इत्याह। अविनाशीति।

"अत्रैव माभगवान्मोहान्तमापीपदन्नप्रेत्य संज्ञास्तीति"मैत्रेय्याः प्रश्नमाकर्ण्य'न वाअरेऽहं मोहं ब्रवीमि अविनाशी वाअरेयमात्माऽनुच्छित्तिधर्मे'ति स्वरूपा श्रुतिर्विकारिषु देहादिषु विनश्यत्सु विनाशमुपगच्छत्सु मध्ये आत्मनोऽविनाशित्वं ब्रवीति तस्माद्विनाशश्रुति-रुपाधिविनाशाभिप्रायेति तरुदृष्टान्तोन श्रुतिविरुद्धइति भावः ५६२

अविनाशी। वै। अरे। अयम्। आत्मा। इति। श्रुतिः। आत्मनः॥ब्रवीति। अविनाशित्वम्। विनश्यत्सु। विकारिषु ५६२

बल्कि विनाश कहने वाली श्रुतिके अन्तवाक्यमें हे मैत्रेयी! यह आत्मा अविनाशी है ऐसा कहा है सो श्रुति देहादि विकारि-

पदार्थोंके विनाशको प्राप्त होनेपर भी आत्माको अविनाशी कहती है तिसकारण विनाश श्रुति उपाधिके नाशके अभिप्रायसे प्रवृत्त हुई है इस कारण वृक्षपत्रदृष्टान्त श्रुतिके संग विरुद्ध नहीं है ॥

पाषाणवृक्षतृणधान्यकडङ्कराद्या-
दग्धाभवन्ति हि मृदेव यथा तथैव ॥
देहेन्द्रियासुमनआदि समस्तदृश्यं,
ज्ञानाग्निदग्धमुपयाति परात्मभावम् ॥५६३॥

विनश्यत्सु विकारिषु इत्युक्तं सदृष्टान्तं प्रपंचयति । पाषाणेत्यादिद्वाभ्याम् ।

यथा पाषाणवृक्षतृणधान्यकडङ्कराद्याः प्रस्तरतरुतृणधान्यबुसप्रभृतयोदग्धाभस्मान्तमिताम्दृदेव हि भवन्ति न मृदोऽतिरिच्यमानादृश्यन्ते तथैव देहेन्द्रियासुमनआदिसमस्तदृश्यं ज्ञानाग्निना दग्धं सत्परमात्मभावमुपयाति न ततोऽतिरिच्यते इत्यर्थः ॥ ५६३ ॥

पाषाणवृक्षतृणधान्यकडङ्कराद्याः । दग्धाः । भवन्ति । हि । मृत् । एव । यथा । तथा । एव ॥ देहेन्द्रियासुमनआदि । समस्तदृश्यम् । ज्ञानाग्निदग्धम् । उपयाति । परात्मभावम् ॥ ५६३ ॥

जैसे पत्थर वृक्ष घास धान कडंकर आदि भस्महुवे मृत्तिकारूप होजाते हैं, मृत्तिकासे अतिरिक्त नहीं दीखते हैं तैसे ही देह इन्द्रिय प्राण मन आदि सर्व जगत् ज्ञानरूप अग्निकरके दग्धहुवा परमात्मरूपताको प्राप्त होवै है उससे अतिरिक्त नहीं होवै है ॥ ५६३ ॥

विलक्षणं यथा ध्वान्तं लीयते भानुतेजसि ॥
तथैव सकलं दृश्यं ब्रह्मणि प्रविलीयते ॥५६४॥

ननु जडं ब्रह्मविलक्षणं विकारिदृश्यं कथं चेतने निर्विकारे लीनं मन्तव्यं नहि कटकादयोमृदि लीयन्ते घटादयोवा हेम्नीत्यतआह । विलक्षणमिति ।

यथा ध्वान्तं तमोविलक्षणं भानोर्विजातीयं तथापि भानुतेजसि उदिते लीयते तत्रैव विलीयते न ततोऽतिरिच्यमानं दृश्यते तथैव सकलं दृश्यं जडमपि सविकारं ब्रह्मणि प्रविलीयते विलयोनात्रोपादानेसति कार्यविनाशोयेन कटकादिदृष्टान्तोऽत्र प्राप्नुयात् किन्तु सोपादानकार्यविनाशःसच बाधएव तेन नोक्तदृष्टान्तविरोधइतिभावः। यथा च सूक्ष्मदृशा निर्वचने तेजसोऽभानमेव ध्वान्तं सिद्ध्यति तथा ब्रह्मणोऽभानमेव दृश्यमित्यनेन बोध्यते इतिबोध्यम् ॥ ५६४ ॥

विलक्षणम् । यथा । ध्वान्तम् । लीयते । भानुतेजसि ॥ तथा। एव । सकलम् । दृश्यम् । ब्रह्मणि । प्रविलीयते॥५६५॥

जडप्रपञ्च चेतनसे विलक्षण होनेसे कैसे चेतनमें विलीन होवै है इस शङ्काका समाधान करें हैं। विलक्षणम् इति। जैसे अन्धकार सूर्यसे विजातीय है तथापि सूर्यरूप तेजके उदय होनेपर तिसमें ही लीन होवै है तैसे जडप्रपंच सर्वही कल्पित है, अधिष्ठान सत्य ब्रह्ममें लीन होवै है। इहां उपादानसहित कार्यप्रपंचका विनाशरूप बाध ग्रहण होवै है ॥५६४॥

घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम् ॥
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम् ॥ ५६५ ॥

ननु भवतु ब्रह्मविद्याविषयकोपाधिलयोब्रह्मणि ब्रह्मवित्तु नित्यत्वान्न कुत्रापि लीयते नच तस्यापि ब्रह्मणि लयोवक्तव्योमोक्षाभावप्रसङ्गात्स्वरूपनाशे कोमुच्येतेत्यतआह । घटे नष्टइति ।

घटे नष्टे ध्वस्ते सति यथा तदन्तर्वर्तमानं व्योमघटाकाशं व्योमैव महानभएवस्फुटं निःसंशयं भवति विद्यतएव न नश्यति निरवयवत्वान्नित्यत्वाच्च तथैवोपाधिविलये विनाशे ब्रह्मवित्स्वयं ब्रह्मैव न ततोऽतिरिच्यते विनश्यति वा ब्रह्मरूपत्वादेव ब्रह्मवत्सएव च मोक्षइति न मोक्षाभावप्रसङ्गइति भावः ॥ ५६५ ॥

घटे । नष्टे । यथा । व्योम । व्योम । एव । भवति ॥

स्फुटम् ॥ तथा । एव । उपाधिविलये । ब्रह्म । एव । ब्रह्मवित् । स्वयम् ॥ ५६५ ॥

उपाधिके लय होनेपर भी ब्रह्मवेत्ताको तो नित्य होनेसे विलय न होगा। इस शङ्काका समाधान करे हैं। घटे इति । जैसे घटके नाश होनेपर उसके अन्तरका आकाश महाकाशरूप ही होजाता है इसमें कुछ संशय नहीं है तैसे ही उपाधिके लय होनेपर ब्रह्मज्ञानी पुरुष ब्रह्म ही होजाता है, ब्रह्मसे भिन्न नहीं रहता, उपाधि जो भेदका हेतु थी उसका लय होनेसे॥ ५६५ ॥

क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले ॥
संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः॥५६६॥

उपाध्यपोहेंऽशांशिनोरेकत्वं सदृष्टान्तमाह । क्षीरमिति । यथा क्षीरादुद्धृतं क्षीरं पुनश्च तस्मिन्नेव क्षिप्तं तथा तैलादुद्धृत्य तैलं तैले प्रक्षिप्तमेवं जले जलं तत्रत्यं स्वांशिनो वियुज्याल्पत्वमालम्ब्य पुनस्तत्र प्रक्षिप्तं संयुक्तं वियोगनिवृत्त्योपलक्षितमेकतां स्वांशिना सहाभेदं याति प्राप्नोति तथात्मविन्मुनिरात्मनि ब्रह्मणि वियोगहेतोरुपाधेः प्रहाणेनैकतां याति न भेदी भवतीत्यर्थः । 'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तंगच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' इति श्रुत्यर्थोऽत्र प्रपञ्चितः॥

क्षीरम् । क्षीरे । यथा । क्षिप्तम् । तैलम् । तैले । जलम् । जले ॥ संयुक्तम् । एकताम् । याति । तथा । आत्मनि । आत्मवित् । मुनिः ॥

उपाधिके अभावसे अंश अंशीकी एकता होनेमें दृष्टान्त कहे हैं । क्षीरम् इति । जैसे दूधसे पृथक्करके दूध उसीमें प्रक्षिप्त करें और तैलमें तैल प्रक्षिप्त होवै है तैसे जलमें जल प्रक्षिप्त होवै है सो मिलाहुवा अंशीके संग एकताको प्राप्त होवै है तैसे ही आत्मज्ञानी पुरुष उपाधिके संबन्धसे ब्रह्मसे पृथक् हुवा था सो उपाधिके त्यागसे ब्रह्मरूपताको प्राप्त होवै है॥५६६॥

एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम् ॥
ब्रह्मभावं प्रपद्यैषयतिर्नावर्तते पुनः ॥५६७॥

ननु स्वर्गादिप्राप्तिवद्ब्रह्मप्राप्तेरप्यावृत्त्यवसानत्वाद्विदेहमुक्तस्याप्यावृत्तौ न स्वर्गादिवैलक्षण्यमित्यत आह। एवमिति।

एषब्रह्मवित्सन्मात्रत्वं सदात्ममात्रत्वमखण्डितमविनाशिब्रह्मभावं ब्रह्मरूपतामेवमुक्तरीत्या प्रपद्य प्राप्य पुनर्नावर्तते न लिङ्गदेहप्रवेशमनुभवतीत्यर्थः। स्वभिन्नस्वर्गादिप्राप्तेरावृत्त्यवसानत्वेपि स्वात्मप्राप्तेरतथात्वान्न स्वर्गादिप्राप्तितुल्यतेति भावः॥ ५६७॥

एँवम्। विदेहकैवल्यम्। सँन्मात्रत्वम्। अँखण्डितम्॥ ब्रँह्मभावम्। प्रँपद्य। एँषः। यँतिः। नँ। आँवर्तते। पुँनः॥५६७

स्वर्गादिवत् विदेह मोक्षसे पुनःआगमन नहीं होवै है ऐसा निरूपण करे हैं। एवम् इति। यह ज्ञानी पुरुष अविनाशि ब्रह्मरूप सतरूप विदेहमोक्षको उक्त प्रकारसे प्राप्त होकर पश्चात् लिंगदेहमें प्रवेश नहीं करता है स्वर्गादिको अपनेसे भिन्नरूप होनेसे पुनःआवृत्ति होवै है मोक्षको आत्माका स्वरूप होनेसे पुनः आवृत्ति होवै नहीं ॥ ५६७॥

सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ॥
अमुष्य ब्रह्मभूतत्वाद्ब्रह्मणः कुतउद्भवः ॥५६८॥

आवृत्तिहेत्वनिरूपणादप्यस्य नावृत्तिरित्याह। सदात्मैकत्वमिति।

सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ब्रह्मात्माभेदसाक्षात्कारेण प्रध्वस्तान्यविद्यादीनि वर्ष्माणि त्रीण्येव शरीराणि यस्य सतया तस्यामुष्य ब्रह्मविदो ब्रह्मभूतत्वाद्ब्रह्मणो लोकान्तरादिवत्कुतोनिमित्तादुद्भवोन कुतोपीत्यर्थः। यदि ब्रह्मविदोऽविद्यादिशरीरं किञ्चिदवशिष्टं भवेत्तदा कारणशरीरेण प्रलयादिव सूक्ष्मशरीरेण स्वर्गादितइव स्थूलेन ग्रामादिभ्यइवावृत्तिर्भवेद्ब्रह्मबोधेनशरीरत्रयविनाशे त्वशरीरस्य ब्रह्मणइवास्य ब्रह्मीभूतस्यावृत्तिराकस्मिकीनापादयितुं शक्यते केनापीति भावः॥ ५६८॥

सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ॥ अमुष्य । ब्रह्मभूतत्वात् । ब्रह्मणः । कुतः । उद्भवः ॥ ५६८ ॥

आवृत्तिके हेतुके न होनेसे मोक्षको प्राप्त हुवेकी आवृत्ति नहीं होवै है ऐसा निरूपण करे हैं। सदात्मैकत्व इति। जीव ब्रह्मके अभेद साक्षात्कारकरके अविद्यादि तीन शरीर जिसके भस्म हुवे हैं तिसे ब्रह्मज्ञानीको ब्रह्मरूप होनेसे कैसें स्वर्गादिको प्राप्त जनवत् पुनः आवृत्तिहो किसी हेतुसे भी नहीं होसकती॥

मायाक्लृप्तौ बन्धमोक्षौ न स्तः स्वात्मनि वस्तुतः ॥
यथा रज्जौ निष्क्रियायां सर्पाभासविनिर्गमौ ॥५६९॥

ननु ब्रह्मरूपावस्थितेर्भूतपूर्वत्वान्न कश्चिदपूर्वोमोक्षइति बन्धमोक्षकथैवास्थाने स्यादिति चेदेतत्कथायाः कल्पितत्वादोमित्याह मायाक्लृप्ताविति ।

यतोबन्धमोक्षौ मायाक्लृप्तौ माययैवाविद्ययैव क्लृप्तौ समर्थितौ ततः स्वात्मनि ब्रह्मात्मनि परमार्थभूतौ न स्तोन भवतः बन्धपदं दृष्टान्तदर्शकम्। बन्धइव मोक्षोप्यौपनिषदमतेऽवास्तवोबन्धप्रतियोगिकत्वात्तस्येति भावः। एतदाशयेनैव दृष्टान्तमनुरूपमुपादत्ते यथेति। यथा निष्क्रियायां निश्चलायां रज्जौ सर्पाभासविनिर्गमौ सर्पाभासआभासमात्रशरीरः प्रातिभासिकःसर्पस्तस्य विनिर्गमोविनाशश्चेत्येतौ यथा न वास्तवौ किन्तु भ्रान्तपुंदृष्ट्यैव तथा बन्धमोक्षावप्यज्ञदृष्ट्यैवेति भावः । तथाच हरिः "बन्धोमोक्षइति व्याख्यागुणतोमे न वस्तुतः। गुणस्य मायामूलत्वान्न मे मोक्षोन बन्धनम्" इति "न निरोधोन चोत्पत्तिर्न बद्धोन च साधकः। न मुमुक्षुर्न वै मुक्तइत्येषा परमार्थता" इति च श्रुतिरुदाहार्या ॥ ५६९ ॥

मायाक्लृप्तौ । बन्धमोक्षौ । न । स्तः । स्वात्मनि । वस्तुतः ॥ यथा । रज्जौ । निष्क्रियायाम् । सर्पाभासविनिर्गमौ ॥५६९॥

ब्रह्मस्वरूप स्थितिको ज्ञानसे पूर्व भी सिद्ध होनेसें कोई अपूर्व मोक्ष पदार्थ नहीं प्रतीत देता है इसकारण बन्ध मोक्षकथा व्यर्थ प्रतीत होवै है इस शङ्काका समाधान करे हैं।मायाक्लृप्तौ

इति । जिसकारण बन्ध मोक्ष अज्ञानसे सिद्ध होवै है परमार्थरूप आत्मामें बन्ध मोक्ष नहीं हैं अर्थात् जैसे बन्ध अविद्याकल्पित है तैसे ही तिस कल्पितकी निवृत्तिरूप मोक्ष भी अविद्या कल्पित है और जैसे निश्चल रज्जुमें प्रातिभासिक सर्प उदय होना और उसका निर्गमन होना वास्तव नहीं है तैसे ही बन्ध और उसकी निवृत्तिरूप मोक्ष भी वास्तव नहीं है ॥५६९॥

आवृत्तेः सदसत्त्वाभ्यां वक्तव्ये बन्धमोक्षणे॥
नावृत्तिर्ब्रह्मणः काचिदन्याभावादनावृतम् ॥
यद्यस्त्यद्वैतहानिः स्याद्द्वैतं नो सहते श्रुतिः॥

बन्धमोक्षस्वरूपनिरूपणेनैव तयोरवास्तवत्वं सिध्यतीत्याह । आवृत्तेरिति ।

आवृत्तेः शुद्धब्रह्मणः । आवरणस्य सदसत्त्वाभ्यां सत्त्वेनासत्त्वेन च बन्धमोक्षणे वक्तव्ये ब्रह्मणस्तु स्वतःशुद्धस्य स्वयंज्योतिरद्वितीयस्य काचिदप्यावृत्तिर्नास्त्येव यतोऽतोऽन्याभावादन्यस्य वस्तुनोऽभावादनावृतमेव ब्रह्मेति बन्धस्यैवावृत्तिरूपस्यासत्त्वेन तन्निवृत्तिलक्षणोमोक्षोपि दुर्निरूपइत्यर्थः । यदि चोच्यते जगद्भानादावृत्तिर्ब्रह्मण्यनुमीयते स्वयंज्योतिष्यपि सवितरि पेचकानुभवसिद्धावरणवत् स्वप्रकाशेप्यावृत्तेःसम्भावयितुं शक्यत्वात्तदनुरोधेन चावरणहेतुर्द्वितीयामायापि मन्यते तथाच बन्धमोक्षौ सुघटाविति तत्राह यद्यस्तीति । यद्यन्यद्ब्रह्मणोस्ति तदाऽद्वैतहानिः स्यादद्वैतरूपं ब्रह्म न सिद्ध्येत् भवतु द्वैतं किं छिन्नमतआह द्वैतमिति । श्रुतिरेकमेवाद्वितीयम्' इति श्रुतिर्द्वैतं संजातीयं विजातीयं स्वगतं वा न किमपि सहते क्षमते एकावधारणाद्द्वैतोक्त्या सर्वथा द्वैतप्रतिषेधेनाद्वैतात्मस्वरूपसमर्पणाद्द्वैताभ्युपगमे श्रुतिव्याकोपइति भावः ॥५७०॥

आवृत्तेः । सदसत्त्वाभ्याम् । वक्तव्ये । बन्धमोक्षणे ॥ न । आवृत्तिः । ब्रह्मणः । काचित् । अन्याभावात् । अनावृतम् ॥ यदि । अस्ति । अद्वैतहानिः । स्याद् । द्वैतम् । नो । सहते । श्रुतिः ॥ ५७० ॥

बन्ध मोक्षका स्वरूप निरूपण करनेसे भी बन्ध मोक्ष वास्तव नहीं सिद्ध होवै है ऐसा निरूपण करे हैं । आवृत्तेः इति । शुद्ध ब्रह्मस्वरूपके आवरणके होने न होनेसे बन्ध मोक्ष कहने बनसकते हैं और शुद्ध ब्रह्मसे अन्य वस्तुका अभाव होनेसे स्वतःशुद्ध स्वयंप्रकाशरूप अद्वितीय ब्रह्मका कोई आवरण है नहीं इसकारण आवरणरूप बन्धका ही निरूपण न होनेसे उसकी निवृत्तिरूप मोक्ष भी निरूपण नहीं होसकता जो कभी ब्रह्मसे अन्यहो तब अद्वैतरूप ब्रह्मकी सिद्धि नहीं होवेगी और ब्रह्म एक है, अद्वैत है, ऐसा कहनेवाली श्रुति द्वैत को नहीं सहारे है । सजातीय विजातीय स्वगतभेदसे रहित ब्रह्मको श्रुति प्रतिपादन करे है ॥ ५७० ॥

बन्धं च मोक्षञ्च मृषैव मूढा-
बुद्धेर्गुणं वस्तुनि कल्पयन्ति ॥
दृगावृतिं मेघकृतां यथा रवौ,
यतोऽद्वयाऽसङ्गचिदेतदक्षरम् ॥ ५७१ ॥

सिद्धमर्थं सदृष्टान्तं निरूपयति। वन्धं चेति ।

मूढाअविवेकिनोबुद्धेर्मायाकार्यायागुणं वन्धं मोक्षञ्च वस्तुन्यात्मनि मायाविलक्षणे मृषैव कल्पनयैव कल्पयन्ति मन्यन्ते यथा मेघकृतां दृगावृतिं चक्षुरावरणं रवौ स्वयंज्योतिषि कल्पयन्ति कुतोयत एतदक्षरं ब्रह्माद्वयासंगचित् निर्द्वैतसम्बन्धशून्यचैतन्यात्मकं नात्राणुमात्रमपि बन्धादिकं सम्भाव्यं केनापितत्स्वरूपविदेति भावः ५७१

बन्धम् । च । मोक्षम् । च । मृषा । एव । मूढाः । बुद्धेः । गुणम् । वस्तुनि । कल्पयन्ति ॥ दृगावृतिम् । मेघकृताम् । यथा । रवौ । यतः । अद्वयासङ्गचित् । एतत् । अक्षरम् ॥ ५७१ ॥

जैसे अविवेकी पुरुष मेघकृत नेत्रोंके आवरणको स्वयं

प्रकाश सूर्यमें कल्पते हैं तैसेही मूर्खजन मायाकार्य बुद्धिके बँन्ध मोक्ष गुणको माया विलक्षण आत्मामें मिथ्या कल्पते हैं जिसं कारण यह अविनाशि ब्रह्म अद्वैत असंग चेतनरूप है इस कारण बन्धमोक्ष उसमें असंभव हैं ॥ ५७१ ॥

अस्तीति प्रत्ययोयश्च यश्च नास्तीति वस्तुनि॥
बुद्धेरेव गुणावेतौ नतु नित्यस्य वस्तुनः॥५७२॥

नन्वेवं कथं बोधात्प्रागासीद्बन्धः सच बोधे उदिते निवृत्तइति लोकप्रसिद्धिरतआह। अस्तीति।

वस्तुनि ब्रह्मात्मनि बन्धोऽस्तीति प्रत्ययः प्रतीतिर्यश्च तस्मिन्ना-स्तीति प्रत्ययोलोके प्रसिद्धस्तावेतौ बुद्धेरेव गुणौ परिणामौ नान्य-स्यापरिणामिनोवस्तुनोब्रह्मणस्तु न सम्भवतः लोकप्रसिद्धिर्बुद्ध्यनु-रोधिनीति भावः ॥ ५७२ ॥

अस्ति। इति। प्रत्ययः। यः। च। यः। च। न। अस्ति। इति। वस्तुनि॥ बुद्धेः। एव। गुणौ। एतौ। न। तु। नित्य-स्य। वस्तुनः॥ ५७२ ॥

ज्ञानसे प्रथम बन्ध था,ज्ञानसे उत्तर बन्ध निवृत्त होता है ऐसे लोकप्रसिद्धिका क्या तात्पर्य है। इस शङ्काका समाधान करे हैं। अस्ति इति।ज्ञानसे पूर्व ब्रह्ममें जो बन्ध है यह प्रतीति जो है और ज्ञानसे उत्तर बन्ध नहीं है यह जोप्रतीतिसो यह दोनोंबोधं बुद्धिके परिणाम हैं और अपरिणामि वस्तु ब्रह्मके यह धर्म नहीं संभव होसकते इसकारण लोकप्रसिद्धि बुद्धिको लेकर बन सके है ॥ ५७२ ॥

अतस्तौ माययाक्लृप्तौ बन्धमोक्षौ नचात्मनि॥
निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने ॥
अद्वितीये परे तत्त्वे व्योमवत्कल्पना कुतः॥५७३॥

यतउक्तयुक्तिभिर्बन्धादिकल्पनाऽप्रामाणिक्यतस्ततो बन्धमोक्षौ मायया क्लृप्तौ प्रसिद्धौ नचात्मनि बन्धमोक्षकल्पनापवादायात्मस्वरूपं बहुकृत्वउपदिष्टमपि स्मारयति निष्कलइति। निष्कले निष्क्रिये शान्ते निरवद्ये निर्दोषे निरञ्जनेऽविद्यानावृतेऽद्वितीये परे उत्कृष्टे तत्त्वे वस्तुभूते व्योमवद्वर्त्तमाने आत्मनि कुतः कल्पना न कुतोपि निमित्तादित्यर्थः। यथाहि रज्जुपाशादिभिर्व्योमबद्धं न भवति तस्यासङ्गत्वादेवमात्मनोप्यसंगत्वान्न बुद्ध्यादिबन्धप्रसक्तिरिति भावः ॥

अतः । तौ । मायया । क्लृप्तौ । बन्धमोक्षौ । न । च । आत्मनि ॥ निष्कले । निष्क्रिये । शान्ते । निरवद्ये निरञ्जने ॥ अद्वितीये । परे । तत्त्वे । व्योमवत् । कल्पना । कुतः ॥५७३॥

इस कारण पूर्वोक्त बन्ध मोक्ष मायाकरके प्रसिद्ध हैं और निरवयव क्रियारहित रागद्वेषशून्य निर्दोष निरंजन अद्वितीय परमात्मारूप यथार्थ आत्मामें बन्धमोक्षकी कल्पना आकाशवत् कहांसे बने कहींसे नहीं बन सकती है ॥५७३॥

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ॥
न मुमुक्षुर्न वै मुक्तइत्येषा परमार्थता ॥५७४॥

नन्वेवंचेत्तर्हि बन्धनिवृत्तिबोधकानामुपदर्शितवचसामौपनिषदानां कागतिरितिचेदवतमसे कल्पितपिशाचतोविभीतबालं प्रतिविशेषदर्शिदर्शितदीपइव स्वाज्ञानकल्पितबन्धतोभीतं स्वशरणं नीतं जिज्ञासुमव्युत्पन्नमतिं प्रति मोक्षशास्त्रं सार्थकमतएवाविद्यकं सर्वं कल्पितमित्यभिसंधाय किं परमार्थतत्त्वमिति जिज्ञासमानं प्रति श्रुतिर्बन्धादिकं सर्वं कल्पितमिति पुनरभिदधाति परमार्थस्वरूपविज्ञप्तये न निरोधइति ।

कस्यापि पदार्थस्य नोत्पत्तिरस्ति बीजस्यैवासत्त्वादतएव च न निरोधो न नाशः आत्मनः स्वयंज्योतिष्ट्वाद्बन्धोपि न तदभावादेव साधकोबन्धनिवृत्त्युपाये यत्नशीलो जिज्ञासुरपि न ततएव च बन्धनिवृत्तिरूपमोक्षाभावेन मोक्षमिच्छुर्मुमुक्षुरपि नास्ति ततएव च न वै नैव मुक्तःकोपि भवति किन्त्वात्मैव केवलमद्वयइत्येषामतिः परमार्थता गुह्यार्थतेत्यर्थः ॥ ५७४ ॥

न । निरोधः । न । च । उत्पत्तिः । न । बद्धः । न । च । साधकः॥न । मुमुक्षुः।न । वै । मुक्तः । इति । एषा । परमार्थता॥

बन्ध मोक्ष कल्पित मानोगे तौ बन्धकी निवृत्ति और मोक्ष की प्राप्तिका बोधक वेदवाक्य निरर्थक होजावेंगे । इस शङ्का का समाधान करे हैं । न इति । किसी पदार्थकी उत्पत्ति नहीं है बीजका ही अभाव होनेसे इसी कारण नाशभी किसी पदार्थ का नहीं हैं आत्माको स्वप्रकाश होनेसे अविद्यारूप बन्धभी नहीं है इसी कारण बन्धनिवृत्तिके उपायमें यत्न करने वाला जिज्ञासु भी नहीं है इसी कारण मोक्षकी इच्छा करने वाला भी नहीं है इसी कारण कोई मुक्त भी नहीं बनसकता किन्तु आत्माही केवल अद्वैतरूप है यह गुह्य अर्थ है । और जैसे पिशाचकल्पना अंधकारमें करके बालक भयभीत होता है उसके भयनिवृत्तिके लिये दीपक दिखाके पिशाचके अभावको यथार्थवक्ता पुरुष उसका भय दूर करे है तैसेही अज्ञानिकल्पित पिशाचरूप बन्धकी निवृत्तिके लिये ज्ञानदीपकके प्रकाशार्थ वेदकी प्रवृत्ति है इस कारण वेदकी प्रवृत्ति व्यर्थ नहीं है५७४

सकलनिगमचूडास्वान्तसिद्धान्तरूपं,
परमिदमतिगुह्यं दर्शितं ते मयाद्य ॥
अपगतकलिदोषं कामनिर्मुक्तबुद्धिं ,
स्वसुतवदसकृत्त्वां भावयित्वा मुमुक्षुम्५७५

उक्तमुपदेशं सप्रमाणयन्नुपसंहरति । सकलेति ।

भोःशिष्य अपगतकलिदोषं निरस्तदम्भलोभादिकलियुगदोषं कामनिर्मुक्तबुद्धिं निष्कामचेतसं मुमुक्षुं मोक्षमाकाङ्क्षन्तं त्वां सुतवत्पुत्रमिव'नापुत्राये'ति श्रुतेः भावयित्वा मत्वा मया सकलनिगमचूडास्वान्तसिद्धान्तरूपं सकलानां निगमचूडानां वेदान्तानां स्वान्त-

सिद्धान्तोऽद्वादसिद्धान्तस्तस्य रूपमिव रूपं यस्य तत्सर्वोपनिषत्तात्पर्यगोचरासिद्धान्तात्मकामित्यर्थः।परमुत्कृष्टमुपमानाद्यनास्पृष्टमति-गुह्यमल्पमतीनां यत्नतोप्यलभ्यं रहस्यमित्यर्थः। इदमात्मानात्मविवेकप्रकरणमतएव विवेकचूडामणीति प्रख्यन्ते तुभ्यमत्यासक्तृद्दर्शित-मनेकवारमुपदिष्टामित्यत्यादरणीयामिदं न साधारणोपदेशवदुपेक्ष्यमिति भावः ॥ ५७५ ॥

सकलनिगमचूडास्वान्तसिद्धान्तरूपम् । परम् । इदम् । अतिगुह्यम् । दर्शितम् । ते । मया । अद्य ॥ अपगतकलिदोषम् । कामनिर्मुक्तबुद्धिम् । स्वसुतवद् । असकृत् । त्वाम् । भावयित्वा । मुमुक्षुम् ॥ ५७५ ॥

पूर्वोक्त ग्रन्थके उपसंहारको सूचन करे हैं । सकल इति । हे शिष्य ! कलियुगके दोषसे रहित निष्कामाचित्त मोक्षकी इच्छावाले तुमको अपने पुत्रके वत् मानके मैंने सर्ववेदान्त का तात्पर्य विषय सिद्धान्त सर्वसे उत्कृष्ट अल्पबुद्धिवालों को यत्नसे भी जो प्राप्त नहीं होता अतिगुप्त है ऐसा आत्मा अनात्माका विवेकप्रकरण इसीकारण विवेकचूडामणि नाम वाला यह ग्रन्थ तुमको अब मैंने अनेकवार उपदेश किया है इसकारण यह अतिआदर योग्य है ॥ ५७५ ॥

इति श्रुत्वा गुरोर्वाक्यं प्रश्रयेण कृतानतिः ॥
सतेन समनुज्ञातोययौ निर्मुक्तबन्धनः ॥ ५७६ ॥

उपदेशग्रहणफलमाह। इतिश्रुत्वेति ।

इति पूर्वाभिहितं गुरोर्वाक्यं वाक्यवृन्दं श्रुत्वा सशिष्यः प्रश्रयेण प्रेम्णा कृतानतिः कृतप्रणामः संस्तेन गुरुणा समनुज्ञातोलब्धानुज्ञो-निर्मुक्तबन्धनोजीवन्मुक्तः सन् ययौ स्वच्छन्दं यथारब्धं यंकञ्चिदपि देशं जगामेत्यर्थः ॥ ५७६ ॥

इति । श्रुत्वा । गुरोः । वाक्यम् । प्रश्रयेण । कृतानतिः ॥ सः । तेन । समनुज्ञातः । ययौ । निर्मुक्तबन्धनः ॥ ५७६ ॥

उपदेशग्रहणका फल कहते हैं। इति इति। ऐसे पूर्वोक्त गुरुके वाक्यसमूहको श्रवणकरके सो शिष्य प्रेमकरके प्रणाम करता-भया और गुरुदेवजीकी आज्ञाको प्राप्त हो जीवन्मुक्त होकर अपनी प्रारब्धके अनुसार जिस किसी देशको जाता भया ॥

गुरुरेव सदानन्दसिन्धौ निर्मग्नमानसः ॥
पावयन्वसुधां सर्वां विचचार निरन्तरः ॥ ५७७ ॥

गुरोरपि तथा स्वच्छन्दगतिमाह। गुरुरेवेति।

सदानन्दसिन्धौ ब्रह्मानन्दमहाम्भोधौ निर्मग्नमानसोनिश्चिन्त-मग्नचित्तोनिरन्तरोनिर्भेदभानः सर्वां वसुधां धरित्रीं पावयन्नेव वसु-धावर्तिजनानां स्वदर्शनस्पर्शनादिभिर्हार्दान्धतमसं निवारयन्नेव चचार स्वच्छन्दमेव निजगामेत्यर्थः ॥ ५७७ ॥

गुरुः । एव । सदानन्दसिन्धौ । निर्मग्नमानसः॥ पावयन्। वसुधाम् । सर्वाम् । विचचार । निरन्तरः ॥ ५७७ ॥

गुरुदेवजीका यथेष्ट गमन कहे हैं। गुरुः इति। ब्रह्मानन्द-रूप समुद्रमें जिसका मन मग्न हुवा है और जिसको भेदका ज्ञान नष्ट होगया है, सर्व पृथिवीको पवित्र करता हुवा अर्थात् सर्व पृथिवीमें निवास करनेवाले जनोंको दर्शनादि द्वारा कृतार्थ करता हुवा, गुरुभी अपनी इच्छानुसार गमन करता भया॥

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ॥
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥ ५७८ ॥

नेमौ कौचिद्गुरुशिष्यावाधुनिकाविति मन्तव्यं किन्तु केनोप-निषदि 'केनेषितं पतति प्रेषितं मनः' इत्यादिना अन्यनानादि-सिद्धगुरुशिष्यसंवादवदयमपि संवाद आत्मलक्षणनिरूपणार्थइत्याह। इत्याचार्यस्येति।

मुमुक्षूणां सुखबोधोपपत्तये आचार्यस्य देशिकस्य शिष्यस्य

च कस्यचिद्बुद्धिस्थस्यैव संवादेन प्रश्नोत्तरप्रवाहेणात्मलक्षणं निरूपितमिति समाप्तमित्यर्थः ॥ ५७८ ॥

इति । आचार्यस्य । शिष्यस्य । संवादेन । आत्मलक्षणम् ॥ निरूपितम् । मुमुक्षूणाम् । सुखबोधोपपत्तये ॥ ५७८ ॥

यह गुरु शिष्य आधुनिक नहीं हैं किन्तु केन उपनिषद्में कथन किये गुरु शिष्यवत् अनादि सिद्ध हैं ऐसा कहे हैं। इतिइति। मुमुक्षु पुरुषोंके सुखपूर्वक ज्ञानउदयके लिये गुरु और शिष्य जो हमारी बुद्धिमें स्थित हैं उनके संवादकरके ऐसा आत्माका लक्षण निरूपण किया है ॥ ५७८ ॥

हितमिदमुपदेशमाद्रियन्तां,
विहितनिरस्तसमस्तचित्तदोषाः ॥
भवसुखविरताः प्रशान्तचित्ताः,
श्रुतिरसिकायतयोमुमुक्षवोये ॥ ५७९ ॥

ग्रन्थग्रहणादरणाधिकारिस्वरूपमाह । हितमिदमिति । ये विहितनिरस्तसमस्तचित्तदोषाः विहितैर्बाह्यान्तरङ्गसाधनैर्यज्ञशमादिभिर्निरस्ता अपास्ता निखिला बोधप्रतिबन्धकाश्चित्तदोषा-मलविक्षेपादयोयेषां ते तथा तथाभवसुखविरतावैषयिकसुखास्वाद-विमुखाः प्रशान्तचित्तानिस्तरङ्गमहोदधिकल्पाचलचित्ताः श्रुतिरसिकाः वेदान्तामृतपानतत्परकर्णपुटसंसृष्टचित्तमुखास्तेऽधिकारिण-इदं हितं मोक्षाभिव्यञ्जकमुपदेशमात्मानात्मविवेकबोधप्रकरणमा-द्रियन्तामतिप्रेम्णोपाददतामित्यर्थः ॥ ५७९ ॥

हितम् । इमम् । उपदेशम् । आद्रियन्ताम् । विहितनिरस्त-समस्तचित्तदोषाः ॥ भवसुखविरताः । प्रशान्तचित्ताः । श्रुति-रसिकाः । यतयः । मुमुक्षवः । ये ॥ ५७९ ॥

ग्रन्थके आदरके अधिकारीका वर्णन करे हैं । हितम् इति । जो पुरुष वेदोक्त यज्ञादि और शमादि साधनोंकरके

ज्ञानप्रतिबन्धक दोषसे रहित हैं और विषयजन्य सुखकी इच्छासे भी रहित हैं, तरङ्गशून्य अचल सागरवत् निश्चल जिनका चित्त है, वेदान्त—अमृतके पानका रस जिनको ज्ञात है सो अधिकारी इस मोक्षके प्रापक आत्मा अनात्माके बोधक प्रकरणको अतिप्रेमसे आदर करें, यह उत्तम पदार्थ है॥५७९॥

संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकांक्षया मरुभुवि भ्रान्त्या परिभ्राम्यताम्
अत्यासन्नसुधाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-
त्येषा शङ्करभारती विजयते निर्वाणसंदायिनी॥५८०॥

इति श्रीमच्छङ्कराचार्यविरचितोविवेकचूडामणिनामा निबन्धस्समाप्तः॥

रचितप्रकरणस्य परोपकारमात्रप्रयोजनत्वेनोत्कर्षमाह। संसाराध्वनीति।

एषा पुरस्तादुपदर्शिता शङ्करभारती शङ्करस्वामिनोमम शङ्करावतारस्य भारतीगीर्निर्वाणसंदायिनी कल्याणकरी संसाराध्वनि जगन्मार्गे तापभानुकिरणप्रोद्भूतदाहव्यथाखिन्नानां त्रिविधदुःखान्येव तापास्तएवभानुकिरणाः प्रचण्डरश्मयस्तैरुत्पादिता या दाहव्यथा तया खिन्नानां खेदभराक्रान्तचेतसां जलकाङ्क्षया जलाभिलाषेण भ्रान्त्या भ्रमेण मरुभुवि संसारलक्षणायां मरुदेशीयभूमिनिभायां नानायोनिसन्ततौ भ्राम्यतां शान्तिलेशार्थम्मुहुः परिघूर्णतां जनानामत्यासन्नसुधाम्बुधिमत्यासन्नमतिसन्निहितं स्वाभिन्नमेव सुधाम्बुधिममृतपयोधिं सुखकरं सर्वतापोपशमनकरमद्वयं ब्रह्मदर्शयन्ती बोधयन्ती विजयते सर्वोत्कर्षेण वर्ततइत्यर्थः॥५८०॥

निःसामान्यविशेषमिन्द्रियमनःप्राणावरोधोज्झितं,
जाग्रत्स्वप्नसुषुप्तिभिर्व्यवसितं धामानिशं ध्यायिभिः॥
स्वात्मत्वेन सनातनं श्रुतिशिरस्तात्पर्यविश्रामभूः,
सान्द्रानन्दमनञ्जनं विजयते सत्यं तदेकं स्वयम्॥१॥
पूर्वाचार्यवरीयसोभगवतः श्रीशङ्करस्वामिनः,
सूक्तेः सत्समया मया विरचिता व्याख्या प्रभाख्या प्रभा॥

मैत्रीचार्यनिवेदिका स्वविषयध्वान्तादिनिर्भेदिका,
निर्मात्सर्यनितान्तशान्तमनसां नित्यं पुरस्तादियम् ॥ २ ॥
येनैवाद्भुतगीतायां मीमांसायां निराकृतेः ॥
ब्रह्माण्डोपनिषत्सूक्तौ भाष्यं भाषितमद्भुतम् ॥ ३ ॥
सोऽभ्यर्थितोऽत्यन्तमुदासितापि,सद्भिः सदानन्दकवीन्द्रमुख्यैः॥
व्याख्या विधेयेत्यभिशस्तिरेषांमाभूदपार्थेत्यतनोत्प्रभां ताम् ॥४॥

इति श्रीमदुदासीनपरमहंसावतंसगौरदेवशिष्यविद्यादिवाकरभारतभूषण-महामहोपाध्यायकेशवानन्दस्वामिविरचिता विवेकचूडामणेः-प्रभाख्याव्याख्या समाप्ता ॥

संसाराध्वनि । तापभानुकिरणप्रोद्भूतदाहव्यथाखिन्नानाम् । जलकाङ्क्षया । मरुभुवि । भ्रान्त्या । परिभ्राम्यताम् ॥ अत्यासन्नसुधाम्बुधिम् । सुखकरम् । ब्रह्म । अद्वयम् । दर्शयति । एषा । शङ्करभारती । विजयते । निर्वाणसंदायिनी ॥ ५८० ॥

इस ग्रन्थका उपकारमात्र प्रयोजन दिखावै हैं। संसाराध्वनि इति । यह जो पूर्व दिखाई है शंकराचार्य स्वामीकी वाणी कल्याण करने वाली है और संसारमार्गमें तीन प्रकारके दुःखरूप—सूर्यकिरणोंसे उत्पन्न हुई जो दाहरूप पीडा उसकरके खेदको प्राप्त हुवे जैसे जलकी इच्छासे भ्रमकरके संसाररूप मरुपृथिवीरूप नाना योनियोंमें शान्तिके लाभार्थ भ्रमसे वारंवार जो भ्रमण करते हैं और अंतिसमीप अमृत—समुद्रवत् सर्व सुखकरनेहारा, सर्व तापका नाशक, अद्वैत ब्रह्मको दिखानेवाली यह वाणी सर्वसे उत्कृष्ट है ॥ ५८० ॥

इति श्रीनारायणमुनिविरचिता भाषाभावार्थदीपिका समाप्तिमगमत् ॥

१ विद्यादिवाकरभारतभूषणमहामहोपाध्यायश्री १०८ पण्डितकेशवानन्दस्वामीतिप्रसिद्धः केशवाचार्यः ।

विवेकचूडामणेः शुद्धिपत्रम्

अशुद्धम्	पृ०	पं०	शुद्धम्
परमानन्दः	५	१६	परमआनन्दः
प्रमाण्य	७	२७	प्रामाण्य
निष्ठं	८	१७	निष्ठं
विस्तरात्मा	१०	१४	विस्तरामात्मा
त्रयमै	१२	५	त्रयमे
कोन्वस्ति	१३	१३	कोन्योस्ति
विज्ञान	१४	२	विज्ञाना
रा	१५	२८	रायल्पं
भङ्क्त्वा	२१	१६	भुङ्क्त्वा
स्तत्य	२४	७	सत्त्व
नेतर	२५	३	नेतरः
तुद्वयं	२७	१८	द्वयंतु
सविक्षेपेण	३०	७	सविशेषण
तदन्तरम्	३२	२५	तदनन्तरम्
च्छिन्दन्ति	३३	२०	छिन्दन्ति
यस्त्व	३४	१७	क्य
मुपाद	३४	१७	मुपादद
बन्धनस्य	४३	१७	बन्धस्य
सच	४३	१८	साच
त्वैवा	४३	१९	स्त्विर्वा
देहान्तरस्य	४३	२७	देहान्तस्य
गच्छत्	४५	१६	गच्छेत्समितपाणिः
भिर्वं	४९	१४	भिव
सतस्मै	५४	३	तस्मैस
सुजनवृन्दं	६२	७	सुजनवृन्दंपावितं
नन्यतन	६३	१०	नन्ययतन
तुरीयां	६८	२७	तुरीयं
विज्ञातेपि	७०	१३	विज्ञातेपीति
हाला	७१	१५	हला
राविर्भवं	७६	९	राविर्भावं
निहितं	७६	१७	निहितम
लक्षणास्तीक्ष्ण	८८	२५	लक्षणातीक्ष्ण
सुमार्गे	९१	२२	सुमार्गो
प्रासाध्यासन	९५	१३	प्रासाध्यासन्
स्थूलपदार्था	९७	२३	स्थूलार्था
मसे	९९	१९	मते
बाह्ये	१०५	२२	बाह्य
आग्न	१०५	२६	आम्र
तज्ज्ञा	१०९	२६	तज्ज्ञाः
मायेतः	११३	१८	मोयतः
क्षीणः	१२३	५	क्षीणः

अशुद्धम्	पृ०	प०	शुद्धम्
यतेऽति	१५८	२३	यतेऽस्ति
चेत्तत्राह	१७५	१२	चेत्तत्राह
स्वम	१७६	२१	स्वप्न
लभते	२०३	६	लभेते
च	२१४	८	चं
सूनुः	२१६	१८	सूनु
व्यप्यो	२१७	१	व्याप्यो
निरूपयतुं	२१७	५	निरूपयितुं
एव	२१७	२४	राव
भावोऽसिद्ध	२१९	२१	भावाधिद्धि
वैष्टव्यं	२२०	१८	वैष्टव्यं
प्रत्याप्यते	२३१	३–४–५	प्रत्याय्यते
स्ताव	२५१	११	स्तत्त्व
मित्त	२५३	१३	निमित्त
देश्य	२६८	२४	द्वेश्य
ज्वरादि	२७२	१४	ज्वरादि
कस्व	२८८	१७	कस्य
सा	२९४	६	छो
प्यापि	२९५	४	यद्यपि
बहुकृत्या	२९५	२३	बहुकृत्वो
घटा	२९९	१७	घट
दुष्कम्	३००	१२	दुष्कत्या
माप	३०४	४	मापय
पुन्सः	३०८	७	पुंसा
सत्स्वरूपं	३०९	११	सन्स्वरूपं
शत्र	३१६	१०	शत्रु
संकल्पो	३३५	२६	संकल्पा
हंसश्चञ्चु	३४९	२३	हंसचञ्चु
निर्विकल्पक	३६८	१७	निर्विकल्प
परिग्रहीचिन्ता	३७०	१२	चिन्ता
घस्ताद	३८९	१७	घस्तादा
त्वहमह	३९१	१७	त्वमह
द्रोस्तु	३९३	७	द्रोस्तु
प्रजल्प	३९७	१७	प्रजल्प
बन्धतं	४०६	७	बन्धितं
जेहाति	४१०	१	जहाति
रक्षाह	४१५	११	रक्षान
साक्षात्कार	४२१	६	साक्षात्कारो
प्रपेयं	४४३	२३	प्रमयं
बन्ध	४४९	२०	बन्धसंबन्ध
ऽस्त	४४९	२३	ऽस्तं
मेवा	४४९	२६	मेव
सन्मुखं	४५२	१९	संमुखं
भासाने	४५६	२	भासोन
एव देव	४७९	८	एतदेव
कामते	४८४	७	क्रमते